अथचरकसंहितायांसूत्रस्थानतृतीयप्रारंभः॥ १

चर. सू. ॐ नमः श्रीमहागणपतयेनमोधन्वंतरयेनमः॥ ॥अर्वाचीनंपरमधिवसन्योगग्रामयुक्तंवामांगार्धेप्रविश्यच
नयोपर्णयाबद्धकेलिः यश्चाभेयोंतिगतकरणःकेवलज्ञानमूर्तिःसोयंशांतंपदमधिगतः पातुवःशूलपाणिः
१ अथातोदीर्घंजीवितीयमध्यायंव्याख्यास्यामः इतिहस्माहभगवानात्रेयः दीर्घंजीवितमन्विछनभरद्वाज
१ उपागमत इंद्रमुग्रतपाबुध्वाशरण्यममरेश्वरं २ ब्रह्मणाहियथाप्रोक्तआयुर्वेदंप्रजापतिः जग्राहनिखिले
नादाश्विनौतुपुनस्ततः २ अश्विभ्यांभगवान्शक्रःप्रतिपेदेहकेवलं ऋषिप्रोक्तोभरद्वाजस्तस्माछक्रमु
पागमत ३ विघ्नीभूतायदारोगाःप्रादुर्भूताःशरीरिणां उपवासतपःपाध्ययनब्रह्मचर्यव्रतायुषां ४ तदाभूते
ष्वनुक्रोशंपुरस्कृत्यमहर्षयः समेताःपुण्यकर्माणःपार्श्वेहिमवतःशुभे ५ अंगिराजमदग्निश्चवसिष्ठःका
श्यपोभृगुः आत्रेयोगौतमःसांख्यःपुलस्त्योनारदोऽसितः ६ अगस्त्योवामदेवश्चमार्कंडेयाश्वलाय
नौ पारिक्षिर्भिक्षुरात्रेयोभरद्वाजःकपिष्ठलः ७ विश्वामित्राश्मरथ्यौचभार्गवश्च्यवनोभिजित गार्ग्यः
शांडिल्यकौडिन्यौवार्क्षिर्देवलगालवौ ८ सांकृत्योवैजवापिश्चकुशिकोबादरायणः कर्कराक्षोहिरण्या
क्षोलोकाक्षिःपैंगिरेवच ९ कात्यायनकैकशेयोधौम्योमारीचकश्यपः शिराःशरलोमाचकाप्यका
ःयायनावुभौ १० शौनकःशाकुनेयश्चमैत्रेयोमैमतायनिः वैखानसावालखिल्यास्तथाचान्येमह
र्षयः ११ ब्रह्मज्ञानस्यनिधयोदमस्यनियमस्यच तपसस्तेजसादीप्ताहूयमानाइवाग्नयः १२ सुखोपवि
ष्टास्तेतत्रपुण्यांचक्रुःकथामिमां धर्मार्थकाममोक्षाणांमारोग्यंमूलमुत्तमं रोगास्तस्यापहर्तारःश्रेयसो
जीवितस्यच प्रादुर्भूतामनुष्याणामंतरायोमहानयं १४ कस्यात्तेषांशमोपायइत्युक्त्वाध्यानमास्थिताः
अथातेशरणंशक्रंददृशुर्ध्यानचक्षुषा १५ प्रहमर्थेनियुज्येयंतत्रेतिप्रथमंवचः सवक्ष्यतिसमोपायंय १
थावदमरप्रभुः कःसहस्राक्षभवनंगच्छेत्प्रष्टुंशचीपतिं १६ अहमर्थेनियुज्येयंतत्रेतिप्रथमंवचः भरद्वा
जोब्रवीत्तस्मादृषिभिःसनियोजितः १७ सशक्रभवनंगत्वासुरर्षिगणमध्यगं ददर्शबलहंतारंदीप्य

मानमिवानलं १८ विनयेनागमत्त्रेनंप्रष्टुकामोमहायशाः दृष्ट्वैवचमुनिंप्राहभगवान्पाकशासनः स्वागतं
तेतिधर्मज्ञमुनिंतस्मात्प्रथेप्सितं अर्चितश्चयथान्यायंउपविष्टमुपागतः २० शांत्युपायंविकाराणांप्रे
पछहरिवाहनं सोभिगम्यजयाशीर्भिरभिवाद्यसुरेश्वरं प्रोवाचविनयाद्धीमानृषीणांवाक्यसंहितां
व्याधयोहिसमुत्पन्नाःसर्वप्राणिभयंकराः २२ प्रब्रूहिनःशमोपायंतेषाममरसत्तमं तस्मैसोवाचभग
वानआयुर्वेदंशतक्रतुः पदैरल्पैर्मतिंबुध्वाविपुलांपरमर्षये हेतुलिंगौषधज्ञानंस्वस्थातुरपरायणं २४
त्रिसूत्रंशाश्वतंपुण्यंबुबुधेयंपितामहः सोनंतपारंत्रिस्कंधमायुर्वेदंमहामतिः २५ यथावदचिरात्सर्वं
बुबुधेतन्मनामुनिः श्लोकःसूत्रपदन्यासछंदोरलस्वरक्रमः ऋषिभ्योनाधिकंतच्चशशंसानवशेषयन
ऋषयश्चभरद्वाजज्जगृहुस्तंप्रजाहितं २७ दीर्घमायुश्चिकीर्षंतोवेदंवर्धनमायुषः तेनर्षयस्तेददृशुर्य
थावज्ज्ञानचक्षुषा सामान्यंचविशेषंचगुणान्द्रव्याणिकर्मच समवायंचतज्ज्ञात्वातंत्रोक्तंविधिमास्थि
तं २९ लेभिरेपरमंशर्मजीवितंचाप्यनित्वरं अथमैत्रीपरःपुण्यमायुर्वेदंपुनर्वसुः २८ शिष्येभ्यो
दत्तवान्षड्भ्यःसर्वभूतानुकंपया अग्निवेशश्चभेडश्चजातूकर्णःपराशरः हारीतःक्षारपाणिश्चजगृहु
स्तन्मुनेर्वचः बुद्धेर्विशेषस्तत्रासान्नोपदेशांतरंमुने ३० तंत्रस्यकर्ताप्रथममग्निवेशोयततोभवत् अ
थभेडादयश्चक्रुःस्वंस्वंतंत्रंकृतानिच श्रावयामासुरात्रेयंसर्षिसंघं — सः श्रुत्वासूत्रेणमर्थानामृ
षयःपुण्यकर्मणां ३२ यथावत्सूत्रितमितिप्रहृष्टास्तेनुमेनिरे सर्वएवस्तुवंतश्चसर्वभूतहितैषिणः
साधुभूतेष्वनुक्रोशइत्युच्चैर्वबुवन्समं तंपुण्यंशुश्रुवुःशब्दंदिविदेवर्षयःस्थितं ३४ सामराःपरमर्षी
णांश्रुत्वामुमुदिरेपरं अहोसाध्वितिघोषश्चलोकांस्त्रीनन्वनादयत नभसिस्निग्धगंभीरोहर्षाद्भूतैः
रुदीरितः शिवोवायुर्ववौसर्वाभाभिरुन्मीलितादिशः ३६ निपेतुःसजलाश्चैवदिव्याःकुसुमवृष्टयः
अथाग्निवेशप्रमुखान्विविशुर्ज्ञानदेवताः ३७ बुद्धिःसिद्धिःस्मृतिर्मेधाधृतिःकीर्तिःक्षमादया
तानिवानुमतान्येषांतंत्राणिपरमर्षिभिः ३८ भावायभूतसंघानांप्रतिष्ठांभुविलेभिरे हिताहि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चर॰ सू॰ तं सुखंदुःखमायुस्तस्य हिताहितं ३९ मानंच तच्च यत्रोक्तमायुर्वेदः स उच्यते शरीरेंद्रियसत्वात्मसंयोगो धारि
जीवितं नित्यगश्चानुबंधश्च पर्यायैरायुरुच्यते तस्यायुषः पुण्यतमो वेदो वेदविदां मत ४१ वक्ष्यते
यो मनुष्याणां लोकयोरुभयोर्हितः सर्वदा सर्वभावानां सामान्यं वृद्धिकारणं ह्रासहेतुर्विशेषश्च प्रवृत्ति
२. रुभयस्य तु सामान्यमेकत्वकरं विशेषश्च पृथक्त्वकृत् ४३ तुल्यार्थता हि सामान्यं विशेषश्च विपर्य
यः सत्वमात्मा शरीरं च त्रयमेतत्त्रिदंडवत् ४४ लोकस्तिष्ठति संयोगात्तत्र सर्वं प्रतिष्ठितं स पुमांश्चे
तनं तच्च तच्चाधिकरणं स्मृतं वेदस्यास्य तदर्थं हि वेदोयं संप्रकाशितं । खादीन्यात्मा मनः कालो दिशश्च द्रव्यसंग्र
हः ४६ सेंद्रियं चेतनं द्रव्यं निरिंद्रियमचेतनं सार्था गुर्वादयो बुद्धिः प्रयत्नांताः परादयः गुणाः प्रोक्ताः प्रयत्ना
दि कर्म चेष्टितमुच्यते समवायोऽपृथग्भावो भूम्यादीनां गुणैर्मतः ४८ स नित्यो यत्र हि द्रव्यं न तत्रानियतो
गुणः यत्राश्रिताः कर्मगुणाः कारणं समवायि यत् तद्द्रव्यं समवायी तु निश्चेष्टः कारणं गुणः संयोगे च वि
भागे च कारणं द्रव्यमाश्रितं ५० कर्तव्यस्य क्रिया कर्म कर्म नान्यदपेक्षते इत्युक्तं कारणं कार्यं धातुसाम्य
मिहोच्यते ५१ धातुसाम्यक्रिया चोक्ता तंत्रस्यास्य प्रयोजनं कालबुद्धींद्रियार्थानां योगो मिथ्या न चा
ति च द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः शरीरं सत्वसंज्ञं च व्याधीनामाश्रयो मतः ५३ तथा
सुखानां योगस्तु सुखानां कारणं शमः निर्विकारः परस्त्वात्मा सत्वभूतगुणेंद्रियैः चैतन्ये कारणं नित्यो
द्रष्टा पश्यति हि क्रियाः वातपित्तकफाश्चोक्ताः शारीरो दोषसंग्रहः ५५ मानसः पुनरुद्दिष्टो रजश्च त
मएव च प्रशाम्यत्यौषधैः पूर्वो दैवयुक्तिव्यपाश्रयैः मानसो ज्ञानविज्ञानधैर्यस्मृतिसमाधिभिः रूक्षः
शीतो लघुः सूक्ष्मश्चलोथ विशदः खरः ५७ विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति सस्नेहमु २
ष्णं तीक्ष्णं च द्रवमम्लं सरं कटु विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति गुरुशीतमृदुस्निग्धमधुरस्थि
रपिच्छलाः ५९ श्लेष्मणः प्रशमं यांति विपरीतगुणैर्गुणाः विपरीतगुणैर्द्रव्यैर्मात्राकालोपपादितैः

Dr BHAU DAJI MEMORIAL

६० भेषजैर्विनिवर्तंते विकाराः साध्यसंमताः साधनं न त्वसाध्यानां व्याधीनामुपदिश्यते भूयश्चातो यथा
द्रव्यं गुणकर्म प्रवक्ष्यते रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा ६२ निर्वृत्तौ च विशेषे च प्रत्ययाः खादय
स्त्रयः स्वादुरम्लोथ लवणः कटुकस्तिक्त एव च कषायश्चेति षट्कोयं रसानां संग्रहः स्मृतः स्वाद्वम्ललवणा वायुं
कषायस्वादुतिक्तकाः ६५ जयंति पित्तं श्लेष्माणं कषायकटुतिक्तकाः कटुतिक्तकषायाश्च कोपयंति समीरणं
कट्वम्ललवणाः पित्तं स्वाद्वम्ललवणाः कफं किंचिद्दोषप्रशमनं किंचिद्धातुप्रदूषणं ६६ स्वस्थवृत्तौ मतं किं
चिद्द्रव्यं त्रिविधमुच्यते तत्पुनस्त्रिविधं ज्ञेयं जांगमौद्भिदपार्थिवं ६७ मधूनि गोरसाः पित्तं वसा मज्जासृगा
मिषं विण्मूत्रं चर्म रेतोस्थि स्नायुः शृंगं नखाः खुराः ६८ मनःशिला लमणयो लवणं गैरिकांजनं सौम्यौ
षधमुद्दिष्टमौद्भिदं च चतुर्विधं वनस्पतिस्तथा वीरुद्वानस्पत्यस्तथौषधिः फलैर्वनस्पतिः पुष्पैर्वानस्पत्यः
फलैरपि ७० ओषध्यः फलपाकांताः प्रतानैर्वीरुधः स्मृताः मूलत्वक्सारनिर्यासनालस्वरसपल्लवाः क्षा
राः क्षीरं फलं पुष्पं भस्म तैलानि कंटकाः पत्राणि शुंगाः कंदाश्च प्ररोहाश्चौद्भिदो गणः ७२ मूलिन्यः षोडशैका
ना फलिन्यो विंशतिः स्मृताः महास्नेहाश्च चत्वारः पंचैव लवणानि च अष्टौ मूत्राणि संख्यातान्यष्टावेव पयां
सि च शोधनार्थाश्च षड्वृक्षाः पुनर्वस्वा निदर्शिताः ७४ य एतान्वेत्ति संयोक्तुं विकारेषु स वेदवित् हस्तादंती
हैमवती श्यामा त्रिवृदधोगुणा सप्तला श्वेतनामा च प्रत्यक्श्रेणी गवाक्ष्यपि ७५ एलाज्योतिष्मती चैव यो
ज्ये मूर्धविरेचने एकादशावशिष्टा याः प्रयोज्यास्ता विरेचने इत्युक्ता नामकर्मभ्यां मूलिन्यः फलिनीः शृणु
शंखिन्यथ विडंगानि त्रपुसं मदनानि च ७७ आनूपं स्थलजं चैव क्लीतकं द्विविधं स्मृतं धामार्गवमथेक्ष्वा
कु जीमूतं कृतवेधनं प्रकीर्या चोदकीर्या च प्रत्यक्पुष्पी तथाभया अंतःकोटरपुष्पी च हस्तिपर्ण्याश्च शा
रदं कंपिल्लकारग्वधयोः फलं यत्कुटजस्य च धामार्गवमथेक्ष्वाकु जीमूतं कृतवेधनं ८० मदनं कुटजं चैव
त्रपुसं हस्तिपर्णिकं एतानि वमने चैव योज्यान्यास्थापनेषु च नस्यप्रच्छर्दने चैव प्रत्यक्पुष्पी विधीयते. दश
यान्यानि शिष्टानि विविधानि विरेचने ८२ नामकर्मभिरुक्तानि फलान्येकोनविंशतिः सर्पिस्तैलं वसा मज्जाः

च॰ सू॰ स्नेहा दृष्टश्चतुर्विधाः ८३ पानाभ्यंजनबस्त्यर्थं नस्यार्थं चैव योगतः स्नेहना जीवना वर्ण्या बलोपचयवर्धनाः
स्नेहा ह्येते च विहिता वातपित्तकफापहाः सौवर्चलं सैंधवं च विडमौद्भिदमेव च ८७ सामुद्रेण सहैतानि पंच
स्युर्लवणानि तु स्निग्धान्युष्णानि तीक्ष्णानि दीपनीयतमानि च आलेपनार्थे युज्यंते स्नेहस्वेदविधौ तथा
३ अधोभागोर्ध्वभागेषु निरूहेष्वनुवासने ८९ अभ्यंजने भोजनार्थे शिरसश्च विरेचने शस्त्रकर्माणि वर्त्त्य
र्थमंजनोत्सादनेषु च ९० अजीर्णानाहयोर्वाते शूले गुल्मे तथोदरे उक्तानि लवणा॰यूर्ध्वं मूत्राण्य
ष्टौ निबोधत मुख्यानि यानि दृष्टानि सर्वाण्यात्रेयशासने अविमूत्रमजामूत्रं गोमूत्रं माहिषं च यत् ९२ हस्ति
मूत्रमथोष्ट्रस्य हयस्य च खरस्य च युक्तान्यास्थापने मूत्रं युक्तं चापि विरेचने ९३ स्वेदेष्वपि च तद्युक्तमानाहेष्व
गदेषु च उदरेष्वथ चार्शःसु गुल्मेष्वथ किलासिषु तद्युक्तमुपनाहेषु परिषेके तथैव च दीपनीयं विषघ्नं च क्रिमि
घ्नं चोपदिश्यते पांडुरोगोपसृष्टानामुत्तमं शर्म चोच्यते श्लेष्माणं शमयेत् पीतं मारुतं चानुलोमयेत् ९६
कर्षेत् पित्तमधोभागमित्यस्मिन् गुणसंग्रहः सामान्येन प्रयोगस्तु पृथक्त्वेन च वक्ष्यते ९८ अविमूत्रं सति
क्तं स्यात् स्निग्धं पित्ताविरोधि च आजं कषायं मधुरं पथ्यं दोषान् निहंति च गव्यं समधुरं किंचित् दोषघ्नं क्रि
मिकुष्ठनुत् कंडूपांडुमयश्वासलघ्नं शोषोदरिणां हितं १०० अर्शःशोफोदरघ्नं तु सक्षारं माहिषं सरम् हास्ति
नं लवणं क्षारं रूक्षं क्रिमिकुष्ठनुत् १ प्रशस्तं बद्धमूत्राणां सर्वश्लेष्मामयार्शसां सतिक्तं श्वासकासघ्नमर्शो
घ्नं चौष्ट्रमुच्यते २ वाजिनां तिक्तकटुकं कुष्ठव्रणविषापहं खरमूत्रमपस्मारोन्मादग्रहविनाशनं ३ इतिहोक्ता
नि मूत्राणि यथासामर्थ्ययोगतः अतः क्षीराणि वक्ष्यंते कर्म चैषां गुणाश्च ये अविक्षीरमजाक्षीरं गोक्षी ३
रं माहिषं च यत् उष्ट्रीणामथ नागीनां वडवायाः स्त्रियास्तथा १०० प्रायशो मधुरं स्निग्धं शीतं स्तन्यं पयो
मतं प्रीणनं बृंहणं वृष्यं मेध्यं बल्यं मनस्करं जीवनीयं श्रमहरं श्वासकासनिबर्हणं हंति शोणितपित्तं च
संधानं विहतस्य च सर्वप्राणभृतां सात्म्यं शमनं शोधनं तथा तृष्णाघ्नं दीपनीयं च श्रेष्ठं क्षीणक्षतेषु च
पांडुरोगेऽम्लपित्ते च शोषे गुल्मे तथोदरे १०९ अतीसारे ज्वरे दाहे श्वयथौ च विधीयते योनिशुक्रप्रदो

षेषु मूत्रेष्वप्रदरेषु च १०५ पुरीषे ग्रथिते पथ्यं वातविकारिणां नस्यालेपावगाहेषु वमनास्थापनेषु च विरे
चने स्नेहने च पयः सर्वत्र युज्यते यथाक्रमं क्षीरगुणानेकैकस्य पृथक् पृथक् अन्नपानादिके ध्याये भूयो वक्ष्या
म्यशेषतः अथापरे त्रयो वृक्षाः पृथग्ये फलमूलिनः स्नुह्यर्काश्मंतकास्तेषामिदं कर्म पृथक् पृथक् वमनेऽश्मंत
कं विद्यात् स्नुहीक्षीरं विरेचनं १०८ क्षीरमर्कस्य विज्ञेयं वमने सविरेचने इमांस्त्रीन् परान् वृक्षानाहुर्येषां हि
तत्वचः पूतीकः कृष्णगंधा च तिल्वकश्च तथा तरुः विरेचने प्रयोक्तव्यः पूतिकस्तिल्वकस्तथा कृष्णगंधा परिस ग्म
र्पिशोथेष्वर्शःसु चोच्यते दद्रुविद्रधिगंडेषु कुष्ठेष्वप्यलजीषु च ११ षड्वृक्षान् शोधनानेतानपि विद्यादि
चक्षण इत्युक्ताः फलमूलिन्यः स्नेहाश्च लवणानि च मूत्रक्षीराणि वृक्षाश्च षड् ये दृष्टाः पयस्त्वचः ओषधीनामरू
पाभ्यां जानते तत्त्वपा वने अविपाश्चैव गोपाश्च ये चान्ये वनवासिनः न नामज्ञानमात्रेण रूपज्ञानेन वा पुनः
१३ ओषधीनां परां प्राप्तिं कश्चिद्वेदितुमर्हति योगवित्त्वप्यरूपज्ञस्तासां तत्त्वविदुच्यते किं पुनर्यो विजानीया
दोषधीः सर्वथा भिषक् योगमासां तु यो विद्याद्देशकालोपपादितं १५ पुरुषं पुरुषं वीक्ष्य स विज्ञेयो भि
षक्तमः यथा विषं यथा शस्त्रं यथाग्निरशनिर्यथा तथौषधमविज्ञातं विज्ञातममृतं यथा औषधं ह्य
नभिज्ञातं नामरूपगुणैस्त्रिभिः १७ विज्ञातं चापि दुर्युक्तमनर्थायोपपद्यते योगादपि विषं तीक्ष्ण
मुत्तमं भेषजं भवेत् १८ भेषजं चापि दुर्युक्तं तीक्ष्णं संपद्यते विषं तस्मान्न भिषजा देयं युक्तिबाह्येन भेषजं
धीमता किंचिदादेयं जीविता रोग्यकांक्षिणा कुर्यान्निपतितो मूर्ध्नि सशेषं वासवाशनिः सशेषमातुरं कुर्यान्न
त्वज्ञमतिमौषधं २० दुःखिताय शयानाय श्रद्दधानाय रोगिणे यो भेषजमविज्ञाय प्राज्ञमानी प्रयच्छति
दुर्मतेर्मृत्युदुःखस्य पापस्य त्यक्तधर्मणः नरोमरणसामास्यात्तस्य संभाषणादपि २२ वरमाशीविषवि
षं पीतं क्वथितं ताम्रमेव वा पीतमत्यग्निसंतप्ता भक्षिता वाप्ययोगुडाः न तु श्रुतवतां वेषं बिभ्रतः शरणाग
तान् गृहीत्वान्नपानं च वित्तं वा रोगपीडितान् भिषग्बुभूषुर्मतिमानतः स्वगुणसंपदि परं प्रयत्नमा
तिष्ठेत्प्राणदः स्याद्यथा नृणां २५ तदेव युक्तं भैषज्यं यदारोग्याय कल्पते स चैव भिषजां श्रेष्ठो रोगेभ्यो

यः प्रमोचयेत् २६ सम्यक्प्रयोगं सर्वेषां सिद्धिराख्याति कर्मणां सिद्धिराख्याति सर्वैश्च गुणैर्युक्तं भिषक्तमं २७
चर०.सू. इति तत्र श्लोकः आयुर्वेदागमो हेतुरागमस्य प्रवर्तनं स्मरणं साध्वनुज्ञानामायुर्वेदस्य निर्णयः संपूर्णकार
णं कार्यमायुर्वेदप्रयोजनं हेतवश्चैव दोषाश्च भेषजं संग्रहेण च रसाः सप्रत्ययद्रव्यास्त्रिविधो द्रव्यसंग्रहः
५ मूलिन्यश्च फलिन्यश्च स्नेहाश्च लवणानि च १३० मूत्रं क्षीराणि वृक्षाश्च षड् ये क्षीरत्वगाश्रया कर्माणि चै
षां सर्वेषां योगायोगगुणागुणा ३१ वैद्यापवादो यत्रस्थाः सर्वेषां भिषजां गुणाः सर्वमेतत्समाख्यातं पूर्वाध्या
ये महर्षिणा १३२ इति श्रीचरकसंहितेदीर्घंजीवितीयो नाम प्रथमोध्यायः १ ॥ छ ॥ अथातोपामार्गतं
डुलीयं नामाध्यायं व्याख्यास्यामः इति ह स्माह भगवानात्रेयः अपामार्गस्य बीजानि पिप्पलीमरिचानि च
विडंगान्यथ शिग्रूणि सर्षपांस्तुंबुरूणि च १ अजाजीं चाजमोदां च पीलून्येलां हरेणुकां पृथ्वीकां सुरसां श्वेतां
कुठेरकफणिज्झके २ शिरीषबीजं लशुनं हरिद्रे लवणद्वयं ज्योतिष्मतीं नागरं च विद्यान्मूर्धविरेचनैः ३
गौरवे रसः शूले पीनसेर्धावभेदके क्रिमिव्याधावपस्मारे घ्राणनाशे प्रमोहके मदनं मदनानेवं जीमूतं कृत
वेधनं पिप्पलीं कुलसे इक्ष्वाकून्येवापामार्गवाणि च ५ उपस्थिते श्लेष्मपित्ते व्याधावामाशयाश्रये वमना
र्थं प्रयुंजीत भिषग्देहमदूषयन् ६ त्रिफलां त्रिवृतां दंतीं नीलिनीं सप्तलां वचां कंपिल्लकं गवाक्षीं च क्षीरिणीमु
दकीर्यकां पीलून्यारग्वधं द्राक्षां द्रवंतीं निचुलानि च पक्वाशयगते दोषे विरेकार्थं प्रयोजयेत् पाटलां
चाग्निमंथं च बिल्वं श्योनाकमेव च काश्मर्यं शालपर्णीं च पृश्निपर्णीं निदिग्धिकां ९ बलां श्वदंष्ट्रां बृहतीमे
रंडं सपुनर्नवं यवकोलकुलत्थांश्च गुडूचीं मदनानि च पलाशं कत्तृणं चैव स्नेहांश्च लवणानि च उदाव
र्तविबंधेषु कुर्यादास्थापने सदा ११ अत एवौषधगणात्संकल्प्यमनुवासनं मारुतघ्नमिति प्रोक्तः संग्र
हः पांचकर्मिकः १२ तान्युपस्थितदोषाणां स्नेहस्वेदोपपादनैः पंचकर्माणि कुर्वीत मात्राकालौ विचा ५
रयन् मात्राकालाश्रया युक्तिः सिद्धिर्युक्तौ प्रतिष्ठिता तिष्ठत्युपरि युक्तिज्ञो द्रव्यज्ञानवतां सदा १४
अत ऊर्ध्वं प्रवक्ष्यामि यवागूर्विविधौषधाः विविधानां विकाराणां तत्साध्यानां निवृत्तये १५ पिप्प

ली पिप्पलीमूलचव्यचित्रकनागरैः यवागूर्दीपनीया स्याच्छूलघ्नी चोपसाधिता १६ दधित्थबिल्वचांगेरीतक्र
दाडिमसाधिता पाचनी ग्राहिणी पेया सा वाते पंचमूलिकी शालिपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता दाडिमा
म्ला हिता पेयाः पित्तश्लेष्मातिसारिणी पयस्यार्धोदके छागे ह्रीवेरोत्पलनागरैः पेयार - - - रघ्नी पृश्निपर्ण्या च सा
धिता १९ दद्यात्सातिविषां पेयामामे साम्लां सनागरां श्वदंष्ट्राकंटकारीभ्यां मूत्रकृच्छ्रे सफाणितां २० विडंगपिप्प
लीमूलशिग्रुभिर्मरिचेन च तक्रसिद्धा यवागूः स्यात्कृमिघ्नी ससुवर्चिका मृद्वीकासारिवालाजापिप्पलीमधुना
गरैः पिपासाघ्नी विषघ्नी च सोमराजीविपाचिता २२ सिद्धा वराहनिर्यूहे यवागूर्बृंहणी मता गवेधुकानां भृ
ष्टानां कर्शनीया समाक्षिका सर्पिष्मती बहुतिला स्नेहनी लवणान्विता कुशामलकनिर्यूहे श्यामाकानां विरूक्ष
णी २५ दशमूलीशृतं काससिद्धा श्वासहिक्कापहा यमके मदिरासिद्धा पक्वाशयरुजापहा शाकैर्मांसैस्तिलै
र्माषैः सिद्धा वर्चो निरस्यति जंबाम्रास्थिदधित्थाम्लबिल्वैः सांग्राहिकी मता २६ क्षारचित्रकहिंग्वम्लवेतसै
र्भेदनी मता अभयापिप्पलीमूलविश्वैर्वातानुलोमनी तक्रसिद्धा यवागूः स्याद्घृतव्यापत्तिनाशिनी तैलव्या
पदि शस्ता च तक्रपिण्याकसाधिता गव्यमांसरसैः साम्ला विषमज्वरनाशिनी २८ कंठ्या यवानां यमके पि
प्पल्यामलकैः शृता ताम्रचूडरसे सिद्धा रेतोमार्गरुजापहा समाषविदला वृष्या घृतक्षीरोपसाधिता
उपोदिकादधिभ्यां च सिद्धा मदविनाशिनी ३० क्षुधं हन्यादपामार्गक्षीरगोधारसान्विता तत्र श्लोकाः
अष्टाविंशतिरित्येता यवाग्वः परिकीर्तिताः पंचकर्माणि चाश्रित्य प्रोक्तो भेषजसंग्रहः ३१ पूर्वं मूल
फलज्ञानहेतोरुक्तं यदौषधं पंचमूलानि यज्ज्ञानहेतोस्तत्कीर्तितं पुनः ३२ स्मृतिमान् हेतुयुक्तिज्ञो जि
तात्मा प्रतिपत्तिमान् भिषगौषधसंयोगैश्चिकित्सां कर्तुमर्हति ३३ इति श्री अपामार्गतंडुलीय
नाम द्वितीयोध्यायः २ ॥ ॥ छ ॥ अथातो आरग्वधीयमध्यायं व्याख्यास्यामः इति ह स्माह०
आरग्वधः सैडगजः करंजो वासा गुडूची मदनं हरिद्रे श्र्याह्वः सुराह्वः खदिरो धवश्च निंबो विडंगं कर
वीरकश्च १ ग्रंथिश्च भौर्जो लशुनः शिरीषः सलोमशो गुग्गुलुकृष्णगंधे फणिज्झको वत्सकसप्तपर्णौ

पालूनि कुष्ठं सुमनः प्रवालाः २ वचा हरेणुस्त्रिवृता निकुंभा भल्लातकं गैरिकमंजनं च मनःशिलाले गृहधूम एलाका
चा॰ सू॰ सीसलोध्रार्जुनमुस्तसर्जाः ३ इत्यर्धरूपैर्विहिताः षडेते गोपित्तपीताः पुनरेव पिष्टाः सिद्धाः परं सर्षपतैलयुक्ता
श्चूर्णप्रदेहा भिषजा प्रयोज्याः ४ कुष्ठानि कृच्छ्राणि नवं किलासं सुरेन्द्रलुप्तं किटिभं सदद्रु भगंदरार्शांस्यपचीं सपा
५ मां हन्युः प्रयुक्ता ह्यचिरान्नराणां ५ कुष्ठं हरिद्रे सुरसं पटोलं निंबाश्वगंधे सुरदारुशिग्रुं ससर्षपं तुंबरुधान्यव
न्यं चंडां च चूर्णानि समानि कुर्यात् तैस्तक्रयुक्तैः प्रथमं शरीरं तैलाक्तमुद्वर्तयितुं यतेत तथास्य कंडूः पिटकाः सको
ठाः कुष्ठानि शोफश्च शमं व्रजंति ७ कुष्ठामृता संगकटंकटेरी कासीसकंपिल्लकमुस्तलोध्राः सौगंधिकं सर्जर
सो विडंगं मनःशिलाले करवीरकत्वक् ८ तैलाक्तगात्रस्य कृतानि चूर्णान्येतानि दद्यादवचूर्णनाय दद्रूः सकंडूः किटि
भानि पामा विचर्चिका चैति शमं प्रजंति ९ मनःशिलाले मरिचानि तैलमार्कं पयः कुष्ठहरः प्रदेहः तुत्थं विडं
गं मरिचानि कुष्ठं लोध्रं च तद्वत्समनःशिलं स्यात् १० रसांजनं सप्रपुनाडबीजं युक्तः कपित्थस्य रसेन लेपः करं
जबीजैडगजः सकुष्ठो गोमूत्रपिष्टश्च वरः प्रदेहः ११ उभे हरिद्रे कुटजस्य बीजं करंजबीजं सुमनःप्रवालाः त्वचं समा
ध्यां हयमारकस्य लेपं तिलक्षारयुतं विदध्यात् १२ मनःशिलाले कुटजः सकुष्ठः सलोमशः सैडगजः करंजः ग्रंथि
श्च भौर्जः करवीरमूलं चूर्णानि साध्यानि तुषोदकेन पलाशनिर्दाहरसेन चापि कर्षोद्धृतान्याढकसंमितेन द
र्वीप्रलेपं प्रवदंति लेपमेनं परं कुष्ठनिषूदनाय १४ पर्णानि पिष्ट्वा चतुरंगुलस्य तक्रेण पर्णान्यथ काकमाच्याः तै
लाक्तगात्रस्य नरस्य तस्मा- द्वर्तयेदश्वहनच्छदैश्च १५ कोलं कुलत्थाः सुरदारुरास्नामाषातसीतैलफलानि
कुष्ठं ॥ व - - - - यवचूर्णमम्लमुष्णानि वातामयिनां प्रदेहः १६ अनूपमत्स्यामिषवेसवारैरुष्णैः प्रदेयाः
पवनापहः स्यात् स्नेहैश्चतुर्भिर्दशमूलमिश्रैर्गंधौषधैश्चानिलहः प्रदेहः १७ तक्रेण पिष्टं यवचूर्णमुष्णं सक्षा
रमर्तिं जठरे निहन्यात् कुष्ठं शताह्वां सवचां यवानां चूर्णं सतैलाम्लमुशंति वाते १८ उभे शताह्वे मधुकं मधूकं ब ५
लां प्रियालं च कसेरुकं च घृतं विदारीं च सितोपलां च कुर्यात्प्रदेहं पवने सरक्ते १९ रास्नां गुडूचीं मधुकं बले द्वे सजी
वकं सर्षभकं पयश्च घृतं च सिद्धं मधुशेषयुक्तं रक्तानिलार्तिं प्रणुदेत्प्रदेहः २० वाते सरक्ते सघृतः प्रदेहो गोधू

मचूर्णं छगलीपयश्च नतोत्पलं चंदनकुष्ठयुक्तं शिरोरुजायां सघृतः प्रदेहः २१ प्रपौंडरीकं सुरदारुकुष्ठं यष्ट्या
ह्वमेला कमलोत्पले च शिरोरुजायां सघृतः प्रदेहो लोहैरकापद्मकचोरकैश्च २२ रास्ना हरिद्रे नलदं शताह्वे द्वे
देवदारुणी सितोपला च जीवंतिमूलं सघृतं सतैलमालेपनं पार्श्वरुजासु कोष्णं २३ शैवालपद्मोत्पलवेत्रतुंगप्र
पौंडरीकाण्यमृणाललोध्रं प्रियंगुकालीयकचंदनानि निर्वापणः स्यात्सघृतः प्रदेहः सितालतावेतसपद्मकानि
यष्ट्याह्वमैंद्री नलिनानि दूर्वा यवासमूलं कुशकाशयोश्च निर्वापणः स्याज्जलमेरका च २५ शैलेयमेलागु
रु धान्यकुष्ठं चंडा नतं त्वक्सुरदारुरास्ना शीतं निहन्यादचिरात्प्रदेहो विषं शिरीषस्तु ससिंदुवारः २६ शिरीषला
मज्जकहेमलोध्रैस्त्वग्दोषसंस्वेदहरः प्रघर्षः पत्रांबुलोध्राभयचंदनानि शरीरदौर्गंध्यहरः प्रदेहः २७ ॥ ॥
तत्र श्लोकाः इहात्रिजः सिद्धतमानुवाच द्वात्रिंशतं सिद्धमहर्षिपूज्यः चूर्णप्रदेहान्विविधामयघ्नानार
ग्वधीये जगतो हितार्थं २८ इति आरग्वधीयो नाम तृतीयोऽध्यायः ३ ॥७ ॥ ॥ अथातः षड्विरे
चनशताश्रितीयमध्यायं व्याख्यास्यामः इति ह स्माह भगवानात्रेयः इह खलु षड्विरेचनशतानि भवंति
षड्विरेचनाश्रयाः पंचकषायशतानि पंचकषाययोनयः पंचविधं कषायकल्पनं पंचाशन्महाकषाया इति संग्रहः
षड्विरेचनशतानीति यदुक्तं तदिह संग्रहेणोदाहृत्य विस्तरेण कल्पोपनिषदि व्याख्यास्यामः ॥ त्रयस्त्रिंशद्योगशतं
प्रणीतं फलेषु एकोनचत्वारिंशज्जीमूतकेषु योगाः पंचचत्वारिंशदिक्ष्वाकुः धामार्गवः षष्टिधा भवति योग
युक्तः कुटजस्त्वष्टादशधा योगमेति कृतवेधनं षष्टिधा भवति योगयुक्तं श्यामात्रिवृद्योगशतं प्रणीतं दशा
परे चात्र भवंति योगाः चतुरंगुलो द्वादशधा योगमेति लोध्रं विधौ षोडशयोगयुक्तं महावृक्षो विंशतियोग
युक्तः एकोनचत्वारिंशत्सप्तलाशंखिन्योर्योगा भवंति अष्टचत्वारिंशद्दंतीद्रवंत्योरिति षड्विरेचनशतानि ष
ड्विरेचनाश्रया इति क्षीरमूलत्वक्पत्रपुष्पफलानि पंचकषाययोनय इति मधुकषायोऽम्लकषायः क
टुककषायस्तिक्तकषायः कषायकश्चेति तंत्रे संज्ञा पंचविधं कषायकल्पनमिति स्वरसः कल्कः शृतः
शीतः फांटकषाय इति तेषां यथापूर्वं बलाधिक्यमतश्च कषायकल्पना व्याध्यातुरबलापेक्षिणी नत्वे

वंखलुसर्वाणिसर्वप्रयोगानिभवंति पंचाशन्महाकषायाइतियदुक्तंतदनुव्याख्यास्यामः तद्यथा जीवनीयोबृंह
चरक सू णीयोलेखनीयोभेदनीयः संधानीयोदीपनीयश्चेतिषट्कः कषायवर्गः बल्योवर्ण्यःकण्ठ्योहृद्यइतिचतुष्कः कषा
यवर्गः तृप्तिघ्नोऽर्शोघ्नःकुष्ठघ्नः कंडूघ्नः कृमिघ्नोविषघ्नइतिषट्कः कषायवर्गः स्तन्यजननः स्तन्यशोधनःशु
६ क्रजननःशुक्रशोधनइतिचतुष्कः कषायवर्गः स्नेहोपगः स्वेदोपगोवमनोपगोविरेचनोपगआस्थापनो
पगोनुवासनोपगः शिरोविरेचनोपगइतिसप्तकः कषायवर्गः॥ छर्दिनिग्रहणः तृष्णानिग्रहणोहिक्कानि
ग्रहणइतित्रिकः कषायवर्गः॥ पुरीषसंग्रहणः पुरीषविरजनीयोमूत्रसंग्रहणोमूत्रविरजनीयोमूत्र
विरेचनीयाइतिपंचककषायवर्गः॥ दाहप्रशमनः शीतप्रशमनः उदर्दप्रशमनोंऽगमर्दप्रशमनः शूलप्र
शमनइतिपंचककषायवर्गः॥ शोणितस्थापनोवेदनास्थापनः संज्ञास्थापनः प्रजास्थापनोवयःस्थापनइ
तिपंचककषायवर्गः॥ इतिपंचकषायशतान्यभिसमस्यपंचाशन्महाकषायाः॥ महतांचकषायाणांल
क्षणोदाहरणार्थंव्याख्याताः॥ एतेषामेकैकस्मिन्महाकषायेदशदशावयविकाःकषायाव्याख्यास्यंते
॥ तान्येवपंचकषायशतानिभवंति॥ तद्यथा॥ जीवकर्षभकौ॥ मेदामहामेदा॥ काकोलीक्षीरकाको
ली॥ मुद्गपर्णीमाषपर्ण्यौजीवंतीमधुकमितिदशेमानिजीवनीयानिभवंति॥ क्षीरिणीराजक्षवका॥
काकोलीक्षीरकाकोली॥ वाट्यायनीभद्रौदनी॥ भारद्वाजीपयस्यर्ष्यगंधाश्वगंधाइतिदशेमानिबृंह
णीयानिभवंति॥ मुस्ताकुष्ठहरिद्रादारुहरिद्रा॥ वचातिविषा॥ कटुरोहिणी॥ चित्रकचिरबिल्व॥ हैमव
त्यइतिदशेमानिलेखनीयानिभवंति॥ सरलार्कोरबूकाग्निमुखीचित्राचित्रकचिरबिल्वशंखिनी
कुलाहलीकरवर्णक्षीरिण्यइतिदशेमानिभेदनीयानिभवंति॥ मधुमधुकपृश्निपर्ण्यश्वम्बष्ठकीसमंगमो
चरसोधातकी॥ लोध्रप्रियंगु॥ कट्फलानीतिदशेमानिसंधानीयानिभवंति॥ पिप्पलीपिप्पलीमूल॥ चव्यक
चित्रकशृंगवेराम्लवेतसमरिचाजमोदाभल्लातकास्थिहिंगुनिर्यासइतिदशेमानिदीपनीयानिभवंतीति ६
षट्कःकषायवर्गः॥ ऐंद्र्यार्षभ्यतिरसर्ष्यप्रोक्तापयस्याश्वगंधास्थिरापुनर्नवा॥ बलातिबला इतिदशेमानिबल्या

निभवंति॥ चंदनतुंगपद्मकोशीरमधुकमंजिष्ठासारिवा॥ पयस्यासितालताइतिदशेमानिवर्ण्यानिभवंति॥ सा
रिवेक्षुमूलमधुकपिप्पलीद्राक्षाविदारीकैतर्यहंसपादीबृहतीकंटकाइतिदशेमानिकंठ्यानिभवंति॥ आ
म्रातकलकुचकरमर्दवृक्षाम्लाम्लवेतसकुवलबदरदाडिममातुलुंगानीतिदशेमानिहृद्यानिभवंति॥ च
तुष्कः कषायवर्गः॥ नागरचव्यचित्रकविडंगमूर्वागुडूचीवचामुस्तापिप्पलीपटोलानीतिदशेमानितृप्तिघ्नानिभवंति
॥ कुटजबिल्वभ।चित्रकनागरातिविषाभया॥ धन्वायवासकदारुहरिद्रावचाव्यानीतिदशेमानिअर्शोघ्नानिभवं
ति॥ खदिराभयामलकहरिद्रारुष्करसप्तपर्णारग्वधकरवीरविडंगजातीप्रवालाइतिदशेमानिकुष्ठघ्नानिभवंति॥
चंदननलदकृतमालनक्तमालनिंबकुटजसर्षपमधुकदारुहरिद्रामुस्तानिदशेमानिकंडूघ्नानिभवंति॥ अक्षीव
मरिचगंडीरकेबुकविडंगनिर्गुंडीकिणिहीश्वदंष्ट्रावृषकर्णिकाआखुकर्णिकाइतिदशेमानिकृमिघ्नानिभवंति॥ हरिद्रा
मंजिष्ठासुवहासूक्ष्मैलापालिंदीचंदनकतकशिरीषसिंदुवारश्लेष्मातकाइतिदशेमानिविषघ्नानिभवंति॥
इतिषट्कः कषायवर्गः॥ वीरणशालिषष्टिकेक्षुवालिकादर्भकुशकाशगुंद्रेत्कटमूलानीतिदशेमानिस्तन्यज
ननानिभवंति॥ जीवकर्षभककाकोलीक्षीरकाकोलीमुद्गपर्णीमाषपर्णीमेदावृक्षरुहाजटाकुलीरशृंग्यइतिदशे
मानिशुक्रजननानिभवंति॥ कुष्ठेलवालुककट्फलसमुद्रफेननालकदंबनिर्यासिकाइक्षुइक्षुरकवसुकोशीराणी
तिदशेमानिशुक्रशोधनानिभवंतीति॥ चतुष्कः कषायवर्गः॥ मृद्वीकामधुकमधुपर्णीमेदाविदारीकाकोली
क्षीरकाकोलीजीवंतीशालपर्ण्यइतिदशेमानिस्नेहोपगानिभवंति॥ शोभांजनकैरंडार्कवृश्चीवपुनर्नवाय
वतिलकुलत्थमाषबदराणीतिदशेमानिस्वेदोपगानिभवंति॥ मधुमधुककोविदारकर्बुदारनीपविदुलबिंबीश
णपुष्पीसदापुष्पीप्रत्यक्पुष्पाइतिदशेमानिवमनोपगानिभवंति॥ द्राक्षाकाश्मर्यपरूषकाभयामलकबि
भीतककुवलबदरकर्कंधुपीलूनीतिदशेमानिविरेचनोपगानिभवंति॥ त्रिवृद्बिल्वपिप्पलीकुष्ठसर्षपवचावत्स
कफलशतपुष्पामधुकमदनानीतिदशेमानिआस्थापनोपगानिभवंति॥ रास्नासुरदारुबिल्वमदनश
तपुष्पावृश्चीवपुनर्नवाश्वदंष्ट्राग्निमंथश्योनाकाइतिदशेमान्यनुवासनोपगानिभवंति॥ ज्योतिष्मती

वालुकाश्चवकमरीचपिप्पलीविडंगशिग्रुसर्षपापामार्गतंडुलमूषश्वेताश्वेताइतिदशमानिशिरोविरेचनोपगानि
भवंतीतिसप्तकः कषायवर्गः॥ जंब्वाम्रपल्लवमातुलुंगाम्लबदरदाडिमयववष्टिकोशीरमृल्लाजाइतिदशा
मानिछर्दिनिग्रहणानिभवंति॥ नागरधन्वयवासकमुस्तपर्पटकचंदनकिराततिक्तकगडूचीह्रीवेरधान्यक
पटोलानीतिदशमानितृष्णानिग्रहणानिभवंति॥ शठीपुष्करमूलबदरबीजकंटकारिकाबृहतीवृक्षरुहा
भयापिप्पलीदुरालभाकुलीरशृंगइतिदशमानिहिक्कानिग्रहणानिभवंतीतित्रिकः कषायवर्गः॥ प्रियंग्वनंता
म्रास्थिकट्वंगरोध्रमोचरससमंगाधातकीपुष्पपद्मापद्मकेसराणीतिदशमानिपुरीषसंग्रहणानिभवंति।
जंबूशल्लकीत्वक्कच्छुरामधूकशाल्मलीश्रीवेष्टकभृष्टमृत्पयस्योत्पलतिलकणाइतिदशमानिपुरीषविरजनी
यानिभवंति॥ जंब्वाम्रप्लक्षवटकपीतनोदुंबराश्वत्थभल्लातकाश्मंतकसोमवल्काइतिदशमानिमूत्रसंग्रह
णानिभवंति॥ पद्मोत्पलनलिनकुमुदसौगंधिकपुंडरीकशतपत्रमधुकप्रियंगुधातकीपुष्पाणीति
दशमानिमूत्रविरजनीयानिभवंति॥ पंचकः कषायवर्गः॥ ॥ द्राक्षाभयामलकपिप्पलीदुरालभा
भाशृंगीकंटकारिकावृश्चीवपुनर्नवातामलक्यइतिदशमानिकासहराणिभवंति॥ शठीपुष्करमू
लाम्लवेतसैलाहिंग्वगुरुसुरसतामलकीजीवंतीचंडाइतिदशमानिश्वासहराणिभवंति॥ द्राक्षाखर्जू
रचवयवष्टिकपियालबदरदाडिमफल्गुपरूषकेक्षुयवष्टिकाइतिदशमानिश्रमहराणिभवंतीतिपं
चकः कषायवर्गः॥ मधुमधुकरुधिरमोचरसमृत्कपालमोलोध्रगैरिकप्रियंगुशर्करालाजाइतिदशा
मानिशोणितस्थापनानिभवंति॥ शालकट्फलकदंबपद्मककामोचरसशिरीषवंजुलैलवालुकाशोकाइति
दशमानिवेदनास्थापनानिभवंति॥ हिंगुकैटर्यपूत्यारिमेदवचाचोरकवयःस्थागोलोमीदुर्वामीजटि
लापलंकषाशोकरोहिण्यइतिदशमानिसंज्ञास्थापनानिभवंति॥ ऐंद्रीब्राह्मीशतवीर्यासहस्रवीर्या
अमोघाअव्यथाशिवाअरिष्टावाट्यपुष्पीविष्वक्सेनकांताइतिदशमानिप्रजास्थापनानिभवंति॥

अमृताःभयाधात्रीमुक्ताश्वेताजीवंत्यतिरसामंडूकपर्णीस्थिरापुनर्नवाइतिदशमानिवयःस्थापनानिभ
वंतीतिपंचकः कषायवर्गः॥ ॥ इतिपंचकषायशतान्यभिसमस्यपंचाशन्महाकषायाः॥ महतांचकषाया
णांलक्षणोदाहरणार्थंव्याख्याताःभवंति। नहिविस्तरस्यप्रमाणमस्ति। नचाप्यतिसंक्षेपतोल्पबुद्धीनां
सामर्थ्यायोपकल्पते। तस्मादनतिसंक्षेपेणानतिविस्तरेणचोपदिष्टाः॥ एतावंतोल्पमत्यबुद्धीनांव्यव
हारायबुद्धिमतांचस्वालक्षणानुमानयुक्तिकुशलानांअनुक्तार्थज्ञानायेत्येवंवादिनंभगवंतमात्रेयमग्निवेशउ॰
वाचनैतानिभगवन्पंचकषायशतानिपूर्यंते। तानितानिह्येवांगानिसंप्रवर्तंते। महाकषायेष्विति।त
मुवाचभगवानात्रेयः॥ नैतदेवंबुद्धिमताद्रष्टव्यमग्निवेश॥ एकोपिह्यनेकांसंज्ञांलभते। कार्यांतरा
णिकुर्वन्यथा॥ पुरुषोबहूनांकर्मणांकरणेसमर्थः॥ सयद्यत्कर्मकुरुतेतस्यतस्यकर्मणःकर्तृकरणसं
प्रयुक्तं। तत्तन्नामविशेषंप्राप्नोति॥ तद्वदौषधद्रव्यमपिद्रष्टव्यं॥ यदिचैकमेवकिंचिद्द्रव्यमासादयेम
तथायुक्तं। यत्सर्वकर्मणांकरणेसमर्थंस्यात्कस्तन्यान्यदिच्छेदुपधारयितुमुपदेष्टुंवाशिष्येभ्यइति। तत्रश्लो
कः॥ यतोयावंतिथेर्द्रव्यैर्विरेचनशतानिषडुक्तानिसंग्रहेणेहतव्येवैषांषडाश्रयाः॥ रसालवणवर्ज्याश्च
कषायाइतिसंज्ञिताः॥ तस्मात्पंचविधायोनिःकषायाणामुदाहृताः॥ तथाकल्पनमप्येषामुक्तंपंचविधंपु
नः॥ महतांचकषायाणांपंचाशत्परिकीर्तिताः॥ पंचचापिकषायाणांशतान्युक्तानिभागशः॥ लक्षणा
र्थंप्रमाणाद्धिविस्तरस्यनविद्यते। नचाकमतिसंक्षेपःसामर्थ्यायोपकल्पते। अल्पबुद्धेरयंतस्मान्नाति
संक्षेपविस्तरः॥ मंदानांव्यवहारायबुधानांबुद्धिवृद्धये॥ पंचाशत्कोह्ययंग्रंथःकषायाणामुदाहृतः
तेषांकर्मसुबाह्येषुयोगमाभ्यंतरेषुच॥ संयोगंचप्रयोगंचयोवेदसभिषग्वरः॥ ॥ इतिषड्विरेचन
शताश्रितीयोनामचतुर्थोध्यायः॥ ४ ॥ ॥छ॥ अथातोमात्राशितीयमध्यायंव्याख्यास्यामः
इतिह॰यः॥ मात्राशीस्यात्आहारमात्रापुनरग्निबलापेक्षिणी।यावद्ध्यस्याशनमशितमनुप
हत्यप्रकृतिंयथाकालंजरांगच्छति॥ तावदस्यमात्राप्रमाणंवेदितव्यंभवति॥ तत्रशालिषष्टिकमुद्ग

चरक.सू. लावकपिंजलैणशशशरभशंबरादीनामाहारद्रव्याणि प्रकृतिलघून्यपि मात्रापेक्षीणि भवंति॥ तथापिष्टे
९॥ श्रीएवेकृतिमाषानूपौदकपिशितादीनआहारद्रव्याणि प्रकृतिगुरूण्यपि मात्रामेवापेक्षंते नचैवमुक्ते द्र
व्ये द्रव्यगुरुलाघवमकारणं मन्येत॥ लघूनि हि द्रव्याणि वाय्वग्निगुणबहुलानि॥ पृथिवीसोमगुणबहुलानित
९ राणि॥ तस्मात्स्वगुणादपि लघून्यग्निसंधुक्षणस्वभावान्यल्पदोषाणि चोच्यंते॥ सौहित्योपयुक्तान्यपि गु
रूणि पुनर्नाग्निसंधुक्षणस्वभावान्यसामान्यात्तश्चातिमात्रं दोषवंति सौहित्योपयुक्तान्यपि गुरूणि पुनर्व्या
यामाग्निबलात॥ सैषा भवत्यग्निबलापेक्षिणी मात्रा नच नापेक्षते द्रव्यं द्रव्यापेक्षया च त्रिभागसौहित्यमर्ध
सौहित्यं गुरूणामुपदिश्यंते॥ लघूनामपि च नातिसौहित्यमग्नेर्युक्तार्थं मात्राध्यन्नानमग्निमनुपहत्य प्रकृतिं बल
वर्णसुखायुषा योजयत्युपयोक्तारमवश्यमिति॥ भवंति चात्र॥ गुरुपिष्टमयं तस्मात्तंडुलान्पृथुकानपि॥ नजातु भुक्त
वान्खादेन्मात्रया वा बुभुक्षितः॥ वल्लूरं शुष्कशाकानि शालूकानि बिसानि च॥ नाभ्यसेद्गौरवान्मांसं कृशं नैवोपयो
जयेत्॥ कूर्चिकांश्च किलाटांश्च शौकरं गव्यमाहिषं॥ मत्स्यान्दधि च माषांश्च यवकांश्च न शीलयेत्॥ षष्टिकान्शा
लिमुद्गांश्च सैंधवामलके यवान॥ आंतरिक्षं पयः सर्पिर्जांगलं मधु चाभ्यसेत्॥ अत ऊर्ध्वं शरीरस्य कालमभ्यं
जनादिकं॥ स्वस्थवृत्तमभिप्रेत्य गुणतः संप्रवक्ष्यते॥ ६॥ सौवीरमंजनं नित्यं हितमक्ष्णोः प्रयोजयेत्॥ पंचरा
त्रेऽष्टरात्रे वा स्रावणार्थे रसांजनं॥ चक्षुस्तेजोमयं तस्य विशेषात्श्लेष्मतो भयं॥ ततः श्लेष्महरं कर्म
हितं दृष्टेः प्रसादनं॥ ९॥ विरेकदुर्बलं चक्षुरादित्यं प्राप्य सीदति॥ तस्माच्छ्राव्यं निशायां तु ध्रुवमंजनमि
ष्यते॥ यथाहि कनकादीनां दर्पणस्य मणेर्यथा॥ भस्मादिमार्जनादेव प्रभावात्प्रभा भवेत॥ १०॥ एवं
दृष्टिगतान्रोगान्मूलांजनककर्मणा॥ दृष्टिर्निरामया भाति निर्मेघ इव चंद्रमाः॥ ११॥ हरेणुकां प्रियंगुं
च पृथ्वीकां केसरं नखं॥ ह्रीबेरं चंदनं पत्रं त्वगेलोशीरपद्मकं॥ ध्यामकं मधुकं मांसीं गुग्गुल्वगुरुशर्करं ९
न्यग्रोधोदुंबराश्वत्थप्लक्षलोध्रत्वचः शुभाः॥ वन्यं सर्जरसं मुस्तं शैलेयं कमलोत्पले॥ श्रीवेष्टकं स
ल्लकीं च शुकबर्हमथापि च॥ पिष्ट्वा लिंपेच्छरेषीकां तां वर्तिं यवसंनिभां॥ अंगुष्ठसंमितां कुर्यादष्टांगु

Dr BHAU DAJI MEMORIAL

लसमां भिषक्॥ शुष्कां विगर्भां तां वर्तिं धूमनेत्रार्पितां नरः॥ स्नेहाक्तामग्निसंप्लुष्टां पिबेत्प्रायोगिकीं सुखां॥ वसाघृ
तमधूच्छिष्टैर्युक्तियुक्तैर्वरौषधैः॥ वर्तिं मधुरकैः कृत्वा स्नैहिकं धूममाचरेत्॥ १७॥ श्वेताज्योतिष्मती चैव ह
रितालं मनःशिला॥ गंधाश्चागुरुपत्राद्या धूमो मूर्धविरेचनः॥ १८॥ गौरवं शिरसः शूलं पीनसार्धावभेद
कौ॥ कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः॥ दंतदौर्बल्यमास्रावः श्रोत्रघ्राणाक्षिदोषजः॥ पूतिघ्राण
श्चास्यगंधश्च दंतशूलमरोचकः॥ २०॥ हनुमन्याग्रहः कंडूः कृमयो मुखपांडुता॥ श्लेष्मप्रसेको वैस्वर्यं गल
शुंड्युपजिह्विके॥ खालित्यं पिंजरत्वं च केशानां पतनं तथा॥ क्षवथुश्चातितंद्रा च बुद्धेर्मोहोतिनिद्रता॥ २२
धूमपानात्प्रशाम्यंति बलं भवति चाधिकं॥ शिरोरुहकपालानामिंद्रियाणां स्वरस्य च॥ नच वातकफा
त्मानो बलिनोप्यूर्ध्वजत्रुजाः॥ धूमरिक्तकपालस्य व्याधयस्युः शिरोगताः॥ २४॥ प्रयोगपाने तस्याष्टौ का
लाः संपरिकीर्तिताः॥ वातश्लेष्मसमुत्क्लेशः कालेष्वेषु हि लक्ष्यते॥ २५॥ स्नात्वा भुक्त्वा समुल्लिख्य क्षुत्वा दंतान्वि
घृष्य च॥ नावनांजननिद्रांते चात्मवान्धूमपो भवेत्॥ तथा वातकफात्मानो न भवंत्यूर्ध्वजत्रुजाः॥ रोगास्तस्य तु
पेयाः स्युरापानास्त्रिस्त्रयस्त्रयः॥ २७॥ परं द्विकालपायी स्यादह्नः कालेषु बुद्धिमान्॥ प्रयोगे स्नैहिके त्वेकं वैरे
च्यां त्रिश्चतुः पिबेत्॥ हृत्कंठेंद्रियसंशुद्धिर्लघुत्वं शिरसः शमः॥ यथेरितानां दोषाणां सम्यक्पीतस्य लक्षणं॥
बाधिर्यमांध्यं मूकत्वं रक्तपित्तं शिरोभ्रमं॥ अकाले चातिपीतश्च धूमः कुर्यादुपद्रवान्॥ ३०॥ तत्रेष्टं सर्पिषः पा
नं नावनांजनतर्पणं॥ स्नैहिकं धूमजे दोषे वायुः पित्तानुगो यदि॥ शीतं तु रक्तपित्ते स्याच्छ्लेष्मपित्ते विरूक्षणं॥
परं त्वतः प्रवक्ष्यामि धूमो येषां विगर्हितः॥ ३२॥ न विरिक्तः पिबेद्धूमं न कृते बस्तिकर्मणि॥ न रक्ती न विषेणा
र्त्तो न शोचन्न च गर्भिणी॥ न श्रमे न मदे नामे न पित्ते न प्रजागरे॥ न मूर्छाभ्रमतृष्णासु न क्षीणे नापि च
क्षते॥ न मद्यदुग्धे पीत्वा च न स्नेहं न च माक्षिकं॥ न चातिभुक्तवान्दध्ना न रूक्षः क्रुद्ध एव च॥ ३५॥ न
तालुशोषे तिमिरे शिरस्यभिहते न च॥ न शंखके न रोहिण्यां न मेहे न मदात्यये॥ ३६॥ एषु धूममकालेषु
मोहात्पिबति यो नरः॥ तस्य रोगाः प्रवर्धंते दारुणा धूमविभ्रमात्॥ ३७॥ धूमयोग्यः पिबेद्दोषे शिरोघ्रा

च॰सू॰५॰

९

णाक्षिसंश्रयं॥ घ्राणेनास्येन कंठस्थे मुखेन घ्राणयोर्वमेत्॥३८॥ आस्येन धूमकवलान् पिबन् घ्राणेन नोद्वमेत्॥
प्रतिलोमं गतो ह्याशु धूमो हिंस्याद्धि चक्षुषी॥३९॥ ऋज्वंगचक्षुस्तच्चेताः सूपविष्टस्त्रिपर्ययं। पिबेच्छिद्रं पिधायैकं ना
सया धूममाताबान्॥४०॥ चतुर्विंशतिकं नेत्रं मंगुलैर्वैरेचनं॥ द्वात्रिंशदंगुलं स्नेहे प्रयोगेऽध्यर्धमिष्यते॥४१
ऋजुत्रिकोषाकंमच्छिद्रं कोलास्थ्यग्रप्रमाणकं॥ बस्तिनेत्रसमद्रव्यं धूमनेत्रं प्रशस्यते॥४२॥ दूराद्विनिर्गतः पर्वच्छिन्नो नाडी
तनूकृतः। नेंद्रियं बाधते धूमो मात्राकालनिषेवितः॥ वर्षे वर्षेणुतैलं च कालेषु त्रिषु नाचरेत्॥ प्रावृट्शरद्वसंतेषु ग
तमेघे नभस्तले॥४४॥ नस्यकर्म यथाकालं यो यथोक्तं निषेवते॥ न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते॥४५
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः॥ न च केशाः प्रलुप्यंते वर्धंते च विशेषतः॥ मन्यास्तंभः शिरःशू
लमर्दितं हनुसंग्रहः॥ पीनसार्धावभेदौ च शिरःकंपश्च शाम्यति॥४७॥ शिराः शिरःकपालानि संधयः स्नायुकंड
राः॥ नावनप्रीणिताश्चास्य लभंतेऽभ्यधिकं बलं॥ मुखं प्रसन्नोपचितं स्वरः स्निग्धस्थिरो महान्॥ सर्वेंद्रियाणां वि
मलत्वं बलं भवति चाधिकं॥४९॥ न चास्य रोगाः सहसा प्रभवंत्यूर्ध्वजत्रुजाः॥ जीर्यतो चोत्तमांगेषु जरा न लभते बलं॥
चंदनागुरुणी पत्रं दार्वीत्वग्मधुकं बला॥ प्रपौंडरीकं सूक्ष्मैला विडंगं बिल्वमुत्पलं॥५२॥ ह्रीबेरमभयं धान्यं त्वङ्मु
स्तं सारिवा स्थिरा॥ जीवंती पृश्निपर्णी च सुरदारु शतावरी॥ हरेणुं बृहती व्याघ्रीं सुरभिं पद्मकेसरं॥ विपाचयेच्छतगुणे
माहेंद्रे विमलेऽंभसि॥५५॥ तैलाद्दशगुणं शेषं कषायमवतारयेत्॥ तेन तैलं कषायेण दशकृत्वो विपाचयेत्॥
अथास्य दशमे पाके समांशं छागलं पयः॥ दद्यादेषोणुतैलस्य नावनीयस्य संविधिः॥५६॥ अहन्यहाच्च स
प्ताहमेतत्कर्म समाचरेत्॥ निवातोष्णसमाचारो हिताशी नियतेंद्रियः॥ तैलमेतत्त्रिदोषघ्नमिंद्रियाणां बलप्रदं॥
प्रयुंजानो यथाकालं यथोक्तानश्नुते गुणान्॥५८॥ आपोथिताग्रं द्वौ कालौ कषायकटुतिक्तकं॥ भक्षयेद्दंतपव
नं दंतमांसान्यबाधयन्॥५९॥ निहंति गंधवैरस्यं जिह्वादंतास्यजं मलं॥ निःकृष्य रुचिमाधत्ते सद्यो दंतविशोधनं ९
६० करंजकरवीरार्कमालतीककुभासना॥ शस्यंते दंतपवने ये चाप्येवंविधा द्रुमाः॥ सुवर्णरूप्यताम्राणि त्रपुसी
समयानि च॥ जिह्वानिर्लेखनानि स्युरतीक्ष्णान्यृजूनि च॥६२॥ जिह्वामूलगतं यच्च मलं श्वासावितं च तत्

दौर्गंध्यं भजते तेन तस्माज्जिह्वां विशोधयेत् ६३ धार्याण्यास्येन वैशद्यरुचिसौगंध्यमिच्छता जातीकटुकपूगानां लवं
गस्य फलानि च कंकोलकफलं चैव तांबूलैः सह लक्षयेत् कर्पूरस्य तु निर्यासः सूक्ष्मैलाया फलानि च ६५ हन्वो
र्बलं स्वरबलं वदनोपचयः परः स्याच्च परं च रसज्ञानमन्ने च रुचिरुत्तमा न चास्य कंठशोषः स्यान्नौष्ठयोः स्फुटनाद्भ
यं न च दंताः क्षयं यांति दृढमूला भवंति च ६७ न शूल्यते न चाम्लेन हृष्यंते भक्षयंति च खरानपि परान् भक्ष्यां
स्तैलगंडूषधारणात् नित्यं स्नेहार्द्रशिरसः शिरःशूलं न जायते न खालित्यं न पालित्यं न केशाः प्रपतंति च ६९
बलं शिरःकपालानां विशेषेणाभिवर्धते दृढमूलाश्च दीर्घाश्च कृष्णाः केशा भवंति च इंद्रियाणि प्रसीदंति
सुत्वग्भवति चाननं निद्रालाभः सुखं च स्यान्मूर्ध्नि तैलनिषेवणात् ७१ स्नेहास्यगाद्यथा कुंभश्चर्म स्नेहवि
मर्दनात् भवत्युपांगाणाच्च दृढः क्लेशसहस्तथा ७२ तथा शरीरमभ्यंगाद्दृढं सुत्वक् च जायते प्रशांतमारुताबा
धं क्लेशव्यायामसंसहं स्पर्शने चाधिको वायुः स्पर्शनं च त्वगाश्रितं त्वच्यश्च परमोऽभ्यंगस्तस्मात्तं शीलयेन्नरः
न चाभिघाताभिहतं गात्रमभ्यंगसेविनः विकारं भजतेऽत्यर्थं बले कर्मणि वा क्वचित् ७६ सुस्पर्शोपचितां
गश्च बलवान्प्रियदर्शनः भवत्यभ्यंगनित्यत्वान्नरोऽल्पजर एव वा खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयो
: सद्य एवोपशाम्यंति पादाभ्यंगनिषेवणात् ७८ जायते सौकुमार्यं च बलं स्थैर्यं च पादयोः दृष्टिः प्रसाद
लभते मारुतश्चोपशाम्यति न चास्य गृध्रसीवातः पादयोः स्फुटनं न च न शिरास्नायुसंकोचः पादाभ्यं
गेन पादयोः ८० दौर्गंध्यं गौरवं तंद्रां कंडूमलमरोचकं स्वेदबीभत्सतां हंति शरीरपरिमार्जनं पवित्रं वृष्य
मायुष्यं श्रमस्वेदमलापहं शरीरबलसंधानं स्नानमोजस्करं परं ८२ काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्र
हर्षणं श्रीमत्पारिषदं शस्तं निर्मलांबरधारणं ८३ वृष्यं सौगंध्यमायुष्यं काम्यं पुष्टिबलप्रदं सौमनस्य
मलक्ष्मीघ्नं गंधमाल्यनिषेवणं धन्यं मांगल्यमायुष्यं श्रीमद्व्यसनसूदनं हर्षणं काम्यमोजस्यं रत्नाभर
णधारणं मेध्यं पवित्रमायुष्यमलक्ष्मीकलिनाशनं पादयोर्मलमार्गाणां शौचाधानमभीक्ष्णशः ८६
पौष्टिकं धन्यमायुष्यं शुचिरूपविराजनं केशश्मश्रुनखादीनां कल्पनं संप्रसाधनं ८७ चक्षुष्यं स्पर्शने

चरकसू० हितं पादयोर्व्यसनापहं बल्यं पराक्रमसुखं वृष्यं पादत्रधारणं ९८ ईतेर्विधमनं वर्ण्यं गुप्त्यावरणशंकरं धर्मा
निलरजोंबुघ्नं छत्रधारणमिष्यते स्खलतः संप्रतिष्ठानं शत्रूणां च निषेधनं अवष्टंभनमायुष्यं भयघ्नं दंड
धारणं ९० रजोवध्वायसूर्यांशुहिमानिलनिवारणं प्रतिश्यायशिरःशूलदुर्वोष्णीषधारणं नगरीनग
१० रस्येव रथस्येव रथी सदा स्वशरीरस्य मेधावी कृत्येष्ववहितो भवेत् ९२ इत्युपायान्निषेवेत ये स्युर्धर्मावि
रोधितः सुखमध्ययनं चैव सुखमेवं समश्नुते ९३ तत्र श्लोकाः ॥ मात्राद्रव्याणि मात्रां च संश्रित्य गुरुलाघ
वं द्रव्याणां गर्हितो भ्यासो येषां येषां च शस्यते अंजनं धूमवर्तिश्च त्रिविधा वर्तिकल्पना धूमपानगुणाः
कालाः पानमानं च शस्यते ९५ आपत्तिचिह्नं भैषज्यं धूमो येषां च गर्हितः योज्यो यन्मयं नेत्रं यथा यस्य
च यादृशं ९६ नस्यकर्मगुणा नस्तः कार्यं यच्च यदा यथा भक्षयेद्दंतपवनं यथा यद्गुणं च यत् ९७ यदर्थं
यानि वास्येन धार्याणि कवलग्रहे तैलस्य ये गुणा दृष्टाः शिरस्तैलगुणाश्च ये ९८ कर्णतैले तथाभ्यंगे पा
दाभ्यंगे गमार्जने स्नाने वाससि शुद्धे वा सौगंध्ये रत्नधारणे ९९ शौचे संहरणे लोम्नां पादत्रछत्रधारणे गु
णा मात्राशितीयेस्मिं तथोक्ता दंडधारणे १०० ॥ इति मात्राशितीयो नाम पंचमोध्यायः ५ छ छ०
अथातस्तस्याशितीयमध्यायं व्याख्यास्यामः ॥ ॥ इति ह० त्रेयः ॥ तस्याशिताद्याद्दाहारात्बलं वर्णश्च वर्धते
यस्यर्तुसात्म्यं विदितं चेष्टाहारव्यपाश्रयं इति ॥ इह खलु संवत्सरं षडंगमृतुविभागेन विद्यात् तस्यादित्याद
यनमादानं च त्रीनृतून् शिशिरादीन् ग्रीष्मांतान् व्यवस्येत् ॥ वर्षादीन् पुनर्हेमंतांतान् दक्षिणायनं विसर्गं
च विसर्गे पुनर्वायवो नातिरूक्षाः प्रवांति पुनरादाने सोमश्चाव्याहतबलः शिशिराभिर्भाभिरापूरयन् जगदा
प्याययति शश्वतो विसर्गः सौम्यः आदानं पुनराग्नेयं तावेतावर्कवायू सोमश्च कालस्वभावमार्गपरिग्र
हीताः कालर्तुरसदोषदेहबलानिर्वृत्तिप्रत्ययभूताः समुपदिश्यंते १ तत्र रविर्भाभिरादानो जगतः स्नेहं वायवस्ती १०
व्ररूक्षाश्चोपशोषयंतः शिशिरवसंतग्रीष्मेषु यथाक्रमं रौक्ष्यमुत्पादयंतो रूक्षान् रसांस्तिक्तकषायकटुकांश्चाभि
वर्धयंतो नृणां दौर्बल्यमावहंति ॥ वर्षाशरद्धेमंतेषु तु दक्षिणाभिमुखेर्के कालमार्गमेघवातवर्षाभिहतप्र

तापे शांते निवाब्याहतबले माहेंद्रसलिलप्रशांतसंतापे जगत्यरूक्षा रसाः प्रवर्धंते ॥ अम्ललवणमधुराः यथाक्रमं
च बलमुपचीयते नृणामिति ॥ भवंति चात्र श्लोकाः ॥ आदावंते च दौर्बल्यं विसर्गादानयोर्नृणां ॥ मध्ये मध्यबलं ते
ते श्रेष्ठमग्ने विनादिशेत् ॥ १ ॥ शीते शीतानिलस्पर्शसंरुद्धो बलिनां बली ॥ पक्ता भवति हेमंते मात्राद्रव्यगुरुःक्षम
स यदा नेंधनं युक्तं लभते देहजं तमः ॥ रसं हिनस्यतो वायुः शीतः शीते प्रकुप्यति ॥ ३ ॥ तस्मात्तुषारसमये स्निग्धा
म्ललवणान् रसान् ॥ औदकानूपमांसानां मेद्यानामुपयोजयेत् ॥ ४ ॥ बिलेशयानां मांसानि प्रसहानां भृतानि
च ॥ भक्षयेन्मदिरां सीधु मधु चानुपिबेन्नरः ॥ ५ ॥ गोरसानिक्षुविकृतीर्वसां तैलं नवौदनं ॥ हेमंतेभ्यस्यतस्तोय
मुष्णं चायुर्न हीयते ॥ अभ्यंगोत्सादनं मूर्ध्नि तैलं जेंताकमातपं ॥ भजेद्भूमिगृहं चोष्णमुष्णं गर्भगृहं तथा ॥ ७ ॥
शीते सुसंवृतैः सेव्यं यानं शयनमासनं ॥ प्रावाराजिनकौशेयप्रवेणीकुथकास्तृतं ॥ ८ ॥ गुरूष्णवासा दिग्धांगो
गुरुणागुरुणा सदा ॥ शयने प्रमदां पीनां विशालोपचितस्तनीं ॥ आलिंग्यागुरुदिग्धांगीं सुप्यात्समदमन्मथः प्र
कामं च निषेवेत मैथुनं शिशिरागमं ॥ १० ॥ हेमंतशिशिरे तुल्ये शिशिरेल्पं विशेषणं ॥ रूक्षमादानजं शीतं मेघमा
रुतवर्षजं ॥ तस्माद्धैमंतिकः सर्वः शिशिरे विधिरिष्यते ॥ निवातमुष्णं त्वधिकं शिशिरे गृहमाश्रयेत् ॥ कटुति
क्तकषायाणि रूक्षं शीतलघूनि च ॥ वर्जयेदन्नपानानि शिशिरे शीतलानि च ॥ वसंते निचितः श्लेष्मा दिनकृ
द्भाभिरीरितः ॥ कायाग्निं बाधते रोगांस्ततः प्रकुरुते बहून् ॥ १४ ॥ तस्माद्वसंते कर्माणि वमनादीनि कारयेत् ॥
गुर्वम्लस्निग्धमधुरं दिवास्वप्नं च वर्जयेत् ॥ व्यायामोद्वर्तनं धूमं कवलग्रहमंजनं सुखांबुना शौचविधिः
शीलयेत्कुसुमागमे ॥ १६ ॥ चंदनागुरुदिग्धांगो यवगोधूमभोजनं ॥ शारभं शाशमैणेयं मांसं लावकपिंज
लं ॥ भक्षयेन्निगदं सीधु पिबेन्माध्वीकमेव वा ॥ वसंतेनुभवेत्स्त्रीणां काननानां च यौवनं ॥ १८ ॥ मयूखैर्जगतः स्ने
होग्रीष्मे पेपीयते रविः ॥ स्वादु शीतं द्रवं स्निग्धमन्नपानं तदा हितं ॥ शीतं सशर्करं मंथं जांगलान्मृगपक्षिणः
घृतं पयः सशाल्यन्नं भजन्ग्रीष्मे न सीदति ॥ मद्यमल्पं न वा पेयमथवा सुबहूदकं ॥ लवणाम्लकटूष्णानि
व्यायामं चात्र वर्जयेत् ॥ २१ ॥ दिवा शीतगृहे निद्रां निशि चंद्रांशुशीतले ॥ सेव्यमानो भजेदास्यां मुक्तामणि

विभूषितः॥ काननानि च शीतानि जलानि कुसुमानि च॥ ग्रीष्मकाले निषेवेत मैथुनाद्विरतो नरः॥ आदानदुर्बले देहे
पक्ता भवति दुर्बलः॥ स वर्षास्वनिलादीनां दूषणैर्बाध्यते पुनः॥ भूबाष्पान्मेघनिस्यंदात्पाकादम्लाज्जलस्य च॥ व
र्षास्वग्निबले क्षीणे कुप्यंति पवनादयः॥ तस्मात्साधारणः सर्वो विधिर्वर्षासु शस्यते॥ उदमंथं दिवास्वप्नमवश्यायं
नदीजलं॥ व्यायाममातपं चैव व्यवायं चात्र वर्जयेत्॥ पानभोजनसंस्कारान्प्रायः क्षौद्रान्वितान्भजेत्॥ व्यक्ता
म्ललवणस्नेहं वातवर्षाकुलेऽहनि॥ विशेषशीते भोक्तव्यं वर्षास्वनिलशांतये॥ पुनः संरक्षता चाग्निं यवगोधूमशाल
यः॥ पुराणा जांगलैर्मांसैर्भोज्या यूषैश्च संस्कृतैः॥ पिबेत्क्षौद्रान्वितं चाल्पं माध्वीकारिष्टमंबु वा॥ माहेंद्रं तप्तशीतं
वा कौपं सारसमेव वा॥ प्रघर्षोद्वर्तनस्नानगंधमाल्यपरो भवेत्॥ लघुशुद्धांबरः स्थानं भजेदक्लेदि वार्षिकं॥ वर्षाशी
तोचितांगानां सहसैवार्करश्मिभिः॥ तप्तानामाचितं पित्तं प्रायः शरदि कुप्यति॥ तत्रान्नपानं मधुरं ल - - - -

धारिते॥५॥ स्वेदाभ्यंगावगाहाश्च वर्तयो बस्तिकर्म च॥ हितं प्रतिहते वर्चस्यन्नपानं प्रमाथि च॥६॥ मेढ्रवृषणयोः शू
लमंगमर्दो हृदि व्यथा॥ भवंति प्रतिहते शुक्रे विबद्धं मूत्रमेव च॥ तत्राभ्यंगोऽवगाहश्च मदिरा चरणायुधाः॥ शालिः पयो
निरूहश्च शस्तं मैथुनमेव च॥८॥ संगो विण्मूत्रवातानामाध्मानं वेदना क्लमः॥ जठरे वातजाश्चान्ये रोगाः स्युर्वात
निग्रहात्॥ स्नेहस्वेदविधिस्तत्र वर्तयो भोजनानि च॥ पानानि बस्तयश्चैव शस्तं वातानुलोमनं॥१०॥ कंडूकोठारुचि
व्यंगशोथपांड्वामयज्वराः॥ कुष्ठहृल्लासवीसर्पाश्छर्दिनिग्रहजा गदाः॥११॥ भुक्त्वा प्रच्छर्दनं धूमो लंघनं रक्तमोक्ष
णं॥ रूक्षान्नपानं व्यायामो विरेकश्चात्र शस्यते॥१२॥ मन्यास्तंभः शिरःशूलमर्दितार्धावभेदकौ॥ इंद्रियाणां च
दौर्बल्यं क्षवथोः स्याद्विधारणात्॥१३॥ तत्रोर्ध्वजत्रुकेऽभ्यंगः स्वेदो धूमः सनावनः॥ हितं वातघ्नमद्यं च घृतं चौत्त
रभाक्तिकं॥ हिक्काकासारुचिः कंपो विबंधो हृदयोरसोः॥ उद्गारनिग्रहात्तत्र हिक्कायास्तुल्यमौषधं॥१५॥ विनामा
क्षेपसंकोचाः सुप्तिः कंपः प्रवेपनं॥ जृंभाया निग्रहात्तत्र सर्वं वातघ्नमौषधं॥१६॥ कार्श्यदौर्बल्यवैवर्ण्यांग
मर्दोऽरुचिर्भ्रमः॥ क्षुद्वेगनिग्रहात्तत्र स्निग्धोष्णं लघु भोजनं॥१७॥ कंठास्यशोषो बाधिर्यं श्रमः सादो हृदि
व्यथा॥ पिपासानिग्रहात्तत्र शीतं तर्पणमिष्यते॥ प्रतिश्यायोऽक्षिरोगश्च हृद्रोगः सारुचिर्भ्रमः॥ बाष्पनिग्रह
णात्तत्र स्वप्नो मद्यं प्रियाः कथाः॥१९॥ जृंभांगमर्दस्तंद्रा च शिरोरोगाक्षिगौरवं॥ निद्राविधारणात्तत्र स्वप्नः सं
वाहनानि च॥ गुल्महृद्रोगसंमोहाः श्रमनिश्वासधारणात्॥ जायंते तत्र विश्रामो वातघ्न्यश्च क्रिया हिताः॥
वेगनिग्रहजा रोगा य एते परिकीर्तिताः॥ इच्छंस्तेषामनुत्पत्तिं वेगानेतान्न धारयेत्॥२२॥ इमांस्तु धारयेद्वेगा व्यं
न्हितैषी प्रेत्य चेह च॥ साहसानामशस्तानां मनोवाक्कायकर्मणां॥ लोभशोकभयक्रोधमानवेगान्विधार
येत्॥ नैर्लज्ज्येर्ष्यातिरागाणामभिध्यायाश्च बुद्धिमान्॥२४॥ परुषस्यातिमात्रस्य सूचकस्यानृतस्य च॥ वा
क्यस्याकालयुक्तस्य धारयेद्वेगमुत्थितं॥२५॥ देहप्रवृत्तिर्या काचिद्वर्तते परपीडया॥ स्त्रीभोगस्तेयहिंसा
द्या तस्या वेगान्विधारयेत्॥ पुण्यः शब्दो विपापत्वान्मनोवाक्कायकर्मणां॥ धर्मार्थकामान्पुरुषः सुखी भुं
क्ते चिनोति च॥२७॥ शरीरचेष्टा या चेष्टा स्थैर्यार्था बलवर्धनी॥ देहव्यायामसंख्याता मात्रया तां समाचरे
त्॥

च॰ सू॰

१२

॥२८॥ स्याच्छिथिलं कृशं कुर्याद्गुरुकर्षणादपि। आयामो वृद्धिर्गात्राणां व्यायाम इति शब्दितः॥ २९॥ गात्रेष्वायम्यमा
नेषु तेषु रक्तं विभज्यते। तद्विभक्तं विभजेद्दीर्घं मांसं भवति मर्दनात्॥ ३०॥ श्वेतः सकफो वायुर्यः स चापि प्रतिसार्य
ते। मारुते प्रगुणीभूते सकलं गात्रेषु जायते। कान्तवर्णत्वमङ्गानां सुविभक्तत्वमेव च। पुष्टिः स्यात् छ्रमतानिः श्वासचेष्ट
त्वमग्नेरपि च॥ ३२॥ लाघवं कर्मसामर्थ्यं स्थैर्यं दुःखसहिष्णुता। दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते। क्रमस्त
स्यासदारोग्यशरीरबलपुष्टिदः। आरोग्यबलपुष्टिघ्नः स एवाक्रमसेवितः। स्वेदागमः श्वासवृद्धिर्गात्राणां लाति
लाघवं। हृदयाद्युपरोधश्च इति व्यायामलक्षणं॥ ३५॥ श्रमः क्लमः क्षयस्तृष्णा रक्तपित्तं प्रतामकः। अतिव्या
यामतः कासो ज्वरश्छर्दिश्च जायते॥ ३६॥ अरोगो जीर्णभक्तश्च नरो व्यायाममाचरेत्॥ नातिपीडाकरो देहे बल
वान् स्त्रैणगः। व्यायामोष्मशरीरत्वात् सदा च प्रविलापितः। श्लेष्मा निश्लेष्मकाः रोगा न भवन्ति शरीरिणः।
अजीर्णं न स्यादामरसो व्यायामेनाकुलीकृतः। देहे विसर्पान् जनयेद् कपि समयान् गदान्॥ ३९॥ अतिव्याया
म भाराध्वकर्मभिश्चातिकर्शितः। क्रोधशोकभयायासैः क्रान्ता ये चापि मानवाः॥ ४०॥ बालवृद्धाः प्रवाता
श्च ये चोच्चैर्बहुभाषकाः। ते वर्जयेयु व्यायामं क्षुधिताः तृषिताश्च ये॥ ४२॥ येतिव्यायामतो रोगा मानवानां
भवन्ति हि। घृतमांसरसः क्षीरवस्तिभिस्तानुपाचरेत्॥ व्यायामहास्यभाष्याध्वग्राम्यधर्मप्रजागरान्॥ नोचि
तानपि सेवेत बुद्धिमानतिमात्रया॥ ४३॥ एतानेवंविधांश्चान्यान् योऽतिमात्रं निषेवते। गजं सिंह इवाकर्षन् स
हसा स विनश्यति। उचितादहिताद्धीमान् क्रमशो विरमेन्नरः॥ हितं क्रमेण सेवेत क्रमश्चात्रोपदिश्यते॥ ४५
प्रक्षेपापचये ताभ्यां क्रमः पादांशिको भवेत्॥ एकान्तरं ततश्चोर्ध्वं द्व्यन्तरं त्र्यन्तरं तथा॥ क्रमेणापचिता
दोषाः क्रमेणोपचिताः गुणाः॥ सन्तो यान्त्यपुनर्भावमप्रकम्प्या भवन्ति च॥ समपित्तानिलकफाः केचिद्गर्भा
दिमानवाः॥ ४७॥ दृश्यन्ते वातलाः केचित् पित्तलाः श्लेष्मलास्तथा। तेषामनातुराः पूर्वे वातलाद्याः सदातुराः
दोषानुशयिता ह्येषां देहप्रकृतिरुच्यते। विपरीतगुणस्तेषां स्वस्थवृत्तेर्विधिर्हितः॥ समसर्वरसं सात्म्यं स
मधातोः प्रशस्यते॥ ५०॥ द्वे अधः सप्त शिरसि खानि स्वेदमुखानि च॥ मलायनानि बाध्यन्ते दुष्टैर्मात्राधिकै

१२

र्मलैः॥ ५१॥ मलवृद्धिं गुरुत्वाल्लाघवान्मलसंक्षये॥ मलायनानि बुध्येत सङ्गोत्सर्गादतीव च॥ ५२॥ तान् दोषलिं
गैरादिश्य व्याधीन् साध्यानुपाचरेत्॥ व्याधिहेतुप्रतिद्वन्द्वैर्मात्राकालौ विचारयन्॥ विषमस्वस्थवृत्तानामेते रोगा
स्तथापरे॥ जायन्ते नातुरस्तस्मात् स्वस्थवृत्तपरो भवेत्॥ माधवप्रथमे मासे नभस्यप्रथमे पुनः॥ सहस्यप्रथमे
चैव वाहयेद्दोषसञ्चयं॥ स्निग्धस्विन्नशरीराणामूर्ध्वं चाधश्च नित्यशः॥ ५५॥ वस्तिकर्म ततः कुर्यान्नस्यकर्म
च बुद्धिमान्॥ यथाक्रमं यथायोगमत ऊर्ध्वं प्रयोजयेत्॥ रसायनानि सिद्धानि वृष्ययोगांश्च कालवित्॥ रो
गास्तस्य न जायन्ते प्रकृतिस्थेषु धातुषु॥ ५७॥ धातवश्चाभिवर्धन्ते जरां मान्द्यमुपैति च॥ निजानामितरेषां तु
पृथगेवोपदिश्यते॥ ये भूतविषवाय्वग्निसम्प्रहारादिसम्भवाः॥ ५९॥ नृणामागन्तवो रोगाः प्रज्ञा तेष्वपरा
ध्यति॥ ईर्ष्याशोकभयक्रोधमानद्वेषादयश्च ये॥ ६०॥ मनोविकारास्तेऽप्युक्ताः सर्वे प्रज्ञापराधजाः॥ त्यागः
प्रज्ञापराधानामिन्द्रियोपशमः स्मृतिः॥ देशकालात्मविज्ञानं सद्वृत्तस्यानुवर्तनं॥ आगन्तूनामनुत्पत्तावेष मा
र्गो निदर्शितः॥ ६२॥ प्राज्ञः प्रागेव तत्कुर्याद्धितं विद्याद्यदात्मनः॥ आप्तोपदेशप्रज्ञानं प्रतिपत्तिश्च कारकः॥
विकाराणामनुत्पन्नानामुत्पन्नानां च शान्तये॥ पापवृत्तवचःसत्वाः सूचकाः कलहप्रियाः॥ ६४॥ मर्मोपहासिनो
लुब्धाः परवृद्धिद्विषः शठाः॥ परापवादरतयश्चपला रिपुसेविनः॥ निर्घृणास्त्यक्तधर्माणः परिवर्ज्या न
राधमाः॥ बुद्धिविद्यावयःशीलधैर्यस्मृतिसमाधिभिः॥ वृद्धोपसेविनो वृद्धाः स्वभावज्ञा गतव्यथा॥
सुमुखाः सर्वभूतानां प्रशान्ताः शंसितव्रताः॥ ६७॥ सेव्याः सन्मार्गवक्तारः पुण्यश्रवणदर्शनाः॥ आहा
राचारचेष्टासु सुखार्थी प्रेत्य चेह च॥ ६८॥ परं प्रयत्नमातिष्ठेद्बुद्धिमान् हितसेवने॥ न नक्तं दधि भुञ्जीत न
चाप्यघृतशर्करं॥ नामुद्गयूषं नाक्षौद्रं नोष्णं नामलकैर्विना॥ ज्वरासृक्पित्तवीसर्पकुष्ठपाण्ड्वामयभ्रमा
न्॥ ७०॥ प्राप्नुयात्कामलां चोग्रां विधिं हित्वा दधिप्रियः॥ अलक्ष्मीदोषयुक्तत्वान्नक्तं तु दधि वर्जितं॥ ७२॥
श्लेष्मलं स्यात्ससर्पिष्कं दधि मारुतसूदनं॥ न च सन्दूषयेत्पित्तं सारिकं च विपच्यते॥ शर्करासंयुतं दद्यात्तृ
ष्णादाहनिवारणं॥ मुद्गसूपेन संयुक्तं दद्याद्रक्तानिलापहं॥ ७३॥ क्षारसंयुक्तं ... सूक्ष्मं ... क्षौद्रयुक्तं स्वादुरसं ...

रुग्ममाश्चाथ येइंगवानधार्यायुक्तं च निर्दूरते॥ ७४॥ तत्र श्लोकाः॥ वेगावेगसमुत्थाश्च रोगास्तेषां च भेषजं॥ वेगा
चा०सू० येऽत्र विधार्याश्च यदर्थं यद्धिताहितं॥ ७५॥ उचिते चाहिते वर्ज्ये सेव्ये चानुचिते क्रमः॥ यथाप्रकृति चाहारो मला
यनगदौषधं॥ ७६॥ भविष्यतामनुत्पत्तौ रोगाणामौषधं च यत्॥ वर्ज्याः सेव्याश्च पुरुषा धीमता येसुखा
१३ र्थिना॥ विधिना रधिसेव्यं च येन यस्मान्न यन्त्रिणः॥ न वेगान्धारणाध्याये सर्वमेवावदन्मुनिः॥ ७८॥ ७
इतिश्री चरके सूत्रस्थाने वेगान्धारणीयो नाम सप्तमोध्यायः ७ ७ ७॥ अथात इन्द्रियोपक्रमणीय
मध्यायं व्याख्यास्यामः॥ ॥इति ह आत्रेयः॥ इह खलु पंचेंद्रियाणि पंचेंद्रियद्रव्याणि पंचेंद्रियअधिष्ठाना
नि पंचेंद्रियार्थाः पंचेंद्रियबुद्धयो भवंतीत्युक्तमिंद्रियाधिकारे॥ अतींद्रियं पुनर्मनः सत्वसंज्ञकं चेत इत्याहु
रेके॥ तदर्थात्मगुणसंपदायत्तचेष्टं॥ चेष्टाप्रत्ययभूतमिंद्रियाणां स्वार्थेंद्रियार्थसंकल्पव्यभिचरणाच्चानेकमे
कस्मिन्पुरुषे सत्वरजस्तमःशुद्धगुणयोगाच्च॥ नचानेकमेककालं वर्तते॥ तस्मान्नैककाला सर्वेंद्रियप्रवृ
त्तिर्यद्गुणं चाभीक्ष्णं पुरुषमनुवर्तते॥ सत्वं तत्सत्वमेवोपदिशंति ऋषयो बाहुल्यानुशयात्मनः पुरःसराणि
इंद्रियाण्यर्थग्रहणसमर्थानि भवंति॥ तत्र पंचेंद्रियद्रव्याणि खं वायुर्ज्योतिरापो भूरिति॥ पंचेंद्रियाधिष्ठा
नानि॥ अक्षिणी कर्णौ नासिका जिह्वा त्वक् पंचेंद्रियार्थाः शब्दस्पर्शरूपरसगंधाः॥ पंचेंद्रियबुद्धयश्चक्षु
र्बुध्यादिकाः॥ पुनरिंद्रियार्थसत्वात्मसंनिकर्षजाः क्षणिका निश्चयात्मिकाश्चेत्येतत्पंचकं॥ मनोर्थो बुद्धि
रात्मा चात्मद्रव्यगुणसंग्रहः॥ शुभाशुभप्रवृत्तिनिवृत्तिहेतु द्रव्याश्रितं च कर्म यदुच्यते॥ सा क्रियेति॥
तत्रानुमानगम्यानां पंचमहाभूतविकारसमुदायात्मकानामपि सतामिंद्रियाणां तेजश्चक्षुषि खं श्रोत्रे
घ्राणे क्षितिरापो रसने स्पर्शनेऽनिलो विशेषेणोपदिश्यते॥ तत्र यद्यदात्मकमिंद्रियं विशेषात्तत्तदात्मकमे १३
वार्थमनुधावति॥ तत्स्वभावाद्विभुत्वाच्च॥ तदर्थातियोगायोगमिथ्यायोगैः समनस्कमिंद्रियं विकृतिमापद्य
मानं यथास्वं बुध्युपघाताय संपद्यते॥ सम्यग्योगात्पुनः प्रकृतिमनुवर्तमानं यथास्वबुद्धिमाप्याययति
मनसस्तु चिंत्यमर्थस्तत्र मनसो मनोबुद्धेश्च त एव समातिहीनमिथ्यायोगाः प्रकृतिविकृतिहेतवो भवंति॥

तत्रेंद्रियाणां समनस्कानां अनुपतप्तानामुपतप्तानां च प्रकृतिभावे प्रयतितव्यमेभिर्हेतुभिस्तथा यथा सात्म्येंद्रिया
र्थसंयोगेन बुध्या सम्यगवेक्ष्यावेक्ष्य कर्मणां सम्यक्प्रतिपादनेन देशकालात्मदोषप्रकृतिगुणविपरीतोपसेवनं
चेति तस्मादात्महितं चिकीर्षता सर्वेण सर्वास सर्वदा स्मृतिमास्थाय सद्वृत्तमनुष्ठेयं॥ तदनुतिष्ठन्युगपत्संपादयत्य
र्थद्वयमारोग्यमिंद्रियजयं चेति॥ तत्सद्वृत्तमखिलेनोपदेक्ष्यामः॥ तद्यथा देवगोब्राह्मणगुरुवृद्धसिद्धाचार्या
नर्चयेदग्निमुपचरेदोषधीः प्रशस्ता धारयेत॥ द्वौ कालावुपस्पृशेन्मलायनेष्वभीक्ष्णं पादयोश्च वैमल्यमा
दध्यात्॥ त्रिः पक्षस्य केशश्मश्रुलोमनखान् संहारयेत॥ नित्यमहतवासाः सुमनाः सुगंधिः स्यात् साधुवेष
प्रसिद्धकेशो मूर्धश्रोत्रपादतैलनित्यो धूमपः पूर्वाभिभाषी सुमुखो दुर्गेष्वभ्युपपत्ता होता यष्टा दाता च
तुःपथानां नमस्कर्ता बलीनामुपहर्ता तिथीनां पूजकः पितृभ्यः पिंडदः काले हितमितमधुरार्थवादी वश्या
त्मा धर्मात्मा हेतावीर्ष्युः फले नेर्ष्युर्निश्चितोऽभिभूतो धीमान् ह्रीमान् महोत्साहो दक्षः क्षमावान् धार्मिका
स्तिको विनयबुद्धिविद्याभिजनवयोवृद्धसिद्धाचार्याणामुपासीता॥ छत्री दंडी मौली सोपानत्को युगमात्र
दृगनुचरेत् मंगलाचारशीलः कुचेलास्थिकंटकामेध्यकेशतुषोत्करभस्मकपालस्नानबलिभूमीनां परिहर्ता प्राक्
श्रमाद्व्यायामवर्जी स्यात् सर्वप्राणिषु बंधुभूतः स्यात्॥ क्रुद्धानामनुनेता भीतानामाश्वासयिता॥ दीनानामभ्यु
पपत्ता सत्यसंधः सामप्रधानः॥ परपुरुषवचनसहिष्णुरमर्षघ्नः॥ प्रशमगुणदर्शी॥ रागद्वेषहेतूनां हंता
नानृतं ब्रूयात्॥ नान्यस्वमाददीत॥ नान्यस्त्रियमभिलषेन्नान्यश्रियं॥ न वैरं रोचयेत्॥ न कुर्यात्पापं न पापेऽपि पा
पः स्यात्॥ नान्यदोषान्ब्रूयात्॥ नान्यरहस्यमागमयेत्॥ नाधार्मिकैर्न नरेंद्रद्विष्टैः सहासीत नोन्मत्तैर्न पतितैर्न
भ्रूणहभिर्न क्षुद्रैर्न दुष्टैः॥ न दुष्टयानान्यारोहेत्॥ न जानुसमं कठिनमासनमध्यासीत॥ न नग्नः शयीत॥ नानानास्तीर्ण
मनुपहितमसमं वा शयनं प्रपद्येत॥ न गिरिविषममस्तकेष्वनुचरेत्॥ न द्रुममारोहेत्॥ न जलोग्रवेगमवगाहेत॥ न कु
लच्छायामुपासीत॥ नाग्न्युत्पातमभितश्चरेत्॥ नोच्चैर्हसेत्॥ न शब्दवंतं मारुतं मुंचेत्॥ नासंवृतमुखो जृंभां क्षव
थुं हास्यं वा प्रवर्तयेत्॥ न नासिकां कुष्णीयात्॥ न दंतान्विघट्टयेत्॥ न नखान्वादयेत्॥ नास्थीन्यभिहन्यात्॥ न भूमिं वि

चा॰सू॰ लिखेन्नाच्छिंद्यात्तृणं न लोष्टं विमृद्नीयान्न विगुणमंगैश्चेष्टेत॥ ज्योतींष्यनिष्टममेध्यं च नमवीक्षेत॥ न हुंकुर्या
च्छवं न चैत्यध्वजगुरुपूज्याभिशस्तछायामाक्रमेन्न क्षपास्वमरसदनचैत्यचत्वरचतुष्पथोपवनश्मशाना
घातनान्यासेवेत नैकः शून्यगृहं नाटवीमनुप्रविशेन्न पापवृत्तान्स्त्रीमित्रभृत्यान्भजेन्नोत्तमैर्विरुध्येत।
१५ नावरानुपासीत न जिह्मं रोचयेन्नानार्यमाश्रयेन्न भयमुत्पादयेन्न साहसातिस्वप्नप्रजागरस्नानासनन्याय
नान्यासेवेत॥ नोर्ध्वजानुश्चिरं तिष्ठेन्न व्यालानुपसर्पेन्न दंष्ट्रिणो नाविषाणिनः॥ पुरोवातातपावश्यायातिप्र
वातान् जह्यात् कलिं नारभेत। नानिभृतोऽग्निमुपासीत नोच्छिष्टो नाधःकृत्वा प्रतापयेन्नाविगतक्लमो
नाप्लुतवदनो न नग्न उपस्पृशेन्न स्नानशाट्या स्पृशेदुत्तमांगं न केशाग्राण्यभिहन्यान्नोपस्पृश्य
ते एव वाससी बिभृयान्नास्पृष्ट्वा रत्नाज्यपूज्यमंगलसुमनसोऽभिनिःक्रामेन्न पूज्यमंगलान्यपसव्यं गच्छेन्नेतराण्य
नुदक्षिणं॥ नारत्नपाणिर्नास्नातो नोपहतवासा नाजपित्वा न देवताभ्यो नानिरूप्य न पितृभ्यो नादत्त्वा गुरुभ्यो
नोपाश्रितेभ्यो नापुण्यगंधो नामाली नाप्रक्षालितपाणिपादवदनो नाशुद्धमुखो न विमना नाभक्ताशिष्टाशुचि
क्षुधितपरिचारो न पात्रीष्वमेध्यासु नादेशे नाकाले नाकीर्णे नाजीर्णे नादत्त्वाग्रमग्नये नाप्रोक्षितं प्रोक्षणो
दकैर्न मंत्रैरनभिमंत्रितं न कुत्सयन्न कुत्सितं न प्रतिकूलोपहितमन्नमद्यात्॥ न पर्युषितमन्यत्र मांसहरितशुष्क
शाकफलभक्ष्येभ्यो नाशेषभुक् स्यादन्यत्र दधिमधुसलिलसक्तुसर्पिर्भ्यो न नक्तं दधि भुंजीत॥ न सक्तूनेका
नश्नीयान्न निशि न भुक्त्वा न बहून्न द्विर्नोदकांतरितान्न छित्वा द्विजैर्भक्षयेन्नानृजुः क्षुयान्नाद्यान्न शयीत न वेगितो
न्यकार्यः स्यान्न वाय्वग्निसलिलसोमार्कद्विजगुरुप्रतिमुखो निष्ठीविकावर्चोमूत्राण्युत्सृजेन्न पंथानमवमूत्र
येन्न जनवति नान्नकाले न जपहोमाध्ययनबलिमंगलक्रियासु श्लेष्मसिंघाणकं मुंचेन्न स्त्रियमवजानीयान्नाति
विश्रंभयेन्नाधिकुर्यान्न गुह्यमनुश्रावयेन्न रजस्वलां नातुरां नामेध्यां नाशस्तां नानिष्टरूपाचारोपचारां नादक्षां १५
नादक्षिणां नाकामां नान्यकामां नान्यस्त्रियं नान्ययोनिं नायोनौ न चैत्यचत्वरचतुष्पथोपवनश्मशानाघातन
सलिलौषधिद्विजगुरुसुरालयेषु न संध्ययोर्नातिथिषु नाशुचिर्नाजग्धभेषजो नाप्रणीतसंकल्पो नानुपस्थित

BHAU DAJI MEMORIAL

प्रहर्षो नाभुक्तवान्नात्यशितो न विषमस्थो न मूत्रोच्चारपीडितो न श्रमव्यायामोपवासक्लमाभिहतो नारहसि व्यवा
यं गच्छेत्॥ न सतो गुरून्परिवदेन्नाशुचिरभिचारकर्मचैत्यपूज्यपूजाध्ययनमभिनिर्वर्तयेन्न विद्युत्स्वनार्तवासु
नाभ्युदितासु दिक्षु नाग्निसंप्लवेन भूमिकंपेन महोत्सवे नोल्कापाते न नष्टचंद्रायां तिथौ न संध्ययोर्नामुखाद्गु
रोर्नावपतितं नातिमात्रं न तांतं न विस्तरं नातिद्रुतानि क्लीबं नावस्थितपदं नातिविलंबितं॥ नात्युच्चैर्नातिनीचैः स्वरै
रध्ययनमभ्यस्येन्नातिसमयं जह्यान्न नियमं भिंद्यान्न नक्तं नादेशे विचरेन्न संध्यास्वभ्यवहाराध्ययनस्त्रीस्व
प्नसेवी स्यान्न बालवृद्धलुब्धमूर्खक्लिष्टक्लीबैः सह सख्यं कुर्यान्न मद्यद्यूतवेश्याप्रसंगरुचिः स्यान्न गुह्यं विवृणु
यान्न कंचिदवजानीयान्नाहंमानी स्यान्नादक्षो नादक्षिणो नासूयको न ब्राह्मणान्परिवदेन्न गवां दंडमुद्य
च्छेन्न वृद्धान्न गुरून्न गणान्न नृपान्न पापानाक्षिपेन्न चातिब्रूयान्न बांधवानुरक्तकृच्छ्रद्वितीयगुह्यज्ञान्बहिः
कुर्यान्नाधीरो नात्युच्छ्रितसत्त्वः स्यान्नाभृतभृत्यो नाविश्रब्धस्वजनो नैकः सुखी न दुःखशीलाचारोपचारो न
सर्वविश्रंभी न सर्वाभिशंकी॥ न सर्वकालविचारी न कार्यकालमतिपातयेन्नापरीक्षितमभिनिवेशये
न्नेंद्रियवशगः स्यान्न चंचलं मनोऽनुभ्रमयेन्न बुद्धींद्रियाणामतिभारमादध्यान्न चातिदीर्घसूत्री स्या
न्न क्रोधहर्षावनुविदध्यान्न सिद्धौ दैन्यं प्रकृतेरभीक्ष्णं स्मरेद्धेतुप्रभावनिश्चितः स्याद्धेत्वारंभनित्यश्च न कृ
तमित्याश्वसेन्न वीर्यं जह्यान्नापवादं स्मरेच्छुचिरुत्तमाऽज्याक्षतकुशतिलसर्षपैरग्निं जुहुयादात्मा
नमाशीर्भिराशंसमानोऽग्निर्मे मापगाच्छरीराद्वायुर्मे प्राणानादध्याद्विष्णुर्मे बलमादध्यादिंद्रो वीर्यं शि
वा मां प्रविशंत्वाप आपोहिष्ठेत्यपः स्पृशेत्॥ ब्रह्मचर्यज्ञानदानमैत्रीप्रशमपरश्च स्यादिति॥ तत्र
श्लोकाः॥ पंचपंचकमुद्दिष्टं मनो हेतुचतुष्टयं॥ इंद्रियोपक्रमेऽध्याये सद्वृत्तमखिलेन च॥ स्वस्थवृत्तं
यथोद्दिष्टं यः सम्यगनुतिष्ठति॥ स समाः शतमव्याधिरायुषा न वियुज्यते॥ नृलोकमापूरयते यशसा
साधुसंमतः॥ धर्मार्थावेति भूतानां बंधुतामुपगच्छति॥ परान्सुकृतिनां लोकान्पुण्यकर्मा प्रपद्यते॥ त
स्माद्वृत्तमनुष्ठेयमिदं सर्वेण सर्वदा॥ यच्चान्यदपि किंचित्स्यादनुक्तमिह पूजितं॥ वृत्तं तदपि चात्रेयः सदैवाभ्य

नुमन्यते॥ ॥इति इन्द्रियोपक्रमणीयो नामाष्टमोऽध्यायः ८ ॥ ॥ ॥अथातः खुड्डाकचतुष्पाद
चर॰ सू॰ मध्यायं व्याख्यास्यामः॥ इति ह स्माह भगवानात्रेयः॥ भिषग्द्रव्याण्युपस्थाता रोगी पादचतुष्टयं॥ गुणवत्कार
णं ज्ञेयं विकारव्युपशान्तये॥ विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते॥ सुखसंज्ञकमारोग्यं विकारो दुःखमेव तु॥
१५ चतुर्णां भिषगादीनां शस्तानां धातुवैकृते॥ प्रवृत्तिर्धातुसाम्यार्था चिकित्सेत्यभिधीयते॥ ३॥ श्रुते पर्यवदात
त्वं बहुशो दृष्टकर्मता॥ दाक्ष्यं शौचमिति ज्ञेयं वैद्ये गुणचतुष्टयं॥ ४॥ बहुता तत्र योग्यत्वमनेकविधकल्पना॥ सं
पच्चेति चतुर्थोऽयं द्रव्याणां गुण उच्यते॥ उपचारज्ञता दाक्ष्यमनुरागश्च भर्तरि॥ शौचं चेति चतुर्थोऽयं गुणः परिचरे जने॥
स्मृतिर्निर्देशकारित्वमभीरुत्वमथापि च॥ ज्ञापकत्वं च रोगाणामातुरस्य गुणाः स्मृताः॥ ७॥ कारणं षोडशगुणं सि
द्धौ पादचतुष्टयं। योक्ता प्रयोक्ता शास्ता तु प्रधानं भिषगत्र तु॥ ९॥ पक्तौ य कारणं पक्तुर्यथा पात्रेन्धनानलाः॥ विजे
तुर्विजये भूमिः शौर्यं प्रहरणानि च॥ आतुराद्यास्तथा पादाः सिद्धौ कारणसंज्ञिताः॥ वैद्यस्यातश्चिकित्सायाः प्रधा
नं कारणं भिषक्॥ १०॥ मृद्दण्डचक्रसूत्राद्याः कुम्भकाराद्दृते यथा॥ नावहन्ति गुणं वैद्याद्दृते पादत्रयं तथा॥ गन्धर्वपुरव
न्नाशं यद्विकाराः सुदारुणाः॥ यान्ति यच्चेतरे वृद्धिमाशूपायप्रतीक्षिणः॥ सति पादत्रये ज्ञानौ भिषजावत्र कारणं॥
वरमात्मा हुतो ज्ञेन नाचिकित्साप्रवर्तिता॥ १३॥ पाणिचाराद्यथा चक्षुरज्ञानाद्भीतभीतवत्॥ नौर्मारुतवशेवाज्ञो भि
षक्चरति कर्मसु॥ स यदृच्छासमापन्नमुत्तार्य नियतायुषं॥ भिषङ्मानी निहन्त्याशु शतान्यनियतायुषं॥ १५॥ हे
तौ लिङ्गे प्रशमने रोगाणामपुनर्भवे॥ ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक्तमः॥ शस्त्रं शास्त्राणि सलिलं
गुणदोषप्रवृत्तये॥ पात्रापेक्षीण्यतः प्रज्ञां चिकित्सार्थं विशोधयेत्॥ १७॥ तस्माच्छास्त्रेऽर्थविज्ञाने प्रवृत्तौ कर्म
दर्शने॥ भिषक् चतुष्टये युक्तः प्राणाभिसर उच्यते॥ विद्या वितर्को विज्ञानं स्मृतिस्तत्परता क्रिया॥ यस्यैते षड्गुणा
स्तस्य न साध्यमतिवर्तते॥ विद्या मतिः कर्मदृष्टिरभ्यासः सिद्धिराश्रयः॥ वैद्यशब्दाभिनिष्पत्तावलमेकैक १५
मप्यतः॥ २०॥ यस्य त्वेते गुणाः सर्वे सन्ति विद्यादयः शुभाः॥ स वैद्यशब्दं सद्भूतमर्हन् प्राणिसुखप्रदः॥ शास्त्र
ज्योतिः प्रकाशार्थं दर्शनं बुद्धिरात्मनः॥ ताभ्यां भिषक् सुयुक्ताभ्यां चिकित्सन्नापराध्यति॥ २२॥ चिकित्सितेत्र

यः पादा यस्माद्वैद्यव्यपाश्रयाः तस्मात्प्रयत्नमातिष्ठेद्भिषक् स्वगुणसम्पदि॥ २३॥ मैत्री कारुण्यमार्तेषु शक्ये प्रीति
रुपेक्षणं॥ प्रकृतिस्थेषु भूतेषु वैद्यवृत्तिश्चतुर्विधा॥ २४॥ तत्र श्लोकाः॥ भिषग्जितं चतुष्पादं पादः पादश्च
तुर्गुणः भिषक् प्रधानं पादेभ्यो यस्माद्वैद्यश्च यद्गुणः २५॥ ज्ञानानि बुद्धिर्ब्राह्मी च भिषजां या चतुर्विधा॥ सर्वं
मत्तं चतुष्पादे खुड्डाके संप्रकाशितं॥ २६॥ ॥इति खुड्डाकचतुष्पादो नाम नवमोऽध्यायः ९ ॥
॥ ॥ ॥अथातो महाचतुष्पादमध्यायं व्याख्यास्यामः॥ इति ह स्माह आत्रेयः॥ चतुष्पादं षोडशकलं भेषज
मिति भिषजो भाषन्ते॥ यदुक्तं पूर्वेऽध्याये षोडशगुणमिति तद्भेषजं युक्तियुक्तमलमारोग्यायेति भगवानात्रेयः॥ ने
ति मैत्रेयः किं कारणं दृश्यन्ते ह्यातुराः केचिदुपकरणवन्तश्च परिचारकसम्पन्नाश्चात्मवन्तश्च कुशलैश्च भिषग्भिरु
पक्रान्ताः समुत्तिष्ठमानास्तथापरे चतुष्टययुक्ताश्चापरे म्रियमाणास्तस्माद्भेषजं नाकिंचित्करं भवति॥ तद्यथा॥
श्वभ्रे सरसि वा प्रसिक्तमल्पमुदकं नद्यां वा स्यन्दमानायां पांशुधाने वा पांशुमुष्टिः प्रकीर्ण इति तथापरे॥ दृश्यं
ते ह्यनुपकरणाश्चापरिचारकाश्चानात्मवन्तश्चाकुशलैश्च भिषग्भिरुपक्रान्ताः समुत्तिष्ठमानास्तथा अम्रिय
माणाश्चापरे॥ यतश्च प्रतिकुर्वन्सिध्यति प्रतिकुर्वन् म्रियते प्रतिकुर्वन्सिध्यत्यप्रतिकुर्वन्नपि च म्रियते तत
श्चिन्त्यते भेषजमभेषजेनाविशिष्टमिति मैत्रेयो मिथ्या चिन्तयतीत्यात्रेयः॥ किं कारणं ये ह्यातुराः केवला
द्भेषजादृते समुत्तिष्ठन्ते न तेषां सम्पूर्णभेषजोपपन्नानां नोत्थानविशेषोऽस्ति॥ यथाहि॥ पतितं पुरुषमस
मर्थमुत्थाने यो ह्युत्थापयन् पुरुषो बलमस्योपदध्यात्॥ स क्षिप्रतरमपरिक्लिष्ट एवोत्तिष्ठेत् तद्वत्सम्पूर्णः
भेषजोपलम्भादातुराः ये चातुराः केवलाद्भेषजादृते म्रियन्ते न ते सर्व एव सम्पूर्णभेषजोपपन्नाः समुत्तिष्ठे
रन्॥ न हि सर्वे व्याधयो भवन्त्युपायसाध्याः न चोपायसाध्यानां व्याधीनामनुपायेन सिद्धिरस्ति॥ ये पुनरा
तुराः षोडशगुणसमुदितेनानेन भेषजेनोपपद्यमाना म्रियन्त इत्युक्तं॥ तदनुपपन्नं नहि भेषजसाध्यानां
व्याधीनां भेषजमकारणं भवति॥ न चासाध्यानां व्याधीनां भेषजसमुदायमस्ति॥ न ह्यलं ज्ञानवान् भिष
ङ्मुमूर्षुमातुरमुपस्थातुं॥ परीक्ष्यकारिणो हि कुशला भवन्ति॥ यथा ह्योगज्ञोऽभ्यासनित्य इष्वासो धनुरादा

चा॰ सू॰ येषुमस्य सन्निविप्रकृष्टे महति कार्ये नापराधवान् भवति॥ संपादयति चैवं कार्यं॥ तथाहि भिषक् सर्वगुणसंपन्नः कर
णवान् परीक्ष्य कर्मारंभमाणो साध्यातिगमनेनापराधः संपादयत्येवातुरमारोग्येण तस्मात् भेषजानां विशिष्टं
भवति॥ इदं च नः प्रत्यक्षं यदनातुरेण भेषजेनातुरं चिकित्सामः॥ क्षाममक्षामेण कृशं च दुर्बलमाप्याययाम॥
१६ स्थूलं मेदस्विनमपतर्पयामः शीतेनोष्णाभिभूतमुपचरामः॥ शीताभिभूतमुष्णेन न्यूनान्धातून् पूरयामो व्य
तिरिक्तान् ह्रासयामो व्याधीन् मूलविपर्ययेणोपचरन्तः सम्यक् प्रकृतौ स्थापयामस्तेषां तथा कुर्वतामयं भेषज
समुदायः कान्ततमो भवतीति॥ तत्र श्लोकाः॥ साध्यासाध्यविभागज्ञो ज्ञानपूर्वं चिकित्सकः॥ काले चारभते
कर्म यत्तत्साधयति ध्रुवं॥ अर्थविद्यायशोहानिमुपक्रोशमसंग्रहं॥ प्राप्नुयान्नियतं वैद्यो योऽसाध्यं समुपा
चरेत्॥ सुखसाध्यं मतं साध्यं कृच्छ्रसाध्यमथापि च॥ द्विविधं चाप्यसाध्यं स्याद्याप्यं यच्चानुपक्रमं॥ साध्यानां
त्रिविधश्चाल्पमध्यमोत्कृष्टतां प्रति॥ विकल्पो न त्वसाध्यानां नियतानां विकल्पना॥ हेतवः पूर्वरूपाणि रूपा
ण्यल्पानि यस्य च॥ न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेत्॥ न च कालगुणस्तुल्यो न देशो दुरुपक्रमः॥ ग
तिरेका नवत्वं च रोगस्योपद्रवो न च॥ दोषश्चैकः समुत्पत्तौ देहः सर्वौषधक्षमः॥ चतुष्पादोपपत्तिश्च सुख
साध्यस्य लक्षणं॥ निमित्तपूर्वरूपाणां रूपाणां मध्यमे बले॥ कालप्रकृतिदूष्याणां सामान्येऽन्यतमस्य च॥ गर्भि
णी वृद्धबालानां नात्युपद्रवपीडितं॥ शस्त्रक्षाराग्निकृत्यानामनवं कृच्छ्रदेशजं॥ विद्यादेकपथं रोगं नाति
पूर्णचतुष्पदं॥ द्विपथं नातिकालं वा कृच्छ्रसाध्यं द्विदोषजं॥ शेषत्वादायुषो याप्यमसाध्यं पथ्यसेवया॥ ल
ब्धाल्पसुखमल्पेन हेतुनाशुप्रवर्तकं॥ गंभीरं बहुधातुस्थं मर्मसंधिसमाश्रितं॥ नित्यानुशायिनं रोगं दीर्घका
लमवस्थितं॥ विद्याद्द्विदोषजं तद्वत् प्रत्याख्येयं त्रिदोषजं॥ क्रियापथमतिक्रान्तं सर्वमार्गानुसारिणं॥ औत्सुक्या १६
रतिसंमोहकरमिन्द्रियनाशनं॥ दुर्बलस्यातिसंवृद्धं व्याधिं सारिष्टमेव च॥ भिषजा प्राक् परीक्ष्यैवं विकाराणां
स्वलक्षणं॥ पश्चात्कर्मसमारंभः कार्यः साध्येषु धीमता॥ साध्यासाध्यविभागज्ञो यः सम्यक्प्रतिपत्तिमा
न्॥ न स मैत्रेयतुल्यानां मिथ्याबुद्धिं विवर्धयेत्॥ इति तत्र श्लोकौ॥ इहौषधं पादगुणाः प्रभावो भेषजा
श्रयः

आत्रेय मैत्रेयमतं द्वैविध्ये निश्चयः॥ चतुर्विधा विकल्पाश्च व्याधयः स्वस्वलक्षणाः॥ उक्ता महाचतुष्पादे ये
ष्वायत्तं भिषग्जितं॥ ॥ इति महाचतुष्पादो नाम दशमोऽध्यायः॥ १० ॥ ७॥ अथातस्तिस्रैषणीय
मध्यायं व्याख्यास्यामः॥ इति ह॰ आत्रेयः॥ इह खलु पुरुषेणानुपहतसत्वबुद्धिपौरुषपराक्रमेण हि
तमिह चामुष्मिंश्च लोके समनुपश्यता तिस्र एषणाः पर्येष्टव्या भवंति॥ तद्यथा॥ प्राणैषणा धनैषणा प
रलोकैषणेति॥ आसां तु खल्वेषणानां प्राणैषणां पूर्वतरमापद्येत॥ कस्मात् प्राणपरित्यागे हि सर्वत्यागस्तस्यांतिन्
तद्यथाक्रममनुवर्तमानः प्राणानुपालना आख्याता भवतीति॥ अथ द्वितीयां धनैषणामापद्येत॥ प्राणेभ्यो ह्यनन्त
रं धनमेव पर्येष्टव्यं भवति॥ न ह्यतः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुस्तस्मादुपकरणानि पर्येष्टुं यते
त॥ तत्रोपकरणोपायाननुव्याख्यास्यामः॥ तद्यथा॥ कृषिः पाशुपाल्यं वाणिज्यं राजोपसेवा चेति यानि चान्यान्य
पि सतामगर्हितानि कर्माणि वृत्तिपुष्टिकराणि विद्यात्तान्यथारभेत कर्तुं तथा हि कुर्वन् दीर्घजीवितमनवमतः पुरु
षो जीवति॥ इति द्वितीया धनैषणा व्याख्याता भवतीति॥ अथ तृतीयां परलोकैषणामापद्येत॥ संशयश्चात्र कथं भ
विष्याम इतश्च्युता भवति॥ कुतः संशयः परिणामेण॥ यदेके चापरेऽज्ञानादुत्पतः संशयः॥ किं तु खल्वस्ति पुनर्भवो न
भवेति॥ तत्र बुद्धिमान्नास्तिक्यबुद्धिं जह्याद्विचिकित्सां च॥ कस्मात् प्रत्यक्षं ह्यल्पमनल्पं अप्रत्यक्षमस्ति यदागमा
नुमानयुक्तिभिरुपलभ्यते॥ यैरेव तावदिन्द्रियैः प्रत्यक्षमुपलभ्यते॥ तान्येव संति चाप्रत्यक्षाणि सतां च रूपाद्
नामतिसंनिकर्षादतिविप्रकर्षादावरणात् करणदौर्बल्यान्मनोनवस्थानात् समानाभिहारादभिभवात् सौक्ष्म्या
च प्रत्यक्षस्यानुपपत्तिः॥ तस्मादपरीक्षितमेतदुच्यते प्रत्यक्षमेवास्ति नान्यदस्तीति॥ श्रुतयश्चैता न कारणं
युक्तिविरोधात्॥ आत्मा मातुः पितुर्वा यः सोऽपत्यं यदि संचरेत्॥ द्विविधं संचरेदात्मा सर्वो वावयवेन वा॥ स
र्वश्चेत्संचरेन्मातुः पितुर्वा मरणं भवेत्॥ निरंतरं नावयवः कश्चित्सूक्ष्मस्य चात्मनः॥ बुद्धिर्मनश्च निर्णीते यथैवात्मा
तथैव ते॥ येषां चैषा मतिस्तेषां योनिर्नास्ति चतुर्विधा॥ संस्वेदजानि भूतानि दृश्यंते द्विसदस्त्रजः॥ सासार्थं नैयता
लोकेऽभूतयोनिश्चतुर्विधा॥ विद्यात्स्वाभाविकं षण्णां धातूनां यत्स्वलक्षणं॥ संयोगे च वियोगे च तेषां कर्मैव कारणं

च॰ सू॰

अंतादेश्चतनाधातोर्नेव्यक्तेपरनिर्मितिः॥ परआत्मासचेद्धेतुरिष्टोऽस्तुपरनिर्मितः॥ नपरीक्षानोपरीक्ष्यंनकर्म
कारणंचन॥ नदेवानऋषयःसिद्धाः कर्मकर्मफलंनवा॥ नास्तिकस्यास्तिनैवात्मा यदृच्छोपहतात्मनः॥ पातकेभ्यः
परंचैतत्पातकंनास्तिकग्रहः॥ तस्मान्मतिंविमुच्यैताममार्गप्रसृतांबुधः॥ सतांबुद्धिप्रदीपेनपश्येत्सर्वंय
१७ थातथा॥ इतिद्विविधमेवाद्विसर्वंसच्चासच्चतस्यचतुर्विधापरीक्षा॥ आप्तोपदेशःप्रत्यक्षमनुमानंयुक्ति
श्चेति॥ आप्तास्तावत्रजस्तमोभ्यांनिर्मुक्तास्तपोज्ञानबलेनयेषांत्रिकालममलंज्ञानमव्याहतंसदाआप्ताःशि
ष्टाविबुद्धास्तेषांवाक्यमसंशयं॥ सत्यंवक्ष्यंतितेकस्मादनृतंनीरजस्तमाः॥ आत्मेंद्रियमनोऽर्थानांसंनि
कर्षात्प्रवर्तते॥ व्यक्तातदात्वयाबुद्धिःप्रत्यक्षंसानिरुच्यते॥ प्रत्यक्षपूर्वंत्रिविधंत्रिकालंचानुमीयते॥ वह्नि
र्निगूढोधूमेनमैथुनंगर्भदर्शनात्॥ एवंव्यवस्यंत्यतीतंबीजात्फलमनागतं॥ दृष्ट्वाबीजात्फलंजातमिहैवस
दृशंबुधाः॥ जलकर्षणबीजर्तुसंयोगात्सस्यसंभवः॥ युक्तिःषड्धातुसंयोगाद्गर्भाणांसंभवस्तथा॥ मथ्यमं
थकमंथानसंयोगादग्निसंभवः॥ युक्तियुक्ताचतुष्पादसंपद्व्याधिनिबर्हिणी॥ बुद्धिःपश्यतियाभावान्ब
हुकारणयोगजान्॥ युक्तिस्त्रिकालासाज्ञेयात्रिवर्गःसाध्यतेयया॥ एषापरीक्षानास्त्यन्यायथासर्वंपरी
क्ष्यते॥ परीक्ष्यंसदसच्चैवंतयाचास्तिपुनर्भवः॥ इति॰ आप्तागमस्तावद्वेदोयश्चान्योऽपिकश्चिद्वेदा
र्थादविपरीतःपरीक्षकैःप्रणीतःशिष्टानुमतोलोकानुग्रहप्रवृत्तःशास्त्रवादःसचाप्तागमः॥ आप्ताग
माद्युपलभ्यते॥ दानंतपोयज्ञःसत्यमहिंसाब्रह्मचर्यमित्यभ्युदयनिःश्रेयसकराणीति॥ नचानिवृ
त्तसत्वदोषाणामदोषैरपुनर्भवोधर्मद्वारेषूपदिश्यते॥ धर्मद्वारावहितैश्चव्यपगतभयरागद्वेष
लोभमोहमानैर्ब्रह्मपरैराप्तैःकर्मविद्भिरनुपहतसत्वबुद्धिप्रचारैःपूर्वैःपूर्वतरैश्चमहर्षिभिर्दिव्यचक्षु १७
र्भिर्दृष्टोपदिष्टःपुनर्भवोऽस्तीतिव्यवस्येदेवंपुनर्भवेप्रत्यक्षमपिचोपलभ्यते॥ मातापित्रोर्विसदृ
शान्यपत्यानितुल्यसंभवानांवर्णस्वराकृतिसत्वबुद्धिभाग्यविशेषाःप्रवरावरकुलजन्मदास्यै
श्वर्यसुखासुखमायुरनायुषोर्वैषम्यमिहाकृतस्यावाप्तिरशिक्षितानांचरुदितस्तनपानहासत्रासा

दीनांप्रवृत्तिर्लक्षणोत्पत्तिःकर्मसामान्येफलविशेषोमेधाऽपचितकर्मण्यमेधाजातिस्मरणमिहागमनमितश्च्युतानां
चभूतानांचभूतानांसमदर्शनेप्रियाप्रियत्वमतएवानुमीयते॥ अन्नस्वकृतमपरिहार्यमविनाशिपौर्वदेहिकं॥
दैवसंज्ञकमानुबंधिकंकर्मतस्यैतत्फलमितश्चान्यद्भविष्यतीतिफलाद्बीजमनुमीयते॥ फलंचबीजात्॥ कर्मसदृ
शंफलंनान्यबीजादन्यस्योत्पत्तिरितियुक्तिरेवंप्रमाणैश्चतुर्भिरुपदिष्टेपुनर्भवेधर्मद्वारेष्ववधीयेत॥ तथा॥
गुरुशुश्रूषायामध्ययनेब्रह्मचर्यायांदारक्रियायामपत्योत्पादने॥ भृत्यभरणे॥ अतिथिपूजायांदानेऽनभि
ध्यायांतपस्यनसूयायांदेहवाङ्मानसेकर्मण्यक्लिष्टेदेहेंद्रियमनोबुद्ध्यात्मपरीक्षायांमनःसमाधाविति॥ या
निचान्यान्यप्येवंप्रकाराणिस्वर्ग्याणिवृत्तिपुष्टिकराणि॥ कर्माणिविद्यात्तान्यारभेतकर्तुं॥ तथाहि॥ कुर्वन्नि
हचयशोलभते॥ प्रेत्यचस्वर्गमिति॥ तृतीयापरलोकैषणाव्याख्याताभवति॥ अथखल्वत्रयउपस्तंभास्त्रि
विधंबलंत्रीण्यायतनानित्रयोरोगास्त्रयोरोगमार्गास्त्रिविधाभिषजस्त्रिविधमौषधमिति॥ त्रयउपस्तंभा
इत्याहारःस्वप्नोब्रह्मचर्यमित्येभिस्त्रिभिर्युक्तियुक्तैरुपस्तंभैःशरीरंबलवर्णोपचयोपचितमनुवर्ततेयावदा
युःसंस्कारात्संस्कारमहितमनुपसेवमानस्यइहैवोपदेक्ष्यंते॥ त्रिविधंबलमिति॥ सहजंकालजंयुक्तिकृ
तंच॥ तत्रसहजंयच्छरीरसत्वयोःप्राकृतंकालकृतमृतुविभागजंवयःकृतंच॥ युक्तिकृतंचपुनस्तद्यदाहारचे
ष्टायोगजं॥ त्रीण्यायतनानीत्यर्थानांकर्मणःकालस्यचातियोगायोगमिथ्यायोगाः॥ तत्रातिप्रभावतां
दृश्यानामतिमात्रंदर्शनमतियोगः॥ सर्वशोऽदर्शनमयोगः॥ सूक्ष्मातिश्लिष्टातिविप्रकृष्टरौद्रभैर
वद्विष्टबीभत्सविकृतवित्रासनादिरूपदर्शनंमिथ्यायोगः॥ तथातिमात्रस्तनितपटहोत्कुष्टा
दीनांशब्दानामतिमात्रश्रवणमतियोगः॥ सर्वशोऽश्रवणमयोगः॥ परुषेष्टविनाशोपघातप्रध
र्षणाद्भीषणादीनांशब्दानांश्रुतिमिथ्यायोगः॥ तथातितीक्ष्णोग्राभिष्यंदिनांगंधानामतिमात्रंघ्राणम
तियोगः॥ सर्वशोऽघ्राणमयोगः॥ पूतिद्विष्टामेध्यक्लिन्नविषपवनकुणपगंधादिघ्राणंमिथ्यायोगः॥
तथारसानामत्यादानमतियोगः॥ अनादानमयोगः॥ मिथ्यायोगोराशिवर्ज्येष्वाहारविधिविशेषायत

चर० सू० ते दृष्टपरिहृष्यते। तथा॥ शीतोष्णादीनां स्पृश्यानां स्नानाभ्यंगोत्सादनादीनां चस्पृश्यानामनानुपूर्व्योपसेवनम
भिघातभूताशुचिसंस्पर्शादयश्च मिथ्यायोगः॥ तत्रैकं स्पर्शनेंद्रियमिंद्रियाणामिंद्रियव्यापकं चेतः समवा
यिस्पर्शनव्याप्तेर्व्यापकमपि चेतस्तस्मात्सर्वेंद्रियाणां व्यापकः स्पर्शः कृतो भावविशेषः सोयमनुपशयात्
१८ पंचविधस्त्रिविधविकल्पो भवत्यसात्म्येंद्रियार्थसंयोगः॥ सात्म्यार्थो ह्युपशयार्थः॥ कर्मवाङ्मनः
शरीरप्रवृत्तिरिति तत्र वाङ्मनःशरीराणामप्रवृत्तिरिति योगो भवत्यप्रवृत्तिरितियोगः॥ वेगाविधारणोदीरणवि
षमस्खलनपतनांगप्रणिधानसंदूषणप्रहारामर्दप्राणोपरोधसंक्लेशनादिः शारीरो मिथ्यायोगः॥ सूचका
नृताकालकलहाप्रियाबद्धानुपचारपरुषवचनादिर्वाङ्मिथ्यायोगः॥ भयशोकलोभमोहक्रोधमानेर्ष्यामिथ्या
दर्शनादिर्मानसो मिथ्यायोगः॥ संग्रहेण चातियोगायोगवर्जं कर्मवाङ्मनःशारीरमहितमनुपदिष्टं
यत्तच्च मिथ्यायोगं विद्यादिति॥ त्रिविधविकल्पं त्रिविधमेव कर्म प्रज्ञापराध इति व्यवस्येत॥ शीतोष्णवर्ष
लक्षणाः पुनर्हेमंतग्रीष्मवर्षाः संवत्सरः स कालः॥ तत्रातिमात्रस्वलक्षणः कालोतियोगो हीनस्वलक्षणः
कालोयोगो यथास्वलक्षणाविपरीतलक्षणस्तु मिथ्याकालयोगः कालः पुनः परिणाम उच्यते इत्यसात्म्ये
न्द्रियार्थसंयोगः॥ प्रज्ञापराधः परिणामश्चेत्येतत्त्रिविधविकल्पं कारणं विकाराणां समयोगयुक्तास्तु प्र
कृतिहेतवो भवंति॥ सर्वेषामपि भावानां भावाभावौ नांतरेण योगायोगातियोगमिथ्यायोगान्॥ समुपलभ्येते
यथास्वयुक्त्यपेक्षिणौ हि भावाभावौ॥ त्रयो रोगा इति॥ निजागंतुमानसाः॥ तत्र निजः शारीरदोषसमुत्थः
॥ आगंतुर्भूतवाय्वग्निविषसंप्रहारादिसमुत्थः॥ मानसः पुनरिष्टस्यालाभाल्लाभाच्चानिष्टस्योपजायते॥
तत्र बुद्धिमता मानसव्याधिपरीतेनापि सता बुद्ध्या हिताहितमवेक्ष्यावेक्ष्य धर्मार्थकामानामहितानाम
नुपसेवने हितानां चोपसेवने प्रयतितव्यं॥ न ह्यंतरेण लोके त्रयमेतन्मानसं किंचिन्निष्पद्यते॥ सुखं १८
वा दुःखं वा तस्माद्धितज्ञानुष्ठेयं॥ तद्विद्यानां चोपसेवने प्रयतितव्यं॥ आत्मदेशकालबलशक्तिज्ञा
नं यथावच्चेति॥ तत्र श्लोकाः॥ मानसं प्रति भैषज्यं त्रिवर्गस्यान्ववेक्षणं॥ तद्विद्यसेवा विज्ञानमात्मादी

नां च सर्वशः॥ त्रयो रोगमार्गा इति॥ शाखामर्मास्थिसंधयः कोष्ठश्च॥ तत्र शाखा रक्तादयो धातवस्त्वक् च॥ स बाह्यो
रोगमार्गः मर्माणि पुनर्बस्तिहृदयमूर्धादीन्यस्थिसंधयोऽस्थिसंयोगास्तत्रोपनिबद्धाश्च स्नायुकंडराः शिरा
दयः स मध्यमो रोगमार्गः॥ कोष्ठः पुनरुच्यते॥ महास्रोतः शरीरमध्यं महानिम्नमामपक्वाशयश्चेति॥
पर्यायशब्दैस्तंत्रे स रोगमार्ग आभ्यंतरः॥ तत्र गंडपिडकालज्यपचीचर्मकीलार्बुदाधिमांसमशककुष्ठव्यं
गादयो विकारा बाह्यभागजाश्च वीसर्पश्वयथुगुल्मार्शोविद्रध्यादयः शाखानुसारिणो भवंति रोगाः॥ पक्ष
वधग्रहापतानकार्दितशोषराजयक्ष्मास्थिसंधिशूलगुदभ्रंशादयः शिरोहृद्बस्तिरोगादयश्च मध्यममा
र्गानुसारिणो भवंति रोगाः॥ ज्वरातीसारछर्द्यलसकविसूचिकाश्वासकासहिक्कानाहोदरप्लीहादयोंतर्भागजा
श्च विसर्पश्वयथुगुल्मार्शोविद्रध्यादयः कोष्ठानुसारिणो भवंति रोगाः॥ त्रिविधा भिषज इति॥ भिषक्छद्मच २
राः॥ संति संत्येके सिद्धसाधिताः संति वैद्यगुणैर्युक्तास्त्रिविधा भिषजो भुवि॥ वैद्यभांडौषधैः पुस्तैः पल्लवैर
वलोकनैः लभंते ये भिषक्छब्दमज्ञास्ते प्रतिरूपिकाः॥ श्रीयशोज्ञानसिद्धानां व्यपदेशादतद्विधाः॥ वैद्यश
ब्दं लभंते ये ज्ञेयास्ते सिद्धसाधिताः॥ प्रयोगज्ञानविज्ञानसिद्धिसिद्धाः सुखप्रदाः॥ जीविताभिसरास्ते स्युर्वै
द्यत्वे व्यवस्थितं॥ इति त्रिविधमौषधमिति॥ दैवव्यपाश्रयं युक्तिव्यपाश्रयं॥ सत्त्वावजयश्चेति॥ तत्र दैव
व्यपाश्रयं मंत्रौषधमणिमंगलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्लपनप्रणिपातगमनादि
युक्तिव्यपाश्रयं पुनराहारविहारौषधद्रव्याणां योजना सत्त्वावजयः पुनरहितेभ्योर्थेभ्यो मनोनिग्रहः॥
शरीरदोषविधमौषधमिच्छंति॥ अतः परिमार्जनं पादिपरिमार्जनं शस्त्रपरिधानमिति॥ तत्रांतः परिमा
र्जनं यदंतः शरीरमनुप्रविश्यौषधमाहारजाः तान्व्याधीन् प्रमार्ष्टि॥ यत्पुनर्बहिः स्पर्शनमाश्रित्याभ्यंग
स्वेदप्रदेहपरिषेकोन्मर्दनाद्यैरामयान् प्रमार्ष्टि तद्बहिःपरिमार्जनं॥ शस्त्रप्रणिधानं पुनश्छेदनभेदन
व्यधदारणलेखनोत्पाटनसीवनप्रच्छनक्षाराग्निजलौकसश्चेति॥ तत्र श्लोकाः॥ प्राज्ञो रोगे समुत्पन्ने
बाह्येनाभ्यंतरेण वा॥ कर्मणा लभते शर्म शस्त्रोपक्रमणेन वा॥ बालस्तु खलु मोहाद्वा प्रमादाद्वा न बुध्य
ते

चा॰स॰ इत्यवमानं प्रथमं रोगानुत्पत्तिमिवाबुधः॥ अणुर्हि प्रथमं भूत्वा रोगः पश्चाद्विवर्धते। स जातमूलो मुष्णाति बल-
मायुश्च दुर्मतेः॥ न मूढो लभते संज्ञां तावद्यावन्न पीड्यते। पीडितस्तु मतिं पश्चात्कुरुते व्याधिनिग्रहे॥ अथ पुत्रांश्च
दारांश्च ज्ञातींश्चाहूय भाषते। सर्वस्वेनापि मे कश्चिद्भिषगानीयतामिति। अथाविधं च यः प्राक्तं दुर्बलं व्याधि-
१९ पीडितं। कृशं क्षीणेन्द्रियं दीनं परित्रातुं गतायुषं। स त्रातारमनासाद्य बालस्त्यजति जीवितं। गोधा लांगूलबद्धेवा
कृष्यमाणा बलीयसा॥ तस्मात्प्रागेव रोगेभ्यो रोगेषु तरुणेषु वा॥ भेषजैः प्रतिकुर्वीत य इच्छेत्सुखमात्मनः॥ तत्र
श्लोकाः॥ एषणाः समुपस्तंभा बलं कारणमामयाः॥ तिस्रैषणीये मार्गाश्च भिषजो भेषजं तथा॥ त्रित्वेनाष्टौ
समुद्दिष्टाः कृष्णात्रेयेण धीमता॥ भावा भावेषु सक्तेन येषु सर्वं प्रतिष्ठितं॥ ॥इति तिस्रैषणीयो नामैका-
दशोध्यायः॥ ११ ॥ ॥ २ ॥ ॥अथातो वातकलाकलीयमध्यायं व्याख्यास्यामः॥ इति ह स्माह
भगवानात्रेयः॥ वातकलाकलाज्ञानमधिकृत्य परस्परमतानि जिज्ञासमानाः समुपविश्य महर्षयः॥ पप्रच्छु-
रन्योन्यं किंगुणो वायुः॥ किमस्य प्रकोपनमुपशमनानि वास्य कानि कथं चैनमसंघातमनवस्थितमनासाद्य प्रको-
पनप्रशमनानि प्रकोपयन्ति प्रशमयन्ति वा कान्यस्य कुपिताकुपितस्य शरीराशरीरचरस्य शरीरेषु चरतः॥ क-
र्माणि बाह्यानि शरीरेभ्यो वा भवन्तीत्यत्रोवाच कुशः सांकृत्यायनो रूक्षलघुशीतदारुणखरविशदाः षडिमे वात-
गुणा भवन्ति स तैर्गुणैस्तैर्द्रव्यैरेवं प्रकारैश्च कर्मभिरभ्यस्यमानैर्वायुः प्रकोपमापद्यते। समानगुणाभ्या-
साद्धि धातूनां वृद्धिकारणमिति॥ तच्छ्रुत्वा वाक्यं काङ्कायनो बाह्लीकभिषगुवाच एतान्येव वातप्रकोपनान्येतद्वि-
परीतान्यस्य प्रशमनानि भवन्ति॥ प्रकोपनविपर्ययो हि धातूनां प्रशमनकारणं भवतीति। तच्छ्रुत्वा वाक्यं ब-
डिशो धामार्गव उवाच॥ तद्यथा भगवानाह॥ एतान्येव वातप्रकोपनप्रशमनानि भवन्ति। यथा त्वेनमसंघातम-
नवस्थितमनासाद्य प्रकोपनप्रशमनानि प्रकोपयन्ति प्रशमयन्ति वा तथानुव्याख्यास्यामः॥ वातप्रकोपना- १९
नि खलु रूक्षलघुशीतदारुणखरविशदशुषिरकराणि शरीराणां तथाविधेषु हि शरीरेषु वायुराश्रयं ग-
त्वाप्यायमानः॥ प्रकोपमापद्यते। वातप्रशमनानि पुनः स्निग्धगुरूष्णश्लक्ष्णमृदुपिच्छिलघनकराणि॥

शरीराणां तथाविधेषु शरीरेषु वायुरसज्जमानश्चरन्प्रशान्तिमापद्यत इति॥ तच्छ्रुत्वा वाडिशवचनमवितथमृषिग-
णवचनमतमुवाच वार्योविदो राजर्षिः सर्वमेतदनपवादं यथा भगवानाह॥ यानि तु खलु वायोः कुपिताकुपित-
स्य शरीराशरीरचरस्य शरीरेषु चरतः॥ कर्माणि बाह्यानि शरीरेभ्यो वा भवन्ति। तेषामवयवान्प्रत्यक्षानुमानोपदेशैः सा-
धयित्वा॥ नमस्कृत्य वायवे यथाशक्ति प्रवक्ष्यामः॥ वायुस्तन्त्रयन्त्रधरः प्राणोदानसमानव्यानापानात्मा प्रवर्त-
कश्चेष्टानामुच्चावचानां नियन्ता प्रणेता च मनसः सर्वेन्द्रियाणामुद्योजकः सर्वेन्द्रियार्थानामभिवोढा स-
र्वशरीरधातुव्यूहकरः संधानकरः शरीरस्य प्रवर्तको वाचः प्रकृतिः शब्दस्पर्शयोः श्रोत्रस्पर्शनयोर्मूलं
हर्षोत्साहयोर्योनिः समीरणोऽग्नेर्दोषसंशोषणः क्षेप्ता बहिर्मलानां स्थूलाणुस्रोतसां भेत्ता कर्ता गर्भाकृती-
नामायुषोनुवृत्तिप्रत्ययभूतो भवत्यप्रकुपितः॥ प्रकुपितस्तु खलु शरीरे शरीरं नानाविधैर्विकारैरुपतप-
ति बलवर्णसुखायुषामुपघाताय। मनो व्यावर्तयति। सर्वेन्द्रियाण्युपहन्ति विहन्ति गर्भान्विकृतिमापादयत्यतिका-
लं धारयति। भयशोकमोहदैन्यमतिप्रलापाञ्जनयति। प्राणांश्चोपरुणद्धि प्रकृतिभूतस्य खल्वस्य लोके चरतः कर्मा-
णीमानि भवन्ति॥ तद्यथा॥ धरणीधारणं ज्वलनोज्ज्वालनं आदित्यचन्द्रनक्षत्रग्रहगणानां संतानगतिविधानं सृष्टिश्च मे-
घानामपां च विसर्गः प्रवर्तनं च। श्रोतसां पुष्पफलानां चाभिनिर्वर्तनमुद्भेदनं चौद्भिदानामृतूनां प्रविभागः प्रविभा-
गो धातूनां धातुमानसंस्थानव्यक्तिः बीजाभिसंस्कारः सस्याभिवर्धनमविक्लेदोपशोषणमवैकारिकविकारश्चेति
प्रकुपितस्य खल्वस्य लोकेषु चरतः कर्माणीमानि भवन्ति॥ तद्यथा॥ शिखरिशिखरावमथनमुन्मथनमनोक-
हानामुत्पीडनं सागराणामुद्वर्तनं सरसां प्रतिसरणमापगानामाकम्पनं भूमेराधमनमम्बुदानां नीहारनिर्ह्राद-
पांशुसिकतामत्स्यभेकोरगक्षाररुधिराश्माशनिविसर्गो व्यापादनं च षण्णामृतूनां सस्यानामसंघातो भूता-
नां चोपसर्गो भावानां चाभावकरणं चतुर्युगान्तकराणां मेघसूर्यानलानिलानां विसर्गः स हि भगवान्प्रभवश्चाव्ययश्च भू-
तानां भावाभावकरः॥ सुखासुखयोर्विधाता मृत्युर्यमो नियन्ता प्रजापतिरदितिर्विश्वकर्मा विश्वरूपः सर्वगः
सर्वतन्त्राणां विधाता भावानामणुर्विभुर्विष्णुः क्रान्ता लोकानां वायुरेव भगवानिति॥ तच्छ्रुत्वा वार्योविदो वचो मा-
रीचिरु-

च० सू०

भि

यद्यप्येवमेतत्किमस्यार्थस्य वचने विज्ञाने वा सामर्थ्यमस्तीति प्रकृतविद्यायां॥ भिषग्विद्यां वाधिकृत्येयं कथा प्रवर्तितेति॥
आर्योविद उवाच॥ भिषक् पवनमतिबलमतिपरुषमतिशीघ्रकारिणमात्ययिकमनुनिशाम्य सहसा प्रकुपितमति
प्रयतः॥ कथमग्रेभिसंरक्षितुमभिसंधास्यति प्रागेवैनमत्ययभयात्॥ हि वायोर्यथार्थस्तुतिरपि च भवत्यारोग्याय ब
२० लवर्णवृद्धये वर्चस्वित्वायोपचयाय ज्ञानोपपत्तये परमायुः॥ प्रकर्षाय चेति॥ मारीचिरुवाच॥ अग्निरेव शरीरे पि
त्तान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति॥ तद्यथा॥ पक्तिमपक्तिं मदर्शनं॥ मात्रामात्रत्वमात्रामात्रेतमू
ष्मणः॥ प्रकृतिविकृतिवर्णौ शौर्यं भयं क्रोधं हर्षं बुद्धिमबुद्धिमोहं मोहमेवमादीनि चापराणि द्वन्द्वानीति॥ तच्छ्रुत्वा मारी
चिवचः काप्य उवाच॥ सोम एव शरीरे श्लेष्मान्तर्गतः कुपिताकुपितः शुभाशुभानि करोति॥ तद्यथा॥ दार्ढ्यं शैथि
ल्यमुपचयं कार्श्यमुत्साहमालस्यं वृषतां क्लीबतां बुद्धिमोहमेवमादीनि चापराणि द्वन्द्वानीति॥ तच्छ्रुत्वा काप्यवचो भ
गवान् पुनर्वसुरात्रेय उवाच॥ सर्व एव भवन्तः सम्यगाहुरन्यत्रैकान्तिकवचनात्॥ सर्व एव वातपित्तश्लेष्माणः प्रकृ
तिभूताः पुरुषमव्यापन्नेन्द्रियं बलवर्णसुखोपपन्नमायुषा महतोपपादयन्ति॥ सम्यगेवाचरिता धर्मार्थकामानि
श्रेयसेन महता पुरुषमिह चामुष्मिंश्च लोके विकृतास्त्वेनं महता विपर्ययेणोपपादयन्ति॥ ऋतवस्त्रय इव विकृतिमापन्नाः
लोकमशुभेनोपघातकाले इति॥ तदृषयः सर्व एवानुमेनिरे वचनमात्रेयस्य भगवतोऽभिननन्दुश्चेति॥ आत्रेयस्य व
चः श्रुत्वा सर्व एवानुमेनिरे नृपयोऽभिननन्दुश्च यथेन्द्रवचनं सुराः॥ तत्र श्लोकः॥ गुणाः षड्द्विविधो हेतुर्विवि
धं कर्म तत्पुनः॥ वायोश्चतुर्विधं कर्म पृथक् च कफपित्तयोः॥ महर्षीणां मतिर्या या पुनर्वसुमतिश्च या॥ कलाकली
ये वातस्य तत्सर्वं संप्रकाशितं॥ ॥ इति वातकलाकलीयो नाम द्वादशोऽध्यायः॥१२॥ ७ ७ ॥
अथातः स्नेहाध्यायं व्याख्यास्यामः॥ इति ह० आत्रेयः॥ सांख्यैः संख्यातसंख्येयैः सहासीनं पुनर्वसुं॥ २०
जगद्धितार्थं पप्रच्छ वह्निवेशः स्वसंशयं॥ किंयोनयः कति स्नेहाः के च स्नेहगुणाः पृथक्॥ कालानुपाने के कस्य
कस्य कति काश्च विचारणाः॥ कति मात्राः कथंमानाः का च केषूपदिश्यते॥ कश्च केभ्यो हितः स्नेहः प्रकर्षः स्नेहने च
कः॥ स्नेह्याः के च न स्नेह्याः स्निग्धातिस्निग्धलक्षणं॥ किं पानात्प्रथमं पीते जीर्णे किं च हिताहितं॥ किं

Dr BHAU DAJI MEMORIAL

मृदुक्रूरकोष्ठाः का व्यापदः सिद्धयश्च काः॥ अच्छसंशोधने चैव स्नेहे का वृत्तिरिष्यते॥ विचारणाः केषु योज्याः
विधिना केन तत्प्रभो॥ स्नेहस्यामितविज्ञानं ज्ञानमिच्छामि वेदितुं॥ अथ तत्संशयच्छेत्ता प्रत्युवाच पुनर्वसुः॥
स्नेहानां द्विविधा सौम्य योनिः स्थावरजंगमा॥ तिलः प्रियालाभिषुकौ बिभीतकश्चित्राभयैरण्डमधूकसर्षपाः॥
कुसुंभबिल्वारुकमूलिकातसीनिकोचकाक्षोडकरंजशिग्रुकाः स्नेहाश्रयाः स्थावरसंज्ञितास्तथा॥ स्युर्जंगमा मा
त्स्यमृगाः सपक्षिणः॥ तेषां दधिक्षीरघृतामिषं वसा स्नेहेषु मज्जा च तथोपदिश्यते॥ सर्वेषां तैलजातानां ति
लतैलं विशिष्यते॥ बलार्थे स्नेहने चाग्र्यमैरंडं तु विरेचने॥ स्निग्धोष्णं तैलमैरंडं वातश्लेष्महरं परं॥ कषायस्वा
दुतिक्तं च योजितं पित्तहार्यपि॥ सर्पिस्तैलं वसा मज्जा सर्वस्नेहोत्तमा मताः॥ एषु चैवोत्तमं सर्पिः संस्कार
स्यानुवर्तनात्॥ घृतं पित्तानिलहरं रसशुक्रौजसां हितं॥ निर्वापणं मृदुकरं स्वरवर्णप्रसादनं॥ मारुतघ्नं न च
श्लेष्मवर्धनं बलवर्धनं॥ त्वच्यमुष्णं स्थिरकरं तैलं योनिविशोधनं॥ विद्धभग्नाहतभ्रष्टयोनिकर्णशिरोरुजि
॥ पौरुषोपचये स्नेहे व्यायामे चेष्यते वसा॥ बलशुक्ररसश्लेष्ममेदोमज्जाविवर्धनः॥ मज्जा विशेषतोऽस्थ्नां
च बलकृत्स्नेहने हितः॥ सर्पिः शरदि पातव्यं वसा मज्जा च माधवे॥ तैलं प्रावृषि नात्युष्णशीते स्नेहं पिबेन्नरः॥
वातपित्ताधिको रात्रावुष्णे चापि पिबेन्नरः॥ श्लेष्माधिको दिवा शीते पिबेच्चामलभास्करे॥ अत्युष्णे वा दिवा
पीतवातपित्ताधिकेन वा॥ मूर्च्छां पिपासामुन्मादं कामलां वा समीरयेत्॥ शीते रात्रौ पिबेत्स्नेहं नरः श्लेष्माधिकोऽपि
वा॥ आनाहमरुचिं शूलं पाण्डुतां वा समृच्छति॥ जलमुष्णं घृते पेयं यूषस्तैलेऽनु शस्यते॥ वसामज्ज्ञोस्तु मंडः पास
र्वेषूष्णमथांबु वा॥ कद्रूरजंघापादानि वातोल्बणानि नाविवा(?)॥ पिबेत्प्राक्भोजनाज्जंतुः कट्यादीनां बला
वहं॥ वातगुल्ममुदावर्तं प्लीहानं पारिकीर्तितं॥ योन्यर्शोवेदनां चैव वातातीसारमेव च॥ इति रूप्यश्च बलस्थ
कायाग्निश्च बलप्रदः॥ स्नुताह्वातिदोषांश्च रुतः स्नेह्या वपीडकाः(?)॥ पिबेच्च भोजनादूर्ध्वं मूर्ध्वजत्रुगते गदे॥
बलं तेनेन्द्रियाणां चाविमत्यं चापजायते॥ कर्णमन्याशिरः शूलमार्दितं हनुसंग्रहं॥ प्रविश्याथ बकासं च
श्वासादृसान्तरश्चायं(?)॥ नक्तांध्यं तिमिरं चैव स्नेहो हन्त्यो ध्वभागकः(?)॥ वलीपलितखालित्यं सेव्यमानो निहंत

व॥ रोगा नेतानतः पुंसो देहदुर्गकराः पराः॥ समभिष्यंदनीयाश्चाजीवनीया बृंहणास्तथा॥ ओदनश्च विलेपी च रसो मांसप
चरक.सू. योदधि॥ यवागूः सूपशाकौ च यूषः कांबलिकः खलः॥ सक्तवस्तिलपिष्टं च मद्यं लेहास्तथैव च॥ भक्ष्यमभ्यंजनं बस्तिस्त
थैवोत्तरबस्तयः॥ गंडूषः कर्णतैलं च नस्तः कर्णाक्षितर्पणं॥ चतुर्विंशतिरित्येताः स्नेहस्य प्रविचारणाः॥ स्नेहस्य स भिष
२१ दृष्टः कल्पः प्राथमकल्पिकः॥ रसैश्चोपहितः स्नेहः समासव्यासयोगिभिः॥ षड्भिस्त्रिषष्टिधा संख्यां प्राप्नोत्येकश्च के
वलः॥ एवमेताश्चतुःषष्टिः स्नेहानां प्रविचारणाः॥ ओकर्तुव्याधिपुरुषान् प्रयोज्या जानता भवेत्॥ अहोरात्रमहः
कृत्स्नमर्धाहं च प्रतीक्ष्यते॥ प्रधाना मध्यमा ह्रस्वा स्नेहमात्रा जरां प्रति॥ इति तिस्रः समुद्दिष्टा मात्राः स्नेहस्य मानतः॥
तासां प्रयोगं वक्ष्यामि पुरुषं पुरुषं प्रति॥ प्रभूतस्नेहनित्या ये क्षुत्पिपासासहा नराः॥ पावकश्चोत्तमबलो येषां ये
चोत्तमा बले॥ गुल्मिनः सर्पदष्टाश्च विसर्पोपहताश्च ये॥ उन्मत्ताः कृच्छ्रमूत्राश्च गाढवर्चस एव च॥ पिबेयुरुत्तमां मा
त्रां तस्याः पाने गुणान् शृणु॥ विकारान् शमयत्येषा शीघ्रं सम्यक् प्रयोजिता॥ दोषानुकर्षिणी मात्रा सर्वमार्गानु
सारिणी॥ बल्या पुनर्नवकरी शरीरेंद्रियचेतसां॥ अरुष्कस्फोटपिडकाकंडूपामाभिरार्दिताः॥ कुष्ठिनश्च प्रमीढा
श्च वातशोणितकाश्च ये॥ नातिबह्वाशिनश्चैव मृदुकोष्ठास्तथैव च॥ पिबेयुर्मध्यमां मात्रां मध्यमाश्चापि ये
बले॥ मात्रैषा मंदविभ्रंशा न चातिबलहारिणी॥ सुखेन च स्नेहयति शोधनार्थे च युज्यते॥ ये तु वृद्धाश्च बाला
श्च सुकुमाराः सुखोचिताः॥ रिक्तकोष्ठत्वमहितं येषां मंदाग्नयश्च ये॥ ज्वरातिसारकासाश्च येषां चिरसमुत्थिताः॥
येषां मात्रां पिबेयुस्ते ह्रस्वां ये चावरा बले॥ परिहारे सुखा चैषा मात्रा स्नेहनबृंहणी॥ वृष्या बल्या निराबाधा
चिरं चाप्यनुवर्तते॥ वातपित्तप्रकृतयो वातपित्तविकारिणः॥ चक्षुष्कामाः क्षताः क्षीणा वृद्धा बालास्तथाबलाः॥
आयुःप्रकर्षकामाश्च बलवर्णस्वरार्थिनः॥ पुष्टिकामाः प्रजाकामाः सौकुमार्यार्थिनश्च ये॥ दीप्त्योजःस्मृतिमे
धाग्निबुद्धींद्रियबलार्थिनः॥ पिबेयुः सर्पिरार्ताश्च दाहशस्त्रविषाग्निभिः॥ प्रवृद्धश्लेष्ममेदस्काश्चलस्थूलग २१
लोदराः॥ वातव्याधिभिराविष्टा वातप्रकृतयश्च ये॥ बलं तनुत्वं लघुतां दृढतां स्थिरगात्रतां॥ स्निग्धश्लक्ष्ण
तनुत्वक्तां ये च कांक्षंति देहिनः॥ कृमिकोष्ठाः क्रूरकोष्ठास्तथा नाडीभिरर्दिताः॥ पिबेयुः शीतले काले तैलं तैलो

चिताश्च ये॥ वातातपसहा ये तु रूक्षा भाराध्वकर्शिताः॥ संशुष्करेतोरुधिरा निष्पीतकफमेदसः॥ अस्थिसंधिसिरास्नायुमर्म
कोष्ठमहारुजः॥ बलवान् मारुतो येषां खानि चावृत्य तिष्ठति॥ महच्चाग्निबलं येषां वसासात्म्याश्च देहिनः॥ तेषां स्नेह्य
तमानां तु वसापानं विधीयते॥ दीप्ताग्नयः क्लेशसहा घस्मराः स्नेहसेविनः॥ वातार्ताः क्रूरकोष्ठाश्च स्नेह्या मज्जानमाप्नु
युः॥ येभ्यो येभ्यो हितो यो यः स्नेहः स परिकीर्तितः॥ स्नेहनस्य प्रकर्षे तु सप्तरात्रत्रिरात्रकौ॥ स्वेद्याः शोधयितव्याश्च
रूक्षा वातविकारिणः॥ व्यायाममद्यस्त्रीनित्याः स्नेह्याः स्युर्ये च चिंतकाः॥ संशोधनादृते येषां रूक्षणं संप्रवक्ष्यते न ते
षां स्नेहनं शस्तमुत्सन्नकफमेदसां॥ अभिष्यण्णाननगुदा नित्यमंदाग्नयश्च ये॥ तृष्णामूर्छापरीताश्च गर्भिण्यस्तालु
शोषिणः॥ अन्नद्विषश्छर्दयंतो जठरामगरार्दिताः॥ दुर्बलाश्च प्रतांताश्च स्नेहग्लाना मदातुराः॥ न स्नेह्या वर्तमानेषु न
नस्तोबस्तिकर्मसु॥ स्नेहपानात् प्रजायंते रोगास्तेषां तु दारुणाः॥ पुरीषं ग्रथितं रूक्षं वायुरप्रगुणो मृदुः॥ पक्ता खर
त्वं रूक्षत्वं गात्रस्यास्निग्धलक्षणं॥ वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतं॥ मार्दवं स्निग्धता चांगे स्निग्धानामुपजाय
ते॥ पांडुता गौरवं जाड्यं पुरीषस्याविपक्वता॥ तंद्रीररुचिरुत्क्लेशः स्यादतिस्निग्धलक्षणं॥ द्रवोष्णमनभिष्यंदि
भोज्यमन्नं प्रमाणतः॥ नातिस्निग्धमसंकीर्णं श्वः स्नेहं पातुमिच्छता॥ पिबेत् संशमनं स्नेहमन्नकाले प्रकांक्षितः॥ शुध्य
र्थं पुनराहारे नैशे जीर्णे पिबेन्नरः॥ श्लेष्मणा स्नेहमिश्रेण रुध्यते पथि मारुतः॥ तेनांगमर्दो हृद्ग्रहः परिकर्तिश्च
जायते॥ श्लेष्मवातानुलोम्यार्थं तस्मादन्नं स्नेहपाचनं॥ स्नेहे तस्माज्जीर्णेऽपि तोयमन्नं न दुष्यति॥ स्वल्पस्नेहं वि
लेप्यां तु जीर्णे स्नेहे च भोजनं॥ मद्गुल्यस्नेहसिद्धेन यूषाद्यैरितरसेन वा॥ उद्गारसंप्रवृत्त्यर्थं स्वल्पमुष्णं पिपायये
त॥ शोषस्ताल्वोष्ठजिह्वानां श्वेदनं कर्णयोरपि॥ दीनस्वरत्वं वर्णश्च प्रसेको वदनस्य च॥ जंघोरुद्वेष्टनं सादो ह्लाः म
निर्हृष्णास एव च॥ जीर्णस्यालक्षणं स्नेहे परा शेयं तथापरे॥ उष्णोदकोपचारी स्याद् ब्रह्मचारी क्षपाशयः॥ शकृन्मू
त्रानिलोद्गारानुदीर्णांश्च न धारयेत्॥ व्यायाममुच्चैर्वचनं क्रोधशोकौ हिमातपौ॥ वर्जयेदप्रवातं च सेवेत शयना
सनं॥ स्नेहं पीत्वा नरः स्नेहं प्रतिभुंजान एव च॥ स्नेहमिथ्योपचाराद्धि जायंते दारुणा गदाः॥ मृदुकोष्ठस्त्रिरात्रेण स्नि
ह्यत्यच्छोपसेवया॥ स्निह्यति क्रूरकोष्ठस्तु सप्तरात्रेण मानवः॥ गुडमिक्षुरसं मस्तु क्षीरमुल्लोडितं दधि॥ पा

ग्रसं कृसरां सर्पिः काश्मर्यत्रिफलारसौ॥ द्राक्षारसं पीलुरसं जलमुष्णमथापि वा॥ मद्यं वा तरुणं पीत्वा मृदुकोष्ठो विरि
च्यते॥ विरेचयंति नैतानि क्रूरकोष्ठं कदाचन॥ भवंति क्रूरकोष्ठस्य ग्रहण्यत्युल्बणानिला॥ उदीर्णपित्ताल्पकफा ग्रह
णी मंदमारुता॥ मृदुकोष्ठस्य तस्मात्स सुविरेच्यो नरः स्मृतः॥ उदीर्णपित्ता ग्रहणी यस्य चाग्निबलं महत्॥ भस्मी
भवति तस्याशु पीतः स्नेहोऽग्नितेजसा॥ स जग्ध्वा स्नेहमात्रां तामोजः प्रक्षारयन् बली॥ स्नेहाग्निरुत्तमां तृष्णां सो
पसर्गामुदीरयेत्॥ स चेत्सुशीतं सलिलं नासादयति दह्यते॥ यथैवाशीविषः कक्षमध्यगः स्वविषाग्निना॥ अजी
र्णे यदि तु स्नेहे तृष्णा स्याच्छर्दयेद्भिषक्॥ शीतोदकं पुनः पीत्वा भुक्त्वा रूक्षान्नमुल्लिखेत्॥ न सर्पिः केवलं पित्ते पेयं सा
मे विशेषतः॥ सर्वं ह्यनुरजेद्देहं हत्वा संज्ञां च मारयेत्॥ तंद्रा सोत्क्लेश आनाहो ज्वरः स्तंभो विसंज्ञिता॥ कुष्ठानि कंडूः
पांडुत्वं शोफार्शांस्यरुचिस्तृषा॥ जठरं ग्रहणीदोषः स्तैमित्यं वाक्यनिग्रहः॥ शूलमामप्रदोषाश्च जायंते स्नेह
विभ्रमात्॥ तत्राप्युल्लेखनं शस्तं स्वेदः कालप्रतीक्षणं॥ प्रतिप्रति व्याधिबलं बुध्वा स्रंसनमेव च॥ तक्रारिष्ट
प्रयोगश्च रूक्षपानान्नसेवनं॥ मूत्राणां त्रिफलायाश्च स्नेहव्यापत्तिभेषजं॥ अकाले चातिमात्रश्च न
च योजितः॥ स्नेहो मिथ्योपचाराच्च व्यापद्येतातिसेवितः॥ स्नेहात्प्रस्कंदनं जंतुस्त्रिरात्रोपरतः पिबेत्॥ स्नेहवद्द्रवमु
ष्णं च त्र्यहं भुक्त्वा रसौदनं॥ एकाहोपरतस्तद्वद्भुक्त्वा प्रच्छर्दनं पिबेत्॥ स्यात्तु संशोधनार्थीये वृत्तिः स्नेहे विरिक्तव
त्॥ स्नेहद्विषः स्नेहनित्या मृदुकोष्ठाश्च ये नराः॥ क्लेशासहा मद्यनित्यास्तेषामिष्टा विचारणा॥ लावतैत्तिरमा
यूरहंसवाराहकुक्कुटाः॥ गव्याजौरभ्रमात्स्याश्च रसाः स्युः स्नेहने हिताः॥ यवकोलकुलत्थाश्च स्नेहाः सगुडशर्क
राः॥ दाडिमं दधि सव्योषं रससंयोगसंग्रहः॥ स्नेहयंति तिलाः पूर्वं जग्धाः सस्नेहफाणिताः॥ नरः स्निह्यति पी
त्वा वा रसं दध्नः सफाणितं॥ कृसराश्च बहुस्नेहास्तिलकांबलिकास्तथा॥ फाणितं शृंगवेरं च तैलं च सुरया सह॥
पिबेद्रूक्षो भृते मांसे जीर्णेऽश्नीयाच्च भोजनं॥ तैलं मद्यं च वाराहं वसा मज्जा न मेव वा॥ पिबन् सफाणितं
क्षीरं नरः स्निह्यति वातिकः॥ धारोष्णं स्नेहसंयुक्तं पीत्वा वा सलवणं पयः॥ स्निह्येत सगुडं वापि पीत्वा दधिरसं नरः
पंचप्रसृतिका पेया पायसो माषमिश्रकः॥ क्षीरसिद्धो बहुस्नेहः स्नेहः स्नेहयेदचिरान्नरं॥ सर्पिस्तैलवसामज्जातंदुल २२

प्रसृतैः स्मृताः पंचप्रसृतिका पेया पेया स्नेहनमिच्छता॥ सौकरो वा रसः स्निग्धः सर्पिर्लवणसंयुतः॥ पिबेद्द्वात्रि
धावा च स्नेहयेदचिरान्नरं॥ ग्राम्यानूपौदकं मांसं गुडं दधि पयस्तिलान्॥ कुष्ठशोफप्रमेहांश्च स्नेहनेन प्रयोजयेत्॥
स्नेहैर्यथास्वं तान्सिद्धैः स्नेहयेदविकारिभिः॥ पिप्पलीभिर्हरीतक्या सिद्धैस्त्रिफलया सह॥ द्राक्षामलकयूषाभ्यां
दध्ना चाम्लेन साधयेत्॥ व्योषगर्भं भिषक्स्नेहं पीत्वा स्निह्यति तं नरः॥ यवकोलकुलत्थानां रसाः क्षारं सुरा दधि॥
क्षीरः सर्पिश्च तत्सिद्धं स्नेहनीयं घृतोत्तमं॥ तैलमज्जवसासर्पिर्बदरत्रिफलारसैः॥ योनिशुक्रप्रदोषेषु साधयित्वा प्र
योजयेत्॥ गृण्हात्यंबु यथा वस्त्रं प्रस्रवत्यधिकं यथा॥ यथाग्निर्वीर्यानि स्नेहस्रवते वाधिकस्तथा॥ यथा वाक्लेदयन्मृत्पि
मासिक्तं त्वरया जलं॥ स्रवत्यस्नेहतोऽत्यर्थं तथा चाति सेवितः॥ लवणोपहिताः स्नेहाः स्नेहयंत्यचिरान्नरं॥ तद्धि वि
ष्यंद्यरूक्षं च सूक्ष्ममुष्णं व्यवायि च॥ स्नेहमग्रे प्रयुंजीत ततः स्वेदमनंतरं॥ तत्र श्लोकाः॥ स्नेहाः स्नेहविधिः कृत्स्नो व्या
पत्सिद्धिः सभेषजाः॥ यथाप्रश्नं भगवता व्याहृतं चांद्रभागिना॥ ॥ इति स्नेहाध्यायस्त्रयोदशः॥ १३॥ ७
॥ अथातः स्वेदाध्यायं व्याख्यास्यामः॥ इति ह॰ आत्रेयः॥ अतः स्वेदाः प्रवक्ष्यंते यैर्यथावत्प्रयोजितैः॥ स्वेदसा
ध्याः प्रशाम्यंति गदा वातकफात्मकाः॥ स्नेहपूर्वं प्रयुक्तेन स्वेदेनावजितेऽनिले॥ पुरीषमूत्ररेतांसि न सज्जंति कदाच
न॥ शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादनैः॥ नमयंति यथान्यायं किं पुनर्जीवितो नरान्॥ रोगर्तुव्याधितापेक्षो
नात्युष्णोऽतिमृदुर्न च॥ द्रव्यवान्कल्पितो देशे स्वेदः कार्यकरो मतः॥ व्याधौ शीते शरीरे च महान्स्वेदो महाबले॥ दुर्बले
दुर्बलः स्वेदो मध्यमे मध्यमो हितः॥ वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते॥ स्निग्धरूक्षस्तथा स्निग्धो रूक्षश्चा
प्युपकल्पितः॥ आमाशयगते वाते कफे पक्वाशयाश्रये॥ रूक्षः पूर्वोहितः स्वेदः स्नेहपूर्वस्तथैव च॥ वृषणौ
हृदयं दृष्टी स्वेदयेन्मृदु नैव वा॥ मध्यमं वंक्षणौ शेषमंगावयवमिष्टतः॥ सुशुद्धैर्नक्तकैः पिंड्या गोधूमानाम
थापि वा॥ पद्मोत्पलपलाशैर्वा स्वेद्यः संवृत्य चक्षुषी॥ मुक्तावलीभिः शीताभिः शीतलैर्भाजनैरपि॥ जलार्द्रैर्जलजै
र्हस्तैः स्विद्यतो हृदयं स्पृशेत्॥ शीतशूलव्युपरमे स्तंभगौरवनिग्रहे॥ संजाते मार्दवे चैव विरामः स्वेदनाद्धितः॥ पित्त
प्रकोपो मूर्छा च गात्रसादस्तृषा क्लमः॥ स्वेदः स्वसंगदौर्बल्यमतिस्विन्नस्य लक्षणं॥ उक्तस्तस्याशितीयो ग्रैष्मिकः

सर्वशो विधिः॥ सोत्तानविन्यस्य कर्णस्योर्विधिर्मधुरैस्तिलैः॥ कषायमद्यनित्यानां गर्भिण्या रक्तपित्तिनां॥ पित्तिनां सातिसा
च.सू. रिणां रूक्षाणां मधुमेहिनां॥ विदग्धभ्रष्टबुध्नानां विषमद्यविकारिणां॥ श्रान्तानां नष्टसंज्ञानां स्थूलानां पित्तमेहिनां॥ तृ
ष्यतां क्षुधितानां क्रुद्धानां शोचतामपि॥ कामल्युदरिणां चैव क्षतानामाढ्यरोगिणां॥ दुर्बलातिविशुष्काणामुपक्षीणौ
२३ जसां तथा॥ भिषक्तैमिरिकाणां च न स्वेदमवतारयेत्॥ प्रतिश्याये च कासे च हिक्काश्वासेष्वलाघवे॥ कर्णमन्याशिरःशूले
स्वरभेदे गलग्रहे॥ अर्दितैकांगसर्वांगपक्षाघाते विनामके॥ कोष्ठानाहविबंधेषु शुक्राघाते विजृंभके॥ पार्श्वपृ
ष्ठकटीकुक्षिसंग्रहे गृध्रसीषु च॥ मूत्रकृच्छ्रे महत्त्वे च मुष्कयोरंगमर्दके॥ पादजानूरुजंघार्तिसंग्रहे श्वयथावपि॥ खल्ली
ष्वामेषु शीते च वेपथौ वातकंटके॥ संकोचायामशूलेषु स्तंभगौरवसुप्तिषु॥ सर्वांगेषु विकारेषु स्वेदनं हितमुच्यते॥
तिलमाषकुलत्थाम्लघृततैलामिषौदनैः॥ पायसैः कृसरैर्मांसैः पिंडस्वेदं प्रयोजयेत्॥ गोखराश्वयराहोष्ट्रशकृद्भिः
सतुषैर्यवैः॥ सिकतापांसुपाषाणकरीषायसपुटकैः॥ श्लेष्मिकान्स्वेदयेत्पूर्वैर्वातिकान्समुपाचरेत्॥ द्रव्याण्ये
तानि शस्यंते यथास्वं प्रस्तरेष्वपि॥ भूगृहेषु च जंताकेषूष्णगर्भगृहेषु च॥ विधूमांगारतप्तेषु स्वभ्यक्तः स्वि
द्यते सुखं॥ ग्राम्यानूपौदकं मांसं पयो बस्तशिरस्तथा॥ वराहमध्यपित्तासृक्स्नेहवत्तिलतंदुलाः॥ इत्येता
नि समुत्क्वाथ्य नाडीस्वेदं प्रयोजयेत्॥ देशकालविकारज्ञो युक्त्यपेक्षाभिषक्क्रमः॥ वरुणामृतकैरंडशिग्रुमू
लकसर्षपैः॥ वासावंशकरंजार्कपत्रैरश्मंतकस्य च॥ शिरीषशोभांजनकमालतीसुरसार्जकैः॥ पत्रैरुत्
क्वाथ्य सलिलं नाडीस्वेदं प्रयोजयेत्॥ पूतीकपंचमूलाभ्यां सुरया दधिमस्तुना॥ मूत्रैरम्लैश्च सस्नेहैर्ना
डीस्वेदं प्रयोजयेत्॥ एत एव च निर्यूहाः प्रयोज्या जलकोष्ठके॥ स्वेदनार्थं घृतक्षीरतैलकोष्ठांश्च कारयेत्॥ गो
धूमशकलैश्चूर्णैर्यवानामम्लसंयुतैः॥ सस्नेहकिण्वलवणैरुपनाहः प्रशस्यते॥ गंधैः सुरायाः किण्वेन
जीवंत्या शतपुष्पया॥ उमया कुष्ठतैलाभ्यां युक्तया चोपनाहयेत्॥ चर्मभिश्चोपनद्धव्यः सलोमभिरपूतिभिः॥ २३
उष्णवीर्यैरलाभे तु कौशेयाविकशाटकैः॥ रात्रौ बद्धं दिवा मुंचेन्मुंचेद्रात्रौ दिवाकृतं॥ विदाहपरिहारार्थं स्यात्प्र
कर्षस्तु शीतले॥ संकरः प्रस्तरो नाडी परिषेकोऽवगाहनं॥ जेंताकोऽश्मघनः कर्षूः कुटी भूः कुंभिकेव च॥ कूपो होला

क इत्येते स्वेदयंति त्रयोदश॥ तेन यथावत्प्रवक्ष्यंते सर्व एवानुपूर्वशः॥ तत्र वस्त्रांतरितैरवस्त्रांतरितैर्वा पिंडैर्य
थोक्तैरुपस्वेदनं शंकरस्वेदमिति विद्यात्॥ शूकशमीधान्यपुलाकानां वेशवारपायसकृसरोत्कारिकादीनां वा
प्रस्तरे कौशेयाविकोत्तरप्रच्छदे वा पंचांगुलैरंडार्कपत्रप्रच्छदे वा स्वभ्यक्तसर्वगात्रस्य शयानस्योपरि स्वेदनं प्र
स्तरस्वेदमिति विद्यात्॥ स्वेदनद्रव्याणां पुनर्मूलफलपत्रभंगादीनां मृगशकुनिपिशितशिरःपादादीनामुष्ण
स्वभावानां यथार्हमम्ललवणस्नेहोपहितानां मूत्रक्षीरादीनां वा कुंभ्यां बाष्पमनुद्वमंत्यामुत्क्वथितानां नाड्या
शरेषीकावंशदलकरंजार्कपत्रान्यतमकृतया गजाग्रहस्तसंस्थानया व्याममात्रदीर्घया व्यामार्धदीर्घया वा
व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विनतया
वातहरसिद्धस्नेहाभ्यक्तगात्रस्य बाष्पमुपहरेत्॥ बाष्पो ह्यनृजुगामी विहतचंडवेगस्त्वचमविदहन्॥ सुखं
स्वेदयतीति नाडीस्वेदः॥ वातिकोत्तरवातिकानां पुनर्मूलफलपत्रभंगादीनां क्वाथैः सुखोष्णैः कुंभीर्वर्ष
णिकाः प्रनाडीर्वा पूरयित्वा यथार्हसिद्धस्नेहाभ्यक्तगात्रं वस्त्रावच्छन्नं परिषेचयेदिति परिषेकः॥ वातहरोत्क्वाथ
क्षीरघृततैलपिशितरसोष्णसलिलकोष्ठकावगाहस्तु यथोक्त एवावगाहो विज्ञेयः॥ अथ जेंताकं चिकीर्षुर्भू
मिं परीक्षेत॥ पूर्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे कृष्णमधुरमृत्तिके सुवर्णवर्णमृत्तिके वा प
रीवापे पुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभूमिभागे
सप्ताष्टौ वारत्नीरुपक्रम्योदकात्प्राङ्मुखमुदङ्मुखं वाभिमुखतीर्थं कूटागारं कारयेदुत्सेधविस्तार
तः परमरत्नीः षोडश समंततः सुवृत्तं मृत्कर्मसंपन्नमनेकवातायनमस्य च कूटागारस्यांतः समंततो भित्ति
मरत्निविस्तारोत्सेधां पिंडिकां कारयेदाकपाटान्मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रं पुरुषप्रमाणं
मृण्मयं कंदुसंस्थानं बहुसूक्ष्मच्छिद्रमंगारकोष्ठकस्तंभं सपिधानं कारयेत्तं च खादिराणामाश्वकर्णादीनां
वा काष्ठानां पूरयित्वा प्रदीपयेत्॥ स यदा जानीयात्साधु दग्धानि काष्ठानि विगतधूमान्यवतप्तं केवलमग्नि
ना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति॥ तत्रैनं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत्॥ प्रवे

ग्यायंश्चानुशिष्यात् सौम्य प्रविश कल्याणायारोग्याय चेति प्रविश्य चैनां पिंडिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासु
खं शयीथा न च त्वया स्वेदमूर्छापरीतेनापि सता पिंडिकैषा मोक्तव्या आप्राणोच्छ्वासात् भ्रश्यमानो ह्यतः पिंडिकावका
शाद्द्वारमनधिगच्छन् स्वेदमूर्छापरीततया सद्यः प्राणान् जह्याः तस्मात् पिंडिकां न कथंचन मुंचेथाः स यदा जानीयाद्वि
गताभिष्यंदमात्मानं सम्यक्प्रस्रुतस्वेदपिच्छं सर्वस्रोतोविमुक्तं लघुभूतमपगतविबंधस्तंभसुप्तिवेदनागौरवमिति तत
स्तां पिंडिकामनुसरन् द्वारं प्रपद्येथाः निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमुपस्पृशेरपगतसं
तापक्लमस्तु मुहूर्तात्सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयादिति जेंताकः ॥ शयनस्य प्रमाणेन घना
मश्ममयीं शिलां तापयित्वानिलघ्नैर्दारुभिः संप्रदीपितैः ॥ व्यपोह्य सर्वानंगारान् प्रोक्ष्य चैवोष्णवारिणा ॥
तां शिलामथ कुर्वीत कौशेयाविकसंस्तरां ॥ तस्यां स्वभ्यक्तसर्वांगः स्वपन् स्विद्यति ना सुखं कौरवाजिनकौशेयप्रावारा
द्यैः सुसंवृतः इत्युक्तोऽश्मघनः स्वेदः कर्षूस्वेदः प्रवक्ष्यते ॥ खनयेच्छयनस्याधः कर्षूं स्थानविभागवित् ॥ दीप्तैरधूमै
रंगारैस्तां कर्षूं पूरयेत्ततः ॥ तस्यामुपरि शय्यायां स्वपन् स्विद्यति ना सुखं ॥ अनत्युत्सेधविस्तारां वृत्ताकाराम
लोचनां ॥ घनभित्तिं कुटीं कृत्वा कुष्ठाद्यैः संप्रलेपयेत् ॥ कुटीमध्ये भिषक् शय्यां स्वास्तीर्णां चोपकल्पयेत् ॥ प्रावारा
जिनकौशेयकुथकंबलगोलकैः ॥ हसंतिकाभिरंगारपूर्णाभिस्तां च सर्वतः ॥ परिवार्यांतरारोहेत्तस्यां स्वि
द्यति ना सुखं ॥ य एवाश्मघनस्वेदविधिर्भूमौ स एव तु ॥ प्रशस्तायां निवातायां समायामुपदिश्यते ॥ तं व्याधि
बलकालज्ञो भिषक्कृत्यां विचारयेत् ॥ कुंभीं वातहरक्वाथपूर्णां भूमौ निखानयेत् ॥ अर्धभागं त्रिभागं
वा शयनं तत्र चोपरि ॥ स्थापयेदासनं वापि नातिसांद्रपरिच्छदं ॥ अथ कुंभ्यां भिषग्द्यात् संतप्तानयसा
गुडान् ॥ पाषाणान्वोष्मणा तेन तत्स्थः स्विद्यति ना सुखं ॥ सुसंवृतांगः स्वभ्यक्तः स्नेहैरनिलनाशनैः ॥ कूपं
शयनविस्तारं द्विगुणं चापि वेधतः ॥ देशे निवाते शस्ते च सुमृष्टं कारयेत्ततः ॥ हस्त्यश्वगोखरोष्ट्राणां करीषै
र्दग्धपूरितं ॥ स्वभ्यक्तः सुसंस्तीर्णे स्वपन् स्विद्यति ना सुखं ॥ धीतिकां तु करीषाणां यथोक्तानां प्रदी
पयेत् ॥ शयनांतःप्रमाणेन शयनं तत्र चोपरि ॥ सुदग्धायां विधूमायां यथोक्तमुपकल्पयेत् ॥ स्ववच्छन्न २५

स्वच्छः

स्वपंस्तस्यां स्वनः स्विद्यति मानवः ॥ होलाकस्वेद इत्येष सुखः प्रोक्तो महर्षिणा ॥ इति त्रयोदशविधः स्वेदो
ऽग्निगुणसंश्रयः ॥ व्यायाममुष्णसदनं गुरुप्रावरणं भयं ॥ क्षुत्पानं बहु क्रोधउपनाहाहवातपाः ॥ स्वेदये
ति दशैतानि नरमग्निगुणादृते ॥ इत्युक्तोऽग्निगुणैः स्वेदः संयुक्तोऽग्निगुणैर्न च ॥ एकांगसर्वांगगतः स्निग्धो रूक्ष
स्तथैव च ॥ तदहः स्विन्नगात्रस्य व्यायामं परिवर्जयेत् ॥ तत्र श्लोकाः ॥ यथा कार्यकरः स्वेदो हितो येभ्यश्च य
द्विधः ॥ यत्र देशे यथायोग्यो देशो रक्ष्यश्च यो यथा ॥ स्विन्नातिस्विन्नरूपाणि तथातिस्विन्नभेषजं ॥ अस्वेद्याः
स्वेदयोग्याश्च स्वेदद्रव्याणि कल्पना ॥ त्रयोदशविधः स्वेदो विना दशविधोऽग्निना ॥ संग्रहेण च षड्भेदाः स्वेदा
ध्यायेऽनिदर्शिताः ॥ स्वेदाधिकारे यद्वाच्यमुक्तमेतन्महर्षिणा ॥ शिष्यैस्तु प्रतिपत्तव्यमुपदेष्टा पुनर्वसुः ॥ ७ ॥
इति स्वेदाध्यायो नाम चतुर्दशः ॥ १४ ॥ ॥ ७ ॥ अथात उपकल्पनीयमध्यायं व्याख्यास्यामः ॥ इति ह स्माह भग
वानात्रेयः ॥ इह खलु राजानं राजमात्रमन्यं वा विपुलद्रव्यं संभृतसंभारं वमनं विरेचनं वा पाययितुकामे
न भिषजा प्रागेवौषधपानात्संभाराः भवंत्युपकल्पनीयाः सम्यक् चैव हि गच्छत्यौषधे प्रतिभोगार्थाः व्याप
न्ने चौषधे व्यापदः परिसंख्याय प्रतीकारार्था भवंति ॥ न हि सन्निकृष्टे काले प्रादुर्भूतायामापदि सत्यपि क्रया
क्रये सुकरमाशु संभरणमौषधानां यथावदिति ॥ एवंवादिनं भगवंतमात्रेयमग्निवेश उवाच ॥ ननु भगवा
नादावेव ज्ञानवता तथा प्रतिविधातव्यं ॥ यथा प्रतिविहितं सिध्येदेवौषधमेकांतेन ॥ सम्यक्प्रयोगनिमित्ता हि
कर्मणां सिद्धिरिष्टा ॥ व्यापच्चासम्यक्प्रयोगनिमित्ता अथ सम्यगसम्यक् च कर्म समारब्धं सिध्यति ॥ व्यापद्यते वानि
यमेन तुल्यं भवति ज्ञानमज्ञानेनेति तमुवाच भगवानात्रेयः ॥ शक्यं तथा प्रतिविधातुमस्माभिरस्मद्विधैर्वा
प्यग्निवेश यथा प्रतिविहितं सिध्येदेवौषधमेकांतेन तच्च प्रयोगसौष्ठवमुपदेष्टुमुपधारयितुं वाऽस्य यथाव
न हि कश्चिदस्ति य एतदेवमुपदिष्टमुपधारयितुमुत्सहेत ॥ उपधार्य वा तथा प्रतिपत्तुं प्रयोक्तुं वा सूक्ष्माणि
हि दोषभेषजदेशकालबलशरीराहारसात्म्यसत्वप्रकृतिवयसामवस्थांतराणि ॥ यान्यनुचिंत्यमानानि विमलवि
पुलबुद्धेरपि बुद्धिमाकुलीकुर्युः ॥ किं पुनरल्पबुद्धेः तस्मादुभयमप्येतद्यथावदुपदेक्ष्यामः ॥ सम्यक्प्रयो

गं चैवौषधानां व्यापन्नानां च व्यापत्साधनानि सिद्धिषूत्तरकालमिदानीं तु तानन्तर्भागानविधानविसमासेनोप
च.रु.स. देक्ष्यामः॥ तद्यथा॥ दृढं निवातं प्रवातैकदेशं सुखप्रविचारमनुपत्यकं॥ धूमातपजलरजसामनभिगमनीय
मनिष्टानां च शब्दस्पर्शरसरूपगन्धानां सोदपानोदूखलमुसलवर्चःस्थानस्नानभूमिमहानसं सर्वोपकरण
२५. समृद्धं तद्वास्तुविद्याकुशलप्रशस्तं गृहमेव तावत्पूर्वमुपकल्पयेत॥ ततः शीलशौचाचारानुरागदाक्ष्यप्रादक्षिण्यो
पपन्नानुपचारकुशलान् सर्वकर्मसु पर्यवदातान् सूपौदनपाचकस्नापकसंवाहकोत्थापकसंवेशकौषधपे
षकांश्च परिचारकान् सर्वकर्मस्वप्रतिकूलांस्तथा गीतवादित्रोल्लापकश्लोकगाथाख्यायिकेतिहासपुराण
कथाकुशलानभिप्रायज्ञाननुकूलाननुमतांश्च देशकालविदः पारिषदांस्तथा लावकपिञ्जलशशहरिणै
णकालपुच्छकमृगमातृकोरभ्रान् गां दोग्ध्रीं शीलवतीमनातुरां जीवद्वत्सां सुप्रतिविहिततृणशरणपानीयां पा
त्र्याचमनीयोदकोष्ठमणिकघटपिठरपर्योगकुम्भीकुम्भकुण्डशरावदर्वीकटोदञ्चनपरिपचनमन्थानचर्मचेलसूत्र
कार्पासोर्णादीनि शयनासनादीनि चोपन्यस्तभृङ्गारप्रतिग्रहाणि सुप्रयुक्तास्तरणोत्तरप्रच्छदोपधानानि सोपाश्र
याणि संवेशनोपवेशनस्नेहस्वेदाभ्यङ्गप्रदेहपरिषेकानुलेपनवमनविरेचनास्थापनानुवासनशिरोविरेचन
मूत्रोच्चारकर्मणामुपचारसुखानि सुप्रक्षालितोपधानाश्च सुश्लक्ष्णखरमध्यमा दृषदः॥ शस्त्राणि चोपकरणार्था
नि धूमनेत्रं च बस्तिनेत्रं चोत्तरबस्तिकं च कुशहस्तकं च तुलां च मानभाण्डं च घृततैलवसामज्जक्षौद्रफाणितलवणेन्धनोदकम
धुसीधुसुरासौवीरकतुषोदकमैरेयमेदकदधिदधिमण्डोदश्विद्धान्याम्लमूत्राणि च तथा शालिषष्टिकमुद्गमाष
यवतिलकुलत्थबदरमृद्वीकाकाश्मर्यपरूषकाभयामलकबिभीतकादीनि नानाविधानि स्नेहस्वेदोपकरणार्थानि॥ द्रव्याणि
तथैवोर्ध्वहरानुलोमिकोभयभाञ्जि संग्राहिकदीपनीयपाचनीयोपशमनीयवातहरादिसमाख्यातानि चौषधा
नि यच्चान्यदपि किञ्चिद्व्यापदः प्रतिसंख्याय प्रतीकारार्थमुपकरणं॥ विद्याद्यच्च प्रतिभोगार्थं तत्तदुपकल्पयेत॥ २५.
ततस्तं पुरुषं यथोक्ताभ्यां स्नेहस्वेदाभ्यां यथार्हमुपपादयेत॥ तं चेदस्मिन्नन्तरे मानसः शारीरो वा व्याधिस्तीव्रत
रः सहसाभ्यागच्छेत्तमेव तावदस्योपावर्तयितुं यतेत॥ ततस्तमुपावर्त्य तावन्तमेवैनं कालं तथाविधेनैव कर्म

णोपाचरेत॥ ततस्तं पुरुषं स्नेहस्वेदोपपन्नमनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं शिरःस्नातमनुलि
प्तगात्रं स्रग्विणमनुपहतवस्त्रसंवीतं देवताग्निद्विजगुरुवृद्धवैद्यानर्चितवन्तमिष्टेक्षणाभिराशीर्भिरभिमन्त्रितां म
धुमधुकसैन्धवफाणितोपहितां मदनफलकषायमात्राप्रमाणं तु खलु सर्वसंशोधनप्रमाणानि च प्रतिपुरुषमपेक्षि
तव्यानि भवंति॥ यावद्धि यस्य संशोधनं पीतं वैकारिकदोषहरणायोपपद्यते॥ तावदस्य मा
त्राप्रमाणं वेदितव्यं भवति॥ पीतवन्तं तु खल्वेनं मुहूर्तमनुकांक्षेत तस्य यदा जानीयात स्वेदप्रादुर्भावेन दोषं प्रविलयमा
पद्यमानं लोमहर्षेण च स्थानेभ्यः प्रचलितं कुक्षिसमाध्मानेन च कुक्षिमनुगतं॥ हृल्लासास्यस्रवणाभ्यामपि चोर्ध्व
मभिमुखीभूतमथास्मै जानुसममसंबाधं सुप्रयुक्तास्तरणोत्तरप्रच्छदोपधानं सोपाश्रयमासनमुपवेष्टुं प्रयच्छेत॥
प्रतिग्रहांश्चोपचारयेत्लालाटप्रतिग्रहे पार्श्वोपग्रहणे नाभिप्रपीडने पृष्ठोन्मर्दने चानपत्रपणीयाः सुहृदोऽनुम
ताः प्रयतेरन्॥ अथैनमनुशिष्याद्विवृतोष्ठतालुकण्ठो नातिमहता व्यायामेन वेगानुदीरयेत॥ किञ्चिदवनम्य ग्री
वामूर्ध्वशरीरमुपवेगानप्रवृत्तान्प्रवर्तयन् सुपरिलिखितनखाभ्यामङ्गुलीभ्यामुत्पलकुमुदसौगन्धिकनालै
र्वा कण्ठमभिस्पृशन्सुखं प्रवर्तयस्वेति॥ स तथा कुर्यात्ततोऽस्य वेगान् प्रतिग्रहगतानवेक्षेतावहितः॥ वेगविशेषद
र्शनाद्धि कुशलः॥ अयोगयोगातियोगविशेषानुपलभ्येत॥ वेगविशेषदर्शी पुनः कृत्यं यथार्हमवबुध्येत ल
क्षणेन तस्माद्वेगानवेक्षेतावहितः॥ तत्रामून्ययोगयोगातियोगविशेषविज्ञानानि भवंति॥ तद्यथा॥ अप्रवृ
त्तिः कुतश्चित्केवलस्य वाप्यौषधस्य प्रवृत्तिर्विभ्रंशो विबन्धो वेगानामयोगलक्षणानि भवंति काले प्रवृत्तिरन
तिमहती व्यथा यथाक्रमं दोषहरणं स्वयं चावस्थानमिति योगलक्षणानि भवंति॥ योगेन तु खलु दो
षप्रमाणविशेषेणाभिभवंती तीक्ष्णमध्यावभागास्त्रयः॥ योगाधिक्येन तु फेनिलरक्तचन्द्रिकोपगमनमित्यतियोगल
क्षणानि भवंति॥ तत्रायोगातियोगनिमित्तानिमानुपद्रवान्विद्यात॥ आध्मानं परिकर्तिका परिस्रावो हृदयोप
सरणमङ्गग्रहो जीवादानं विभ्रंशः स्तम्भः क्लम उपद्रवाः॥ इति योगेन तु खल्वेनं छर्दितवन्तमभिसमीक्ष्य सु
प्रक्षालितपाणिपादास्यं मुहूर्तमाश्वास्य स्नैहिकवैरेचनिकोपशमनीयानां धूमानामन्यतमं सामर्थ्यतः पा

च॰ सू॰ पायित्वा पुनरेवोदकमुपस्पर्शयेत॥ उपस्पृष्टोदकं चैनं निवातमागारमनुप्रवेश्य चानुशिष्यात सोस्य समुच्चै
र्भाष्यमत्याशनमतिस्थानमतिचंक्रमणं क्रोधशोकहिमातपावश्यायातिप्रवातान्यानयानं ग्राम्यधर्ममस्व
पनं निशि दिवास्वप्नं विरुद्धाजीर्णासात्म्याकालप्रमितातिहीनगुरुविषमभोजनं वेगविधारणोदीरणमिति
२६ भावानेतान्मनसाप्यसेवमानः सर्वमहो गमयस्वेति स तथा कुर्यात॥ अथैनं सायाह्ने परे वाह्नि सुखोद
कपरिषिक्तं पुराणानां लोहितशालितण्डुलानां स्वविक्लिन्नां मण्डपूर्वां सुखोष्णां यवागूं पाययेदग्निबलमभि
समीक्ष्य एवं द्वितीये तृतीये चान्नकाले चतुर्थे त्वन्नकाले तथाविधानामेव शालितण्डुलानामुत्स्विन्नां विलेपीमुष्णोदकद्वि
तीयामस्नेहलवणामल्पस्नेहलवणां वा भोजयेत एवं पञ्चमे षष्ठे चान्नकाले सप्तमे त्वन्नकाले तथाविधानामेव शालीनां द्विप्रसृतं सु
स्विन्नमोदनमुष्णोदकानुपानं तनुना तनुस्नेहलवणोपपन्नेन मुद्गयूषेण भोजयेत॥ एवमष्टमे नवमे चान्नकाले दश
मे त्वन्नकाले लावकपिञ्जलादीनामन्यतमस्य मांसरसेनोदकलावणिकेन नातिसारवता भोजयेदुष्णोदकानुपा
नं एवमेकादशे द्वादशे चान्नकाले। अत ऊर्ध्वमन्नगुणान्क्रमेणोपभुञ्जानः सप्तरात्रेण॥ प्रकृतिभोजनमागच्छेत
अथैनं पुनरेव स्नेहस्वेदाभ्यामुपपाद्यानुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं कृतहोमबलि
मङ्गलजपप्रायश्चित्तमिष्टे तिथिनक्षत्रकरणमुहूर्ते ब्राह्मणान्स्वस्ति वाचयित्वा त्रिवृत्कल्कमक्षमात्रं यथार्हा
लोडनप्रतिविनीतं पाययेत। प्रसमीक्ष्य दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्वप्रकृतिवयसामवस्था
न्तराणि विकारांश्च सम्यग्विरिक्तं चैनं वमनोक्तेन धूमवर्जेन विधिनोपपादयेत॥ आबलवर्णप्रकृति
लाभात् बलवर्णोपपन्नं चैनमनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं शिरःस्नातमनुलिप्तगात्रं स्रग्विण २६
मनुलिप्तगात्रं स्रग्विणमनुपहतवस्त्रसंवीतमनुरूपालङ्कारालङ्कृतं॥ सुहृदां दर्शयित्वा ज्ञातीनां दर्शयेदथैनं
कामेष्ववसृजेदिति भवन्ति चात्र श्लोकाः॥ ॥ अनेन विधिना राजा राजमात्रोथवा पुनः॥ यस्य वा विपुलं द्र
व्यं स संशोधनमर्हति॥ दरिद्रस्त्वापदं प्राप्य प्राप्तकालं विशोधनं॥ पिबेत्काममसंभृत्य संभारानपि दुर्लभान।

नहि सर्वमनुष्याणां सन्ति सर्वे परिच्छदाः॥ न च रोगा न बाधन्ते दरिद्रानपि दारुणाः॥ यद्यच्छक्यं मनुष्येण कर्तुमौषधमा
पदि॥ तत्तत्सेव्यं यथाशक्ति वसनान्यशनानि च॥ मलापहं रोगहरं बलवर्णप्रसादनं॥ पीत्वा संशोधनं सम्य
गायुषा युज्यते चिरं॥ तत्र श्लोकाः॥ ईश्वराणां वसुमतां वमनं सविरेचनं॥ संभारा ये यदर्थं च समानीय प्र
योजयेत॥ यथा प्रयोज्या या मात्रा यदयोगस्य लक्षणं॥ योगातियोगयोर्यच्च दोषा ये चाप्युपद्रवाः॥ यदसेव्यं
विशुद्धेन यश्च संसर्जनक्रमः॥ तत्सर्वं कल्पनाध्याये व्याजहार पुनर्वसुः॥ ॥ इति श्री उपकल्पनीयो ना
म पञ्चदशोध्यायः॥१५॥ ॥ ॥ अथातश्चिकित्साप्राभृतीयमध्यायं व्याख्यास्यामः॥ इति ह॰ स्म॰॥
चिकित्साप्राभृतो धीमान्शास्त्रवान्कर्मतत्परः॥ नरं विरेचयति यं स योगात्सुखमश्नुते॥ यं वैद्यमानी त्वबुधो वि
रेचयति मानवं॥ सोतियोगादयोगाद्वा मानवो दुःखमश्नुते॥ दौर्बल्यं लाघवं ग्लानिर्व्याधीनामणुता रुचिः॥ हृद्व
र्णशुद्धिः क्षुत्तृष्णा काले वेगप्रवर्तनं॥ बुद्धीन्द्रियमनःशुद्धिर्मारुतस्यानुलोमता॥ सम्यग्विरिक्तलिङ्गानि का
याग्नेश्चानुवर्तनं॥ ष्ठीवनं हृदयाशुद्धिरुत्क्लेशः श्लेष्मपित्तयोः॥ आध्मानमरुचिश्छर्दिरदौर्बल्यमलाघवं
जंघोरुसदनं तन्द्रा स्तैमित्यं पीनसागमः॥ लक्षणान्यविरिक्तानां मारुतस्य च निग्रहः॥ विट्पित्तकफवाता
नामागतानां यथाक्रमं॥ परं स्रवति यद्रक्तं मेदोमांसोदकोपमं॥ निःश्लेष्मपित्तमुदकं शोणितं कृष्णमेव वा
तृष्यतो मारुतार्तस्य सोतियोगः प्रमुह्यतः॥ एतान्येव च लिङ्गानि वमनेतिकृते वदेत॥ ऊर्ध्वगा वातरोगा
श्च वाग्ग्रहश्चाधिकं मतः॥ चिकित्साप्राभृतं तस्मादुपेयाच्छरणं नरः॥ युञ्ज्याद्य एनमत्यन्तमायुषा च सुखे
न च॥ अविपाकोरुचिः स्थौल्यं पाण्डुता गौरवं क्लमः॥ पिडकाकोठकण्डूनां संभवोरतिरेव च॥ आलस्यश्रमदौर्बल्यं
दौर्गन्ध्यमवसादकः॥ श्लेष्मपित्तसमुत्क्लेशो निद्रानाशोतिनिद्रता॥ तन्द्रा क्लैब्यमबुद्धित्वमशस्तस्वप्नदर्शनं॥ ब
लवर्णप्रणाशश्च तृप्यतो बृंहणैरपि॥ बहुदोषस्य लिङ्गानि तस्मै संशोधनं हितं॥ ऊर्ध्वं चैवानुलोमं च यथादो
षं यथाबलं॥ एवं विशुद्धकोष्ठस्य कायाग्निरभिवर्धते॥ व्याधयश्चोपशाम्यन्ति प्रकृतिश्चानुवर्तते॥ इन्द्रिया
णि मनो बुद्धिर्वर्णश्चास्य प्रसीदति॥ बलं पुष्टिरपत्यं च वृषता चास्य जायते॥ जरां कृच्छ्रेण लभते चिरं जीवत्य
नामयः

च॰ सू॰
पायित्वा पुनरेवोदकमुपस्पर्शयेत्॥ उपस्पृष्टोदकं चैनं निवातमागारमनुप्रवेश्य चानुशिष्यात् सोच्चै
र्भाष्यमत्यासनमतिस्थानमतिचङ्क्रमणं क्रोधशोकहिमातपावश्यायातिप्रवातान् यानयानं ग्राम्यधर्ममस्व
पनं निशि दिवास्वप्नं विरुद्धाजीर्णासात्म्याकालप्रमितातिहीनगुरुविषमभोजनं वेगविधारणोदीरणमिति
२६ भावानेतान्मनसाप्यसेवमानः सर्वमहो गमयस्वेति स तथा कुर्यादथैनं सायाह्ने परे वाह्नि सुखोद
कपरिषिक्तं पुराणानां लोहितशालितण्डुलानां स्वविक्लिन्नां मण्डपूर्वां सुखोष्णां यवागूं पाययेदग्निबलमभि
समीक्ष्य एवं द्वितीये तृतीये चान्नकाले चतुर्थे त्वन्नकाले तथाविधानामेव शालीनामुत्स्विन्नां विलेपीमुष्णोदकद्वि
तीयामस्नेहलवणामल्पस्नेहलवणां वा भोजयेदेवं पञ्चमे षष्ठे चान्नकाले तथाविधानामेव शालीनां द्विःप्रसृतं सु
स्विन्नमोदनमुष्णोदकानुपानं तनुना तनुस्नेहलवणोपपन्नेन मुद्गयूषेण भोजयेत्॥ एवमष्टमे नवमे चान्नकाले दश
मे त्वन्नकाले लावकपिञ्जलादीनामन्यतमस्य मांसरसेनौदकलावणिकेन नातिसारवता भोजयेदुष्णोदकानुपा
नं एवमेकादशे द्वादशे चान्नकाले। अत ऊर्ध्वमन्नगुणान् क्रमेणोपयुञ्जानः सप्तरात्रेण॥ प्रकृतिभोजनमागच्छेत्
अथैनं क्रमागतबलमनुपहतसर्वेन्द्रियमुपपाद्य अनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं कृतहोमबलि
मङ्गलजपप्रायश्चित्तमिष्टे तिथिनक्षत्रकरणमुहूर्ते ब्राह्मणान् स्वस्ति वाचयित्वा त्रिवृत्कल्कमक्षमात्रं यथार्ह
कोडुनप्रतिविनीतं पाययेत्॥ प्रसमीक्ष्य दोषभेषजदेशकालबलशरीराहारसात्म्यसत्त्वप्रकृतिवयसामवस्था
न्तराणि विकारांश्च सम्यग्विरिक्तं चैनं वमनानुरूपेणानेन विधिना धूमवर्ज्यं नोपपादयेत्॥ आबलवर्णप्रति
लाभाद्बलवर्णोपपन्नं चैनमनुपहतमनसमभिसमीक्ष्य सुखोषितं सुप्रजीर्णभक्तं शिरःस्नातमनुलिप्तगात्रं स्रग्विण
मनुपहतवस्त्रसंवीतमनुरूपालङ्कारालङ्कृतं सुहृदां दर्शयित्वा ज्ञातीनां दर्शयेत् अथैनं २६
कामेष्ववसृजेत्। भवति चात्र श्लोकः॥ ॥ अनेन विधिना राजा राजमात्रोऽथवा पुनः॥ यस्य वा विपुलं द्रव्यं
स संशोधनमर्हति॥ दरिद्रस्त्वापदं प्राप्य प्राप्तकालं विशोधनम्॥ पिबेत्काममसंभृत्य संभारानतिदुर्लभान्।

न हि सर्वमनुष्याणां सन्ति सर्वे परिच्छदाः॥ न च रोगा न सेवन्ते दरिद्रमपि दारुणाः॥ यद्यच्छक्यं मनुष्येण कर्तुमौषधमा
पदि। तत्तत्सेव्यं यथाशक्ति वसनान्यशनानि च॥ मलापहं रोगहरं बलवर्णप्रसादनम्॥ पीत्वा संशोधनं सम्य
गायुषा युज्यते चिरम्। तत्र श्लोकाः॥ ईश्वराणां वसुमतां वमनं सविरेचनम्॥ संभारा ये यदर्थं च समानीय प्र
योजयेत्॥ यथा प्रयोज्या या मात्रा यदयोगस्य लक्षणम्॥ योगातियोगयोर्यच्च दोषा ये चाप्युपद्रवाः॥ यदसेव्यं
विशुद्धेन यश्च संसर्जनक्रमः॥ तत्सर्वं कल्पनाध्याये व्याजहार पुनर्वसुः॥ ॥ इति श्री उपकल्पनीयो ना
म पञ्चदशोऽध्यायः॥ १५॥ ७ ॥ ॥ अथातश्चिकित्साप्राभृतीयमध्यायं व्याख्यास्यामः॥ इति ह॰ यः॥
चिकित्साप्राभृतो धीमान् शास्त्रवान् कर्मतत्परः॥ नरं विरेचयति यं स योगात्सुखमश्नुते॥ यं वैद्यमानी त्वबुधो विरे
चयति मानवं॥ सोऽतियोगादयोगाद्वा मानवो दुःखमश्नुते॥ दौर्बल्यं लाघवं ग्लानिर्व्याधीनामणुता रुचिः॥ हृद्व
र्णशुद्धिः क्षुत्तृष्णा काले वेगप्रवर्तनम्॥ बुद्धीन्द्रियमनःशुद्धिर्मारुतस्यानुलोमता॥ सम्यग्विरिक्तलिङ्गानि का
याग्नेश्चानुवर्तनम्॥ ष्ठीवनं हृदयाशुद्धिरुत्क्लेशः श्लेष्मपित्तयोः॥ आध्मानमरुचिश्छर्दिरदौर्बल्यमलाघवम्॥
जङ्घोरुसदनं तन्द्रा स्तैमित्यं पीनसागमः॥ लक्षणान्यविरिक्तानां मारुतस्य च निग्रहः॥ विष्ठापित्तकफवाता
नामागतानां यथाक्रमम्॥ परं स्रवति यद्रक्तं मेदोमांसोदकोपमम्॥ निःश्लेष्मपित्तमुदकं शोणितं कृष्णमेव वा
तृष्यतो मारुतार्तस्य सोऽतियोगः प्रमुह्यतः॥ एतान्येव तु लिङ्गानि वमनेऽतिकृते वदेत्॥ ऊर्ध्वगा वातरोगा
श्च वाग्ग्रहश्चाधिकास्ततः॥ चिकित्साप्राभृतस्तस्माद्दद्याच्छोधनं नरः॥ युञ्ज्याद्यथा न मत्येत मात्रया च सुखे
न च॥ अविपाकोऽरुचिः स्थौल्यं पाण्डुता गौरवं क्लमः॥ पिडकाकोठकण्डूनां संभवोऽरतिरेव च॥ आलस्यश्रमदौर्बल्यं
दौर्गन्ध्यमवसादकः॥ श्लेष्मपित्तसमुत्क्लेशो निद्रानाशोऽतिनिद्रता॥ तन्द्रा क्लैब्यमबुद्धित्वमशस्तस्वप्नदर्शनम्॥ ब
लवर्णप्रणाशश्च तृप्यतो बृंहणैरपि॥ बहुदोषस्य लिङ्गानि तस्मै संशोधनं हितम्॥ ऊर्ध्वं चैवानुलोमं च यथादो
षं यथाबलम्॥ एवं विशुद्धकोष्ठस्य कायाग्निरभिवर्धते॥ व्याधयश्चोपशाम्यन्ति प्रकृतिश्चानुवर्तते॥ इन्द्रिया
णि मनोबुद्धिर्वर्णश्चास्य प्रसीदति॥ बलं पुष्टिरपत्यं च वृषता चास्य जायते॥ जरां कृच्छ्रेण लभते चिरं जीवत्य
नामयः

चा.क्र.म.

तस्मात्संशोधनं काले युक्तं युक्तेन पिबेन्नरः॥ दोषाः कदाचित्कुप्यन्ति जिता लंघनपाचनैः॥ जिताः संशोधनैर्ये तु न तेषां
पुनरुद्भवः॥ दोषाणां च द्रुमाणां च मूलेऽनुपहते सति॥ रोगाणां प्रसवानां च गतानामागतिर्ध्रुवा॥ भेषजक्षपि
ते पथ्यमाहारैरेव बृंहणं॥ घृतमांसरसक्षीरहृद्ययूषोपसंस्कृतैः॥ अभ्यंगोत्सादनैः स्नानैर्निरूहैः सानुवा
१७ सनैः॥ तथा स लभते शर्म युज्यते चायुषा चिरं॥ अतियोगानुबिद्धानां सर्पिःपानं प्रशस्यते॥ तैलं मधुरकैः
सिद्धमथवाप्यनुवासनं॥ अयोगो यस्य तं स्निग्धं पुनः संशोधयेन्नरं॥ मात्राकालक्रमापेक्षी स्मरन्पूर्वम
नुक्रमं॥ स्नेहने स्वेदने शुद्धौ रोगाः संसर्जने च ये॥ जायन्ते मार्गविहिते तेषां सिद्धिषु साधनं॥ जायन्ते हेतुवैषः
म्याद्विषमा देहधातवः॥ हेतुसाम्यात्समास्तेषां स्वभावोपरमः सदा॥ प्रवृत्तिहेतुर्भावानां न निरोधेऽस्ति कारणं
केचित्तत्रापि मन्यन्ते हेतुं हेतोरवर्तनं॥ एवमुक्तार्थमाचार्यमग्निवेशोऽभ्यभाषत॥ स्वभावोपरमे कर्म चिकि
त्साप्राभृतस्य किं॥ भेषजैर्विषमान्धातून्कान्समीकुरुते भिषक्॥ का वा चिकित्सा भगवन्किमर्थं वा प्रयुज्यते॥
तच्छिष्यवचनं श्रुत्वा व्याजहार पुनर्वसुः॥ श्रूयतामत्र या सौम्य युक्तिर्दृष्टा महर्षिभिः॥ न नाशे कारणाभावा
द्भावानां नाशकारणं॥ ज्ञायते नित्यगस्येव कालस्यात्ययकारणं॥ शीघ्रगत्वाद्यथाभूतस्तथा भावो वि
पद्यते॥ निरोधे कारणं तस्य नास्ति नैवान्यथा क्रिया॥ याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः॥ सा चिकि
त्सा विकाराणां कर्म तद्भिषजां स्मृतं॥ कथं शरीरे धातूनां वैषम्यं न भवेदिति॥ समानां चानुबन्धः स्यादित्यर्थं
क्रियते क्रिया॥ त्यागाद्विषमहेतूनां समानां चोपसेवनात्॥ विषमा नानुबध्नन्ति जायन्ते धातवः समाः॥ समै
स्तु हेतुभिर्यस्माद्धातून्संजनयेत्समान्॥ चिकित्साप्राभृतस्तस्माद्दाता देहसुखायुषां॥ धर्मस्यार्थस्य का
मस्य नृलोकस्योभयस्य च॥ दाता संपद्यते वैद्यो दानाद्देहसुखायुषां॥ इति तत्र श्लोकाः॥ चिकित्साप्राभृत २७
गुणो दोषो यश्चेतराश्रयः॥ योगायोगातियोगानां लक्षणं शुद्धिसंश्रयं॥ चिकित्सासूत्रमात्रं च सिद्धिव्याप
त्तिसंश्रये॥ या च युक्तिश्चिकित्सायां यं चार्थं कुरुते भिषक्॥ चिकित्साप्राभृते ध्याये तत्सर्वमवदन्मुनिः॥
इति श्री चिकित्साप्राभृतो नाम षोडशोऽध्यायः॥ १६॥ ७ ७ ७ ॥ अथातः कियन्तःशिरसीयम

ध्यायं व्याख्यास्यामः॥ इति ह स्माह भगवानात्रेयः॥ कियन्तः शिरसि प्रोक्ता रोगा हृदि च देहिनां॥ कति चाप्यनिल
दीनां रोगा मानविकल्पजाः॥ क्षयाः कति समाख्याताः पिडकाः कति चानघ॥ गतिः कतिविधा चोक्ता दोषाणां
दोषसूदन॥ हुताशवेशस्य वचनं तच्छ्रुत्वा गुरुरब्रवीत्॥ पृष्टवानसि यत्सौम्य तन्मे शृणु सविस्तरं॥ दृष्टाः पंच शिरो
रोगाः पंचैव हृदयामयाः॥ व्याधीनां द्व्यधिका षष्टिर्दोषमानविकल्पजा॥ दशाष्टौ च क्षयाः सप्त पिडका मधुमे
हिकाः॥ दोषाणां त्रिविधा चोक्ता गतिर्विस्तरतः शृणु॥ संधारणाद्दिवास्वप्नाद्रात्रौ जागरणान्मदात्॥ उच्चै
र्भाष्यादवश्यायात्प्राग्वातादतिमैथुनात्॥ गंधादसात्म्यादाघ्राताद्रजोधूमहिमातपात्॥ गुर्वम्लहरिता
दानादतिशीतांबुसेवनात्॥ शिरोभिघाताद्दुष्टामाद्रोदनाद्बाष्पनिग्रहात्॥ मेघागमान्मनस्तापाद्देशका
लविपर्ययात्॥ वातादयः प्रकुप्यन्ति शिरस्यस्रं च दुष्यति॥ ततः शिरसि जायन्ते रोगा विविधलक्षणाः॥ अ
र्धावभेदको वा स्यात्सर्वं वा रुज्यते शिरः॥ प्रतिश्यायमुखनासाक्षिकर्णरोगशिरोभ्रमाः॥ अर्दितं शिरसः कं
पो गलमन्याहनुग्रहः॥ विविधाश्चापरे रोगा वातादिकृमिसंभवाः॥ पृथग्दृष्टास्तु ये पंच संग्रहे परमर्षिभि
ः॥ शिरोगतांस्ताञ्छृणु मे यथास्वैर्हेतुलक्षणैः॥ उच्चैर्भाष्यातिभाष्याभ्यां तीक्ष्णपानात्प्रजागरात्॥ शी
तमारुतसंस्पर्शाद्व्यवायाद्वेगनिग्रहात्॥ उपवासादभिघाताद्विरेकवमनादति॥ बाष्पशोकभयत्रासाद्भा
रमार्गातिकर्शनात्॥ शिरोगताः सिरा वृद्धो वायुराविश्य कुप्यति॥ ततः शूलं महत्तस्य वातात्समुपजायते॥ निस्तुद्ये
ते भृशं शंखौ घाटा संभिद्यते तथा॥ भ्रुवोर्मध्यं ललाटं च पततीवातिवेदनं॥ बाध्येते स्वनतः श्रोत्रे निष्कृष्येते इवा
क्षिणी॥ घूर्णतीव शिरः सर्वं संधिभ्य इव मुच्यते॥ स्फुरत्यतिसिराजालं स्तभ्यते च शिरोधरा॥ स्निग्धोष्णमु
पशेते चास्य शिरोरोगेऽनिलात्मके॥ कट्वम्ललवणक्षारमद्यक्रोधातपानलैः॥ पित्तं शिरसि संदुष्टं शिरोरोगाय क
ल्पते॥ दह्यते रुज्यते तेन शिरः शीतं सुखायते॥ दह्येते चक्षुषी तृष्णा भ्रमः स्वेदश्च जायते॥ श्लेष्मा शिरसि
संदुष्टः शिरोरोगाय कल्पते॥ शिरो मन्दरुजं तेन सुप्तं स्तिमितभारिकं॥ भवत्युत्पद्यते तन्द्रा तथालस्यमरो
चकः॥ वातात्शूलं भ्रमः कंपः पित्ताद्दाहो मदस्तृषा॥ कफाद्गुरुत्वं तन्द्रा च शिरोरोगे त्रिदोषजे॥ तिलक्षीरगु

च॰ स॰ उदीर्णप्रतिसंकीर्णभोजनात्॥ क्लेदाच्च मांसानां दोषवत्स्योपजायते॥ ततः क्रिमिसंक्लेदात् क्रमयः पापकर्मणः
जनयन्ति भक्षयन्ति गंजातस्त्रीभक्तलक्षणं॥ यथा छिद्रह्जाः कंडुः शोफ हरोगं स्वदुःखितं॥ कृमिरोगानुरं विद्यात् कृमी
णां दर्शनेन च॥ शोकोपवासव्यायाम शीतरुक्षाल्पभोजनैः॥ वायुराविश्य हृदयं जनयत्यतिमारुजं॥ वेपथुर्वे
२८ ष्टनं स्तंभः प्रमोहः शून्यता द्रवः॥ हृदि वातातुरे रूपं जीर्णे चात्यर्थवेदना॥ उष्णाम्ललवणक्षार कटुकाजीर्णभो
जनैः॥ मद्यक्रोधातपैश्चाशु हृदि पित्तं प्रकुप्यति॥ हृद्दाहस्तिक्ततावक्त्रे पित्ताम्लोद्गिरणं क्लमः॥ तृष्णा मूर्छा भ्रमः
स्वेदः पित्तहृद्रोगलक्षणं॥ अत्यादानं गुरुस्निग्धमचिंतनमचेष्टनं॥ निद्रासुखं चाप्यधिकं कफहृद्रोगकारणं॥
हृदयं कफहृद्रोगे सुप्तं स्तिमितभारिकं॥ तंद्रारोचकपरीतस्य भवत्यश्माहतं यथा॥ हेतुलक्षणसंसर्गादुच्यते सान्नि
पातिकः॥ त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते॥ तिलक्षीरगुडादीनि ग्रंथिस्तस्योपजायते॥ मर्मैकदेशसंक्ले
दं रसश्चास्योपगच्छति॥ संक्लेदात् क्रमयश्चास्य भवंत्युपहतात्मनः॥ मर्मैकदेशे संजाताः सर्पंतो भक्षयंति च
तुद्यमानं स हृदयं सूचीभिरिव मन्यते॥ छिद्यमानं यथा शस्त्रैर्जातकंडूं महारुजं॥ हृद्रोगं क्रिमिजं त्वेतं लिंगैर्बु
ध्वा सुदारुणं॥ त्वरेत जेतुं तं विद्वान् विकारं शीघ्रकारिणं॥ द्व्युल्बणैकोल्बणैः षट् च हीनमध्याधिकैश्च षट्॥ समै
श्चैको विकारास्ते सान्निपातास्त्रयोदश॥ संसर्गे नव षट्चैभ्य एकरूपास्त्रयो मताः॥ पृथक् त्रयश्च तैर्वृद्धैर्व्याधि
यः पंचविंशतिः॥ यथा वृद्धैस्तथा क्षीणैर्दोषैः स्युः पंचविंशतिः॥ वृद्धिक्षयकृतश्चान्यो विकल्प उपदेक्ष्यते॥
वृद्धिरेकस्य समता चैकस्यैकस्य संक्षयः॥ द्वंद्ववृद्धिः क्षयश्चैकस्यैकवृद्धिर्द्वयोः क्षयः॥ प्रकृतिस्थं यदा पित्तं
मारुतः श्लेष्मणः क्षये॥ स्थानादादाय गात्रेषु यत्र यत्र विसर्पति॥ तदा भेदश्च दाहश्च तत्र तत्रानवस्थितः॥ गा
त्रदेशे भवत्यस्य श्रमो दौर्बल्यमेव च॥ प्रकृतिस्थं कफं वायुः क्षीणे पित्ते यदा वहेत्॥ करोति तु तदा शूलं सशैत्य
स्तंभगौरवं॥ प्रकृतिस्थं यदा वातं पित्तं कफपरिक्षये॥ संरुणद्धि तदा दाहः शूलं चास्योपजायते॥ प्रकृतिस्थं २९
कफं पित्तं यदा वातपरिक्षये॥ संनिरुंध्यात्तदा कुर्यात् सतंद्रागौरवं ज्वरं॥ प्रवृद्धो हि यदा वातः श्लेष्माणं पित्तपरि
क्षये॥ संनिरुंध्यात्तदा कुर्यात् शीतकं गौरवं करं॥ प्रकृतिस्थं यदा पित्तं श्लेष्मा मारुतसंक्षये॥ संनिरुंध्या

त्तदा कुर्यात् सदाहग्निबलं गुरुं॥ निद्रां तंद्रां प्रलेपं च हृद्रोगं गात्रगौरवं॥ नखादीनां च पीतत्वं ष्ठीवनं श्लेष्मपि
त्तयोः॥ हीनवातस्य तु श्लेष्मा पित्तेन सहितश्चरन्॥ करोत्यरोचकापाकौ सदनं गौरवं तथा॥ हृल्लासमास्य
स्रवणं पांडुतां दूयनं स्वरं॥ विरूक्षस्य च वैषम्यं वैषम्यमनलस्य च॥ हीनपित्तस्य तु श्लेष्मा मारुतेनोपसंहि
तः॥ स्तंभं शैत्यं च तोदं च जनयत्यनवस्थितं। गौरवं मृदुताम् अग्नेर्भक्ताश्रद्धा प्रवेपनं॥ नखादीनां च शुक्लत्वं
गात्रपारुष्यमेव च॥ हीने कफे मारुतस्तु पित्तं च कुपितं द्वयं॥ करोति यानि लिंगानि शृणु तानि समासतः॥
भ्रमं मुद्वेष्टनं दाहं तोदं स्फुरणं वेपनं॥ सांगमर्दं परीदाहं दूयनं धूपनं तथा॥ वातपित्तक्षये श्लेष्मा स्रोतांस्यपिदध
द्भृशं॥ चेष्टाप्रणाशं मूर्छां च वाक्संगं च करोति हि॥ श्लेष्मवातक्षये पित्तं देहौजः संसयंश्चरन्॥ ग्लानिमिंद्रि
यदौर्बल्यं मूर्छां तृष्णां क्रियाक्षयं॥ श्लेष्मपित्तक्षये वायुर्मर्माण्यभिभिन्नारयन्॥ प्रणाशयति संज्ञां च वेप
यत्यथ मानवं॥ दोषाः प्रवृद्धाः स्वलिंगं दर्शयंति यथाबलं॥ क्षीणा जहति लिंगं स्वं समाः स्वं कर्म कुर्वते॥ वा
तादीनां रसादीनां मलानामोजसस्तथा॥ क्षयास्तत्रानिलादीनामुक्तं संक्षयलक्षणं॥ वेपनेन सदा तेजाव्हं नो
चद्रूयति शूल्यते॥ हृदयं ताम्यति स्वल्पचेष्टेनापि रसक्षये॥ परुषास्फुटिता म्लाना त्वग्रूक्षा रक्तसंक्षये॥ मां
सक्षये विशेषेण स्फिग्ग्रीवोदरशुष्कता॥ संधीनां स्फुटनं ग्लानिरक्ष्णोरायास एव च॥ लक्षणं मेदसि क्षी
णे तनुत्वं चोदरस्य च॥ केशलोमनखश्मश्रुद्विजप्रपतनं श्रमः॥ ज्ञेयमस्थिक्षये रूपं संधिशैथिल्यमेव
च॥ शीर्यंत इव चास्थीनि दुर्बलानि लघूनि च॥ विशुष्काणि च लक्ष्यंते क्षीणमज्जानि नित्यशः॥ दौर्बल्यं
मुखशोषश्च पांडुत्वं सदनं श्रमः॥ क्लैब्यं शुक्राविसर्गश्च क्षीणशुक्रस्य लक्षणं॥ क्षीणे शकृति चांत्रा
णि पीडयन्निव मारुतः॥ रूक्षस्योन्नामयन् कुक्षिं तिर्यगूर्ध्वं च गच्छति॥ मूत्रक्षये मूत्रकृछ्रं मूत्रवैवर्ण्यमेव
च॥ पिपासा बाधते चास्य मुखं च परिशुष्यति॥ मलायनानि चान्यानि शून्यानि लघूनि च॥ विशुष्का
णि च लक्ष्यंते यथास्वं मलसंक्षये॥ बिभेति दुर्बलोऽभीक्ष्णं ध्यायति व्यथितेंद्रियः॥ दुःछायो दुर्मना रू
क्षः क्षामश्चैवौजसः क्षये॥ हृदि तिष्ठति यच्छुद्धं रक्तमीषत्सपीतकं॥ ओजः शरीरे संख्यातं तन्नाशान्ना

च०सू० विनश्यति॥ भ्रमरैः फलपुष्पेभ्यो यथा संभ्रियते मधु॥ एवमोजः शरीरेभ्यो गुणैः संभ्रियते नृणां॥ व्यायामा
नशनं चिन्ता रूक्षाल्पप्रमिताशनं। वातातपौ भयं शोको रूक्षपानं प्रजागरः॥ कफशोणितशुक्राणां मलानां चा
२९ तिवर्तनं॥ कालो भूतोपघातश्च ज्ञातव्याः क्षयहेतवः॥ गुरुस्निग्धाम्ललवणान्यतिमात्रं निषेविणां॥ नवमन्नं
च पानं च निद्रामास्यासुखानि च॥ त्यक्तव्यायामचिन्तानां संशोधनमकुर्वतां॥ श्लेष्मा पित्तं च मेदश्च मांसं चा
तिप्रवर्तते। तैरावृतः प्रसादं च गृहीत्वा याति मारुतः॥ यदा बस्तिं तदा कृच्छ्रो मधुमेहः प्रवर्तते॥ स मारुतस्य
पित्तस्य कफस्य च मुहुर्मुहुः॥ दर्शयत्याकृतिं गत्वा क्षयमाप्यायते पुनः॥ भवन्त्युपेक्षणात्तस्य पिडकाः सप्त दारु
णाः॥ मांसलेष्ववकाशेषु मर्मस्वपि च संधिषु। शराविका कच्छपिका जालिनी सर्षपी तथा। अलजी विनताख्या
च विद्रधिश्चेति सप्तमी॥ अन्तोन्नता मध्यनिम्ना श्यावा क्लेदरुजान्विता॥ शराविका स्यात्पिडका शरावाकृतिसंस्थिता
अवगाढार्तिनिस्तोदा महावस्तुपरिग्रहा॥ श्लक्ष्णा कच्छपपृष्ठाभा पिडका कच्छपी मता॥ स्तब्धा सिराजालवती स्निग्ध
स्रावा महाशया॥ रुजानिस्तोदबहुला सूक्ष्मच्छिद्रा च जालिनी॥ पिडका नातिमहती क्षिप्रपाका महारुजा। सर्षपी
सर्षपाभाभिः पिडकाभिश्चिता भवेत्॥ दहति त्वचमुत्थाने तृष्णामोहज्वरप्रदा॥ विसर्पत्यनिशं दुःखाद्दहत्यग्नि
रिवालजी॥ अवगाढरुजाक्लेदा पृष्ठे वाप्युदरेऽपि वा॥ महती विनता नीला पिडका विनता मता॥ विद्रधिं द्विविधं प्रा
हुर्बाह्यमाभ्यन्तरं तथा। बाह्यत्वक्स्नायुमांसोत्थः कण्डराभो महारुजः॥ शीतकान्नं विदाह्युष्णरूक्षशुष्कातिभो
जनात्। विरुद्धाजीर्णसंक्लिष्टविषमासात्म्यभोजनात्॥ व्यापन्नबहुमद्यत्वाद्वेगसंधारणाच्छ्रमात्॥ जिह्म
व्यायामशयनादतिभाराध्वमैथुनात्॥ व्यापन्नबहु०॥ अन्तःशरीरे मांसासृगाविशन्ति यदा मलाः॥
तदा संजायते ग्रन्थिर्गम्भीरस्थः सुदारुणः॥ हृदये क्लोम्नि यकृति प्लीह्नि कुक्षौ च वृक्कयोः॥ नाभ्यां वङ्क्षणयो २९
र्वापि बस्तौ वा तीव्रवेदनः॥ दुष्टरक्तातिमात्रत्वात्स वै शीघ्रं विदह्यते॥ अतः शीघ्रविदाहित्वाद्विद्रधिः परि
र्यते। व्यधच्छेदभ्रमानाहशब्दस्फुरणसर्पणैः॥ वातिकः पैत्तिकस्तृष्णामोहदाहमदज्वरैः॥ जृम्भोत्क्लेशार
चिस्तम्भशीतकैः श्लैष्मिको विदुः॥ सर्वेष्वेतेषु महच्छूलं विद्रधावुपजायते॥ शस्त्रैस्तत्रेव मथ्यते दह्यतेवोल्मुकै

वदह्यते॥ विद्रधिर्व्यम्लतां याते वृश्चिकैरिव दश्यते। तनु रूक्षारुणस्रावं फेनिलं वातविद्रधिः॥ तिलमाषकुलत्थो
दकसंकाशं पित्तविद्रधिः॥ श्लैष्मिकः स्रवति श्वेतं पिच्छिलं बहुलं बहु॥ लक्षणं सर्वमेवैतद्भजते सान्निपातिक
ः॥ इति॥ अथैषां विद्रधीनां साध्यासाध्यविशेषज्ञानार्थं स्थानकृतान् लिङ्गविशेषानुपदेक्ष्यते। तत्र प्रधा
नमर्मजे विद्रधौ हृद्घट्टनतमःप्रमोहकासश्वासाः; क्लोमजे पिपासामुखशोषगलग्रहाः॥ यकृज्जे श्वासः; प्लीहजे उ
च्छ्वासोपरोधः॥ कुक्षिजे कुक्षिपार्श्वान्तरांसशूलं॥ वृक्कजे पृष्ठकटिग्रहः; नाभिजे हिक्का; वङ्क्षणजे सक्थिसादो ५
बस्तिजे कृच्छ्रपूतिमूत्रता॥ पक्वप्रभिन्नेषु तूर्ध्वजेषु मुखात्स्रावः स्रवति॥ अधोजेषु गुदात्॥ उभयतस्तु नाभिब
स्तिजाः पार्श्वजाः सन्निपातजश्च मरणाय अवशिष्टाः पुनः कुशलमाशु प्रतिकारकारिणा चिकित्साक्रम
साद्योपशाम्यंति। तस्मादचिरोत्थितं विद्रधिं शस्त्रसर्पविद्युदग्नितुल्यं स्नेहविरेचनैराशु वा उपक्रमेत सर्वशो
थवद्वेति॥ भवन्ति चात्र॥ विना प्रमेहमप्येता जायन्ते दुष्टमेदसः। तावच्चैता न लक्ष्यन्ते यावद्वस्तुपरिग्रहः॥ श
राविका कच्छपिका जालिनी चेति दुःसहाः॥ जायन्ते ता ह्यतिबलाः प्रभूतश्लेष्ममेदसः॥ सर्षपी चालजी वि
नता विद्रधी च या॥ साध्याः पित्तोल्बणास्तास्तु संभवन्त्यल्पमेदसः॥ मर्मस्वंसे गुदे पाण्योः स्तने संधिषु
पादयोः॥ जायन्ते पिडका यस्य स प्रमेही न जीवति॥ तथान्याः पिडकाः सन्ति पीतरक्तासितारुणाः॥ पाण्डुराः
पाण्डुवर्णाश्च भस्माभा मेचकप्रभाः॥ मृद्व्यश्च कठिनाश्चान्याः स्थूलाः सूक्ष्मास्तथापराः॥ मन्दवेगा महावे
गाः स्वल्पशूला महारुजाः॥ ता बुध्वा मारुतादीनां यथास्वं हेतुलक्षणैः॥ ब्रूयादुपाचरेच्चाशु प्रागुपद्रवद
र्शनात्॥ तृड्श्वासमांससंकोथमोहहिक्कामदज्वराः॥ विसर्पमर्मसंरोधाः पिडकानामुपद्रवाः॥ क्षयस्था
नं च वृद्धिश्च दोषाणां त्रिविधा गतिः॥ ऊर्ध्वं चाधश्च तिर्यक् च विज्ञेया त्रिविधापरा॥ त्रिविधा चापरा कोष्ठ
शाखास्थिमर्मसंधिषु॥ इत्युक्ता विधिभेदेन दोषाणां त्रिविधा गतिः॥ चयप्रकोपप्रशमाः पित्तादीनां य
थाक्रमं॥ भवन्त्येकैकशः षट्सु कालेष्वभ्रागमादिषु॥ गतिः कालकृता चैषा चयाद्या पुनरुच्यते॥ ग
तिश्च द्विविधा दृष्टा प्राकृती वैकृती तथा॥ पित्तादृते ह्यूष्मणः पक्तिर्नराणामुपजायते॥ पित्तं चैवप्रकुपितं

चा.सू. विकारानकर्युरहून॥ प्राकृतस्तुबलंश्लेष्मा विकृतोमलउच्यते॥ सचैवौजःस्मृतःकायेसचपाप्मोपदिश्यते॥ सर्वाहिचे
ष्टावातेनसप्राणःप्राणिनांस्मृतः॥ तेनैवरोगाजायंतेतेनचैवोपरुध्यते॥ नित्यंसन्निहितामित्रंसमीक्ष्यात्मानमा
३० त्मवान॥ नित्ययुक्तःपरिचरेदिच्छन्नायुरनित्वरं॥ इतितत्रश्लोकौ॥ शिरोरोगाःसहृद्रोगारोगामानविकल्पजाः क्षया
पिडकाःप्रोक्तादोषाणांगतिरेवच॥ कियंतःशिरसीयेस्मिन्नध्यायेतत्त्वदर्शिना॥ ज्ञानार्थंभिषजांचैवप्रजानांचा
हितैषिणा॥ ॥इतिश्री॥ कियंतःशिरसीयोनामसप्तदशोध्यायः॥१७॥ ॥छ॥ अथातस्त्रिशोथीयम
ध्यायंव्याख्यास्यामः॥ इतिहस्माहभगवानात्रेयः॥ त्रयःशोफाभवंतिवातपित्तश्लेष्मनिमित्तास्तेपुनर्द्विविधा
निजागंतुभेदेन॥ तत्रागंतवश्छेदनभेदनक्षणनभंजन॥ पिच्छनोत्पेषणप्रहारवधबंधनवेष्टनपीडनादिभिर्वाभ
ल्लातकपुष्पफलरसात्मगुप्ताशूककृमिशूकाहितपत्रलतागुल्मसंस्पर्शनैर्वास्वेदनपरिसर्पणावमूत्रणैर्वावि
वि षिणां॥ सविषाविषमाणिदंष्ट्रादंतविषाणनखनिपातनैर्वासागरविषवातहिमदहनसंस्पर्शनैर्वाशोफाः
समुपजायंतेतेयथास्वंहेतुव्यंजनैरादावुपलभ्यंते॥ निजव्यंजनैकदेशविपरीतैर्वाबंधमंत्रागदप्रलेप
प्रतापननिर्वापणादिभिश्चोपक्रमैरुपक्रम्यमाणाप्रशांतिमापद्यंते॥ निजाःपुनस्नेहस्वेदवमनविरेचनास्था
पनानुवासनशिरोविरेचनानामयथावत्प्रयोगान्मिथ्यासंसर्जनाद्वाछर्द्यलसकविषूचिकाश्वासकासाति
सारशोषपांडुरोगोदरप्रदरभगंदरार्शोविकारातिकर्शितेर्वाकुष्ठकंडूपिडकादिभिर्वाछर्दिक्षवथूद्गारशुक्र
वातमूत्रपुरीषवेगधारणैर्वाकर्मरोगोपवासातिकर्शितस्यतु॥ सहसातिगुर्वम्ललवणपिष्टान्नफलशा
करागदधिहरितकमद्यमंदकदधिविरूढनवशूकशमीधान्यानूपौदकपिशितोपयोगान्मृत्पंकलोष्टभ
क्षणाल्लवणातिभक्षणाद्गर्भसंपीडनादामगर्भप्रपतनात्प्रजातानांचमिथ्योपचारादुदीर्णदोषत्वाच्छोफा
प्रादुर्भवंति॥ उक्तः॥ सामान्योहेतुरयंतत्रविशेषः॥ शीतरूक्षलघुविशदश्रमोपवासातिकर्शनक्षपणा ३०
दिभिर्वायुःप्रकुपितस्त्वङ्मांसशोणितादीन्यभिभूयशोफंजनयति॥ सक्षिप्रोत्थानप्रशमोभवति॥ श्या
वारुणवर्णःप्रकृतिवर्णोवाचलःस्पंदनःखरपरुषभिन्नत्वग्सलोमाछिद्यतइवभिद्यतइवपीड्यतइव

सूचीभिरिवतुद्यतेपिपीलिकाभिरिवसंसृप्यतेसर्षपकल्कावलिप्तइवचिमिचिमायतेसंकुच्यते॥ आयम्यतइववातशोफः
उष्णतीक्ष्णकटुक्षारलवणाम्लाजीर्णभोजनैरग्न्यातपप्रतापैश्चपित्तंप्रकुपितंत्वङ्मांसशोणितादीन्यभिभूयशोफं
जनयति॥ सक्षिप्रोत्थानप्रशमोभवति॥ कृष्णनीलपीतताम्रावभासउष्णोमृदुःकपिलताम्ररोमाउष्यतेदह्यतेदूय
तेधूप्यतेऊष्मायते॥ स्विद्यतेक्लिद्यतेनचस्पर्शमुष्णंवामृष्यते॥ इतिपित्तशोफः॥ गुरुमधुरशीतस्निग्धैरति
स्वप्नाव्यायामादिभिश्चश्लेष्माप्रकुपितस्त्वङ्मांसशोणितादीन्यभिभूयशोफंजनयति॥ सकृच्छ्रोत्थानप्रशमोभवति
पांडुश्वेतावभासःस्निग्धःश्लक्ष्णोगुरुःस्थिरःस्त्यानःशुक्लाग्ररोमास्पर्शोष्णसहश्चेतिश्लेष्मशोफः॥ यथास्वकारणाकृति
संसर्गात्द्विदोषजास्त्रयःशोफाः॥ कारणाकृतिसंसर्गात्सान्निपातिकएकः॥ एवंसप्तविधोभेदःप्रकृतिभिस्ताभिर्भि
द्यमानोद्विविधस्त्रिविधश्चतुर्विधःसप्तविधश्चशोफउपलभ्यते॥ पुनश्चैकएवसंधसामान्यादिति॥ तत्रश्लोकाः॥ शूयं
तेयस्यगात्राणिस्वपंतीवरुजंतिच॥ पीडितान्युन्नमंत्याशुवातशोफंतमादिशेत॥ यश्चाप्यरुणवर्णाभः शोफोनक्तंप्रण
श्यति॥ स्नेहोष्णमर्दनाभ्यांचप्रणश्येत्सचवातिकः॥ यःपिपासाज्वरार्तस्यदूयतेयविदह्यते॥ स्विद्यतेक्लिद्यतेगंधीसपि
त्तश्वयथुःस्मृतः॥ यःपीतमुखनेत्रत्वक्पूर्वंमध्यात्प्रसूयते॥ तनुत्वक्चातिसारीचपित्तशोफःसउच्यते॥ यःशीतलः
सकृद्गतिःपांडुःकंडूयतेपिच॥ पीडितोनोन्नमेन्मंदःशोफःसचकफात्मकः॥ यस्यशस्त्रकुशाछिन्नाच्छोणितंनप्र
वर्तते॥ कृच्छ्रेणपिच्छांस्रवतिसचापिकफसंभवः॥ निदानाकृतिसंसर्गात्श्वयथुःस्याद्द्विदोषजः॥ सर्वाकृतिःसंनिपा
तच्छोफोव्यामिश्रहेतुजः॥ यस्तुपादाभिनिर्वृत्तःशोफःसर्वांगगोभवेत॥ जंताःसचसकष्टस्यात्प्रसृताःस्त्रीमु
खाच्चयः॥ ऊर्ध्वगामीनरंपश्चान्मध्यगामीमुखात्स्त्रियं॥ उभयंबस्तिसंजातःशोफोहन्यान्नसंशयः॥ यश्चापि
गुह्यप्रभवःस्त्रियावापुरुषस्यवा॥ सचकष्टतमोज्ञेयोयस्यचस्युरुपद्रवाः॥ छर्दिःश्वासोरुचिस्तृष्णाज्वरातीसार
एवच॥ सप्तकोयंसदौर्बल्यःशोफोपद्रवसंग्रहः॥ यस्यश्लेष्माप्रकुपितोजिह्वामूलेवतिष्ठते॥ आशुसंजनये
शोफंकरोतिगलशुंडिकां॥ यस्यश्लेष्माप्रकुपितोगलबाह्येवतिष्ठते॥ शनैःसंजनयेतशोफंगलगंडःसउच्य
ते॥ यस्यश्लेष्माप्रकुपितःतिष्ठत्यंतर्गलेस्थिरः॥ आशुसंजनयेच्छोफंजायतेस्यगलग्रहः॥ यस्यपित्तंप्रकुपि

चरकसू॰

३२ तं सरक्तं तावच्च मर्दयति ॥ शोफं सरागं जनयेद्वि सर्पस्तस्य जायते ॥ यस्य पित्तं प्रकुपितं त्वचि रक्ते च तिष्ठति ॥ शोफं सरागं जनयेत्
पिडका तस्य जायते ॥ तस्य पित्तं प्रकुपितं शंखयोरवतिष्ठति ॥ श्वयथुः शंखको नाम दारुणस्तस्य जायते ॥ यस्य पित्तं प्रकु
पितं कर्णमूले वतिष्ठते ॥ श्लेः परितुरस्याभ्यंपुद्दास्तस्याभिवर्धते ॥ यस्य वातः प्रकुपितो गुल्मस्थाने वतिष्ठते ॥ शोफं
सशूलं जनयन् गुल्मस्तस्योपजायते ॥ यस्य वातः प्रकुपितः शोफशूलकरश्चरन् ॥ वंक्षणाद्वृषणौ याति वृध्मस्तस्योपजा
यते ॥ यस्य वातः प्रकुपितः त्वङ्मांसांतरमाश्रितः ॥ शोफं जनयति कुक्षौ उदरं तस्य जायते ॥ यस्य वातः प्रकुपितः कुक्षिं
मावर्त्य तिष्ठति ॥ नाधो व्रजति नाप्यूर्ध्वमानाहस्तस्य जायते ॥ रोगाश्चोत्सेधसामान्या दधिमांसार्बुदादयः ॥ विशिष्टा
नामरूपाभ्यां निर्देश्याः शोफसंग्रहे ॥ वातपित्तकफा यस्य युगपत् कुपितास्त्रयः ॥ जिह्वामूलेवतिष्ठंतो विदहंतः समु
च्छ्रिताः ॥ जनयंति भृशं शोफं वेदनाश्च पृथग्विधाः ॥ तं शीघ्रकारिणं रोगं रोहिणीकां तनिर्दिशेत् ॥ त्रिरात्रं परमं तस्य
जंतोर्भवति जीवितं ॥ उपक्रांतस्तु कुशलैः क्षिप्रं संपद्यते सुखी ॥ संति ह्येवंविधा रोगाः साध्या दारुणसंमताः ॥
ये हन्युरनुपक्रांता मिथ्यारंभेण वा पुनः ॥ साध्याश्चैवापरे संति व्याधयो मृदुसंमताः ॥ यत्नायत्नकृतं येषु कर्म सि
ध्यत्यसंशयं ॥ असाध्याश्चापरे संति व्याधयो याप्यसंज्ञिताः ॥ सुसाध्यपिकृतं येषु कर्म यात्राकरं भवेत् ॥ संति
चाप्यपरे रोगा येषु कर्म न सिध्यति ॥ अपि यत्नकृतं काले नेतान्विद्यानुपाचरेत् ॥ साध्याश्चैवाप्यसाध्याश्च व्याध
यो द्विविधाः स्मृताः ॥ मृदुदारुणभेदेन ते भवंति चतुर्विधाः ॥ त एवापरिसंख्येया भिद्यमाना भवंति हि ॥ निदानवेद
नावर्णस्थानसंस्थाननामभिः ॥ व्यवस्थाकरणं तेषां यथास्थूलेषु संग्रहः ॥ तथाप्रकृतिसामान्याद्विकारेषूपदिश्यते ॥
विकारनामाकुशलो न जिह्रीयात्कदाचन ॥ नहि सर्वविकाराणां नामतोस्ति ध्रुवा स्थितिः ॥ स एव कुपितो दोषः समुत्था
नविशेषतः ॥ स्थानांतरगतश्चैव विकारान् कुरुते बहून् ॥ तस्माद्विकारप्रकृतीरधिष्ठानांतराणि च ॥ समुत्थानविशेषां
श्च बुद्ध्वा कर्म समारभेत् ॥ यो ह्येतत्त्रिविधं ज्ञात्वा कर्माण्यारभते भिषक् ॥ ज्ञानपूर्वं यथान्यायं स कर्मसु न मुह्यति ॥ नि ३१
त्याः प्राणभृतां देहे वातपित्तकफास्त्रयः ॥ विकृताः प्रकृतिस्था वा तान् बुभुत्सेत पंडितः ॥ उत्साहोच्छ्वासनिश्वासचे
ष्टाधातुगतिः समाः ॥ समो मोक्षो गतिमतां वायोः कर्माविकारजं ॥ दर्शनं पक्तिरूष्मा च क्षुत्तृष्णा देहमार्दवं ॥ प्र

भाग्रसादो मेधा च पित्तकर्माविकारजं ॥ स्नेहो बंधः स्थिरत्वं च गौरवं वृषता बलं ॥ क्षमा धृतिरलोभश्च कफकर्माविका
रजं ॥ वाते पित्ते कफे चैव क्षीणे लक्षणमुच्यते ॥ कर्मणः प्राकृताद्धानिर्वृद्धिर्वापि विरोधिनां ॥ दोषप्रकृतिवैशेष्यं निय
तं वृद्धिलक्षणं ॥ दोषाणां प्रकृतेर्हानिर्वृद्धिश्चैवं परीक्ष्यते ॥ तत्र श्लोकाः ॥ संख्यानिमित्तरूपाणि शोफानां साध्य
ता न च ॥ तेषां तेषां विकाराणां शोफांस्तांस्तांश्च पूर्वजान् ॥ विधिभेदं विकाराणां त्रिविधं बोध्यसंग्रहं ॥ प्राकृतं कर्म दोषा
णां लक्षणं हानिवृद्धिषु ॥ वीतमोहरजो दोषाल्लोभमानमदस्पृहः ॥ व्याख्यातवांस्त्रिशोफीये रोगाध्याये पुनर्वसुः
॥ ॥ इति त्रिशोफीयो नाम अष्टादशोध्यायः १८ ॥ ७ ॥ अथातोष्टोदरीयमध्यायं व्याख्यास्यामः ॥ इति ह॰ यः
इह खल्वष्टावुदराण्यष्टौ मूत्राघाताः ॥ अष्टौ क्षीरदोषाः अष्टौ रेतोदोषाः सप्त कुष्ठानि सप्त पिडकाः सप्त विसर्पाः
षडतीसाराः षडुदावर्ताः पंच गुल्माः पंच प्लीहदोषाः पंच कासाः पंच श्वासाः पंच हिक्काः पंच तृष्णाः पंच छर्दयः ॥ पंच
भक्तस्यानशनस्थानानि पंच शिरोरोगाः पंच हृद्रोगाः पंच पांडुरोगाः पंचोन्मादाः चत्वारोपस्माराः चत्वारोक्षिरोगाः
चत्वारः कर्णरोगाः चत्वारः प्रतिश्यायाः चत्वारो मुखरोगाः चत्वारो ग्रहणीदोषाः चत्वारो मदाः चत्वारो मूर्छायाः चत्वारो
शोषाः चत्वारि क्लैब्यानि ॥ त्रयः शोफाः त्रीणि किलासानि त्रिविधं लोहितपित्तं ॥ द्वौ ज्वरौ द्वौ व्रणौ द्वावायामौ द्वे गृध्रस्यौ
द्वे कामले द्विविधमामं द्विविधं वातरक्तं द्विविधान्यर्शांसि ॥ एक ऊरुस्तंभः एकः सन्यासः एको महागदो विंशतिः क्रिमि
जातयो विंशतिः प्रमेहा विंशतिः योनिव्यापदः इत्यष्टचत्वारिंशद्रोगाधिकरणान्यस्मिन संग्रहे भवंत्युद्दिष्टानि ॥
तानि यथोद्देशमभिनिर्देक्ष्यामः ॥ अष्टावुदराणीति ॥ वातपित्तकफसंनिपातपित्तकफसंनिपातप्लीहबद्धछिद्रद
कोदराणीति ॥ अष्टौ मूत्राघाता इति ॥ वातपित्तकफसंनिपाताश्मरीशर्कराशुक्रशोणितजाः ॥ अष्टौ क्षीरदोषा
इति ॥ वैवर्ण्यं वैगंध्यं वैरस्यं पैच्छिल्यं फेनसंघातो रौक्ष्यं गौरवमतिस्नेहश्चेति ॥ अष्टौ रेतोदोषा इति ॥ तनु शु
ष्कं फेनिलमश्वेतं पूत्यतिपिच्छिलमन्यधातूपहतमवसादि चेति ॥ सप्त कुष्ठानीति कपालोदुंबरमंडलर्ष्यजि
ह्वसिध्मपुंडरीकविकाकच्छपिकाजालिनी सर्षपी अलजी विनता विद्रधिश्चेति ॥ सप्त विसर्पा इति वातपित्तकफा
ग्नि कर्दम ग्रंथि संनिपाताख्यः षडतीसारा इति वातपित्तकफसंनिपातभयशोकजाः ॥ षडुदावर्ता इति ॥ वा

चा.त.म.

३२

नमूत्रपुरीषशुक्रच्छर्दिःक्षवथुजाः॥ पंचगुल्मा इति॥ वातपित्तकफसंनिपातरक्तजाः॥ पंचश्वासा इति॥ महोर्ध्वछिन्नत
मकक्षुद्राः॥ पंचहिक्का इति॥ महतीगंभीराव्यपेताक्षुद्रान्नजाश्चेति॥ पंचतृष्णा इति॥ वातपित्तामक्षयोपसर्गात्मि
काः॥ पंचच्छर्दय इति॥ द्विष्टार्थसंयोगजा वातपित्तकफसंनिपातोद्रेकात्मिकाश्च॥ पंचभक्तस्यानशनस्थानानीति
॥ वातपित्तकफद्वेषाभ्यासाः॥ पंचशिरोरोगा इति पूर्वोद्दिष्टा मभिसमस्य वातपित्तकफसंनिपातकृमिजाः॥ पंचहृद्रोगा इ
ति वातपित्तकफसंनिपातकृमिजाः॥ पंचोन्मादा इति वातपित्तकफसंनिपातागंतुनिमित्ताः॥ चत्वारोऽपस्मारा इ
ति॥ वातपित्तकफसंनिपातनिमित्ताः॥ चत्वारोऽक्षिरोगाश्चत्वारः कर्णरोगाश्चत्वारः प्रतिश्यायाश्चत्वारो मुख
रोगाश्चत्वारो ग्रहणीदोषाश्चत्वारो मदाश्चत्वारो मूर्छाया इत्यपस्मारव्याख्याताः चत्वारः शोषा इति साहससंधार
णक्षयविषमाशनजाः॥ चत्वारि क्लैब्यानीति बीजोपघातध्वजभंगजरायाः शुक्रक्षयाश्चेति॥ त्रयः शोथा इति वातपित्त
श्लेष्मनिमित्ताः॥ त्रीणि किलासानीति रक्तताम्रशुक्लानि॥ त्रिविधं लोहितपित्तमिति॥ ऊर्ध्वभागमधोभागमुभयतो
भागं चेति॥ द्वौ ज्वराविति उष्णाभिप्रायशीतसमुत्थः॥ द्वौ व्रणाविति निजश्चागंतुश्च॥ द्वावायामाविति बाह्यश्चाभ्यं
तरश्च॥ द्वे गृध्रस्याविति वातवातकफाभ्यां॥ द्वे कामले इति कोष्ठाश्रया शाखाश्रया चेति॥ द्विविधमाममित्यलसकं विषूचि
का च॥ द्विविधं वातरक्तमिति॥ उत्तानं गंभीरं च॥ द्विविधान्यर्शांसीति शुष्काण्यार्द्राणि च॥ एक ऊरुस्तंभ इत्याम
त्रिदोषसमुत्थः एकः संन्यास इति त्रिदोषात्मको मनःशरीराधिष्ठानः॥ एको महागद इति॥ अतत्त्वाभिनिवेशः वि
शतिः क्रिमिजातय इति यूकाः पिपीलिकाश्च द्विविधा बहिर्मलजाः केशादा लोमादा रोमद्वीपाः सौरसाः उदुंबराः जंतुमातर
श्चेति षट् शोणितजाः॥ अंत्रादा उदरादा हृदयचराश्चुरवो दर्भपुष्पाः सौगंधिका महागुदाश्चेति सप्त कफजाः॥
ककेरुका मकेरुका लेलिहाः सशूलकाः सौसुरादाश्चेति पंच पुरीषजाः॥ विंशतिः प्रमेहा इति उदकमेहश्चेक्षुवालिकाश्च
सिकतामेहश्चालालमेहश्च सांद्रमेहश्च सांद्रप्रसादमेहश्च शुक्लमेहश्च शुक्रमेहश्च शीतमेहश्च शनैर्मेहश्च ३२
क्षारमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च मंजिष्ठामेहश्च हरिद्रामेहश्चेति षट् पित्तनिमित्ताः॥ वसामेह
श्च मज्जामेहश्च हस्तिमेहश्च मधुमेहश्चेति चत्वारो वातनिमित्ताः॥ विंशतिर्योनिव्यापद इति वातिकी पैत्तिकी श्लै

ष्मिकाः सांनिपातिकी चेति॥ चतस्रो दोषदूष्यसंसर्गप्रकृतिनिर्देशेन नामभिरष्टाः योनिव्यापदो निर्दिश्यंते। तद्यथा॥ रक्तयोनि
श्चारजस्का चाचरणा चातिचरणा च प्राक्चरणा चोपप्लुता परिप्लुता चोदावर्तिनी च कर्णिनी च पुत्रघ्नी चांतर्मुखी च सूचीमु
खी च शुष्का च वामिनी च षंढयोनिश्च महायोनिश्चेति विंशतिर्योनिव्यापदः॥ केवलश्चायमुद्देशो यथोद्देशमभि
निर्देश इति॥ भवति चात्र श्लोकः॥ विंशतिकाश्चैककाश्च त्रिकाश्चात्र प्रपत्स्ययः॥ द्विकाश्चाष्टौ चतुष्काश्च दश॥ द्वाद
श पंचकाः॥ चत्वारश्चाष्टका वर्गाः षट्कौ द्वौ सप्तकास्त्रयः॥ अष्टोदरीये रोगाणामध्याये संप्रकाशिताः॥ इति सर्व ए
व च निजा विकारा नान्यत्र वातपित्तकफेभ्यो निर्वर्तंते यथा हि शकुनिः सर्वं दिवसमपि परिपतन् स्वां छायां नाति
वर्तते। तथा स्वधातुवैषम्यनिमित्ताः सर्वविकारा वातपित्तकफान्नातिवर्तंते॥ वातपित्तश्लेष्मणां तु खलु समुत्थान
स्थानप्रकृतिवर्णनामप्रभावविशेषानभिसमीक्ष्य तदात्मकानपि च सर्वविकारांस्तानुपदिशंति बुद्धिमं
त इति॥ तत्र श्लोकौ॥ स्वधातुवैषम्यनिमित्तजा ये विकारसंघा बहवः शरीरे। न ते पृथक् पित्तकफानिलेभ्य आगं
तवस्त्वेव ततो विशिष्टाः॥ आगंतुरन्वेति निजं विकारं निजस्तथागंतुमतिप्रवृद्धः। तत्रानुबंधं प्रकृतिं च सम्यक् ज्ञा
त्वा ततः कर्म समारभेत॥ ॥ इति अष्टोदरीयो नाम एकोनविंशोऽध्यायः १९ ॥ ७ ॥ ॥ अथातो महा
रोगाध्यायं व्याख्यास्यामः। इति ह स्माह भगवानात्रेयः॥ चत्वारो रोगा भवंति॥ आगंतुवातपित्तकफनिमित्ताः
तेषां चतुर्णामपि रोगाणां रोगत्वमेकविधं भवति रुक्सामान्यात् द्विविधा पुनः प्रकृतिरेषामागंतुनिजविभागात्
द्विविधं चैषामधिष्ठानं। मनःशरीरविशेषात् विकाराः॥ पुनरेषामपरिसंख्येयाः प्रकृत्यधिष्ठानलिंगा
यतनविकल्पविशेषाणामपरिसंख्येयत्वात्॥ मुखानि तु खल्वागंतोर्नखदशनपतनाभिघाताभिचाराभि
शापाभिषंगवधबंधनपीडनरज्जुदहनमंत्राशनिभूतोपसर्गादीनि निजस्य तु खलु मुखं वातपित्तश्लेष्मणां
वैषम्यं। द्वयोस्तु खल्वागंतुनिजयोः प्रेरणमसात्म्येंद्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेति सर्वेऽपि त्व
खल्वेते चत्वारो रोगाः॥ परस्परमनुबध्नंति। न चान्योन्येन संदेहमापद्यंते॥ आगंतुर्हि व्यथापूर्वसमु
त्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति॥ निजे तु वातपित्तश्लेष्माणः पूर्वं वैषम्यमापद्यंते।

च॰सू॰ जयन्यंयथास्थानमभिनिर्वर्तयंति॥ तेषां त्रयाणामपि दोषाणां शरीरस्थानविभागमनुव्याख्यास्यामः॥ तद्यथा बस्तिः पु
रीषाधानं कटिः सक्थिनी पादावस्थीनि च वातस्थानानि॥ अत्रापि पक्वाशयो विशेषेण वातस्थानं स्वेदो रसो लसीका रु
धिरमामाशयश्चेति पित्तस्थानानि तत्राप्यामाशयो विशेषेण पित्तस्थानं॥ उरः शिरो ग्रीवा पर्वाण्यामाशयो मेदो
३३ मश्च श्लेष्माणः॥ तत्राप्युरो विशेषेण श्लेष्मणः स्थानं॥ सर्वशरीरचरास्तु वातपित्तश्लेष्माणः सर्वस्मिञ्छरी
रे कुपिताकुपिताः शुभाशुभानि कुर्वंति॥ प्रकृतिभूताः पुनः शुभान्युपचयबलवर्णप्रसादादीनि॥ अशुभानि पुनर्वि
कृतिमापन्ना विकारसंज्ञकानि॥ तत्र विकाराः सामान्यजा नानात्मजाश्च॥ तत्र सामान्यजाः पूर्वमष्टोदरीये व्याख्या
ता नानात्मजास्त्विहाध्याये व्याख्यास्यामः॥ तद्यथा॥ अशीतिर्वातविकाराश्चत्वारिंशत्पित्तविकारा विंशतिश्श्ले
ष्मविकाराः॥ तत्रादौ वातविकाराननुव्याख्यास्यामः॥ तद्यथा॥ नखभेदश्च विपादिका च पादशूलं च पादभ्रंश
श्च पादसुप्तता च वातखुड्डता च गुल्फग्रहश्च पिंडिकोद्वेष्टनं च गृध्रसी च जानुभेदश्च जानुविश्लेषश्च ऊरुस्तंभश्च ऊ
रुसादश्च पांगुल्यं च गुदभ्रंशश्च गुदार्तिश्च वृषणोत्क्षेपश्च शेफस्तंभश्च वंक्षणानाहश्च श्रोणिभेदश्च विड्भेद
श्चोदावर्तश्च खंजत्वं च कुब्जत्वं च वामनत्वं च त्रिकग्रहश्च पृष्ठग्रहश्च पार्श्वावमर्दश्चोदरावेष्टश्च हृन्मोहश्च हृद्द्रवश्च व
क्ष उद्धर्षश्च वक्ष उपरोधश्च बाहुशोषश्च ग्रीवास्तंभश्च मन्यास्तंभश्च कंठोद्ध्वंसश्च हनुभेदश्चोष्ठभेदश्च दंतशै
थिल्यं च मूकत्वं च वाक्संगश्च कषायास्यता च मुखशोषश्चारसज्ञता च घ्राणनाशश्च कर्णशूलं चाशब्दश्रवणं चोच्चैःश्रु
तिश्च बाधिर्यं च वर्त्मस्तंभश्च वर्त्मसंकोचश्च तिमिरं चाक्षिशूलं चाक्षिव्युदासश्च भ्रूव्युदासश्च शंखभेदश्च ललाटभे
दश्च शिरोरुक् केशभूमिस्फुटनं चार्दितं चैकांगरोगश्च सर्वांगरोगश्च पक्षवधश्चाक्षेपकश्च दंडकश्च श्रमश्च भ्र
मश्च वेपथुश्च जृंभा च हिक्का च प्रभापश्च ग्लानिश्च रौक्ष्यं च पारुष्यं च श्यावारुणावभासता चास्वप्नश्चानवस्थित
त्वं चेत्यशीतिर्वातविकाराः॥ वातविकाराणामसंख्येयानामाविष्कृततमा व्याख्याताः॥ सर्वेष्वपि तु खल्वेतेषु वात
विकारेष्वन्येषु चानुक्तेषु वायोरिदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्त
संदेहा वातविकारमेवाध्यवस्यंति कुशलाः॥ तद्यथा रौक्ष्यं लाघवं॥ शैत्यं वैशद्यं गतिरमूर्तत्वमनवस्थितत्वं चेति

वायोरूपाणि भवंत्येवंविधत्वाच्च कर्मणः॥ स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः॥ तद्यथा स्रंसभ्रंशव्या
संगभेदसादहर्षवर्तनर्षमर्दचालतोदभेदव्यथवेष्टभंगास्तथा खरपरुषविशदशुषिरारुणकषायरसशूलशोषसु
प्तिसंकुचनस्तंभनानि वायोः कर्माणि तैरन्वितं वातविकारमेवाध्यवस्येत्तं मधुराम्ललवणस्निग्धोष्णैरुपक्रमैरुप
क्रमेत॥ स्नेहस्वेदास्थापनानुवासननस्तःकर्मभोजनाभ्यंगोत्सादनपरिषेकादिभिर्वातहरैर्मात्रां कालं च प्रमाणीकृत्यास्था
पनानुवासनं तु खलु सर्वोपक्रमेभ्यो वाते प्रधानतमं मन्यंते भिषजस्तद्ध्यादित एव पक्वाशयमनुप्रविश्य केवलं वैका
रिकं वातमूलं छिनत्ति॥ तत्रावजिते वातेऽपि शरीरांतर्गता वातविकाराः प्रशांतिमापद्यंते॥ यथा वनस्पतेर्मूले छिन्ने
स्कंधशाखाप्ररोहकुसुमफलपलाशादीनां नियतो विनाशस्तद्वत्॥ पित्तविकारांश्च चत्वारिंशदत ऊर्ध्वं व्याख्यास्यंते॥
तद्यथा॥ ओषश्च प्लोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च विदाहश्चांतर्दाहश्चांसदाहश्चोष्माधिक्यं चाति
स्वेदश्चांगगंधश्चांगावदरणं च शोणितक्लेदश्च मांसक्लेदश्च त्वग्दाहश्च त्वङ्मांसदरणं च रक्तकोठश्च रक्तवि
स्फोटकाश्च रक्तमंडलानि च रक्तपित्तं च हरितत्वं हारिद्रत्वं च नीलिका च कक्षा च कामला चातिक्तास्यता च लोहितगं
धास्यता च पूतिमुखता च तृष्णाधिक्यं चातृप्तिश्चास्यपाकश्च जीवादानं च तमःप्रवेशश्च हरितहारिद्रनेत्रमूत्रवर्च
स्त्वं चेति चत्वारिंशत्पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवंति॥ सर्वेष्वपि तु खल्वेतेषु पित्त
विकारेषु चान्येषु चानुक्तेषु पित्तस्येदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्त
संदेहाः पित्तविकारमेवाध्यवस्यंति कुशलास्तद्यथा॥ औष्ण्यं तैक्ष्ण्यं द्रवमनतिस्नेहो वर्णश्च शुक्लारुणपार्
वर्जो गंधो विस्रो रसौ च कटुकाम्लौ पित्तस्यात्मरूपाणि भवंति॥ एवंविधत्वाच्च कर्मणः स्वलक्षणमिदमस्य भवति॥
तं तं शरीरावयवमाविशतः॥ तद्यथा॥ दाहौष्ण्यपाकस्वेदक्लेदकोथकंडूस्रावरागाः॥ यथास्वं च गंधवर्णरसाभिनिर्वर्त
नं पित्तकर्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत्तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत स्नेहविरेकप्रदेहपरिषेकाभ्यंगा
वगाहादिभिः पित्तहरैर्मात्रां कालं च प्रमाणीकृत्य विरेचनं तु खलु सर्वोपक्रमेभ्यः॥ पित्ते प्रधानतमं मन्यंते भि
षजः तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलमपकर्षति॥ तत्रावजिते पित्तेऽपि श

चरक.स.

३४

गंतर्गताः॥ पित्तविकाराः प्रशांतिमापद्यंते यथाग्नौ व्यपोढे केवलमग्निगृहं शीतीभवति॥ तद्वत्॥ श्लेष्मविकारान्विंश
तिमूर्ध्वमनुव्याख्यास्यामः॥ तद्यथा तृप्तिश्च तन्द्रा च निद्राधिक्यं च बलासकश्च हृदयोपलेपश्च कण्ठोपलेप
श्च धमनीप्रतिचयश्च गलगंडश्चातिस्थौल्यं च शीताग्निता चोदर्दश्च श्वेतावभासता च श्वेतनेत्रमूत्रवर्चस्त्वं चेति विं
शतिः श्लेष्मविकाराः॥ श्लेष्मविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवंति॥ सर्वेष्वपि तु खल्वेतेषु श्ले
ष्मविकारेष्वन्येषु चानुक्तेषु श्लेष्मण इदमात्मरूपमपरिणामि कर्मणश्च स्वलक्षणं यदुपलभ्य तदवयवं वा विमुक्तसंदे
हाः श्लेष्मविकारमेवाध्यवस्यंति कुशलाः॥ तद्यथा॥ स्नेहशैत्यगौरवमाधुर्यमात्स्न्यानि श्लेष्मणः आत्मरूपाणि भ
वंति॥ एवंविधत्वाच्च कर्मणः स्वलक्षणमिदमस्य भवति तं तं शरीरावयवमाविशतः॥ श्वैत्यशैत्यकंडूस्थैर्यगौरवस्नेह
स्नेहोपदेहबंधमाधुर्यचिरकारित्वानीति श्लेष्मणः कर्माणि तैरन्वितं श्लेष्मविकारमेवाध्यवस्येत्॥ तं कटुकषायती
क्ष्णोष्णरूक्षैरुपक्रमैरुपक्रमेत॥ स्वेदवमनविरेचनशिरोविरेचनव्यायामादिभिः श्लेष्महरैर्मात्राकालं च प्रमाणीकृत्य वमनं
तु खलु सर्वोपक्रमेभ्यः श्लेष्मणि प्रधानतमं मन्यंते भिषजः॥ तद्ध्यादित एवामाशयमनुप्रविश्य केवलं वैकारिकं श्ले
ष्ममूलमपकर्षति॥ तत्रावजिते श्लेष्मण्यपि शरीरांतर्गताः श्लेष्मविकाराः प्रशांतिमापद्यंते॥ यथा भिन्ने केदार
सेतौ शालियवषष्टिकादीन्यनभिष्यंद्यमानान्यंभसा प्रशोषमापद्यंते तद्वदिति॥ तत्र श्लोकाः॥ रोगमादौ परी
क्षेत ततोनंतरमौषधं॥ ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत्॥ यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक्॥
अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया॥ तत्र श्लोकाः॥ संग्रहः प्रकृतिर्देशो विकारमुखमीरणं॥ असंदेहोनुबंधश्च
रोगाणां संप्रकाशितः॥ दोषस्थानानि रोगाणां गणा नानात्मजाश्च ये॥ रूपं पृथक्त्वदोषाणां निर्दिष्टाः समुपक्रमाः॥
सम्यङ्महति रोगाणामध्याये तत्त्वदर्शिना॥ ज्ञानार्थं भिषजां चैव अध्याये तत्त्वदर्शिना॥ ॥ इति महारोगाध्या
यो नाम विंशोध्यायः॥ २० ॥ ॥ श्री॥ अथातोष्टौनिंदितीयमध्यायं व्याख्यास्यामः॥ इति ह स्माह भगवाना ३४
त्रेयः॥ इह खलु शरीरमधिकृत्याष्टौ निंदिताः पुरुषा भवंति॥ तथा॥ अतिदीर्घश्चातिह्रस्वश्चातिलोमा चातिलो
मा चातिकृष्णश्चातिगौरश्चातिस्थूलश्चातिकृशश्चेति॥ तत्रातिस्थूलकृशयोर्भूय एवापरे निंदितविशेषा भवंति॥

अतिस्थूलस्य तावदायुषो ह्रासो जवोपरोधः॥ कृच्छ्रव्यवायता दौर्बल्यं दौर्गंध्यं स्वेदाबाधः क्षुदतिमात्रं पिपासातियो
गश्चेति भवंत्यष्टौ दोषाः॥ तदिदमतिस्थौल्यमतिसंपूरणाद्गुरुमधुरशीतस्निग्धोपयोगादव्यवायादव्यायामाद्दिवा
स्वप्नाद्धर्षनित्यत्वादचिंतनाद्बीजस्वभावाच्चोपजायते॥ तस्यातिमात्रमेदस्विनो मेद एवोपचीयते न तथेतरे धा
वस्तस्मादायुषो ह्रासः॥ शैथिल्यात्सौकुमार्याद्गुरुत्वाच्च मेदसो जवोपरोधः॥ शुक्राबहुत्वान्मेदसावृतमार्गत्वाच्च कृच्छ्रव्यव
यता॥ दौर्बल्यमसमत्वाद्धातूनां द्रुतायामासहिष्णुता च स्वेदाबाधः॥ तीक्ष्णत्वादग्नेः प्रभूतकोष्ठवायुत्वाच्च क्षुदतिमात्रं॥ पि
पासातियोगश्चेति भवंति चात्र॥ मेदसावृतमार्गत्वाद्वायुः कोष्ठे विशेषतः॥ चरन्संधुक्षयत्यग्निमाहारं शोषयत्यपि॥ त
स्माच्छीघ्रं जरयत्याहारं चापि कांक्षति॥ विकारांश्चाश्नुते घोरान्कांश्चित्कालव्यतिक्रमात्॥ एतावुपद्रवकरौ विशेषाद
ग्निमारुतौ॥ एतौ हि दहतः स्थूलं वनदावो वनं यथा॥ मेदस्यतीव संवृद्धे सहसैवानिलादयः॥ विकारान्दारुणान्कृत्वा ना
शयंत्याशु जीवितं॥ मेदोमांसातिवृद्धत्वाच्चलस्फिगुदरस्तनः॥ अयथोपचयोत्साहो नरोतिस्थूल उच्यते॥ इति मेद
स्विनो दोषा हेतवो रूपमेव च॥ निर्दिष्टं वक्ष्यते वाच्यमतिकार्श्ये त्वतः परं॥ सेवा रूक्षान्नपानानां लंघनं प्रमिताशनं॥
क्रियातियोगः शोकश्च वेगनिद्राविनिग्रहः॥ रूक्षस्योद्वर्तनं स्नानस्याभ्यासः प्रकृतिर्जरा॥ विकारानुशयः क्रोधः कुर्वंत्य
तिकृशं नरं॥ व्यायाममतिसौहित्यं क्षुत्पिपासामयौषधं॥ कृशो न सहते तद्वदतिशीतोष्णमैथुनं॥ प्लीहा कासः क्षयः
श्वासो गुल्मोर्शांस्युदराणि च॥ कृशं प्रायोभिधावंति रोगाश्च ग्रहणीगताः॥ शुष्कस्फिगुदरग्रीवो धमनीजालसंततः॥ त्व
गस्थिशेषोतिकृशः स्थूलपर्वा नरो मतः॥ सततं व्याधितावेतावतिस्थूलकृशौ नरौ॥ सततं चोपचर्यौ हि कर्शनैर्बृंहणैर
पि॥ स्थौल्यकार्श्ये वरं कार्श्यं समोपकरणौ हि तौ॥ यद्युभौ व्याधिरागच्छेत्स्थूलमेवातिपीडयेत्॥ सममांसप्रमाणस्तु सम
संहननो नरः॥ दृढेंद्रियत्वाद्व्याधीनां न बलेनाभिभूयते॥ क्षुत्पिपासातपसहः शीतव्यायामसंसहः॥ समपक्ता सम
जरः सममांसचयो नरः॥ गुरु चातर्पणं चेष्टं स्थूलानां कर्शनं प्रति॥ कृशानां बृंहणार्थं च लघु संतर्पणं च यत्॥ वातघ्ना
न्यन्नपानानि श्लेष्ममेदोहराणि च॥ रूक्षोष्णा बस्तयस्तीक्ष्णा रूक्षाण्युद्वर्तनानि च॥ गुडूचीभद्रमुस्तानां प्रयोगो मा
क्षिकस्य च॥ विडंगं नागरं क्षारः काललोहरजो मधु॥ यवामलकचूर्णस्य प्रयोगः श्रेष्ठ उच्यते॥ बिल्वादिपंचमूलस्य

च०सू० प्रयोगः क्षौद्रसंयुतः॥ शिलाजतुप्रयोगश्च साग्निमंथरसः परः॥ प्रशातिकाप्रियंगुश्च श्यामाका यवका यवाः॥ जूर्णा
ह्वाः कोद्रवा मुद्गाः कुलत्थाश्चकमुद्गकाः॥ आढकीनां च बीजानि पटोलामलकैः सह॥ तैलानार्थे प्रयोज्यानि पानं चानु
३८. मधूदकं॥ तक्रारिष्टानुपानार्थे मेदोमांसकफापहं॥ अतिस्थौल्यविनाशाय संविभज्य प्रयोजयेत्॥ अस्वप्नं च व्य
वायं च व्यायामं चिंतनानि च॥ स्थौल्यमिच्छन्परित्यक्तुं क्रमेणाभिप्रवर्धयेत्॥ स्वप्नो हर्षः सुखा शय्या मनसो निर्वृ
तिः शमः॥ चिंताव्यवायव्यायामविरामः प्रियदर्शनं॥ नवान्नानि नवं मद्यं ग्राम्यानूपौदका रसाः॥ संस्कृतानि च मांसा
नि दधि सर्पिः पयांसि च॥ इक्षवः शालयो माषा गोधूमा गुडवैकृतं॥ बस्तयः स्निग्धमधुराः तैलाभ्यंगाश्च सर्वदा॥
स्निग्धमुद्वर्तनं स्नानं गंधमाल्यनिषेवणं॥ शुक्लं वासो यथाकालं दोषाणामवसेचनं॥ रसायनानां वृष्याणां योगानां
चोपसेवनं॥ हत्वातिकार्श्यमाधत्ते नृणामुपचयं परं॥ अचिंतनाच्च कार्याणां ध्रुवं संतर्पणेन च॥ स्वप्नप्रसंगाच्च नरो वराह
इव पुष्यति॥ यदा तु मनसि क्लांते कर्मात्मानः क्लमान्विताः॥ विषयेभ्यो निवर्तंते तदा स्वपिति मानवः॥ निद्रायत्तं सुखं
दुःखं पुष्टिः कार्श्यं बलाबलं॥ वृषता क्लीबता ज्ञानमज्ञानं जीवितं न च॥ अकालेऽतिप्रसंगाच्च न च निद्रा निषेविता॥ सु
खायुषी पराकुर्यात् कालरात्रिरिवापरा॥ सैव युक्ता पुनर्युंक्ते निद्रा देहं सुखायुषा॥ पुरुषं योगिनं सिद्ध्या सत्या बु
द्धिरिवागता॥ गीताध्ययनमद्यस्त्रीकर्मभाराध्वकर्शिताः॥ अजीर्णिनः क्षताः क्षीणा वृद्धा बालास्तथाबलाः॥
तृष्णातिसारशूलार्ताः श्वासिनो हिक्किनः कृशाः॥ पतिताभिहतोन्मत्ताः क्लांता यानप्रजागरैः॥ क्रोधशोकभयक्लां
ता दिवास्वप्नोचिताश्च ये॥ सर्व एते दिवास्वप्नं सेवेरन् सार्वकालिकं॥ धातुसाम्यं तथा ह्येषां बलं चाप्युपजायते॥ श्ले
ष्मा पुष्णाति चांगानि स्थैर्यं भवति चायुषः॥ ग्रीष्मे त्वादानरूक्षाणां वर्धमाने च मारुते॥ रात्रीणां चातिसंक्षेपाद्दि
वास्वप्नः प्रशस्यते॥ ग्रीष्मवर्ज्येषु कालेषु दिवास्वप्नात्प्रकुप्यतः॥ श्लेष्मपित्ते दिवास्वप्नस्तस्मात्तेषु न शस्यते॥ मे
दःस्विन्नाः स्नेहनित्याश्च श्लेष्मलाः श्लेष्मरोगिणः॥ दूषीविषार्ताश्च दिवा न शयीरन् कदाचन॥ हलीमकः शिरःशूलं स्तै ३५.
मित्यं गुरुगात्रता॥ अंगमर्दोऽग्निनाशश्च प्रलेपो हृदयस्य च॥ शोफारोचकहृल्लासपीनसार्धावभेदकाः॥ कोठा
रुःपिडकाः कंडूस्तंद्रा कासो गलामयः॥ स्मृतिबुद्धिप्रमोहश्च संरोधः स्रोतसां ज्वरः॥ इंद्रियाणामसामर्थ्यं विषवे

गप्रवर्तनं॥ भवेन्नृणां दिवास्वप्नस्याहितस्य निषेवणात्॥ तस्माद्धिताहितं स्वप्नं बुद्ध्वा स्वप्यात्सुखं बुधः॥ रात्रौ जागर
णं रूक्षं स्निग्धं प्रस्वपनं दिवा॥ अरूक्षमनभिष्यंदि त्वासीनप्रचलायितं॥ देहवृत्तौ यथाहारस्तथा स्वप्नः सुखो मतः॥ स्व
प्नाहारसमुत्थे च स्थौल्यकार्श्ये विशेषतः॥ अभ्यंगोत्सादनं स्नानं ग्राम्यानूपौदका रसाः॥ शाल्यन्नं सदधि क्षीरं स्नेहो मद्यं
मनःसुखं॥ मनसोनुगुणा गंधाः शब्दाः संवाहनानि च॥ चक्षुषोस्तर्पणं लेपः शिरसो वदनस्य च॥ स्वास्तीर्णं शयनं वेश्म
सुखं कालस्तथोचितः॥ आनयंत्यचिरान्निद्रां प्रनष्टा या निमित्ततः॥ कायस्य शिरसश्चैव विरेकश्छर्दनं भयं॥ चिंता क्रो
धस्तथा धूमो व्यायामो रक्तमोक्षणं॥ उपवासोऽसुखा शय्या सत्त्वौदार्यं तमोजयः॥ निद्राप्रसंगमहितं वारयंति समुत्थितं॥ एत
एव च विज्ञेया निद्रानाशस्य हेतवः॥ कार्यं कालो विकारश्च प्रकृतिर्वायुरेव च॥ तमोभवा श्लेष्मसमुद्भवा च मनःशरीरश्रमसंभवा
च॥ आगंतुकी व्याध्यनुवर्तिनी च रात्रिस्वभावप्रभवा च निद्रा॥ रात्रिस्वभावप्रभवां मतां यां तां भूतधात्रीं प्रवदंति निद्रां॥ त
मोभवामाहुरघस्य मूलं शेषाः पुनर्व्याधिषु निर्दिशंति॥ तत्र श्लोकाः॥ निंदिताः पुरुषास्तेषां यौ विशेषेण निंदितौ॥ निंदि
तकारणं दोषाः स्थौल्यकार्श्ये हितं च यत्॥ येभ्यो यदा हिता निद्रा येभ्यश्चाप्यहिता यदा॥ अतिनिद्रानिद्रयोश्च भेषजं यद्भवा
च्च या॥ या या यथाप्रभावा च निद्रा तत्सर्वमात्रिजः॥ अष्टौनिंदितसंख्याते व्याजहार पुनर्वसुः॥ ॥इति अष्टौनिंदितीयो
एकविंशोऽध्यायः॥२१॥ ॥७॥ अथातो लंघनबृंहणीयमध्यायं व्याख्यास्यामः॥ इति ह स्माह भगवानात्रेयः॥ त
पःस्वाध्यायनिरतानात्रेयः शिष्यसत्तमान्॥ षडग्निवेशप्रमुखाननुक्त्वा परिचोदयन्॥ लंघनं बृंहणं काले रूक्षणं
स्नेहनं तथा॥ स्वेदनं स्तंभनं चैव जानीते यः स वै भिषक्॥ इति- अथैवमुक्तवंतं भगवंतमात्रेयमग्निवेश उवाच
भगवन् लंघनं किंस्विल्लंघनीयाश्च कीदृशाः॥ बृंहणं बृंहणीयाश्च रूक्षणीयाश्च रूक्षणं॥ के स्नेह्याः स्नेहनीयाश्च स्वे
द्याः स्वेद्याश्च के मताः॥ स्तंभनं स्तंभनीयाश्च वक्तुमर्हसि तद्गुरो॥ लंघनप्रभृतीनां च षण्णामेषां समासतः॥ कृताकृ
तातिरिक्तानां लक्षणं वक्तुमर्हसि॥ इति गुरुरुवाच॥ यत्किंचिल्लाघवकरं देहे तल्लंघनं स्मृतं॥ बृहत्त्वं यच्छरीरस्य कुरु
ते तच्च बृंहणं॥ रौक्ष्यं खरत्वं वैशद्यं यः कुर्यात्तद्धि रूक्षणं॥ स्नेहनं स्नेहविष्यंदमार्दवक्लेदकारकं॥ स्तंभगौरवशी
तघ्नं स्वेदनं स्वेदकारणं॥ स्तंभनं स्तंभयति यद्गतिमंतं चलं द्रवं॥ लघूष्णतीक्ष्णविशदं रूक्षं सूक्ष्मं खरं सरं॥ कठि

चरकसू.

३८ नं चैव यद्द्रव्यं प्रायस्तल्लंघनं स्मृतं ॥ गुरुशीतमृदुस्निग्धं बहलस्थूलपिच्छिलं ॥ प्रायो मंदं स्थिरं श्लक्ष्णं बृंहणं द्रव्यमुच्यते ॥
रूक्षं लघु खरं तीक्ष्णमुष्णं स्थिरमपिच्छिलं ॥ प्रायशः कठिनं चैव यद्द्रव्यं तद्धि रूक्षणं ॥ द्रवं स्निग्धं सरं सूक्ष्मं पिच्छिलं गुरु
शीतलं ॥ प्रायो मंदमृदु च यद्द्रव्यं स्नेहनं मतं ॥ उष्णं तीक्ष्णं सरं स्निग्धं रूक्षं सूक्ष्मं स्थिरं द्रवं ॥ द्रव्यं गुरु च यत्प्रायस्तद्धि स्वेदनमु-
च्यते ॥ शीतं मंदं मृदु श्लक्ष्णं रूक्षं सूक्ष्मं द्रवं स्थिरं ॥ यद्द्रव्यं लघु चोद्दिष्टं प्रायस्तत्स्तंभनं स्मृतं ॥ चतुःप्रकारा संशुद्धिः पिपासा
मारुतातपौ ॥ पाचनान्युपवासश्च व्यायामश्चेति लंघनं ॥ प्रभूतश्लेष्मपित्तास्रमलाः संसृष्टमारुताः ॥ बृहच्छरीरा बलिनो
लंघनीया विशुद्धिभिः ॥ येषां मध्यबला रोगाः कफपित्तसमुत्थिताः ॥ वम्यतीसारहृद्रोगविसूच्यलसकज्वराः ॥ विबंधगौ-
रवोद्गारहृल्लासारोचकादयः ॥ पाचनैस्तान्भिषक्प्राज्ञः प्रायेणादावुपाचरेत् ॥ अत एव यथोद्दिष्टा येषामल्पबला गदा
ः ॥ पिपासानिग्रहैस्तेषामुपवासैश्च ताञ्जयेत् ॥ रोगाञ्जयेन्मध्यबलान्व्यायामातपमारुतैः ॥ बलिनां किं पुनर्येषां दोषा-
णामवरं बलं ॥ त्वग्दोषिणां प्रमीढानां स्निग्धाभिष्यंदिबृंहणां ॥ शिशिरे लंघनं शस्तमपि वातविकारिणां ॥ अदिग्धविद्धम-
क्लिष्टं वयस्थं सात्म्यचारिणां ॥ मृगमत्स्यविहंगानां मांसं बृंहणमुच्यते ॥ क्षीणाः क्षताः कृशा वृद्धा दुर्बला नित्यमध्वगाः ॥
स्त्रीमद्यनित्या ग्रीष्मे च बृंहणीया नरा मताः ॥ शोषार्शोग्रहणीदोषैर्व्याधिभिः कर्शिताश्च ये ॥ तेषां क्रव्यादमांसानां बृंहणा
लघवो रसाः ॥ स्नानमुत्सादनं स्वप्नो मधुराः स्नेहबस्तयः ॥ शर्कराक्षीरसर्पींषि सर्वेषां विद्धि बृंहणं ॥ कटुतिक्तकषायाणां से-
वनं स्त्रीष्वसंयमः ॥ खडपिण्याकतक्राणां मध्वादीनां च रूक्षणं ॥ अभिष्यण्णमहादोषा मर्मस्था व्याधयश्च ये ॥ ऊरुस्तंभ-
प्रभृतयो रूक्षणीया निदर्शिताः ॥ स्नेहाः स्नेहयितव्याश्च स्वेदाः स्वेद्याश्च ये मताः ॥ स्नेहाध्याये मया प्रोक्ताः स्वेदाख्ये
च सविस्तराः ॥ द्रवं तनु सरं यावच्छीतीकरणमौषधं ॥ स्वादु तिक्तं कषायं च स्तंभनं सर्वमेव तत् ॥ पित्तक्षाराग्निदग्धा
ये वम्यतीसारपीडिताः ॥ विषस्वेदातियोगार्ताः स्तंभनीयास्तथाविधाः ॥ वातमूत्रपुरीषाणां विसर्गो गात्रलाघवं ॥ ३८
हृदयोद्गारकंठास्यशुद्धिस्तंद्राक्लमे गते ॥ स्वेदजाने रुचौ चापि क्षुत्पिपासासहोदये ॥ कृतं लंघनमादेश्यं निर्व्यथे चांतरा-
त्मनि ॥ पर्वभेदोंगमर्दश्च कासः शोषो मुखस्य च ॥ क्षुत्प्रणाशोरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः ॥ मनसः संभ्रमो-
भीक्ष्णमूर्ध्ववायुस्तमो हृदि ॥ देहाग्निबलनाशश्च लंघनेतिकृते भवेत् ॥ बलं पुष्ट्युपलंभश्च कार्श्यदोषविवर्जनं ॥

लक्षणं बृंहिते स्थौल्यमतिचात्यंतबृंहिते ॥ कृतातिकृतलिंगं यल्लंघिते तद्धि रूक्षिते ॥ स्तंभितः स्याद्बलं लब्ध्वा यथोक्तै-
श्चामयैर्जितैः ॥ श्यावता स्तब्धगात्रत्वमुद्वेगो हनुसंग्रहः ॥ हृद्वर्चोनिग्रहश्च स्यादतिस्तंभितलक्षणं ॥ लक्षणं चा-
कृतानां स्यात्षण्णामेषां समासतः ॥ तदौषधानां धातूनां प्रशमो वृद्धिरेव वा ॥ इति षट्सर्वरोगाणां प्रोक्ताः सम्यगुपक्रमाः
साध्यानां साधने सिद्धा मात्राकालानुरोधिनः ॥ भवति चात्र ॥ दोषाणां बहुसंसर्गात्संकीर्यंत्युपक्रमाः ॥ षट्त्वं तु
नातिवर्तंते त्रित्वं वातादयो यथा ॥ इत्यस्मिँल्लंघनाध्याये व्याख्याताः षडुपक्रमाः ॥ यथाप्रश्नं भगवता चिकित्सा-
यैः प्रवर्तितं ॥ ॥ इति लंघनबृंहणीयनाम द्वाविंशोध्यायः २२ ॥ छ ॥ ॥ अथातः संतर्पणीयं व्याख्यास्यामः ॥
इति ह स्माह० यः ॥ संतर्पयति यः स्निग्धैर्मधुरैर्गुरुपिच्छिलैः ॥ नवान्नैर्नवमद्यैश्च मांसैश्चानूपवारिजैः ॥ १ ॥ गोरसैर्गौ-
डिकैश्चान्नैः पैष्टिकैश्चातिमात्रशः ॥ चेष्टाद्वेषी दिवास्वप्नशय्यासनसुखे रतः ॥ रोगास्तस्योपजायंते संतर्पणनिमित्तजाः ॥ प्रमे-
हपिडकाकोठकंडूपांड्वामयज्वराः ॥ कुष्ठान्यामप्रदोषाश्च मूत्रकृच्छ्रमरोचकः ॥ तंद्रा क्लैब्यमतिस्थौल्यमालस्यं गुरुगात्रता ॥ इंद्रि-
यस्रोतसां लेपो बुद्धेर्मोहः प्रमीलकः ॥ शोफाश्चैवंविधाश्चान्ये शीघ्रमप्रतिकुर्वतः ॥ शस्तमुल्लेखनं तत्र विरेकोस्रमोक्षणं
व्यायामश्चोपवासश्च धूमश्च स्वेदनानि च ॥ सक्षौद्रश्चाभयाप्राशः प्रायो रूक्षान्नसेवनं ॥ चूर्णप्रदेहा ये चोक्ताः कंडूकोठवि-
नाशनाः ॥ त्रिफलारग्वधं पाठां सप्तपर्णं सवत्सकं ॥ मुस्तं समदनं निंबं जलेनोत्क्वथितं पिबेत् ॥ तेन मेहादयो यांति नाशम-
भ्यस्यतो ध्रुवं ॥ मात्राकालप्रयुक्तेन संतर्पणसमुत्थिताः ॥ मुस्तमारग्वधः पाठा त्रिफला देवदारु च ॥ श्वदंष्ट्रा खदिरो निंबो हरि-
द्रे त्वक्च वत्सकात् ॥ रसमेषां यथादोषं प्रातः प्रातः पिबेन्नरः ॥ संतर्पणकृतैः सर्वैर्व्याधिभिर्विप्रमुच्यते ॥ एभिश्चोद्वर्तनोद्ध-
र्षस्नानयोगाः प्रयोजिताः ॥ त्वग्दोषाः प्रशमं यांति तथा स्नेहोपयोजिताः ॥ कुष्ठं गोमेदको हिंगु क्रौंचास्थि त्र्यूषणं वचा
वृषकैलाश्वदंष्ट्रा च खराह्वाश्मभेदकः ॥ तक्रेण दधिमंडेन बदराम्लरसेन च ॥ मूत्रकृच्छ्रं प्रमेहश्च पीतं व्यपगच्छति
तक्राभयाप्रयोगैश्च त्रिफलायास्तथैव च ॥ अरिष्टानां प्रयोगैश्च यांति मेहादयः क्षयं ॥ त्र्यूषणं त्रिफला क्षौद्रं क्रिमिघ्नम-
जमोदकः ॥ मंथोयं सक्तवस्तैलं हितो लोहोदकाप्लुतः ॥ व्योषं विडंगं शिग्रूणि त्रिफलां कटुरोहिणीं ॥ बृहत्यौ द्वे हरिद्रे द्वे पा-
ठामतिविषां स्थिरां ॥ हिंगु केबुकमूलानि यवानीधान्यचित्रकं ॥ सौवर्चलमजाजीं च हपुषां चेति चूर्णयेत् ॥ चूर्णतैल-

चा. स.

घृतक्षौद्रभागाम्लसमन्वितः समाः॥ सक्तूनां षोडशगुणो भागः संतर्पणं पिबेत्॥ प्रयोगादस्य शाम्यन्ति रोगाः संतर्पणो-
त्थिताः॥ प्रमेहा मूढवातश्च कुष्ठान्यर्शांसि कामलाः॥ प्लीहा पाण्ड्वामयः शोफो मूत्रकृच्छ्रमरोचकः॥ हृद्रोगा राजयक्ष्मा का-
सः श्वासो गलग्रहः॥ कृमयो ग्रहणीदोषाः श्वैत्र्यं स्थौल्यमतीव च। नराणां दीप्यते चाग्निः स्मृतिर्बुद्धिश्च वर्धते। व्या-
३१ यामनित्यो जीर्णाशी यवगोधूमभोजनः॥ संतर्पणकृतैर्दोषैः स्थौल्यं मुक्त्वा विमुच्यते॥ उक्तं संतर्पणोत्थानामपतर्पण-
मौषधः॥ वक्ष्यन्ते दोषदाश्चोर्ध्वमपतर्पणजा गदाः॥ देहाग्निबलवर्णौजःशुक्रमांसपरिक्षयः॥ ज्वरः कासानुबन्धश्च पा-
र्श्वशूलमरोचकः॥ श्रोत्रदौर्बल्यमुन्मादः प्रलापो हृदयव्यथा॥ विण्मूत्रसंग्रहः शूलं जङ्घोरुत्रिकसंश्रयं॥ पर्वास्थिसंधि-
भेदश्च ये चान्ये वातजा गदाः॥ ऊर्ध्ववातादयः सर्वे जायन्ते चापतर्पणात्॥ तेषां संतर्पणं तज्ज्ञैः पुनराख्यातमौषधं॥ यत्त-
दात्वे समर्थं स्यादभ्यासे वा यदिष्यते॥ सद्यः क्षीणो नरः सद्यः स्तर्पणेनोपचीयते॥ नर्ते संतर्पणाभ्यासाच्चिरक्षीणस्तु
पुष्यति॥ देहाग्निदोषभैषज्यमात्राकालानुवर्तिना॥ कार्यमत्वरमाणेन भेषजं चिरदुर्बले॥ हिता मांसरसास्तस्मै पयांसि
च घृतानि च॥ स्नाना बस्त्यभ्यङ्गास्तर्पणास्तर्पणाश्च ये॥ ज्वरकासप्रसक्तानां कृशानां मूत्रकृच्छ्रिणां॥ तृष्यतामूर्ध्व-
वातानां वक्ष्यते तर्पणं हितं॥ शर्करापिप्पलीतैलघृतक्षौद्रसमांशिकः॥ सक्तुद्विगुणितो वृष्यस्तेषां मन्थः प्रशस्यते॥
सक्तवो मदिरा क्षौद्रं शर्करा चेति तर्पणं॥ पिबेन्मारुतविण्मूत्रकफपित्तानुलोमनं॥ फाणितं सक्तवः सर्पिर्दधिमण्डोऽम्ल-
काञ्जिकं॥ तर्पणं मूत्रकृच्छ्रघ्नमुदावर्तहरं पिबेत्॥ मन्थः खर्जूरमृद्वीकावृक्षाम्लाम्लीकदाडिमैः॥ परूषकैः सामलकैर्युक्तो म-
द्यविकारनुत्॥ स्वादुरम्लो जलकृतः सस्नेहो रूक्ष एव वा॥ सद्यः संतर्पणो मन्थः स्थैर्यवर्णबलप्रदः॥ इति तत्र श्लोकाः
संतर्पणोत्था ये रोगा रोगा ये चापतर्पणात्॥ संतर्पणीयेऽध्याये ते सौषधाः परिकीर्तिताः॥ ॥ इति संतर्पणीयो नाम त्रयोवि-
शोऽध्यायः॥ २३॥ ॥ ७॥ अथातो विधिशोणितीयमध्यायं व्याख्यास्यामः॥ इति ह स्माह भगवानात्रेयः॥ ॥
विधिना शोणितं जातं शुद्धं भवति देहिनां॥ देशकालौकसात्म्यानां विधिर्यः संप्रकाशितः॥ तद्विशुद्धं हि रुधिरं बलवर्ण- ३१
सुखायुषा॥ युनक्ति प्राणिनं प्राणः शोणितं ह्यनुवर्तते॥ प्रदुष्टबहुतीक्ष्णोष्णैर्मद्यैरन्यैश्च तद्विधैः॥ तथातिलव-
णक्षारैरम्लैः कटुभिरेव च॥ कुलत्थमाषनिष्पावतिलतैलनिषेवणात्॥ पिण्डालुमूलकादीनां हरितानां च सर्वशः॥

जलजानूपबैलानां प्रसहानां च सेवनात्॥ दध्यम्लमस्तुसुक्तानां सुरासौवीरकस्य च॥ अत्यादानं तथा क्रोधं भज-
तां चातपानलौ॥ छर्दिवेगप्रतीघातात् काले चानवसेचनात्॥ श्रमाभिघातसंतापैरजीर्णाध्यशनैस्तथा॥ शर-
त्कालस्वभावाच्च शोणितं संप्रदुष्यति॥ ततः शोणितजा रोगाः प्रवर्धन्ते पृथग्विधाः॥ मुखपाकोऽक्षिरागश्च पूतिघ्रा-
णास्यगन्धता॥ गुल्मोपकुशवीसर्परक्तपित्तप्रमीलकाः॥ विद्रधी रक्तमेहश्च प्रदरो वातशोणितं॥ वैवर्ण्यमग्निनाश-
श्च पिपासा गुरुगात्रता॥ संतापश्चातिदौर्बल्यमरुचिः शिरसश्च रुक्॥ विदाहश्चान्नपानस्य तिक्ताम्लोद्गिरणं क्लमः॥
क्रोधप्रचुरता बुद्धेः संमोहो लवणास्यता॥ स्वेदः शरीरदौर्गन्ध्यं मदः कम्पः स्वरक्षयः॥ तन्द्रानिद्रातियोगश्च तमसश्चा-
तिदर्शनं॥ कण्ड्वरुःपिडकाः कोठाः कुष्ठचर्मदलादयः॥ विकाराः सर्व एवैते विज्ञेयाः शोणिताश्रयाः॥ शीतोष्ण-
स्निग्धरूक्षाद्यैरुपक्रान्ताश्च ये गदाः॥ सम्यक्साध्या न सिध्यन्ति रक्तजांस्तान्विभावयेत्॥ कुर्याच्छोणितरोगेषु
रक्तपित्तहरीं क्रियां॥ विरेकमुपवासं वा स्रावणं शोणितस्य च॥ बलदोषप्रमाणाद्वा विशुद्ध्या रुधिरस्य वा॥ रुधि-
रं स्रावयेज्जन्तोराशयं प्रसमीक्ष्य वा॥ अरुणाभं भवेद्वातात्फेनिलं विशदं तनु॥ पित्तात्पीतासितं रक्तमौष्ण्यात्स्त्यायति
चिरेण तत्॥ ईषत्पाण्डु कफाद्दुष्टं पिच्छिलं तन्तुमद्घनं॥ संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकं॥ तपनीयेन्द्रगोपा-
भं पद्मालक्तकसंनिभं॥ गुञ्जाफलाभवर्णं च विशुद्धं विद्धि शोणितं॥ नात्युष्णशीतं लघु दीपनीयं रक्तेऽपनीते हितमन्न-
पानं॥ तदा शरीरं ह्यनवस्थितासृगग्निर्विशेषेण च रक्षितव्यः॥ प्रसन्नवर्णेन्द्रियमिन्द्रियार्थानिच्छन्तमव्याहतप-
क्तृवेगं॥ सुखान्वितं पुष्टिबलोपपन्नं विशुद्धरक्तं पुरुषं वदन्ति॥ यदा तु रक्तवाहीनि रससंज्ञावहानि च॥ पृथक्पृ-
थक्समस्ता वा स्रोतांसि कुपिता मलाः॥ मलिनाहारशीलस्य रजोमोहावृतात्मनः॥ प्रतिहत्यावतिष्ठन्ते जाय-
न्ते व्याधयस्तदा॥ मदमूर्छायसंन्यासास्तेषां विद्याद्विचक्षणः॥ यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु॥
दुर्बलं चेतसः स्थानं यदा वायुः प्रपद्यते॥ मनो विक्षोभयन् जन्तोः संज्ञां संमोहयेत्तदा॥ पित्तमेवं कफश्चैवं म-
नो विक्षोभयन्नृणां॥ संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते॥ सक्तानल्पद्रुताभाषं चलस्खलितचेष्टितं॥
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाकृतिं॥ सक्रोधपरुषाभाषं संप्रहारकलिप्रियं॥ विद्यात्पित्तमदाविष्टं-

च॰ सू॰

रूपीताभिनाशनं॥ स्वल्पा संबंधनवनंतदात्ययसमन्वितं॥ विषात्कंपमरणविष्टंपादुप्रधानतमं॥ सर्वाण्येतानि रूपा
णि सान्निपातकृते मदे॥ जायते शाम्यति क्षिप्रं मदो मद्यमदाकृतिः॥ यश्च मद्यकृतः प्रोक्तो विषजो रौधिरश्च यः॥ सर्वे
एते मदा नर्ते वातात्पित्तात्कफात्त्रयात्॥ नीलं वा यदि वा कृष्णमाकाशमथवारुणं॥ पश्यंस्तमः प्रविश्यति शीघ्रं च प्रतिबुध्य
३ ते॥ वेपथुश्चांगमर्दश्च प्रपीडा हृदयस्य च॥ कार्श्यं श्यावारुणाच्छाया मूर्छाये वातसंभवे॥ रक्तं हरितवर्णं वा वियत्
पीतमथापि वा॥ तमो विशन्तं संपश्यन्सस्वेदश्च प्रबुध्यते॥ सपिपासः ससंतापो रक्तपीताकुलेक्षणः॥ संभिन्नवर्चाः पी
ताभो मूर्छाये पित्तसंभवे॥ मेघसंकाशमाकाशमावृतं वा तमोघनैः॥ पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते॥ गुरुभिः
प्रावृतैरंगैर्यथैवार्द्रेण चर्मणा॥ सप्रसेकः सहृल्लासो मूर्छाये कफसंभवे॥ सर्वाकृतिः सन्निपातादपस्मार इवागतः॥ स
जंतुं पातयत्याशु विना बीभत्सचेष्टितैः॥ दोषेषु मदमूर्छायाः कृतवेगेषु देहिनां॥ स्वयमेवोपशाम्यंति संन्यासो नौष
धैर्विना॥ वाग्देहमनसां चेष्टामाक्षिप्यातिबला मलाः॥ संन्यस्यंत्यबलं जंतुं प्राणायतनमाश्रिताः॥ स ना संन्याससंन्यस्तः
काष्ठीभूतो मृतोपमः॥ प्राणैर्वियुज्यते शीघ्रं मुक्त्वा सद्यःफलाः क्रियाः॥ दुर्गेंभसि यथा मज्जद्भाजनं त्वरया बुधः॥ गृ
ह्णीयात्तलमप्राप्तं तथा संन्यासपीडितं॥ अंजनान्यवपीडाश्च धूमाः प्रधमनानि च॥ सूचीभिस्तोदनं शस्तं दाहः पीडा
नखांतरे॥ लुंचनं केशलोम्नां च दंतैर्दशनमेव च॥ आत्मगुप्तावघर्षश्च हितास्तस्यावबोधने॥ संमूर्छितानि तीक्ष्णा
नि मद्यानि विविधानि च॥ प्रभूतकटुयुक्तानि तस्यास्ये गालयेन्मुहुः॥ मातुलुंगरसं तद्वन्महौषधसमायुतं॥ तद्व
त्सौवीरकं दद्याद्धृतमम्लकांजिकैः॥ हिंगूषणसमायुक्तं यावत्संज्ञाप्रबोधनं॥ प्रबुद्धसंज्ञमन्नैस्तं लघुभिः स
मुपाचरेत्॥ विस्मापनैः स्मारणैश्च प्रियश्रुतिभिरेव च॥ मधुरगीतवादित्रशब्दैश्चित्रैश्च दर्शनैः॥ स्रंसनोल्लेख
नैर्धूमैरंजनैः कवलग्रहैः॥ शोणितस्यावसेकैश्च व्यायामोद्घर्षणैस्तथा॥ प्रबुद्धसंज्ञं मतिमाननुबंधमुपा ३
चरेत्॥ तस्य संरक्षितव्यं च मनः प्रलयहेतुतः॥ स्नेहस्वेदोपपन्नस्य यथादोषं यथाबलं॥ पंचकर्माणि कुर्वी
त मूर्छायेषु मदेषु च॥ अष्टाविंशत्यौषधस्य तथा तिक्तस्य सर्पिषः॥ प्रयोगः शस्यते तद्वन्महतः षट्पलस्य
वा॥ त्रिफलायाः प्रयोगो वा सघृतक्षौद्रशर्करः॥ शिलाजतुप्रयोगो वा प्रयोगः पयसोपि वा॥ पिप्पलीनां

प्रयोगो वा पयसा चित्रकस्य च॥ रसायनानां कौंभस्य सर्पिषो वा प्रशस्यते॥ रक्तावसेकाच्छास्त्राणां सतां सत्त्ववताम
पि॥ सेवनान्मदमूर्छायाः प्रशाम्यंति शरीरिणां॥ इति तत्रश्लोकः॥ ॥ विशुद्धं चाविशुद्धं च शोणितं तस्य हेतवः॥
रक्तप्रदोषजा रोगास्तेषु रोगेषु चौषधं॥ मदमूर्छायसंन्यासहेतुलक्षणभेषजं॥ विधिशोणितके ध्याये सर्वमे
तत्प्रकाशितं॥ ॥ इति विधिशोणितीयो नामाध्यायश्चतुर्विंशः॥२४॥ ॥श्री॥ ॥ अथातो यज्जःपुरुषीयम ३
ध्यायं व्याख्यास्यामः॥ ॥ इति ह स्माह भगवानात्रेयः॥ पुरा प्रत्यक्षधर्माणं भगवंतं पुनर्वसुं॥ महर्षय
इदा मीताः प्रादुरासीदियं कथा॥ आत्मेंद्रियमनोर्थानां योयं पुरुषसंज्ञकः॥ राशिरस्यामयानां च प्रागुत्पत्तिवि
निश्चये॥ तदंतरं काशिपतिर्वामको वाक्यमर्थवत्॥ व्याजहारर्षिसमितिमुपसृत्याभिवाद्य च॥ किंनु भोः पुरु
षो यज्जस्तज्जास्तस्यामयाः स्मृताः॥ न चेत्युक्ते नरेंद्रेण प्रोवाचर्षीन्पुनर्वसुः॥ सर्व एवामितज्ञाना विज्ञानच्छिन्न
संशयाः॥ भवंतश्छेत्तुमर्हंति काशीशस्यास्य संशयं॥ पारीक्षितः परीक्षायां मौद्गल्यो वाक्यमब्रवीत्॥ आत्मजः
पुरुषो रोगाश्चात्मजाः कारणं हि सः॥ स चिनोत्युपभुंक्ते च कर्म कर्मफलानि च॥ न ह्यृते चेतनाधातोः प्रवृत्तिः
सुखदुःखयोः॥ शरलोमा तु नेत्याह न ह्यात्मात्मानमात्मना॥ योजयेद्व्याधिभिर्दुःखैर्दुःखद्वेषी कदाचन॥ र
जस्तमोभ्यां तु मनः परीतं सत्त्वसंज्ञकं॥ शरीरस्य समुत्पत्तौ विकाराणां च कारणं॥ वार्योविदस्तु नेत्याह न ह्येकं का
रणं मनः॥ नर्ते शरीराच्छारीरा रोगा न मनसः स्थितिः॥ रसजानि तु भूतानि व्याधयश्च पृथग्विधाः॥ आपो हि रसवत्य
स्ताः स्मृता निर्वृत्तिहेतवः॥ हिरण्याक्षस्तु नेत्याह न ह्यात्मा रसजः स्मृतः॥ नातींद्रियं मनः संति रोगाः शब्दादिजास्त
था॥ षड्धातुजस्तु पुरुषो रोगाः षड्धातुजास्तथा॥ राशिः षड्धातुजो ह्येष सांख्यैराद्यैः प्रकीर्तितः॥ तथा ब्रुवाणं
कौशिकमाहैवं नेति कांकायनः॥ कस्मान्मातापितृभ्यां हि विना षड्धातुजो भवेत्॥ पुरुषः पुरुषाद्गौर्गोरश्वादश्वः
प्रजायते॥ पित्र्या मेहादयश्चोक्ता रोगास्तावत्कारणं॥ भद्रकाप्यस्तु नेत्याह नह्यंधोंधात्प्रजायते॥ मातापि
त्रोरपि च ते प्रागुत्पत्तिर्न युज्यते॥ कर्मजस्तु मतो जंतुः कर्मजास्तस्य चामयाः॥ न ह्यृते कर्मणो जन्म रोगाणां पुरु
षस्य च॥ भरद्वाजस्तु नेत्याह कर्ता पूर्वं हि कर्मणः॥ दृष्टं न चाकृतं कर्म यस्य स्यात्पुरुषः फलं॥ भावहेतुः स्व

चरक सू.

भावस्तस्याधीनो पुरुषस्य च॥ खरद्रवचलोष्णत्वं तेजोऽन्तानां यथा हि॥ काङ्कायनस्तु नेत्याह न ह्यारम्भफलं भवेत्॥ भवेच्च भा
वानां प्रसिद्धिः सिद्धिश्च वा॥ स्रष्टा त्वमितसंकल्पो ब्रह्मापत्यं प्रजापतिः॥ चेतनाचेतनस्यास्य जगतः सुखदुःखयोः
तन्निमित्तं भिक्षुरात्रेयो न ह्यपत्यं प्रजापतेः॥ प्रजाहितैषी सततं दुःखैर्युञ्ज्यादसाधुवत्॥ कालजस्त्वेव पुरुषः कालजास्त
३० स्य चामयाः॥ जगत्कालवशं सर्वं कालः सर्वत्र कारणं॥ तथर्षीणां विवदतामुवाचेदं पुनर्वसुः॥ मैवं वोचत तत्त्वं हि दुःप्रा
पं पक्षसंश्रयात्॥ वादान्सप्रतिवादान्हि वदन्तो निश्चितानिव॥ पक्षान्तं नैव गच्छन्ति तिलपीडकवद्गतेः॥ मुक्त्वैवं वादसंघ
ट्टमध्यात्ममनुचिन्त्यतां॥ नाविधूते तमःस्कन्धे ज्ञेये ज्ञानं प्रवर्तते॥ येषामेव हि भावानां संपत्संजनयेन्नरं॥ तेषामेव विप
द्व्याधीन्विविधान्समुदीरयेत्॥ इति॥ ॥ अथात्रेयस्य भगवतो वचनमनुनिशम्य पुनरेव वामकः काशिपतिरुवा
च॥ भगवन्तमात्रेयं॥ भगवन्संपन्निमित्तजस्य पुरुषस्य विपन्निमित्तजानां रोगाणां किमभिवृद्धिकारणं भवतीति॥ तमुवा
च भगवानात्रेयः हितोपयोगनिमित्तः पुरुषस्याभिवृद्धिकरो भवत्यहितोपयोगनिमित्तः पुनर्व्याधीनामिति॥ एवंवा
दिनं भगवन्तमात्रेयमग्निवेश उवाच॥ कथमिह भगवन्हिताहितानामाहारजातानां लक्षणमनपवादमभिजानीमहे
हितसमाख्यातानां चैवाहारजातानामहितसमाख्यातानां च मात्राकालक्रियाभूमिदेहदोषपुरुषावस्थान्तरेषु विपरीत
कारित्वमुपलभामहे इति॥ तमुवाच भगवानात्रेयो यदाहारजातमग्निवेश समांश्चैव शरीरधातून्प्रकृतौ स्थाप
यति॥ विषमांश्च समीकरोतीत्येतद्धितं विद्धि विपरीतमहितमित्येतद्धिताहितलक्षणमनपवादं भवति॥ न त्वेतदेवमु
पदिष्टं भूयिष्ठकल्पाः सर्वभिषजो विज्ञास्यन्ति॥ येषां हि विदितमाहारतत्त्वं गुणतो द्रव्यतः कर्मतः सर्वावयवशो
मात्रादयश्च भावास्त एतदेवमुपदिष्टं विज्ञातुमुत्सहन्ते॥ यथा तु खल्वेतदुपदिष्टं भूयिष्ठकल्पाः सर्वभिषजो
विज्ञास्यन्ति॥ तथैतदुपदेक्ष्यामो मात्रादीन्भावाननुदाहरन्तः॥ तेषां हि बहुविधविकल्पा भवन्त्याहारविधिविशेषांस्तु खलु ल ३०
क्षणतश्चावयवतश्चानुव्याख्यास्यामः॥ तत्राहारस्त्वेकविध एवाभ्यवहार्यत्वात्स पुनर्द्वियोनिः स्थावरजङ्गमा
त्मकत्वाद्द्विविधप्रभावो हिताहितोदर्कविशेषाच्चतुर्विधोपयोगः॥ पानाशनभक्ष्यलेह्योपयोगात्षडास्वादो रसभे
दतः षड्विधत्वाद्विंशतिगुणो गुरुलघुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिल

श्लक्ष्णखरसूक्ष्मस्थूलसान्द्रद्रवानुगमात्॥ अपरिसंख्येयविकल्पो द्रव्यसंयोगकरणबाहुल्यात्॥ त
स्य खलु ये ये विकाराः पुनरावयविकाः भूयिष्ठमुपयुज्यन्ते भूयिष्ठकल्पानां च मनुष्याणां प्रकृत्यैव हिततमाश्चाहिततमाश्च तांस्तान्यथा
वदनुव्याख्यास्यामः॥ तद्यथा॥ लोहितशालयः शूकधान्यानां पथ्यतमत्वे श्रेष्ठतमा भवन्ति॥ मुद्गाः शमीधान्यानां
आन्तरीक्षमुदकानां॥ सैन्धवं लवणानां॥ जीवन्तीशाकं शाकानां ऐणेयं मृगमांसानां॥ लावः पक्षिणां॥ गोधा बिलेश
यानां॥ रोहितो मत्स्यानां॥ गव्यं सर्पिः सर्पिषां॥ गोक्षीरं क्षीराणां तिलतैलं स्थावरस्नेहानां॥ वराहवसानूपमृगवसा
नां॥ कुक्कुटवसा विष्किरशकुनिवसानां॥ अजमेदः शाखादमेदसां॥ शृङ्गवेरं कन्दानां॥ मृद्वीका फलानां॥ शर्करेक्षुवि
काराणामिति॥ प्रकृत्यैव हिततमानामाहारविकाराणां प्राधान्यतो द्रव्याण्यनुव्याख्यातानि भवन्ति॥ अहितानप्यु
पदेक्ष्यामः॥ यवकाः शूकधान्यानामपथ्यत्वे प्रकृष्टतमा भवन्ति॥ माषाः शमीधान्यानां॥ वर्षानादेयमुदका
नामौषरं लवणानां सर्षपशाकं शाकानां॥ गोमांसं मृगमांसानां॥ काकः कपोतः पक्षिणां॥ भेको बिलेशयानां॥
चिलिचिमो मत्स्यानामाविकं सर्पिः सर्पिषामविक्षीरं क्षीराणां॥ कुसुम्भस्नेहः स्थावरस्नेहानां॥ महिषवसानूप
मृगवसानां॥ कुम्भीरवसा मत्स्यवसानां॥ काकमद्गुवसा जलचरविहंगवसानां चटकवसा विष्किरशकुनिवसानां॥
हस्तिमेदः शाखादमेदसां॥ मूलकं कन्दानां॥ लकुचं फलानां॥ फाणितमिक्षुविकाराणामिति॥ प्रकृत्यैवाहितत
मानामाहारविकाराणां प्रकृष्टतमानि द्रव्याण्यनुव्याख्यातानि भवन्ति॥ हिताहितावयवा
नामाहारविकाराणामतो भूयः कर्मौषधानां च प्राधान्यतः सानुबन्धानि द्रव्याण्यनुव्याख्यास्यामः॥ तद्यथा॥ अं
न्नं वृत्तिकराणां श्रेष्ठतममुदकमाश्वासकराणां॥ सुरा श्रमहराणां॥ क्षीरं जीवनीयानां॥ मांसं बृंहणीयानां॥ लवणम
न्नद्रव्यरुचिकराणामम्लं हृद्यानां॥ कुक्कुटो बल्यानां॥ नक्ररेतो वृष्याणां॥ मधु श्लेष्मपित्तप्रशमनानां सर्पिर्वात
पित्तप्रशमनानां॥ तैलं वातश्लेष्मप्रशमनानां॥ वमनं श्लेष्महराणां॥ विरेचनं पित्तहराणां॥ बस्तिर्वातहराणां॥ स्वे
दो मार्दवकराणां॥ व्यायामः स्थैर्यकराणां॥ क्षारः पुंस्त्वोपघातिनां॥ तिन्दुकमनन्नद्रव्यरुचिकराणां॥ आमं कपित्थमकं
ठ्यानामाविकं सर्पिरहृद्यानामजाक्षीरं शोषघ्नस्तन्यसात्म्यरक्तसंग्राहिकराणामविक्षीरं श्लेष्मपित्तोपचयकराणाम्

च॰ सू॰

४० महिषीक्षीरं स्वप्नजननानां मंदकं दध्यभिष्यंदकराणां ॥ गवेधुकान्नं कर्शनीयानां । उद्दालकान्नं विरूक्षणीयानां ॥ इक्षुर्मू
त्रजननानां ॥ माषाः श्लेष्मपित्तजननानां ॥ मदनफलं वमनास्थापनानुवासनोपयोगिनां त्रिवृत्सुखविरेचनानां ॥ चतुरंगु
लो मृदुविरेचनानां ॥ स्नुक्पयस्तीक्ष्णविरेचनानां ॥ प्रत्यक्पुष्पा शिरोविरेचनानां । विडंगं क्रिमिघ्नानां । शिरीषो विषघ्ना
नां ॥ खदिरः कुष्ठघ्नानां । रास्ना वातहराणां ॥ आमलकं वयःस्थापनानां ॥ हरीतकी पथ्यानामेरंडमूलं वृष्यवातहराणां ॥
पिप्पलीमूलं दीपनीयपाचनीयानाहप्रशमनानां चित्रकमूलं दीपनीयपाचनीयगुदशोथशूलहराणां । पुष्करमूलं
हिक्काश्वासकासपार्श्वशूलहराणां ॥ मुस्तं संग्राहकदीपनीयपाचनीयानां ॥ उदीच्यं निर्वापणपाचनीयछर्दतीसारशूल
हराणां ॥ कट्वंगं संग्राहकदीपनीयानां अनंता संग्राहकरक्तपित्तप्रशमनानां अमृता संग्राहकदीपनीयवातहरश्लेष्मशो
णितविबंधप्रशमनानां ॥ बिल्वं संग्राहकदीपनीयवातपित्तकफप्रशमनानामतिविषा पाचनीयसंग्राहकसर्वदोषहराण
मुत्पलकुमुदकिंजल्कः संग्राहकरक्तपित्तप्रशमनानां दुरालभा पित्तश्लेष्मविशोषणानां । गंधप्रियंगुः शोणितपित्ता
तियोगप्रशमनानां ॥ कुटजत्वक् श्लेष्मपित्तरक्तसंग्राहकोपशोषणानां ॥ काश्मर्यफलं रक्तसंग्राहकोपशोषणानां ॥ पृश्नि
पर्णी संग्राहकदीपनीयवातहरवृष्याणां । विदारिगंधा वृष्यसर्वदोषहराणां ॥ बला संग्राहकबल्यवातहराणां ॥ गोक्षु
रकोमूत्रकृच्छ्रानिलहराणां ॥ हिंगुनिर्यासश्छेदनीयदीपनीयानुलोमिकवातकफप्रशमनानामम्लवेतसो भेदनीयदीपनी
यानुलोमिकवातश्लेष्महराणां ॥ यावशूकः स्रंसनीयपाचनीयार्शोघ्नानां ॥ तक्राभ्यासो ग्रहणीदोषशोफार्शोघृतव्यापत
प्रशमनानां ॥ क्रव्यादमांसाभ्यासो ग्रहणीदोषशोषार्शोघ्नानां ॥ क्षीरघृताभ्यासो रसायनानां ॥ समघृतसक्तुप्राशाभ्या
सो वृष्योदावर्तहराणां ॥ तैलगंडूषाभ्यासो दंतबलरुचिकराणां ॥ चंदनं दुर्गंधहरदाहनिर्वापणानुलेपनानां ॥ रास्ना
गुरुणी शीतापनयनप्रलेपनानां ॥ लामज्जकोशीरं दाहत्वग्दोषस्वेदापनयनप्रलेपनानां ॥ कुष्ठं वातहराभ्यंगोपनाहो ४०
पयोगिनां ॥ मधुकं चक्षुष्यवृष्यकेश्यकंठ्यवर्ण्यविरजनीयरोपणीयानां ॥ वायुः प्राणसंज्ञाप्रदानहेतूनामग्निरा
मस्तंभशीतशूलोद्वेपनप्रशमनानां ॥ जलं स्तंभनानां ॥ मृद्भृष्टलोष्टनिर्वापितमुदकं तृष्णाछर्द्यतियोगप्रशमनानामतिमा
त्राशनमामप्रदोषहेतूनां ॥ यथाग्न्यभ्यवहारोऽग्निसंधुक्षणीयानां ॥ यथासात्म्यं चेष्टाभ्यवहारौ सेव्यानां ॥ का

लभोजनमारोग्यकराणां ॥ तृप्तिराहारगुणानां ॥ मद्यं सौमनस्यजननानां ॥ मद्याक्षेपो धीधृतिस्मृतिहराणां ॥ गुरुभोजनं दुर्वि
पाकानामेकाशनभोजनं सुखपरिणामकराणां ॥ शुक्रवेगनिग्रहः षंढकराणां । स्त्रीष्वतिप्रसंगः शो
षकराणां ॥ पराघातनमन्नाश्रद्धाजननानां ॥ अनशनमायुषो ह्रासकराणां ॥ प्रमिताशनं कर्शनीयानामजीर्णाध्य
शनं ग्रहणीदूषणानां । विषमाशनमग्निवैषम्यकराणां ॥ विरुद्धवीर्याशनं निंदितव्याधिकराणां ॥ प्रशमः पथ्याना
मायासः सर्वापथ्यानां ॥ मिथ्यायोगो व्याधिकराणां ॥ रजस्वलाभिगमनमलक्ष्मीमुखानां ॥ ब्रह्मचर्यमायुष्याणां
संकल्पो वृष्याणां ॥ दौर्मनस्यमवृष्याणामयथाबलमारंभः प्राणोपरोधिनां । विषादो रोगवर्धनानां ॥ स्ना
नं श्रमहराणां हर्षः प्रीणनानां शोकः शोषणानां । निवृत्तिः पुष्टिकराणां ॥ पुष्टिः स्वप्नकराणां ॥ स्वप्नस्तंद्राकराणां ॥ स
र्वरसाभ्यासो बलकराणामेकरसाभ्यासो दौर्बल्यकराणां ॥ गर्भशल्यमाहार्याणां ॥ अजीर्णमुद्धार्याणां । बालो
मृदुभेषजीयानां । वृद्धो याप्यानां ॥ गर्भिणी तीक्ष्णौषधव्यवायव्यायामवर्जनीयानां ॥ सौमनस्यं गर्भधारणा
नां ॥ संनिपातो दुश्चिकित्स्यानामामविषमचिकित्स्यानां ज्वरो रोगाणां ॥ कुष्ठं दीर्घरोगाणां ॥ राजयक्ष्मा रोगसमूहा
नां । प्रमेहोऽनुषंगिणां ॥ जलौकाः शस्त्राणां ॥ बस्तिस्तंत्राणां ॥ हिमवानौषधभूमीनां ॥ सोमऔषधीनां ॥ मरु
भूमिरारोग्यदेशानामनूपोऽहितदेशानां । निर्देशकारित्वमातुरगुणानां । भिषक्चिकित्सांगानां ॥ नास्तिको वर्ज्या
नां ॥ लौल्यं क्लेशकराणामनिर्देशकारित्वमरिष्टानामनिर्वेदो वार्तलक्षणानां ॥ योगो वैद्यगुणानां ॥ विज्ञानमौ
षधानां ॥ शास्त्रसहितस्तर्कः साधनानां ॥ संप्रतिपत्तिः कालज्ञानप्रयोजनानां ॥ अनध्यवसायः कालातिप
त्तिहेतूनां ॥ मध्यवसायः कालानिष्पत्तिहेतूनां ॥ दृष्टकर्मता निःसंशयकराणां । असमर्थता भयकरा
णां ॥ तद्विद्यसंभाषा बुद्धिवर्धनानामाचार्यः शास्त्राधिगमहेतूनामायुर्वेदोऽमृतानां ॥ सद्वचनमनुष्ठेयानाम
सद्ग्रहणं सर्वाहितानां । सर्वसंन्यासः सुखानामिति ॥ तत्र श्लोकाः ॥ अग्र्याणां शतमुद्दिष्टं यद्द्विपंचा
शदुत्तरं । अलमेतद्विकाराणां विघातायोपदिश्यते ॥ समानकारिणो येऽर्थास्तेषां श्रेष्ठस्य लक्षणं । ज्यायस्त्वं
कार्यकर्तृत्वे वरश्चाप्युच्यते ॥ वातपित्तकफेभ्यश्च यद्यत्प्रशमने हितं । प्राधान्यतश्च निर्दिष्टं यद्व्याधि

४२ मुत्तमं॥ एतन्निशम्य निपुणं चिकित्सां संप्रयोजयेत॥ एवं कुर्वन्सदा वैद्यो धर्मकामौ समश्नुते॥ पथ्यं पथोनपेतं यद्यच्चोक्तं
मनसः प्रियं॥ मात्राकालक्रियाभूमिदेहदोषगुणांतरं॥ प्राप्य तत्तद्धि दृश्यंते ते ते भावास्तथा तथा॥ तस्मात्स्वभावो नि
र्दिष्टस्तथा मात्रादिराश्रयः॥ तदपेक्ष्योभयं कर्म प्रयोज्यं सिद्धिमिच्छता॥ इति॥ तदात्रेयस्य भगवतो वचनमनुनिश
म्य॥ पुनरपि भगवंतमात्रेयमग्निवेश उवाच॥ यथोद्देशमभिनिर्दिष्टः॥ केवलोयमर्थो भगवता आसवद्रव्याणामि
दानीं लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामह इति॥ तमुवाच भगवानात्रेयः॥ ॥ धान्यफलमूलसारपु
ष्पकांडपत्रत्वचो भवंत्यासवयोनयोग्निवेश संग्रहेणाष्टौ शर्करानवमी॥ तासु द्रव्यसंयोगकारणतोपरिसंख्यातास्
यथापथ्यतमानामासवानां चतुरशीतिं निबोध॥ ॥ तद्यथा॥ सुरासौवीरकतुषोदकमैरेयमेदकधान्याम्लषड्धान्या
सवा भवंति॥ मृद्वीकाकाश्मर्यखर्जूरधन्वनराजादनतृणशून्यपरूषकाभयामलकविभीतकमृगलिंडिकाजांबूकपित्थ
कुवलबदरकर्कंधुपीलुप्रियालपनसन्यग्रोधाश्वत्थप्लक्षकपीतनोदुंबराजमोदशृंगाटकशंखिनीफलासवाः॥ षड्वि
शतिर्भवंति॥ विदारिगंधाश्वगंधाकृष्णगंधाशतावरीश्यामात्रिवृद्दंतीद्रवंतीबिल्वोरुबूकचित्रकमूलैकादशमूलासवा भ
वंति॥ सालप्रियकाश्वकर्णचंदनस्यंदनखदिरकदरसप्तपर्णार्जुनासनारिमेदतिंदुककिणिहीशमीशुक्तिशिंशा
पाशिरीषवंजुलधन्वनमधूकसारासवा विंशतिर्भवंति॥ पद्मोत्पलनलिनकुमुदसौगंधिकपुंडरीकशतपत्रम
धूकप्रियंगुधातकीपुष्परैकादशाः पुष्पासवा भवंति॥ इक्षुकांडेक्षुवालिकापुंड्रकचतुर्थाः कांडासवा भवंति॥ प
टोलताडपत्रासवौ द्वौ भवतः॥ तिल्वकलोध्रैलवालुकक्रमुकचतुर्थास्त्वगासवा भवंति॥ शर्करासव एक एवैषा
मासवानामासुतत्वादासवसंज्ञा॥ एवमेषामासवानां चतुरशीतिः परस्परेण संसृष्टानामासवद्रव्याणामुपदि
ष्टा भवंति॥ द्रव्यसंयोगविभागास्तेषां बहुविधविकल्पाः संस्काराश्च यथास्वयोगिसंयोगसंस्कारसंस्कृता ह्यास
वाः स्वं स्वं कर्म कुर्वंति॥ संयोगसंस्कारदेशकालमात्रादयश्च भावास्तेषां। तेषामासवानां ते ते समुपदिश्यंते॥ तत्त ५२
त्कार्यमभिसमीक्ष्येति॥ भवंति चात्र॥ मनः शरीराग्निबलप्रदाना मस्वप्नशोकारुचिनाशकानां॥ संहर्षणा
नां प्रवरासवानामशीतिरुक्ता चतुरुत्तरैषा॥ शरीररोगप्रकृतीमतानिलत्वेन वाद्यासवनिश्चयोयं॥ इत्याचयज्ञः

पुरुषादिकेस्मिन्मुनिस्तथास्याग्निवरासवांश्च॥ ॥ इति यज्ञःपुरुषीयो नाम पंचविंशतितमोध्यायः॥ २५ ॥ ॥
॥ अथात आत्रेयभद्रकाप्यीयमध्यायं व्याख्यास्यामः॥ इति ह स्माह भगवानात्रेयः॥ आत्रेयो भद्रकाप्यश्च शाकुंतेय
स्तथैव च॥ पूर्णाक्षश्चैव मौद्गल्यो हिरण्याक्षश्च कौशिकः॥ यः कुमारशिरा नाम भरद्वाजः सचानघः॥ श्रीमान्वार्यो
विदश्चैव राजा मतिमतां वरः॥ निमिश्च राजा वैदेहो बडिशश्च महामतिः॥ कांकायनश्च बाल्हीको बाल्हीकभिषजां
वरः॥ एते श्रुतवयोवृद्धा जितात्मानो महर्षयः॥ वने चैत्ररथे रम्ये समीयुर्विजिहीर्षवः॥ तेषां तत्रोपविष्टानामियम
र्थवती कथा॥ बभूवार्थविदां सम्यग्रसाहारविनिश्चय इति॥ एक एव रस इत्युवाच॥ भद्रकाप्योयतः॥ पंचानामिंद्रि
यार्थानामन्यतमं जिह्वार्थविषयिकं भावमाचक्षते कुशलाः॥ स पुनरुदकादनन्य इति॥ द्वौ रसाविति शाकुंतेयो ब्रा
ह्मणः छेदनीयश्चोपशमनीयश्चेति त्रयो रसा इति पूर्णाक्षो मौद्गल्यश्छेदनीयोपशमनीयो साधारणश्चेति
चत्वारो रसा इति हिरण्याक्षः कौशिकः॥ स्वादुर्हितश्चास्वादुरहितश्चेति॥ पंच रसा इति कुमारशिरा भरद्वाजो भौ
मोदकाग्नेयवायवीयांतरिक्षाः॥ षड्रसा इति वार्योविदो राजर्षिर्गुरुलघुशीतोष्णस्निग्धरूक्षाः॥ सप्त रसा इति
निमिर्वैदेहो मधुराम्ललवणकटुतिक्तकषायक्षाराः॥ अष्टौ रसा इति बडिशो धामार्गवो मधुराम्ललवणकटु
तिक्तकषायक्षाराव्यक्ताः अपरिसंख्येया रसा इति कांकायनो बाल्हीकभिषगाश्रयगुणकर्मसंस्कारविशेषाणा
मपरिसंख्येयत्वात॥ षडेव रसा इत्युवाच भगवानात्रेयो मधुराम्ललवणकटुतिक्तकषायाः तेषां षण्णां रसानां योनिरु
दकं छेदनोपशमने द्वे कर्मणी तयोर्मिश्रीभावात साधारणत्वं स्वाद्वस्वादुता भक्तिः हिताहितौ प्रभावौ पंचमहाभू
तविकारास्त्वाश्रयाः प्रकृतिविकृतिविचारदेशकालवशास्तेष्वाश्रयेषु द्रव्यसंज्ञकेषु गुणा गुरुलघुशीतोष्णस्निग्ध
रूक्षाद्याः क्षरणात्क्षारो नासौ रसो द्रव्यं तदनेकरससमुत्पन्नमनेकरसं कटुकलवणभूयिष्ठमनेकेंद्रियार्थसमन्
वितं कारणाभिनिर्वृत्तमव्यक्तीभावस्तु खलु रसानां प्रकृतौ भवत्यनुरसे तु रससमन्विते वा द्रव्ये अपरिसंख्येयत्वं
पुनर्नेतेषामाश्रयादीनां भावानां विशेषापरिसंख्येयत्वाद्युक्तमेकैकशोप्येषामाश्रयादीनां भावानां विशेषाना
श्रयंते॥ न च तस्मादन्यत्वमुपपद्यते॥ परस्परसंसृष्टभूयिष्ठत्वात॥ तच्चैषामभिनिर्वृत्तगुणप्रकृतीनामपार

संख्येयत्वं भवति। तस्मान्न संसृष्टानां रसानां कर्मोपदिशन्ति बुद्धिमन्तः। तच्चैव कारणमपेक्षमाणाः षण्णां रसानां परस्परे-
चा॰ सू॰ णासंसृष्टानां लक्षणपृथक्त्वमुपदेक्ष्यामः॥ अतश्च तावद्द्रव्यभेदमभिप्रेत्य किंचिदभिधास्यामः॥ सर्वं द्रव्यं पांच-
भौतिकमस्मिन्नर्थे तच्चेतनावदचेतनं च। तस्य गुणाः शब्दादयो गुर्वादयश्च द्रवान्ताः। कर्म पंचविधमुक्तं वमना-
४२. दि॥ तत्र द्रव्याणि गुरुखरकठिनमन्दस्थिरविशदसान्द्रस्थूलगन्धगुणबहुलानि पार्थिवानि। तान्युपचयसंघातगौर-
वस्थैर्यकराणि॥ द्रवस्निग्धशीतगुरुमन्दसरसान्द्रमृदुपिच्छिलरसगुणबहुलान्याप्यानि तान्युपक्लेदस्नेहबन्धविष्यन्दमार्दव-
प्रह्लादकराणि॥ उष्णतीक्ष्णसूक्ष्मलघुरूक्षविशदरूपगुणबहुलान्याग्नेयानि तानि दाहपाकतापनप्रभाप्रकाशवर्ण-
कराणि॥ लघुशीतसूक्ष्मखरविशदरूक्षस्पर्शगुणबहुलानि वायव्यानि। तानि रौक्ष्यग्लानिविचारवैशद्यलाघ-
वकराणि॥ अनेन नानौषधभूतं जगति किंचिद्द्रव्यमुपलभ्यते। तां तां युक्तिमर्थं च तं तमभिप्रेत्य न च खलु केवलं गुण-
प्रभावादेव द्रव्याणि कार्मुकाणि भवन्ति। द्रव्याणि द्रव्यप्रभावाद्गुणप्रभावाद्द्रव्यगुणप्रभावाच्च तस्मिंस्तस्मिन्
काले तत्तदधिष्ठानमासाद्य तां तां युक्तिमर्थं च तं तमभिप्रेत्य यत्कुर्वन्ति तत्कर्म येन कुर्वन्ति तद्वीर्यं यत्र कुर्वन्ति तदधिकरणं
यदा कुर्वन्ति स कालः यथा कुर्वन्ति स उपायः यत्साधयन्ति तत्फलं॥ भेदश्चैषां त्रिषष्टिविधविकल्पो द्रव्य-
देशकालप्रभावाद्भवति। तमुपदेक्ष्यामः॥ स्वादुरम्लादिभिर्योगं शेषैरम्लादयः पृथक्॥ यान्ति पंचदशैतानि द्र-
व्याणि द्विरसानि हि॥ पृथगम्लादियुक्तस्य योगः शेषैः पृथग्भवेत्॥ मधुरस्य तथाम्लस्य लवणस्य कटोस्तथा।
त्रिरसानि यथासंख्यं द्रव्याण्युक्तानि विंशतिः॥ वक्ष्यन्ते तु चतुष्कांश्च द्रव्याणि दश पंच च॥ स्वादुरम्लौ सहितौ योगं ल-
वणाद्यैः पृथग्गतौ। योगं शेषैः पृथग्यातश्चतुष्करससंख्यया॥ सहितौ स्वादुलवणौ तद्वत्कट्वादिभिः पृथ-
क्। युक्तौ शेषैः पृथग्योगं यातः स्वादूषणौ तथा। युज्येते तु कषायेण सतिक्तौ लवणोषणौ॥ षट् पंच च रसा-
न्याहुरेकैकस्यापवर्जनात्। षट् चैकरसानि स्युरेकं षड्रसमेव च॥ इति त्रिषष्टिर्द्रव्याणां निर्दिष्टा रससं- ४२
ख्यया॥ त्रिषष्टिः स्यात्त्वसंख्येया रसानुरसकल्पनात्। रसास्तरतमाभ्यस्ताः संख्यामतिपतन्ति हि॥ संयोगाः स-
प्रपंचाद्गतकल्पनात्त्रिषष्टिधा॥ रसानां तत्र योग्यत्वात्कल्पिता रसचिन्तकैः॥ क्वचिदेको रसः कल्प्यः संयुक्ता-

श्च रसाः क्वचित्॥ दोषौषधादीन्संचिन्त्य भिषजा सिद्धिमिच्छता। द्रव्याणि द्विरसादीनि संयुक्तांश्च रसान्बुधाः॥ रसानेकै-
कशश्चैव कल्पयन्ति गदान्प्रति। यः स्याद्रसविकल्पज्ञः स्याच्च दोषविकल्पवित्॥ न स मुह्येद्विकाराणां हेतुलिङ्गोपशान्ति-
षु॥ व्यक्तः शुष्कस्य चादौ च रसो द्रव्यस्य लक्ष्यते। विपर्ययेणानुरसो रसो नास्ति हि सप्तमः॥ परापरत्वे युक्तिश्च संख्या
संयोग एव च॥ विभागश्च पृथक्त्वं च परिमाणमथापि च॥ संस्काराभ्यास इत्येते गुणा ज्ञेयाः परादयः॥ सिद्ध्युपा-
याश्चिकित्साया लक्षणैस्तान्प्रवक्ष्यते। देशकालवयोमानपाकवीर्यरसादिषु॥ परापरत्वे युक्तिस्तु योजना या तु यु-
ज्यते। संख्या स्याद्गणितं योगः सह संयोग उच्यते॥ द्रव्याणां द्वन्द्वसर्वैककर्मजोऽनित्य एव च॥ विभागस्तु विभक्तिः स्याद्
वियोगो भागशो ग्रहः॥ पृथक्त्वं स्यादसंयोगो वैलक्षण्यमनेकता॥ परिमाणं पुनर्मानं संस्कारः करणं मतं॥ भा-
वाभ्यसनमभ्यासः शीलनं सततक्रिया॥ इति स्वलक्षणैरुक्ता गुणाः सर्वे परादयः॥ चिकित्सा यैरविदितैर्न यथा-
वत्प्रवर्तते। गुणा गुणाश्रया नोक्तास्तस्माद्रसगुणान्भिषक्॥ विद्याद्द्रव्यगुणान्कर्तुरभिप्रायाः पृथग्विधाः॥ अतश्च
प्रकृतं बुद्ध्वा देशकालान्तराणि च॥ तन्त्रकर्तुरभिप्रायानुपायांश्चार्थमादिशेत्॥ षड्विभक्तीः प्रवक्ष्यामि रसानामत-
उत्तमं॥ षट् पंचभूतप्रभवाः संख्यातास्तु यथा रसाः॥ इति सौम्याः खल्वापोऽन्तरिक्षप्रभवाः प्रकृतिशीता लघ्व्य-
श्चाव्यक्तरसाश्च तास्त्वन्तरिक्षाद्भ्रश्यमाना भ्रष्टाश्च पंचमहाभूतगुणसमन्विता जङ्गमस्थावराणां भूतानां मूर्ती-
रभिप्रीणयन्ति॥ तासु मूर्तिषु षडभिमूर्च्छन्ति॥ रसास्तेषां षण्णां रसानां पृथिवीसोमगुणातिरेकान्मधुरो रसः॥ पृ-
थिव्यग्निभूयिष्ठत्वादम्लः सलिलाग्निगुणभूयिष्ठत्वाल्लवणो वाय्वग्निभूयिष्ठत्वात्कटुको वाय्वाकाशातिरिक्तात्तिक्तः
पवनपृथिवीव्यतिरेकात्कषाय इति॥ एवमेषां षण्णां रसानां षट्त्वमुपपन्नं न्यूनातिरेकविशेषान्महाभूतानां भूत-
नामिव स्थावरजङ्गमानां नानावर्णाकृतिविशेषाः षड्ऋतुकत्वाच्च कालस्योपपन्नो महाभूतानां न्यूनातिरेकविशेषः॥
तत्राग्निमारुतात्मका रसाः प्रायेणोर्ध्वभाजो लाघवादुत्प्लवनत्वाच्च वायोरूर्ध्वज्वलनत्वाच्चाग्नेः॥ सलिलपृथिव्यात्म-
कास्तु प्रायेणाधोभाजः पृथिव्या गुरुत्वान्निम्नगत्वाच्चोदकस्य॥ व्यामिश्रात्मकाः पुनरुभयतोभाजः॥ तेषां षण्णां
रसानामेकैकस्य यथाद्रव्यं गुणकर्माण्यनुव्याख्यास्यन्ते॥ तत्र मधुरो रसः॥ शरीरसात्म्याद्रसरुधिरमांसमेदो-

स्थिमज्जौजः शुक्राभिवर्धनमायुष्यः षडिंद्रियप्रसादनो बलवर्णकरः पित्तविषमारुतघ्नस्तृष्णाप्रशमनस्त्वच्यः॥ केश्यः
चर. सू. कंठ्यः प्रीणनो जीवनस्तर्पणः स्थैर्यकरः क्षीणक्षतसंधानकरो घ्राणमुखकंठप्रल्हादनो दाहमूर्छाप्रशमनः षट्पद
पिपीलिकानामिष्टतमः स्निग्धः शीतो गुरुश्चेति॥ स एवंगुणोप्येक एवात्यर्थमुपयुज्यमानः स्थौल्यं मार्दवमाल
४३ स्यमतिस्वप्नं गौरवमनन्नाभिलाषमग्नेर्दौर्बल्यमास्यकंठयोर्मांसाभिवृद्धिं तथा श्वासकासप्रतिश्यायालस
कशीतज्वरानाहास्यमाधुर्यवमथुसंज्ञास्वरप्रणाशगलगंडमालाश्लीपदगलशोफबस्तिधमनी
गलोपलेपाक्ष्यामयाभिष्यंदानित्येवंप्रभृतीन्कफजान्विकारानुपजनयतीति॥ अम्लो रसो भक्तं रोचयत्य
ग्निं दीपयति देहं बृंहयत्यूर्जयति मनो बोधयतींद्रियाणि बलं वर्धयति॥ वातमनुलोमयति हृदयं तर्पय
त्यास्यमास्रावयति। भुक्तमपकर्षयति क्लेदयति प्रीणयति जरयति लघुरुष्णः स्निग्धश्च॥ स एवंगुणोप्येक एवा
त्यर्थमुपयुज्यमानो दंतान्हर्षयति॥ तर्षयति॥ संमीलयत्यक्षिणी संवेजयति॥ लोमानि कफं विलापयति पि
त्तमभिवर्धयति॥ रक्तं दूषयति मांसं विदहति॥ कायं शिथिलीकरोति क्षीणक्षतकृशदुर्बलानां श्वयथुमापाद
यत्यपि च क्षताभिहतदष्टदग्धभग्नशूनप्रच्युतावमूत्रितपरिसर्पितमर्दितच्छिन्नभिन्नविश्लिष्टोद्विद्धोत्पिष्टादीनि पाचयत्याग्नेयस्व
भावात्परिदहति कंठमुरो हृदयं चेति॥ लवणो रसः पाचनः क्लेदनो दीपनश्च्यावनश्छेदनो भेदनस्तीक्ष्णः सरो
विकाष्यवंसस्यवकाशकरो वातहरः स्तंभबंधसंघातविधमनः सर्वरसप्रत्यनीकभूतश्चास्यमास्रावयति कफं वि
ष्यंदयति मार्गान्शोधयति सर्वशरीरावयवान्मृदूकरोति च रोचयत्याहारमाहारयोगी नात्यर्थगुरुः स्निग्धउष्ण
श्चेति॥ स एवंगुणोप्येक एवात्यर्थमुपयुज्यमानः पित्तं कोपयति॥ रक्तं वर्धयति तर्षयति मूर्छयति तापयति दा
धयति दारयति॥ कुष्णाति मांसानि प्रगालयति॥ कुष्ठानि विषं वर्धयति शोफान्स्फोटयति दंतांश्च्यावयति पुंस्त्वमुपहं ४३
तींद्रियाण्युपरुणद्धि वलीपलितखालित्यमापादयत्यपि च लोहितपित्ताम्लपित्तवीसर्पवातरक्तविचर्चिकेंद्रलु
प्तप्रभृतीन्विकारानुपजनयतीति॥ कटुको रसो वक्त्रं शोधयत्यग्निं दीपयति भुक्तं शोषयति घ्राणमास्रावयति चक्षु
र्विरेचयति स्फुटीकरोतींद्रियाणि अलसकश्वयथूपचयोदर्दाभिष्यंदस्नेहस्वेदक्लेदमलानुपहंति रो

चयत्यशनं कंडूर्विनाशयति व्रणानवसादयति॥ कृमीन्हिनस्ति मांसं विलिखति॥ शोणितसंघातं भिनत्ति बंधान्छिनत्ति
मार्गान्विवृणोति श्लेष्माणं शमयति लघुरुष्णो रूक्षश्चेति स एवंगुणोप्येक एवात्यर्थमुपयुज्यमानो विपाकप्रभावा
त्पुंस्त्वमुपहंति रसवीर्यप्रभावान्मोहयति ग्लापयति सादयति मूर्छयति॥ शोषयति भ्रमयति कंठं परिदहति श
रीरतापमुपजनयति बलं क्षिणोति तृष्णां जनयति॥ वाय्वग्निगुणबाहुल्याच्च भ्रममदथुकंपतोदभेदैश्चरण
भुजपार्श्वपृष्ठप्रभृतिषु मारुतजान्विकारानुपजनयतीति॥ तिक्तो रसः स्वयमरोचिष्णुररोचकघ्नो विषघ्नः कृमि
घ्नो मूर्छादाहकंडूकुष्ठतृष्णाप्रशमनः त्वङ्मांसयोः स्थिरीकरणो ज्वरघ्नो दीपनः पाचनः स्तन्यशोधनो लेखनः॥
क्लेदमेदोवसामज्जलसीकापूयस्वेदमूत्रपुरीषपित्तश्लेष्मोपशोषणो रूक्षः शीतो लघुश्चेति स एवंगुणोप्येक एवा
त्यर्थमुपयुज्यमानो रौक्ष्यात्खरविशदस्वभावाच्च रसरुधिरमेदोमांसास्थिमज्जशुक्राण्युच्छोषयति॥ स्रोतसां
खरत्वमापादयति बलमादत्ते कर्शयति ग्लपयति मूर्छयति मोहयति भ्रमयति॥ वदनमुपशोषयति अपरांश्च वातजा
न्विकारानुपजनयतीति॥ कषायो रसः संशमनः संग्राही संधानः पीडनो रोपणः शोषणः स्तंभनः श्लेष्मपित्तर
क्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतो गुरुश्चेति स एवंगुणोप्येक एवात्यर्थमुपयुज्यमान आस्यं शोष
यति वाचं निगृह्णाति स्रोतांस्यवबध्नाति श्यावत्वमापादयति॥ पुंस्त्वमुपहंति विष्टभ्य जरां गच्छति॥ वात
मूत्रपुरीषरेतांस्यवगृह्णाति बलमादत्ते कर्शयति॥ ग्लपयति तर्षयति स्तंभयति खरविशदरूक्षत्वात्पक्षवध
ग्रहापतानकार्दितशोषप्रभृतींश्च वातजान्विकारानुपजनयतीति॥ एवमेते षड्रसाः पृथक्त्वेनै
कत्वेन वा मात्रशः सम्यगुपयुज्यमाना उपकाराय भवंति अध्यात्मलोकस्य अपकारकराः पुनरतोन्यथा
भ्युपयुज्यमानास्तान्विद्वानुपकारार्थमेव मात्रशः सम्यगुपयोजयेदिति भवंति चात्र॥ शीतं वीर्येण
यद्द्रव्यं मधुरं रसपाकयोः॥ तयोरम्लं यदुष्णं च यच्चोष्णं कटुकं तयोः॥ तेषां रसोपदेशेन निर्देश्यो गुणसंग्र
हः॥ वीर्यतोऽविपरीतानां पाकतश्चोपदेक्ष्यते॥ यथापयो यथासर्पिर्यथा वा चव्यचित्रकौ॥ एवमादीनि चा
न्यानि निर्दिशेद्रसतो भिषक्॥ मधुरं किंचिदुष्णं स्यात्कषायं तिक्तमेव च॥ यथा महत्पंचमूलं यथाब्जानूप

च० सू०

४४

मामिषं॥ लवणं सैंधवं नोष्णमम्लमामलकं तथा॥ अर्कागुरुगुडूचीनां तिक्तानां चोष्णमिष्यते॥ किंचिदम्लं हि संग्राहि
किंचिदम्लं भिनत्ति च॥ यथा कपित्थं संग्राही भेदि चामलकं तथा॥ पिप्पली नागरं वृष्यं कटु चावृष्यमुच्यते॥ कषा
यस्तंभनः शीतः सोभयायामतोन्यथा॥ तस्माद्रसोपदेशेन न सर्वं द्रव्यमादिशेत्॥ दृष्टं तुल्यरसेप्येवं द्रव्ये द्रव्ये गु
णांतरं॥ रौक्ष्यात्कषायो रूक्षाणामुत्तमो मध्यमः कटुः॥ तिक्तोवरस्तथोष्णानामुष्णत्वाल्लवणः परः॥ मध्यमाम्लः
कटुश्चांतिः स्निग्धानां मधुरः परः॥ मध्याम्लो लवणश्चांत्यो रसः स्नेहान्निरुच्यते॥ तिक्तात्कषायान्मधुरः शीताच्छी
तलः परः॥ स्वादुर्गुरुत्वादधिकः कषायाल्लवणोवरः॥ अम्लात्कटुस्ततस्तिक्तो लघुत्वादुत्तमोमतः॥ केचिल्लघू
नामवरमिच्छंति लवणं रसं॥ गौरवे लाघवे चैव सोवरस्तूभयोरपि॥ परं चातो विपाकानां लक्षणं संप्रवक्ष्यते॥ कटु
तिक्तकषायाणां विपाकः प्रायशः कटुः॥ अम्लोम्लं पच्यते स्वादुर्मधुरं लवणस्तथा॥ मधुरो लवणाम्लौ च स्नि
ग्धभावात्त्रयो रसाः॥ वातमूत्रपुरीषाणां प्रायो मोक्षे सुखा मताः॥ कटुतिक्तकषायास्तु रूक्षभावात्त्रयो रसाः॥ दुःखा
विमोक्षे दृश्यंते वातविण्मूत्ररेतसां॥ शुक्रहा बद्धविण्मूत्रो विपाको वातलः कटुः॥ मधुरः सृष्टविण्मूत्रो वि
पाकः कफशुक्रलः॥ पित्तकृत्सृष्टविण्मूत्रः पाकोम्लः शुक्रनाशनः॥ तेषां गुरुः स्यान्मधुरः कटुकाम्लावतोन्यथा॥
विपाकलक्षणस्याल्पमध्यभूयस्त्वमेव च॥ द्रव्याणां गुणवैशेष्यात्तत्र तत्रोपलक्षयेत्॥ मृदुतीक्ष्णगुरुलघुस्नि
ग्धरूक्षोष्णशीतलं॥ वीर्यमष्टविधं केचित्केचिद्द्विविधमास्थिताः॥ शीतोष्णमिति वीर्यं तु क्रियते येन या क्रिया॥ नावी
र्यं कुरुते किंचित्सर्वा वीर्यकृता हि सा॥ रसो निपाते द्रव्याणां विपाकः कर्मनिष्ठया॥ वीर्यं यावदधीवासान्निपाता
च्चोपलभ्यते॥ रसवीर्यविपाकानां सामान्यं यत्र लक्ष्यते॥ विशेषः कर्मणां चैव प्रभावस्तस्य संस्मृतः॥ कटु
कः कटुकः पाके वीर्योष्णश्चित्रको मतः॥ तद्वद्दंती प्रभावात्तु विरेचयति मानवं॥ विषं विषघ्नमुक्तं यत्प्रभावस्त
त्र कारणं॥ ऊर्ध्वानुलोमिकं यच्च तत्प्रभावप्रभावितं॥ मणीनां धारणीयानां कर्म यद्विविधात्मकं॥ तत्प्रभावकृ
तं तेषां प्रभावोचिंत्य उच्यते॥ सम्यग्विपाकवीर्याणि प्रभावश्चाप्युदाहृतः॥ किंचिद्रसेन कुरुते कर्म वीर्ये ४४
ण चापरं॥ द्रव्यं गुणेन पाकेन प्रभावेन च किंचन॥ रसं विपाकस्तौ वीर्यं प्रभावस्तान्व्यपोहति॥ षण्णां रसा

Dr BHAU DAJI MEMORIAL

नां विज्ञानमुपदेक्ष्यामतः परं॥ स्नेहनप्रीणनाह्लादमार्दवैरुपलभ्यते॥ मुखस्थो मधुरश्चास्यं व्याप्नुवँल्लिंपतीव च॥ दं
तहर्षान्मुखास्रावात्स्वेदनान्मुखबोधनात्॥ प्राश्यैवाम्लं रसं ब्रूयाद्विदाहाच्चास्यकंठयोः॥ प्रलीय क्लेदविष्यंदमार्दवं
कुरुते मुखे॥ यः शीघ्रं लवणो ज्ञेयः स विदाहान्मुखस्य च॥ संवेजयेद्यो रसनं निपाते तुदतीव च॥ विदहन्मुखना
साक्षिस्रावी स कटुकः स्मृतः॥ प्रतिहंति निपाते यो रसनं स्वदते न च॥ स तिक्तो मुखवैशद्यशोषप्रह्लादकारकः॥ वैश
द्यस्तंभजाड्यैर्यो रसनं योजयेद्रसः॥ बध्नातीव च यः कंठं कषायः स विकास्यपि॥ इत्येवंवादिनं भगवंतमात्रेय
मग्निवेश उवाच॥ भगवन् श्रुतमेतदवितथमर्थसंपद्युक्तं भगवतो यथावद्द्रव्यगुणकर्माधिकारे वचः॥ पर
त्वाहारविकाराणां वैरोधिकानामिदानीं लक्षणमनतिसंक्षेपेणोपदिश्यमानं शुश्रूषामह इति॥ तमुवाच भगवा
नात्रेयो देहधातुप्रत्यनीकभूतानि द्रव्याणि देहधातुभिर्विरोधमापद्यंते परस्परगुणविरुद्धानि कानिचित्
कानिचित्संयोगात्संस्कारादपराणि देशकालमात्रादिभिश्चापराणि तथा स्वभावादपराणि तत्र यान्याहारम
धिकृत्य भूयिष्ठमुपयुज्यंते॥ तेषामेकदेशं वैरोधिकमधिकृत्योपदेक्ष्यामो न मत्स्यान्पयसा सहाभ्यवहरेदुभयं ह्ये
तन्मधुरं मधुरविपाकं महाभिष्यंदि शीतोष्णत्वाद्विरुद्धवीर्यं विरुद्धवीर्यत्वाच्छोणितप्रदूषणाय महाभिष्यंदि
त्वान्मार्गोपरोधाय चेति॥ तदनंतरमात्रेयमनुमान्य भद्रकाप्योग्निवेशमुवाच॥ सर्वानेव मत्स्यान्पयसा सहाभ्यव
हरेदन्यत्रैकस्माच्चिलिचिमात्स पुनः शकली सर्वतो लोहितराजिः सुकलो लोहितमस्य प्रकारः प्रायो भूमौ विच
रति तं चेत्पयसा सहाभ्यवहरेन्निःसंशयं शोणितजानां विबंधजानां च व्याधीनामन्यतमं तरेण प्राप्नुया
दिति॥ इत्यात्रेयः सर्वानेव मत्स्यान्न पयसा सहाभ्यवहरेत्॥ विशेषतश्चिलिचिमं स हि महाभिष्यंदित्वात्स्थू
ललक्षणतमानेतान्व्याधीनुपजनयत्यामविषमुदीरयति चेति॥ ग्राम्यानूपौदकपिशितानि मधुगुडतिलपयो
माषमूलकबिसैर्विरूढधान्यैश्च नैकध्यमद्यात्तन्मूलं हि बाधिर्यांधवेपथुजाड्यवैकल्यमूकतामैण्मिण्यमथवा
मरणमाप्नोति॥ न पौष्करं रोहिणीकं शाकं कपोतान्सर्षपतैलभृष्टान्मधुपयोभ्यां सहाभ्यवहरेत्॥ तन्मूलं हि
शोणिताभिष्यंदधमनीप्रतिचयापस्मारशंखकगलगंडरोहिणीनामन्यतमं प्राप्नोत्यथवा मरणमिति॥ न मूलक

उष्णमत्स्यमांसं धार्त्तकमुखकमांसादीनि भक्षयित्वा पयः सेव्यं कुष्ठाबाधभयात्॥ नत्रानुक्ताळशाकं लकुचपक्वं म
धुपयोभ्यां सहोपयोज्यं एतद्धि मरणाय अथवा बलाधार्यतेजासानुपरोधायाल्पव्याधये इति॥ तद्वल्लकुचं पक्वं नम
वमत्स्यगुडसर्पिर्भिः सहोपयोज्यं वैरोधिकत्वात्॥ तथाम्रातकमातुलुंगलकुचकरमर्दमोचदंतशठबदरकोशा
५५ म्रमभव्यजांबवकपित्थतिंतिडीकपारावतकाक्षोडपनसनालिकेरदाडिमामलकान्येवंप्रकाराणि चान्यानि द्रव्याणि
सर्वं चाम्लं द्रवमद्रवं च पयसा सह विरुद्धं॥ कंगुवरकमकुष्टकुलत्थमाषनिष्पावाः पयसा सह विरुद्धाः॥ पद्मोत्तरिका
शाकं शार्करो मैरेयो मधु च सहोपयुक्तं विरुद्धं॥ वातं चातिकोपयति॥ हारिद्रकः सर्षपतैलभृष्टो विरुद्धः पित्तं
चातिकोपयति॥ पायसो मंथानुपानो विरुद्धः श्लेष्माणं चातिकोपयति॥ उपोदिका तिलकल्कसिद्धा हेतुरतीसारस्य॥ ब
ळाका वारुण्या कुल्माषैरपि च विरुद्धा॥ सैव सूकरवसाभृष्टा सद्यो व्यापादयति॥ मयूरमांसमेरंडशलाकावस
क्तमेरंडाग्निप्लुष्टमेरंडतैलपरिषिक्तं सद्यो व्यापादयति॥ हारिद्रमांसं हारिद्रसीसकावसक्तं हारिद्राग्निप्लुष्टं
सद्यो व्यापादयति॥ तद्वदेव भस्मपांशुपरिध्वस्तं सक्षौद्रं मरणाय॥ मत्स्यनिस्तलनसिद्धाः पिप्पल्यस्तथा काकमाची मधु च मर
णाय मधु चोष्णमुष्णार्तस्य च मरणाय मधुसर्पिषी समघृते समम् मधु चांतरिक्षं वारि समधृतं॥ मधु पुष्करबीजं मधु
पीतोष्णोदकं भल्लातकोष्णोदकं तक्रसिद्धः कंपिल्लकः पर्युषिता काकमाची॥ अंगारशूल्यो भासश्चेति॥ विरुद्धानी
त्येतद्यथाप्रश्नमभिनिर्दिष्टं भवतीति देशार्थं वा श्लोकाः॥ यत्किंचिद्दोषमुत्क्लेश्य भाव्यनं निर्हरति कायतः आ
हारजातं तत्सर्वमहितायोपपद्यते॥ यच्चापि देशकालाग्निमात्रासात्म्यानिलादिभिः॥ संस्कारतो वीर्यतश्च कोष्ठ
वयःक्रमैरपि॥ परिहारोपचाराभ्यां पाकात्संयोगतोपि च॥ विरुद्धं तच्च नाहितं हृत्संपद्विधिभिश्च यत्॥ विरुद्धं दे
शतस्तावत् रूक्षतीक्ष्णादि धन्वनि॥ अनूपे स्निग्धशीतादि भेषजं यन्निषेव्यते॥ कालतोपि विरुद्धं यत् शीतरूक्षा
दिसेवनं॥ शीतकाले तथोष्णे वा कटुकोष्णादि सेवनं॥ विरुद्धमनले यच्चान्नपानं चतुर्विधं॥ मधुसर्पिः समघृ ५५
तं मात्रया तु विरुध्यते॥ कटुकोष्णादि सात्म्यस्य स्वादुशीतादि सेवनं॥ यत्तत्सात्म्यविरुद्धं तु विरुद्धं त्वनिलादिभिः॥ या
समानगुणाभ्यासविरुद्धान्नौषधक्रिया॥ संस्कारतो विरुद्धं तद्यद्भोज्यं विषमं भवेत्॥ एरंडसीसकासक्तं शिखिमां

संयथा भवेत्॥ विरुद्धं वीर्यतो ज्ञेयं वीर्यतः शीतलात्मकं॥ यत्तं सहोष्णवीर्येण द्रव्येण सह सेव्यते॥ क्रूरकोष्ठस्य चात्यल्पं मंदवी
र्यमभेदनं॥ मृदुकोष्ठस्य गुरु च भेदनं च तथा बहु॥ एतत्कोष्ठविरुद्धं तु विरुद्धं स्यादवस्थया॥ श्रमव्यवायव्यायामसक्त
स्यानिलकोपनं॥ निद्रालसस्यालसस्य भोजनं श्लेष्मकोपनं॥ यच्चानुत्सृज्य विण्मूत्रं भुंक्ते यश्चाबुभुक्षितः॥ तच्च क्रमवि
रुद्धं स्याद्यच्चातिक्षुद्वशानुगः॥ परिहारविरुद्धं च विद्याद्वराहादीन्निषेव्य यत्॥ पयोनिषेवते यच्च तत्समानादीन्निषेवय्या॥
रसायनविधौ चापि कुरुते नानुपालनं॥ उपचारविरुद्धं तत् मध्वादीन्युपयुज्य यः॥ सेवितोष्णं घृतादींश्च पीत्वा शी
तं निषेवते॥ विरुद्धं पाकतश्चापि दुष्टदर्वादिसाधितं॥ अपक्वं तंदुलात्यर्थपक्वं दग्धं च यद्भवेत्॥ संयोगतो विरुद्धं तु यथा
म्लं पयसा सह॥ अमनोरुचितं यच्च हृद्विरुद्धं तदुच्यते॥ संपद्विरुद्धं तद्विद्यादसंजातरसं तु यत्॥ अतिक्रांतरसं चापि वि
पन्नरसमेव वा॥ ज्ञेयं विधिविरुद्धं तु भुज्यते निभृते न यत्॥ तदेवंविधमन्नं स्याद्विरुद्धमुपयोजनं॥ सात्म्यतोल्प
तया चापि दीप्ताग्नेस्तरुणस्य च॥ स्निग्धव्यायामबलिनां विरुद्धं वितथं भवेत्॥ षाढ्यांध्यवीसर्पदकोदराणां वि
स्फोटकोन्मादभगंदराणां॥ मूर्छामदाध्मानगलग्रहाणां पांड्वामयस्यामविषस्य चैव॥ किलासकुष्ठग्रहणीग
दानां शोथाम्लपित्तज्वरपीनसानां॥ संतानदोषस्य तथैव मृत्योर्विरुद्धमन्नं प्रवदंति हेतुं॥ इति॥ एषां खल्वप
रेषां च वैरोधिकनिमित्तानां व्याधीनामिमे भावाः प्रतीघातका भवंति॥ तद्यथा॥ वमनं विरेचनं तद्विरोधिनां द्रव्या
णां संशमनार्थमुपयोगस्तथाविधैश्च द्रव्यैः पूर्वमभिसंस्कारः शरीरस्येति॥ भवंति चात्र॥ विरुद्धाशनजान् रोगा
न्प्रतिहंति विरेचनं॥ वमनं शमनं चैव पूर्वं वा हितसेवनं॥ मतिरासीन्महर्षीणां या या रसविनिश्चये॥ द्रव्याणि गु
णकर्मभ्यां द्रव्यसंख्या रसाश्रया॥ कारणं रससंख्याया रसानुरसलक्षणं॥ परादीनां गुणानां च लक्षणानि पृथ
क्पृथक्॥ पंचात्मकानां षट्त्वं च रसानां येन हेतुना॥ ऊर्ध्वानुलोमभाजश्च यद्गुणानि पयारसाः॥ षण्णां रसानां षट्
त्वेन रसाविभक्ता विभक्तयः॥ उद्देशश्चापवादश्च द्रव्याणां गुणकर्मणी॥ प्रवरावरमध्यत्वं रसानां गौरवादिषु॥ पाक
प्रभावयोर्लिंगं वीर्यसंख्याकृतनिश्चयः॥ षण्णामास्वाद्यमानानां रसानां यत्स्वलक्षणं॥ यद्यद्विरुध्यते यस्माद्य
न यत्कारि चैव यत्॥ वैरोधिकनिमित्तानां व्याधीनामौषधं च यत्॥ आत्रेयभद्रकाप्यीये तत्सर्वमवदन्मुनिः॥

॥ इति भद्रकाप्यीयो नाम षड्विंशोऽध्यायः॥ २६॥ ॥ श्री॥ अथातोऽन्नपानविधिमध्यायं व्याख्यास्यामः॥ इति ह स्माह
भगवानात्रेयः॥ इष्टवर्णगंधरसस्पर्शं विधिविहितमन्नपानं प्राणिनां प्राणसंज्ञकानां प्राणमाचक्षते कुशलाः
प्रत्यक्षफलदर्शनात्तदिंधना ह्यंतराग्नेः॥ स्थिति सत्वमूर्जयति तच्छरीरधातुव्यूहबलवर्णेंद्रियप्रसादकरं यथोक्त
५६ मुपसेव्यमानं॥ विपरीतमहिताय संपद्यते तस्माद्धिताहितावबोधनार्थमन्नपानविधिमखिलेनोपदेक्ष्यामोऽग्नि
वेशतः स्वभावादुदकं क्लेदयति॥ लवणं विष्यंदयति॥ क्षारः पाचयति॥ मधु संदधाति॥ सर्पिः स्नेहयति॥ क्षी
रं जीवयति॥ मांसं बृंहयति॥ रसः प्रीणयति॥ सुरा जर्जरीकरोति॥ माध्वरवधमति॥ द्राक्षासवो दीपयति॥ फाणि
तमाचिनोति॥ दधि शोफं जनयति॥ पिण्याकशाकं ग्लपयति॥ प्रभूतान्तर्मलो माषसूपः॥ दृष्टिशुक्रघ्नः क्षारः प्रति
भवंति चात्र॥ उदकेन कृतं शीघ्रमन्नं समभिसर्पति॥ तेनाशु जीर्यते तस्मादुदकं क्लेदनं स्मृतं॥ स्नेहदौष्ण्याच्च वायित
द्रव्यादित्वाद्विष्यंदित्वाच्च मार्दवं॥ जनयेल्लवणं तस्माद्विष्यंदयति सेवितं॥ समानयोन्यादाग्नेयोऽभिवर्धयति सेवितः
कायाग्निधीमतां तस्मात्क्षारः प्रोक्तोऽनुपाचनः॥ रूक्षं कषायं मधुरं विशदं चाविदाहि च॥ यस्माच्च श्लेष्मलं तस्मा
त्संदधाति क्षतं मधु॥ मधुरं गुरु विष्यंदि स्निग्धं नात्यविदाहि च॥ पित्तानिलहरं तस्मात्स्नेहयति घृतं॥ मधुरं बृं
हणं बल्यं स्निग्धं पौरुषवर्धनं॥ रक्तपित्तानिलघ्नं च तस्माज्जीवयते पयः॥ सस्नेहं मधुरं स्वादु निर्मांसबलवर्धनं
तस्मात् बृंहयते मांसं सेव्यमानं सभीक्ष्णशः॥ व्यवायिभावात्सौक्ष्म्याच्च द्रव्यत्वाच्चोपसेवितः॥ सर्वेंद्रियाणि मर्त्या
नां तस्मात्प्रीणयते रसः॥ पवनं धात्वसञ्जां समसौक्ष्म्यात्तैक्ष्ण्याच्च रोहनः॥ व्यवायित्वाच्च तस्मात्सुरा जर्जरी कुरुते
स्त्रा॥ इष्णा तैक्ष्ण्याच्च रौक्ष्याच्च मेदोमांसमलं तथा॥ जंतोरवधमत्याशु तस्मात्सीधुर्निषेवितः॥ ईषत्कषायान्मा
धुर्यात्तैक्ष्ण्यानि स्वाद्रतीव हि॥ द्राक्षासवो दीपयति तस्मान्माधुर्यसेवितः॥ माधुर्याद्गुरुभावाच्च बल्यात्पित्तकफस्य
तु॥ मलस्तस्मान्नरस्यांगमाचिनोति स्वफाणितं॥ स्वभावात्पित्तानिलदुर्बलस्य शरीरिणः॥ कुर्वीत शोफं दुष्टा ४६
नि तस्माच्छोफकरं दधि॥ रौक्ष्यात् दृष्टभ्यते कोष्ठे विष्टंभित्वाद्विदह्यते॥ विदाहात् कुरुते ग्लानिं पिण्याको नितिषेवि
तः॥ माधुर्यात् श्लेष्मलो रूक्षो गुरुत्वात् मलवर्धनः॥ प्रभूतान्तर्मलो माषसूपस्तस्मात्स्मृतो बुधैः॥ रूक्षोष्णतीक्ष्णा

मम्ल
क्लेदित्वात्प्रमादं दृष्टिचक्षुषः॥ बहुलं च कुरुते तस्मात्क्षारोऽत्यर्थं निषेवितः॥ प्रायः पित्तलमन्यत्र दाडिमामलकात्॥ प्रायः श्ले
ष्मलं मधुरमन्यत्र मधुनः॥ पुराणाच्च शालिषष्टिकयवगोधूमात्॥ प्रायः कटुकं वातलमवृष्यं चान्यत्र पिप्पलीविश्वभेष
जात्॥ सर्वं तिक्तं वातलमन्यत्र पटोलगुडूच्यमृतमालपौरुषमन्यत्र यवगोधूमात्॥ अतो वर्गसंग्रहेणाहारद्रव्याण्यनु
व्याख्यास्यामः॥ शूकधान्यशमीधान्यमांसशाकफलाश्रयान्॥ वर्गान्हरितमद्यांबुगोरसेक्षुविकारिकान्॥ दशद्वौ
चापरौ वर्गौ कृतान्नाहारयोगिनां॥ रसवीर्यविपाकैश्च प्रभावाच्चोपदेक्ष्यते॥ रक्तशालिर्महाशालिः कलमः शकुना
हृतः॥ तूर्णकः दीर्घशूकश्च गौरः पांडुकलांगुलौ॥ सुगंधिको लोहवालः सारिवाख्यः प्रमोदकः॥ पतंगस्तप
नीयाश्च ये चान्ये शालयः शुभाः॥ शीता रसे विपाके च मधुराः स्वल्पमारुताः॥ बद्धाल्पवर्चसः स्निग्धा बृंहणाः शुक्र
मूत्रलाः॥ रक्तशालिर्वरस्तेषां तृष्णघ्नस्त्रिमलापहः॥ महांस्तस्यानु कलमस्तस्याप्यनु ततः परे॥ यवका हायनाः पां
शुवाप्यनैषधकादयः॥ शालीनां शालयः कुर्वंत्यनुकारं गुणागुणैः॥ शीतः स्निग्धो गुरुः स्वादुस्त्रिदोषघ्नः स्थिरात्म
कः॥ षष्टिकः प्रवरो गौरः कृष्णगौरस्ततोऽनु च॥ वरको द्दालको चीनः शारदोज्ज्वालदर्दुराः॥ गंधनाः कुरुविंदाश्च ष
ष्टिकल्पांतरे गुणैः॥ मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः॥ बहुमूत्रपुरीषोष्मा त्रिदोषस्त्वेव पाटलः॥ स
कोरदूषः श्यामाकः कषायमधुरो लघुः॥ वातलः कफपित्तघ्नः शीतः संग्राहि शोषणः॥ हस्तिश्यामाकनीवा
रतोयपर्णीगवेधुकाः॥ प्रशांतिकाम्भःश्यामाकलोहिताणुप्रियंगवः॥ मुकुंदो झिंटी गर्मूटी वरुका वरक
स्तथा॥ शिम्बीरकं जूर्णाह्वाः श्यामाकसदृशा गुणैः॥ रूक्षः शीतो गुरुः स्वादुर्बहुवातशकृद्यवः॥ स्थैर्यकृत्स
कषायश्च बल्यः श्लेष्मविकारजित्॥ रूक्षः कषायानुरसो मधुरः कफपित्तहा॥ मेदःश्रमकफघ्नश्च बल्यो
वेणुयवो मतः॥ संधानकृद्वातहरो गोधूमः स्वादुशीतलः॥ जीवनो बृंहणो वृष्यः स्निग्धः स्थैर्यकरो गुरुः॥ नंदी
मुखी मधूली च मधुरः स्निग्धशीतलः॥ इत्ययं शूकधान्यानां पूर्वो वर्गः समाप्यते॥ ॥ कषायमधुरो रू
क्षः शीतपाकः कटुर्लघुः॥ श्लेष्मपित्तप्रशमनो मुद्गः सूप्योत्तमो मतः॥ वृष्यः परं वातहरः स्निग्धोष्णो मधु
रो गुरुः॥ बल्यो बहुमलः पुंस्त्वं माषः शीघ्रं ददाति च॥ रूक्षश्चैव कषायश्च वातलः श्लेष्मपित्तहा॥ वि

चर॰ सू॰ विष्टंभी वाज्य रूक्षश्च राजमाषः प्रकीर्तितः उष्णाः कषायाः पाकेऽम्लाः कफशुक्रानिलापहाः॥ कुलत्था ग्राहिणः कासहिक्का
श्वासार्शसां हिताः॥ मधुरा मधुराः पाके ग्राहिणो रूक्षशीतलाः मकुष्टकाः प्रशस्यंते रक्तपित्तज्वरादिषु॥ चणकाश्च मसूराश्च
खंडिकाः सहरेणवः॥ लघवः शीतमधुराः सकषाया विरूक्षणाः पित्तश्लेष्मणि शस्यंते लेपेष्वालेपनेषु च तेषाम
५१ मसूरः संग्राही कलायो वातलः परं स्निग्धोष्णमधुरस्तिक्तः कषायकटुकस्तिलः त्वच्यः केश्यश्च बल्यश्च वातघ्नः कफपि
त्तकृत्॥ मधुराः शीतला गुर्व्यो बलघ्न्यो रूक्षणात्मिकाः॥ सस्निग्धा बलिभिर्भोज्या विविधाः शिंबिजातयः॥ आढकी
कफपित्तघ्नी स्वल्पमारुतवर्चसा॥ अवल्गुजः सैडगजो निष्पावा वातपित्तलाः काकांडोलात्मगुप्तानां माषवत्फल
मादिशेत्॥ ॥इति तृतीयः शमीधान्यवर्गः प्रोक्तो महर्षिणा॥ गोखराश्वतरोष्ट्राश्च द्वीपिसिंहर्क्षवानराः वृको व्या
घ्रतरक्षुश्च बभ्रुमार्जारमूषकाः लोपाकजंबुकश्येनवातादश्चाषवायसौ शशघ्नगृध्रकुलिंगाश्च सोमग्री - - - - - -
२ वामश्चित्रपृष्ठः कालकः काकुलीमृगः कूर्चिका चिल्लटो भेको गोधा शल्लकगंडकौ कदलीनकुलः श्वाविदिति भू
मिशयाः स्मृताः श्रमरः श्चमरः खङ्गो महिषो गवयो गजः न्यंकुर्वराहश्चानूपा मृगाः सर्वे रुरुस्तथा कूर्मः कर्क
टको मत्स्यः शिशुमारस्तिमिंगिलः शुक्तिशंखोद्रकुंभीरचुलुकीमकरादयः इति वारिशयाः प्रोक्ता वक्ष्यंते वारिचा
रिणः॥ हंसः क्रौंचो बलाकाच बकः कारंडवः प्लवः शरारिः पुष्कराह्वश्च केसरी मणितुंडकः॥ मृणालकंठो मद्गुश्च
कादंबः काकतुंडकः॥ उत्क्रोशः पुंडरीकाक्षो मेघरावोंबुकुक्कुटी॥ आरानंदीमुखी वाटी समुखाः सहचारिणः रोहि
णी कामकाली च सारसो रक्तशीर्षकः॥ चक्रवाकस्तथा चान्ये खगाः संत्यंबुचारिणः॥ पृषतः शरभो रामः श्वदंष्ट्रा
मृगमातृका॥ शशोरणौ कुरंगश्च गोकर्णः कोट्टकारकः चारुष्को हरिणैणौ च संवरः कालपुच्छकः॥ ऋष्यश्च वरपोतश्च वि
ज्ञेया जांगला मृगाः॥ लावो वर्तीरकश्चैव वार्तीकः सचपिंजलः॥ चकोरश्चोपचक्रश्च कर्वभार कवर्त्मकः लावाद्या
विष्किराश्चैते वक्ष्यंते वर्तकादयः॥ वर्तका वर्तिका बर्ही तित्तिरिः कुक्कुटस्तथा॥ कंकशारपदेंद्राभगोनर्दगिरिवर्तकाः ५१
क्रकरावकरश्चैव वारडश्चेति विष्किराः॥ शतपत्रो भृंगराजः कोयष्टिर्जीवजीवकः॥ कैरातः कोकिलोत्यूहो गोपा
पुत्रः प्रियात्मजः॥ लट्टालट्टषको बभ्रुर्वटहा डिंडिमाणकः॥ कुटदुंदुभिपाकारलोहपृष्ठकुलिंगकाः॥ कपोतशुक

सारंगाश्च चिरिटीककुयष्टिकाः सारिकावल्गुलिकश्च चटकांगारचूडकः॥ पारावतः पांडविकः इत्युक्ताः प्रतुदा द्विजाः॥ प्रसह्य भ
क्षयंतीति प्रसहास्तेन संज्ञिताः भूशया बिलवासित्वादानूपानूपसंश्रयात् जलेनिवासाज्जलजा जलेचर्याज्जलेचराः
स्थलजा जांगलाः प्रोक्ता मृगा जांगलचारिणः विकीर्य विष्किराश्चैव प्रतुद्य प्रतुदास्तथा योनिरष्टविधा त्वेषा मांसा
नां परिकीर्तिताः प्रसहा भूशयानूपवारिजा वारिचारिणः गुरूष्णास्निग्धमधुरा बलोपचयवर्धनाः वृष्याः परं वात
हराः कफपित्ताभिवर्धनाः हिता व्यायामनित्येभ्यो नरा दीप्ताग्नयश्च ये प्रसहानां विशेषेण मांसं मांसाशिनां भिषक्
जीर्णार्शोग्रहणीशोषपीडितानां प्रयोजयेत् लावाद्यो विष्किरो वर्गः प्रतुदाजांगला मृगाः लघवः शीतमधुराः सकषा
या हिता नृणां पित्तोत्तरे वातमध्ये सन्निपाते कफानुगे विष्किरा वर्तिकाद्यास्तु प्रसहाल्पांतरा गुणैः तेषां तु कुक्कुटो भेदाति
तीर्ग्राही दीपनः नातिशीतगुरुस्निग्धं मांसमाजमदोषलं शरीरधातुसामान्यादनभिष्यंदि बृंहणं मांसं मधुरशीतत्वाद्गुरु
बृंहणमाविकं योनावजाव्यामिश्रगोचरत्वादनिश्चिते सामान्येनोपदिष्टानां मांसानां स्वगुणैः पृथक् केषांचिद्गुणवैशेष्या
द्विशेष उपदिश्यते दर्शनश्रोत्रमेधाग्निवयोवर्णस्वरायुषां बर्ही हिततमो बल्यो वातघ्नो मांसशुक्रलः गुरूष्णस्निग्धमधुराः
स्वरवर्णबलप्रदाः बृंहणाः शुक्रलाश्चोक्ता हंसा वातविनाशनाः स्निग्धाश्चोष्णाश्च वृष्याश्च बृंहणाः स्वरबोधनाः बल्या
५२ वातहराः स्वेदनाश्च रणायुधाः गुरूष्णमधुरो नातिधन्वान्वपानिषेवणात् तित्तिरिः संजयेच्छीघ्रं त्रीन्दोषाननिलोल्बणान्
पित्तश्लेष्मविकारेषु सरक्तेषु कपिंजलः मंदवातेषु शस्यंते शैत्यमाधुर्यलाघवात् लावाः कषायमधुरा लघवो
ग्निविवर्धनाः सन्निपातप्रशमनाः शमना मारुतस्य च गोधा विपाके मधुरा कषायकटुका रसे वातपित्तप्रशमनी बृंह
णी बलवर्धनी शल्लको मधुराम्लश्च विपाके कटुकः स्मृतः वातपित्तकफघ्नश्च श्वासकासहरस्तथा शीताः कषायमधु
राः कफपित्तनिवर्हिणः विपाके मधुराश्चैव कपोताः गृहवासिनः तेभ्यो लघुतराः किंचित्कपोता वनवासिनः शीताः सं
ग्राहिणश्चैव स्वल्पमूत्रकराश्च ते शुकमांसं कषायाम्लं विपाके रूक्षशीतलं शोषकासक्षयहितं संग्राहि लघुदीप
नं कषायविशदो रूक्षः शीतः पाके कटुर्लघुः शशः स्वादुः प्रशस्तश्च सन्निपातेनिलावरे चटकाः मधुराः स्निग्धाः क
फशुक्राभिवर्धनाः सन्निपातहराश्चैव शमना मारुतस्य च मधुरा मधुराः पाके त्रिदोषशमनाः शिवाः लघवो बद्ध

चरसू. विण्मूत्राः शीताश्च वृष्याः समकीर्तिताः गुरूष्णमधुरा बल्या बृंहणाः पवनापहाः मत्स्याः स्निग्धाश्च वृष्याश्च बहुदोषाः प्रकी-
र्तिताः शैवालशष्पभोजित्वात्स्वप्नस्य च विवर्जनात् रोहितो दीपनीयश्च लघुपाको महाबलः स्नेहनं बृंहणं वृष्यं श्रमघ्न-
मनिलापहं वराहपिशितं बल्यं रोचनं स्वेदनं गुरुः बल्यो वातहरो वृष्यश्चक्षुष्यो बलवर्धनः मेधास्मृतिकरः पथ्य-
४८ शोषघ्नः कूर्म उच्यते गव्यं केवलवातेषु पीनसे विषमज्वरे शुष्ककासश्रमात्यग्निमांसक्षयहितं च तत् स्निग्धोष्णम-
धुरं वृष्यं माहिषं गुरु तर्पणं दार्ढ्यं बृहत्त्वमुत्साहं स्वप्नं च जनयत्यपि धार्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि चटका-
नां च यानि स्युरण्डानि च हितानि च क्षीणरेतःसु कासेषु हृद्रोगेषु क्षतेषु च मधुराण्यविपाकानि सद्योबलकराणि
च शरीरबृंहणं नान्यद्द्रव्यं मांसाद्विशिष्यते। ॥ इति वर्गस्तृतीयोऽयं मांसानां परिकीर्तितः॥ पाठाश्वषासुनीशाकं वा-
स्तुकं सुनिषण्णकं विद्याद्ग्राहि त्रिदोषघ्नं वर्चोभेदी तु वास्तुकं त्रिदोषशमनी वृष्या काकमाची रसायनी नात्युष्णशीत-
वीर्या च भेदनी कुष्ठनाशिनी राजक्षवकशाकं तु त्रिदोषशमनं लघु ग्राहि शस्तं विशेषेण ग्रहण्यर्शोविकारिणां कालशा-
कं तु कटुकं दीपनं वातगरापहं लघूष्णं वातलं रूक्षं कालायं शाकमुच्यते दीपनीयोष्णवीर्या च ग्राहिणी कफमारुते
प्रशस्यते तम्लचाङ्गेरी ग्रहण्यर्शोहिता च सा मधुरा मधुरा पाके भेदनी श्लेष्मवर्धनी वृष्या स्निग्धा च शीता च मद-
घ्नी चाप्युपोदिका रूक्षो विषमदघ्नश्च प्रशस्तो रक्तपित्तिनां मधुरो मधुरः पाके शीतलस्तण्डुलीयकः मण्डूकपर्णी वे-
त्राग्रं कुचैला वनतिक्तकं कर्कोटकावल्गुजको पटोलं शकुलादनी वृषपुष्पाणि शार्ङ्गेष्टा केम्बुकं सकठिल्लकं नाडी-
कलायं गोजिह्वा वार्ताकं तिलपर्णिका कुलकं कर्कशं निम्बं शाकं पर्पटकं च यत् कफपित्तहरं तिक्तं शीतं कटु विप-
च्यते सर्वाणि सूप्यशाकानि फञ्जी चिल्ली कुतुम्बकः आलुकानि च सर्वाणि सपत्राणि कुटिञ्जरः शणशाल्मलिपु-
ष्पाणि कर्बुदारः सुवर्चलः निष्पावः कोविदारश्च पत्तूरश्चुच्चुपर्णिका कुमारजीवो लोट्टाकः पालङ्क्या मारिषस्तथा ४८
कलम्बो नालिकासूरी कुसुम्भवृकधूमकौ लक्ष्मणा च पुनर्नवा च नलिनी कुठेरकं लोणिका यवशाकं च कूष्मा-
ण्डकमवल्गुजं यातुकः शालकल्याणी त्रिपर्णी पीलुपर्णिका शाकं गुरु च रूक्षं च प्रायो विष्टभ्य जीर्यति मधुरं शी-
तवीर्यं च पुरीषस्य च भेदनं स्विन्नं निष्पीडितरसं स्नेहाढ्यं तत्प्रशस्यते शणस्य कोविदारस्य कर्बुदारस्य शा-

ल्मलेः पुष्पं ग्राहि प्रशस्तं च रक्तपित्ते विशेषतः न्यग्रोधोदुम्बराश्वत्थप्लक्षपद्मादिपल्लवाः कषायाः स्तम्भनाः
शीता हिताः पित्तातिसारिणे वायुं वत्सादनी हन्यात्कफं गण्डीरचित्रकौ श्रेयसी बिल्वपर्णी च बिल्वपत्रं च वातनुत्
भण्डीशतावरीशाकं बलाजीवन्तिजं च यत् पर्वण्याः पर्वपुष्प्याश्च वातपित्तहरं स्मृतं लघु भिन्नशकृत्तिक्तं ला-
ङ्गलक्युरुबूकयोः तिलवेतसशाकं च शाकं पञ्चाङ्गुलस्य च वातलं कटुतिक्ताम्लमधोमार्गप्रवर्तकं रूक्षाम्लमुष्णं कौ-
सुम्भं कफघ्नं पित्तवर्धनं त्रपुसैर्वारुकं स्वादु गुरु विष्टम्भि शीतलं मुखप्रियं च रूक्षं च मूत्रलं त्रपुसं त्वति एर्वारुकं तु संपक्वं दाह-
तृष्णाक्लमार्तिनुत् भिन्नवर्चोऽम्यलाबूनि रूक्षशीतगुरूणि च चिर्भटैर्वारुकं तद्वद्वर्चोभेदि हितं तु ते कूष्माण्डं तु सक्षारं
मधुराम्लं तथा लघु सृष्टमूत्रपुरीषं च सर्वदोषनिबर्हणं केलूटं च कदम्बं च नदीमाषकमैन्दुकं विशदं गुरु शीतं च समभि-
ष्यन्दि चोच्यते एतानि सकषायाणि रक्तपित्तहराणि च पौष्करं तु भवेद्बीजं रक्तपित्तकफापहं तथा तालप्रलम्बं च उरःक्षतरुजाप-
हं खर्जूरं तालसस्यं च रक्तपित्तक्षयापहं उग्रयौगिकषायाणि रक्तपित्तहराणि च तरूटबिसशालूकक्रौञ्चादनकसेरुकं
शृङ्गाटकाङ्कलोड्यं च गुरु विष्टम्भि शीतलं कुमुदोत्पलनालास्तु सपुष्पाः सफलाः स्मृताः शीताः स्वादुकषायास्तु कफमारुत-
कोपनाः कषायमीषद्विष्टम्भि रक्तपित्तहरं परं पौष्करं तु भवेद्बीजं मधुरं रसपाकयोः बल्यः शीतो गुरुः स्निग्धस्तर्पणो बृंह-
णात्मकः वातपित्तहरः स्वादुर्वृष्यो मुञ्जातकः परं जीवनो बृंहणो वृष्यः कण्ठ्यः शस्तो रसायने विदारिकन्दो बल्यश्च मूत्रलः स्वा-
दुशीतलः अम्लिकायाः स्मृतः कन्दो ग्रहण्यर्शोहितो लघुः नात्युष्णः कफवातघ्नो ग्राही शस्तो मदात्यये त्रिदोषं बद्धविण्-
मूत्रं सार्षपं शाकमुच्यते तद्वत्स्याद्रक्तनालस्य रूक्षमम्लं विशेषतः तद्वत्पिण्डालुकं विद्यात्कन्दत्वाच्च मुखप्रियं सर्पच्छत्रक-
वर्ज्याश्च स्युर्बह्व्योऽन्याश्छत्रजातयः शीताः पीनसकर्त्र्यश्च मधुरा गुर्व्य एव च चतुर्थः शाकवर्गोऽयं पत्रकन्दफलाश्रयः तृष्णा-
दाहज्वरश्वासरक्तपित्तक्षतक्षयान् वातपित्तमुदावर्तं स्वरभेदं मदात्ययं तिक्तास्यतामास्यशोषं कासं चाशु व्यपोह-
ति मृद्वीका बृंहणी वृष्या मधुरा स्निग्धशीतला मधुरं बृंहणं वृष्यं खर्जूरं गुरु शीतलं परूषकं मधूकं स्याद्वातपित्तप्र-
शाम्यति मधुरं बृंहणं बल्यमाम्रातं तर्पणं गुरु सस्नेहं श्लेष्मलं शीतं विष्टम्भि जीर्यते॥ तालसस्यानि सिद्धानि ना- वृष्यं
रिकेलफलानि च बृंहणस्निग्धशीतानि बल्यानि मधुराणि च मधुराम्लकषायं च विष्टम्भि गुरु शीतलं पित्तश्ले-

नगृ.म.

५० ष्मवरं हृद्यं ग्राहि च क्रमिशोधनं अरुष्करफलं द्राक्षा वदराण्याद्रकाणि च पित्तश्लेष्मप्रकोपानि कर्कन्धूलकुचानि च नात्युष्णं
गुरुसंपक्वं स्वादुप्रायं मुखप्रियं सबृंहणं शीतलं रंजातिदोषघ्नं मारुतं द्विविधं शीतमुष्णं च मधुरं चाम्लमेव च गुरु पालेवतं
दोषं भरुच्यत्यग्निनाशनं भव्यादल्पान्तरगुणं काश्मर्यफलमुच्यते तथैवाल्पान्तरगुणं तु द्रुमत्परूषकं कषायं मधुरं रूक्षं
वातलं गुरु शीतलं तापस्य मामवं उष्णं विषघ्नं ग्राहि वातलं मधुराम्लकषायान्वासो गंध्या च हृद्यं च प्रदं पारिपक्वान्ते दोष
घ्नं विषघ्नं ग्राहि गुर्वपि दुर्जरं सिद्धं बिल्वं तु दोषलं पूतिमारुतं स्निग्धो घ्नती क्ष्णंत ह्रुलं दीपनं कफवातजित् रक्तपित्तकरं बा
लमापूर्णं पित्तवर्धनं पक्वमाम्रं जयद्वायुं मांसशुक्रबलप्रदं कषायमधुरप्रायं गुरु विष्टंभि शीतलं जांबवं कफपित्तघ्नं ग्रा
हि वातकरं परं बदरं मधुरं स्निग्धं भेदनं वातपित्तजित् तच्छुष्कं कफवातघ्नं पित्ते च न विरुध्यते कषायमधुरं शीतं ग्राहि स्तं
ति चिकाफलं गांगेरुकं करीरं च विभीतो दन्तबंधनं मधुरं सकषायं च शीतं पित्तकफापहं संपक्वं पनसं मोचं राजादनफला
नि च स्वादूनि सकषायाणि शीतानि स्निग्धगुरूणि च कषाय्यविशदत्वाच्च सौगंध्याच्च रुचिप्रदं अवदंशक्षमं हृद्यं वातलं
लवलीफलं नीपसतात्परपीलुतृणशूल्यानि विकंकतं प्राचीनामलकं चैव दोषघ्नं गुरु नानि च ऐंगुदं तिक्तमधुरं स्निग्धोष्णं क
फवातजित् तिंदुकं कफपित्तघ्नं कषायं मधुरं लघु विद्यादामलके सर्वान् रसाल्लवणवर्जितान् स्वेदमेदः कफोत्क्लेदपित्तरोगवि
नाशनं रूक्षं स्वादु कषायाम्लं कफपित्तहरं परं मेदोसृङ्मांसलक्ष्मोपान्यचक्षुर्विभीतकः अम्लकषायमधुरं वातघ्नं ग्रा
हि दीपनं स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधि च रूक्षाम्लं ग्राहि रूक्षोष्णं वातश्लेष्मणि शस्यते अम्लवृक्षाम्ल
मप्युक्तं तस्माच्चाल्पान्तरगुणैः शूलैरुचौ विबंधे च मंदाग्नौ मद्यविक्षये हिक्काश्वासे च कासे च वम्यां वर्चोगदेषु च वात
श्लेष्मसमुत्थेषु सर्वेष्वेवोपदिश्यते केसरो मातुलिंगस्य लघुः शेषमतोऽन्यथा रोचनो दीपनो हृद्यः सुगंधिस्त्वग्निवर्जितः क
र्कोरः कफवातघ्नः श्वासहिक्कार्शसां हितः सुगंधि मधुरं साम्लं विष्टंभकरोचनं दुर्जरं वातशमनं नारंगस्य फलं गुरु बा
तामभिषुकाक्षोटमकूलकानिकोच्यिकाः गुरूष्णस्निग्धमधुराः सोष्णास्वादबलप्रदाः वातघ्ना बृंहणा वृष्याः कफपित्ता ५१
भिवर्धनाः प्रियालमेषां सदृशं विद्यादौष्ण्यं विना गुणैः श्लेष्मलं मधुरं शीतं श्लेष्मातकफलं गुरु श्लेष्मलं गुरु विष्टंभि
चाक्षोडफलमग्निजित् गुरूष्णमधुरं रूक्षं केशघ्नं च शमीफलं विष्टंभयति कारंजं पित्तश्लेष्माविरोधि च आम्रा

तकं दंतशठं मम्लं सकरमर्दकं रक्तपित्तकरं विद्याद् ऐरावतकमेव च वातघ्नं दीपनं चैव वार्ताकं कटुतिक्तकं वातलं कफपि
त्तघ्नं विद्यात्पर्पटकाफलं पित्तश्लेष्मघ्नमम्लं च वातलं चाक्षवीफलं मधुराण्यनुपाकीनि वातपित्तहराणि च अश्व
त्थोदुंबरप्लक्षन्यग्रोधानां फलानि च कषायमधुराम्लानि वातलानि गुरूणि च भल्लातकास्थ्यग्निसमं त्वङ्मां
सं स्वादु शीतलं॥ ॥ पंचमः फलवर्गोऽथ मुलः प्रायोपयोगिकः॥ रोचनं दीपनं वृष्यं आर्द्रकं विश्वभेषजं वातश्ले
ष्मविबंधेषु रसस्तस्योपदिश्यते रोचनो दीपनो रूक्ष्णः सुगंधिर्मुखबोधनं जंबीरः कफवातघ्नः क्रमिघ्नो भुक्तपाचनः बा
लं दोषहरं वृद्धं त्रिदोषं मारुतापहं स्निग्धसिद्धं विशुद्धं तु मूलकं कफवातजित् हिक्का क्रमि विषश्वासपार्श्वशूलविनाशनः
पित्तलः कफवातघ्नः सुरसः पूतिगंधनुत् यवानी चार्जकाश्चैव शिग्रुशालेयतुम्बकं हृद्यान्यास्वादनीयानि पित्तमुत्क्लेशयंति
तु गंडीरो जलपिप्पल्यस्तुंबरुः शृंगवेरिकाः तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च पुंस्त्वघ्नः कटुरूक्षोष्णो भूस्तृणो
वक्त्रशोधनः खराह्वा कफवातघ्नी बस्तिरोगरुजापहा धान्यका चाजगंधा च सुमुखा चेति रोचना सुगंधा नातिकटुका दो
षानुत्क्लेशयंति च ग्राहीगंजनकस्तीक्ष्णो वातश्लेष्मार्शसां हितः स्वेदनेऽभ्यवहार्ये च योजयेत्तमपित्तिनां श्लेष्मलो मारुतघ्न
श्च पलांडुर्न च पित्तनुत् आहारयोगी बल्यश्च गुरुर्वृष्योऽथ रोचनः क्रमिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः स्निग्धश्चोष्णश्च
वृष्यश्च लशुनः कटुको गुरुः शुष्काणि कफवातघ्नान्येतेषां फलानि च हरितानामयं चैषां षष्ठो वर्गः समाप्यते॥ ६ ॥
प्रकृत्या मद्यमम्लोष्णमम्लं चानुविपाकतः सर्वसामान्यतस्तस्य विशेषः उपदेक्ष्यते कृशानां सक्तमूत्राणां ग्रहण्यर्शोविकारि
णां सुरा प्रशस्ता वातघ्नी स्तन्यरक्तक्षयेषु च हिक्काश्वासप्रतिश्यायवातवर्चोग्रहारुचौ छर्द्यानाहविबंधेषु वातघ्नी मादि
रा हिता शूलप्रवाहिकाटोपकफवातार्शसां हिता जगलो ग्राहि रूक्षोष्णः शोथघ्नो भुक्तपाचनः शोषार्शोग्रहणीदोष
पांडुरोगारुचिज्वरान् हन्त्यरिष्टः कफकृतान् रोगान् रोचनदीपनः मुखप्रियः सुखमदः सुगंधिर्बस्तिरोगनुत् जरणी
यः परिणतो हृद्यो वर्ण्यश्च शार्करः रोचनो दीपनो हृद्यः शोफशोषार्शसां हितः शोफोदरार्शसां श्रेष्ठो गौडस्तर्पणदीपनः
पांडुरोगव्रणहिता दीपनी चाक्षिकामता सुरासवस्तीव्रमदो वातघ्नो वदनप्रियः छेदी मध्वासवस्तीक्ष्णो मैरेयो मधुरो गु
रुः धातक्याभिषुतो जीर्णो रूक्षो रोचनदीपनः मार्द्वीकवच्चात्युष्णो माद्वीकं रुधसासवः रोचनं दीपनं हृद्यं वर्ण्यं पित्ता

चरक.स. विन्मापिच विबंधघ्नंकफघ्नंचमफलघात्यमारुतं करासमंडारूक्षोष्मायवानांवातपित्तला गुर्वीलोर्यातिविष्टभ्यश्लेष्मलस्तुम
धूलकः दीपनंजरणीयंचहृद्यांदुष्प्रमिदोषनुत ग्दहृस्पर्शादिहितंभेदीशीतोवीर्यतुषोदकं देहलवापदंस्पर्शाध्मानादूतरूक्षापहं
५० विबंधघ्नमवस्त्रंसिदीपनंचाम्लकांजिकं प्रायशोविनवंमधंगुरुदोषसमीरणं स्रोतसांशोधनंजीर्णदीपनंलघुरोचनं दूषणं
प्राणनंवर्ण्यमर्पंशोकश्रमापहं प्रागल्भ्यवीर्यप्रतिभातुष्टिपुष्टिबलप्रदं सात्विकैर्विधिवतयुक्तान्शीतस्यादमृतंयथा॥ ॥
वर्गोयंसप्तमोमदनाधिकृत्यप्रकीर्तितः॥ जलमेकविधंसर्वंपतत्यैंद्रंनभस्तलात् तम्पतत्पतितंचैवदेशकालावपेक्षते वात्यतमो
मवार्ककैःस्पृष्टंकालमनुवर्तिभिः शीतोष्णस्निग्धरूक्षाद्येर्यथासंनमहागुणैः शीतंशुचिशिवंमृष्टंविमलंलघुषड्गुणं प्रकृत्यादि
व्यमुदकंभ्रष्टंपात्रमपेक्ष्यते श्वेतंहिमंततजलंस्निग्धंगव्यादिमगुरु किंचिन्नीलंलघुतरंशोचीगंकफवातजित कषायमधुरंरक्ते
विपाहूतसतिकंजलंग्रीष्मकालनभिष्यंदीगुर्वभिष्यंदिवार्षिकम नतुलघ्वनाभिष्यादिजलंशरदिशस्यते आग्नेयाश्चैवसो
म्यान्वषड्सापृथिवीमता तस्यारसाःसंभवंतिवारिभूत्पृथग्विधाः सामान्यास्ताःप्रदेहेषुशोफज्वरविषेषुच निःपिष्टेषुचगा
त्रेषुशोणितपदणेषुच मलापकर्षणेहृद्यालघ्वीवोदृतेनाहिता रक्षोघ्नीचपावनावतस्मात्प्यावसंधरा श्वेतेकषायःपां
डौचलवणःस्निग्धलके स्यादेकपिलेक्षारोमोदितेकटुकोभवेत एवमापोरसानयेतुभर्त्रेतेपृथिवीगताः भुवःषड्रसयोगी
तादोषधीनांरसस्यच नानादेशविचारित्वातापःषड्रसतांव्रजेत तस्यवायोःप्रवक्ष्यामिषड्रसत्वंपृथक्पृथक् येनयेनाहिवोत
नवारिमुंचंतिवासवः तेनतेनविशेषेणस्पृश्यतेतद्गुणेनच लवणोरसतःपूर्वोमारुतोमधुरान्वयः गुरुर्विदाहीस्निग्धश्च
विरेवस्तलादिशिभिः तस्मात्वैरंजनयतिवातिकानांप्रशस्यते आहितःश्लेष्मकाणांचपैत्तिकानांचदाहृतं दक्षिणादिग
धवहूनांप्राणिनांचाविरोधतः शोषिनांविचसर्वेषांयेचरक्तेनपीडिताः दक्षिणोमधुरःशीतःसकषायश्चमारुतःचक्ष
ष्यःपित्तलोमनोवातश्लेष्मविबंधनुत कषायःपश्चिमेरूक्षोलघुर्नाप्यविदह्यते श्लेष्मपित्तहरस्तस्माद्वातसंकोपनःसर
नःउत्तरःप्रकृतिस्थानांसर्वधातुप्रसादनः अविदाहीसुशीतश्चलघुःस्निग्धश्चमारुतः षाडुधश्चरसस्तस्मिन्भूयिष्ठमु ५०
पलभ्यते सात्म्यत्वात्प्राणिनामेषसर्वेषामेवशस्यते ऐशानःकटुरूक्षोष्णस्तथाग्नेयश्चैवमारुतः आग्नेयोवदाहीनैर्ऋ
त्योवायव्यस्तिक्तउच्यते एवंषड्रसवत्कोणदिशास्विदिशजोनिलः रूक्षलवनुरक्ष्यायःशीतरसप्रमानिवर्तकः रक्तपित्तप्रश

Dr. BHAU DAJI MEMORIAL

मनःकफघ्नोवातक्रोलघुःपेयोहितोलंगमानांसदावैप्राणिनांतथा ऊरुस्तंभप्रगाढानांमेहिनामथकुष्ठिनां संस्पर्श
दुष्पयाश्चोगाःसगदेषुगदंकरः हैमंतशीतलंहृद्यंदारुणंसूक्ष्ममेवच कफंदूषयत्येतन्नापित्तंनचमारुतं तथाप्रव
र्षप्रलेपादिमादल्पांतरागुणैः चराचराणामहितंतुषारंवह्निनाशनं धाराच्युतंप्रसन्नंचनभोग्राह्यंपयःशुचिः वस्त्रपूतंहि
तमेध्यमारोग्यधातुवर्धनं नद्यःपाषाणविछिन्नाविक्षुब्धाभिहतोदकाः हिमवत्प्रभवाःपथ्याःपुण्यादेवर्षिसेवि
ताः नद्यःपाषाणसिकतावाहिन्योविमलोदकाः मलयप्रभवायाश्चजलंतास्वमृतोपमं पश्चमाभिमुखायाश्चप
थ्यास्तानिर्मलोदकाः प्रायोमृदुवहागुर्व्योयाश्चपूर्वसमुद्रगाः पारियात्रभवायाश्चविंध्यसह्यभवाश्चयाः शिरोहृ
द्रोगकुष्ठानांताहेतुःश्लीपदस्यच वसुधाकीटसर्पाखुमलसंदूषितोदकाः वर्षाजलवहानद्यःसर्वदोषसमीरणाः
वापीकूपतडागोत्ससरःप्रस्रवणादिषु आनूपधन्वशैलानांगुणदोषाविभावयेत पिच्छिलंकृमिलंक्लिन्नंपर्णशैवा
लकर्दमैः दिवर्णविरसंसांद्रंदुर्गंधिनहितंजलं विस्रांतदोषलवणंमंबुयदरुणालये॥ ॥इत्यंबुवर्गःप्रोक्तोयमष्ट
मःक्रमनिश्चितः॥ ॥स्वादुशीतंमृदुस्निग्धंबहलंश्लक्ष्णपिच्छिलं गुरुमंदंप्रसन्नंचगव्यंदशगुणंपयः तदेवंगुण
मेवौजःसामान्यादभिवर्धयेत प्रवरंजीवनीयानांक्षीरमुक्तंरसायनं माहिषाणांगुरुतरंगव्याच्छीततरंपयः स्नेहा
दूनमनिद्राणांमत्यग्नीनांहितंचयत रूक्षोष्णंक्षीरमुष्ट्राणांमीषत्सलवणंलघु शस्तंवातकफानाहकृमिशोफो
दरार्शसां॥ बल्यंस्थैर्यकरंसर्वमुष्णमेकशफंपयः साम्लसलवणंरूक्षंशाखाबाहृतेलघु छागंकषायमधुरंशी
तंग्राहिपयोलघु रक्तपित्तातिसारघ्नक्षयकासज्वरापहं हिक्काश्वासकरंतूष्णंपित्तश्लेष्मलमाविकं हस्तिनीनांप
योबल्यंगुरुस्थैर्यकरंपरं जीवनंबृंहणंसात्म्यंस्नेहनंमानुषंपयः नावनंरक्तपित्तेचतर्पणंचाक्षिशूलिनां रोचनंदी
पनंवृष्यंस्नेहनंबलवर्धनं पाकेम्लमुष्णंवातघ्नंमंगल्यंबृंहणंदधि पीनसेचातिसारेचशीतकेविषमज्वरे अरुचौमू
त्रकृच्छ्रेषुकार्श्येचदधिशस्यते शरद्ग्रीष्मवसंतेषुप्रायशोदधिगर्हितं रक्तपित्तकफोत्थेषुविकारेष्वहितंचतत
त्रिदोषंमंदकंजातंवातघ्नंदधिशुक्रलं सरःश्लेष्मानिलघ्नस्तुमंडःस्रोतोविशोधनः शोफार्शोग्रहणीदोषमूत्रग्र
हारारुचौ स्नेहव्यापदिपांडुत्वेतक्रंदद्याद्गरेषुच संग्राहिदीपनंहृद्यंनवनीतंनवोद्धृतं ग्रहण्यर्शोविकारघ्नम

दिता रुचिनाशनं स्मृतिबुध्यग्निशुक्रौजःकफमेदोभिवर्धनं वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहं सर्वस्नेहोत्तमं शी
-वा.क.म. तं मधुरं रसपाकयोः सहस्रवीर्यं विधिवद्घृतं कर्मसहस्रकृत् मदापस्मारमूर्छायशोषोन्मादगरज्वरात् योनिकर्णशि
रःशूलं घृतं जीर्णमपोहति सर्पीष्यजाविमाहिषीक्षीरवत्तानि निर्दिशेत् पीयूषो मोरटश्चैव किलाटा विविधाश्च ये ॥
५२ दीप्ताग्नीनामनिद्राणां सर्व एते सुखप्रदाः गुरवस्तर्पणा वृष्या बृंहणाः पवनापहाः विशदा गुरवो रूक्षा ग्राहिणस्त
क्रपिंडिकाः गोरसानामयं वर्गो नवमः परिकीर्तितः ॥ ॥ इक्षुः शीतो रसः स्निग्धो बृंहणो मधुरः सरः ॥ श्लेष्मलो भ
क्षितश्चैवं सो यांत्रिकस्तु विदह्यते शैत्यात्प्रसादान्माधुर्यात्पौंड्रकाद्वांशिको वरः प्रभूतकृमिमज्जासृङ्मेदोमांसकफो गुडः क्षुद्रो गु
डश्चतुर्भागत्रिभागार्धावशेषितः सरो गुरुर्यथापूर्वं धौतस्त्वल्पमलो गुडः पुराणः प्रतिश्यायकासश्वासनिबर्हणः ततो मत्स्यं
डिका खंडः शर्करा विमलाः परं यथायथैषां वैमल्यं भवेच्छैत्यं तथा तथं वृष्या क्षीणक्षतहिता सस्नेहा गुडशर्करा कषायम
धुरा शीता सतिक्ता यासशर्करा रूक्षा छर्द्यतिसारघ्नी छेदनी मधुशर्करा तृष्णासृक्पित्तदाहेषु प्रशस्ताः सर्वशर्कराः माक्षि
कं भ्रामरं क्षौद्रं पौत्तिकं मधुजातयः माक्षिकं प्रवरं तेषां विशेषाद्भ्रामरं गुरुः माक्षिकं तैलवर्णं स्याद्धैतं भ्रामरमुच्यते
क्षौद्रं तु कपिलं विद्यात् घृतवर्णं तु पौत्तिकं वातलं गुरु शीतं च रक्तपित्तकफापहं संधातृ छेदनं रूक्षं कषायमधुरं मधु
हन्यान्मधूष्णमुष्णार्तमथवा सविषान्वयात् गुरुरूक्षकषायत्वाच्छैत्याच्चाल्पं हितं मधु नातः कष्टतमं किंचिन्मध्वा
मात्तद्धि मानवः उपक्रमविरोधित्वात्सद्यो हन्याद्यथा विषं नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥ ॥ इतीक्षुविकृतिप्रा
यो वर्गोऽयं दशमो मतः ॥ १ ॥ मंडस्तु दीपयत्यग्निं वातं वाप्यनुलोमयेत् शुंठ्यामलकतांबूलापिप्पलीनागरैः शृतः मंदाग्नि
विषमाग्नीनां बालस्थविरयोषितां देयश्च सुकुमाराणां शुद्धानां वमनादिभिः मंडः करोति स्रोतांसि स्वेदं संजनयत्यपि
लंघितानां विरिक्तानां जीर्णे स्नेहे च पिबतां दीपनत्वाल्लघुत्वाच्च मंडः स्यात्प्राणधारणः तृष्णातीसारशमनो धातुसा
म्यकरः शिवः लाजमंडोऽग्निजननो ग्राही दोषविपाचनः वातानुलोमनो हृद्यः पिप्पलीनागरैर्युतः क्षुत्तृष्णाग्लानि ५२
दौर्बल्यकुक्षिरोगविनाशनी स्वेदाग्निजननी पेया वातवर्चोऽनुलोमनी ग्राहिणी तर्पणी लघ्वी हृद्या चापि विलेपिका
सुधौतः प्रस्रुतः स्विन्नः संतप्तश्चौदनो लघुः भृष्टतंडुलमिच्छंति गलश्लेष्मामयेष्वपि अधौतोऽप्रस्रुतोऽस्विन्नः

नश्चाप्यौदनो गुरुः मांसशाकवसातैलघृतमज्जाफलौदनाः बल्याः संतर्पणा हृद्या गुरवो बृंहयंति च तद्वन्माषतिल
क्षीरमुद्गसंयोगसाधिताः कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः स्विन्नभक्ष्यास्तु ये केचित्सौप्यगोधूमयावकाः
भिषक् तेषां यथाद्रव्यमादिशेद्गुरुलाघवं अकृतं कृतयूषं च तनुं संस्कारितं रसं सूपमम्लमनम्लं च गुरुं विद्याद्यथोत्तरं
सक्तवो वातला रूक्षा बहुवर्चोऽनुलोमिनः तर्पयंति नरं सद्यः पीताः सद्यो बलप्रदाः शीताः कषायमधुरा लघवो न विदाहिनः संग्रा
हिणः पित्तहरा विशेषाल्लाजसक्तवः मधुरा लघवः शीताः सक्तवः शालिसंभवाः ग्राहिणो रक्तपित्तघ्नाः तृष्णाछर्दिज्वरापहाः
हन्याद्व्याधीन्यवापूपो यावको वाट्य एव च उदावर्तप्रतिश्यायकासमेहगलग्रहान् धानासंज्ञास्तु ये भक्ष्याः प्रायस्ते लेख
नात्मकाः शुष्कत्वात्तर्पणास्ताश्च विष्टंभित्वाच्च दुर्जराः विरूढधानाः शष्कुल्यो मधुक्रोडाः ससपिंडकाः पूपाः पूपलिकाद्याश्च
गुरवः पैष्टिकाः परं फलमांसवसाशाकपललक्षौद्रसंस्कृताः भक्ष्या हृद्याश्च बल्याश्च गुरवो बृंहणात्मकाः वेसवारो
गुरुः स्निग्धो बलोपचयवर्धनः गुरवस्तर्पणा वृष्याः क्षीरेक्षुरसपूपकाः सगुडाः सतिलाश्चैव सक्षीरक्षौद्रशर्कराः
भक्ष्या वृष्याश्च बल्याश्च परं तु गुरवः स्मृताः सस्नेहाः स्नेहसिद्धाश्च भक्ष्या विविधलक्षणाः गुरवस्तर्पणा वृष्या हृद्या
गौधूमिका मताः संस्कारात्लघवः संति भक्ष्या गोधूमपैष्टिकाः धानापर्पटपूपाद्यास्तान् बुध्वा निर्दिशेत्तथा पृथुका गु
रवो बल्या भक्षयेदल्पशस्तु तान् यावा विष्टभ्य जीर्यंते सरसा भिन्नवर्चसः सूप्यान्नविकृता भक्ष्या वातला रूक्षशीतलाः
सकटुस्नेहलवणान् भक्षयेदल्पशस्तु तान् मृदुपाकाश्च ये भक्ष्याः स्थूलाश्च कठिनाश्च ये गुरवस्ते व्यतिक्रांतपाकाः पुष्टिबलप्र
दाः द्रव्यसंयोगसंस्कारात् द्रव्यमानं पृथक् तथा भक्ष्याणामादिशेद्बुद्ध्वा यथास्वं गुरुलाघवं नानाद्रव्यैः समायुक्तः पक्वाम
क्लिन्नभर्जितैः विमर्दको गुरुर्हृद्यो वृष्यो बलवतां हितः रसाला बृंहणी वृष्या स्निग्धा बल्या रुचिप्रदा स्नेहनं बृंहणं वृष्यं वातघ्नं स
गुडं दधि द्राक्षाखर्जूरकोलानां गुरु विष्टंभि पानकं परूषकाणां क्षौद्रस्य यच्चेक्षुविकृतिं प्रति तेषां बह्वल्पसंयोगात्पानकानां
पृथक् पृथक् द्रव्यमानं च विज्ञाय गुणकर्माणि निर्दिशेत् रुद्धमूत्रत्वादलवणा लघवो रागखाडवाः मुखप्रियाश्च हृद्याश्च
दीपना भक्तरोचनाः आम्लाम्लकलेहास्तु बृंहणा बलवर्धनाः रोचनास्तर्पणाश्चोक्ताः स्नेहमाधुर्यगौरवान् बुध्वा सं
योगसंस्कारान् द्रव्यमानं च तच्छ्रितं गुणकर्माणि लेह्यानां तेषां तेषां तथा वदेत् रक्तपित्तकफोत्थादिमुक्तं वातानुलोमनं ॥

कंदमूलफलाद्यंचतद्वद्वियान्नदामृतं यवानीन्वा मूलंचान्यत्कालाश्चारोचनंलघु विद्याद्यंकृतानामेवाद्यगामितांभवन्॥ १
चर॰सू॰ कषायानुरसंस्वादुसूक्ष्ममुष्णंव्यवायिच पित्तलंबद्धविण्मूत्रंनचश्लेष्माभिवर्धनं वातघ्नेषूत्तमंबल्यंत्वच्यंमेधाग्निवर्धनम्
तैलंसंयोगसंस्कारात्सर्वरोगापहंमतं तैलप्रयोगादजरानिर्विकारा जितश्रमाः आसन्नतिबलाःसंख्ये दैत्याधिपतयः
५२ पुरा कटूष्णंसार्षपंतैलंरक्तपित्तप्रदूषणं कफशुक्रानिलहरंकण्डूकोठविनाशनं एरण्डतैलंमधुरंगुरुश्लेष्माभिवर्धनं
वातासृग्गुल्महृद्रोगजीर्णज्वरहरंपरं पियालतैलंमधुरंगुरुश्लेष्माभिवर्धनं हितमिच्छंतिनात्यौष्ण्यात्संयोगे वातपित्तयो
:आतस्यंमधुराम्लंवविपाकेकटुकंतथा उष्णवीर्यंहितंवातेरक्तपित्तप्रकोपनं कुसुंभतैलमुष्णंतुविपाकेकटुकंगुरु विदाही
चविशेषेणसर्वरोगप्रकोपनं फलानांयानिचान्यानितैलान्याहारसंविधौ युज्यंतेगुणकर्मभ्यांतानिब्रूयाद्यथाफलं मधुरोबृंह
णोवृष्योबल्योमज्जातथावसा यथासत्वंसशैत्योष्ण्यंवसामज्ज्ञोश्चनिर्दिशेत् स्निग्धंदीपनंवृष्यंमुष्णंवातकफापहं विपाके
मधुरंहृद्यंरोचनंविश्वभेषजं श्लेष्मलामधुरावार्द्रागुर्वीस्निग्धाचपिप्पली सांशुष्काकफवातघ्नीकटूष्णावृष्यसंमता
नात्यर्थमुष्णंमरिचमवृष्यंलघुरोचनं छेदित्वाच्छोषणत्वाच्चदीपनंकफवातजित् वातश्लेष्मविबंधघ्नंकटूष्णंदीपनंलघु हिं
गुशूलघ्नंपाचनंविद्यात्पाचनंरोचनं रोचनंदीपनंवृष्यंचक्षुष्यमविदाहिच त्रिदोषघ्नंसमधुरंसैंधवंलवणोत्तमं सौक्ष्म्यादौ
ष्ण्याल्लघुत्वाच्चसौगंध्याच्चरुचिप्रदं सौवर्चलंविबंधघ्नंहृद्यमुद्गारशोधिच तैक्ष्ण्यादौष्ण्याद्व्यवायित्वाद्दीपनंशूलनाशनं
ऊर्ध्वंचाधश्चवातानामानुलोम्यकरंबिडं सतिक्तकटुकक्षारंतीक्ष्णमुत्क्लेदिचौद्भिदं नकालेलवणेगंधःसौवर्चलगुणान्वितं
सामुद्रकंसमधुरंसतिक्तंकटुपांशुजं रोचनंलवणंसर्वंपाकिस्रंस्यनिलापहं हृत्पाण्डुग्रहणीदोषप्लीहानाहगलग्रहान् काम
कफंत्रमशर्षांसियावशूकोव्यपोहति तीक्ष्णोष्णोलघुरूक्षश्चक्लेदीपाचकोविदारणः दीपनोदहनश्छेत्तासर्वक्षारोग्निसंनिभः
कारव्योकुंचिकाजाजीयवानीधान्यतुंबरे रोचनंदीपनंवातकफदौर्गंध्यनाशनं आहारयोगिनांभक्तिनिश्चयोनतुविद्यते॥ ५२
पूर्यतेद्वादशश्चार्थंवर्गआहारयोगिनां॥ ॥१॥ शूकधान्यंशमीधान्यंसमातीतंप्रशस्यते पुराणप्रायशोरूक्षंप्रायो
नाभिनवंगुरु यद्यदागच्छतिक्षिप्रंचतत्तल्लघुतरंस्मृतं निस्तुषंयुक्तिभृष्टंचसूप्यंलघुविपच्यते मृतंशुष्कंजरातिमेध्यंचबाल
रक्षार्थविवर्जितं अगोचरभृतंव्याधक्लिष्टंमांसंसमुत्सृजेत् अतोन्यथाहितंमांसंवृष्यंबलवर्धनं प्रीणनःसर्वधातूनां

हृद्योमांसरसःपरं शुष्यतांव्याधिमुक्तानांकृशानांक्षीणरेतसां बलवर्णार्थिनांचैवरसंविद्याद्यथामृतं सर्वरोग
प्रशमनंयथास्वंविहितंरसंविद्यात्स्वर्यंबलकरंवयोबुद्धींद्रियायुषां व्यायामनित्याःस्त्रीमद्यपानरतानराः नित्यंमां स्वा
सरसाहारानातुराःस्युर्नदुर्बलाः क्रिमिवातातपहतंशुष्कंजीर्णमनार्तवं शाकंनिःस्नेहसिद्धंचवर्ज्यंयच्चापरिस्रुतं पुराण
मांससंक्लिष्टंरुक्षंपारुष्यमार्तवैः अदेशकालजंक्लिन्नंयस्यात्फलमसाधकतत् हरितानांयथाशाकंनिर्देशःसाधना
दृते मद्याम्बुगोरसादीनांस्वेस्वेवर्गेविनिश्चयः यदाहारगुणैःपानंविपरीतंतदिष्यते अन्नानुपानंधातूनांदृष्टंयन्न
विरोधिच आसवानांसमुद्दिष्टाअशीतिश्चतुरुत्तरा अल्पेयमाप्यर्थपरीक्ष्यानुपिबेद्धितं स्निग्धोष्णंमारुतेशस्तं
पित्तेमधुरशीतलं कफेनुपानंरूक्षोष्णंक्षयेमांसरसःपरं उपवासाध्वभाष्यस्त्रीमारुतातपकर्मभिः क्लांतानामनुपाना
र्थंपयःपथ्यंयथामृतं सुराकृशानांपुष्ट्यर्थमनुपानंप्रशस्यते कार्श्यार्थंमधुदकंस्थूलानामनुशस्तंमधूदकं अल्पाग्नीना
मानिद्राणांतंद्राशोकभयक्लमैः मद्यमांसोचितानांतुमद्यमेवानुशस्यते॥ ॥अथानुपानगुणकर्मवक्ष्याम्यनुपानंत
र्पयतिप्रीणयतिऊर्जयतिपर्याप्तिमभिनिर्वर्तयति भुक्तमवसादयत्यन्नसंघातंभिनत्तिमार्दवमापादयतिक्लेदयति
जरयतिसुखपरिणामिताशुव्यवायितांचाहारस्योपजनयतीति॥ भवतिचात्र॥ ॥अनुपानंहितंयुक्तंतर्प
यत्याशुमानवं सुखंपचतिचाहारमायुषेचबलायच नोर्ध्वांगमारुतार्विष्टानहिक्काश्वासकासिनः नगीतभाष्या
ध्ययनप्रसक्तानोरसिक्षताः पिबेयुरुदकंभुक्त्वातद्धिकंठोरसिस्थितं स्नेहमाहारजंहत्वाभूयोदोषायकल्पते अनु
पानेकटस्थायमुक्तःप्रायोपयोगिकः द्रव्याणिनह्निर्दिष्टानिगुणैःकार्त्स्न्येननामभिः तथानानौषधंकिंचिद्दृश्यतेतज्ज्ञान
चोयथा द्रव्यंतुतत्तथावाच्यमनुक्तमिहयद्भवेत् वराःशरीरावयवाःस्वभावोधातवःक्रियाः लिंगंप्रमाणंसंस्का
रोमात्राचास्मिन्परीक्ष्यते चरानूपजलाकाशधन्वाद्यो भक्ष्यसंविधिः जलजानूपजाश्चैवजलानूपचराश्चये
गुरुभक्ष्याश्चयेसत्वाःप्रायस्तेगुरवःस्मृताः लघुभक्ष्यास्तुलघवोधन्वजाधन्वचारिणः शरीरावयवाःसक्थिशिर
स्कंधादयस्तथा सक्थिमांसाद्गुरुतरंक्रोडस्कंधशिरस्तथा वृषणौचर्ममेढ्रंचश्रोणीवृक्कौयकृद्गुदं मांसाद्गुरुतरंवि
याद्यथास्वंमध्यमेवच स्वभावाल्लघवोमुद्गास्तथालावकपिंजलाः स्वभावाद्गुरवोमाषावराहमहिषास्तथा धा

त्वचांशोणितादीनां गुरुविपाकयोर्नतरं अन्तरसेभ्यो विशिष्यंते प्राणिनां ये बहुक्रियाः गौरवं लिंगसामान्ये पुंसां स्त्री
चरकस. णां तु लाघवं महाप्रमाणं गुरवः स्वजातौ लघवोन्यथा गुरूणां लाघवं विद्यात् संस्कारात्स विपर्ययं व्रीहिलाजा यथा
च स्युः सक्तूनां सिद्धपिंडकाः अल्पादाने गुरूणां च लघूनां चातिसेवने मात्राकारणमुद्दिष्टं द्रव्याणां गुरुलाघवे गुरू
५३ णामल्पमादेयं लघूनां तृप्तिरिष्यते मात्रां द्रव्याण्यपेक्षंते मात्रा चाग्निमपेक्षते बलमारोग्यमायुश्च प्राणाश्चाग्नौ
प्रतिष्ठिताः अन्नपानेंधनैश्चाग्निर्दीप्यते शाम्यतेन्यथा गुरुलाघवचिंतेयं प्रायेणाल्पबलान्प्रति मंदक्रियानला
रोग्यान् सुकुमारान् सुखोचितान् दीप्ताग्नयः खराहाराः कर्मनित्या महोदराः ये नराः प्रति तांश्चिंत्यं नावश्यं गुरुलाघ
वं हिताभिर्जुहुयान्नित्यमंतरग्निं समाहितः अंनपानसमिद्भिर्ना मात्राकालौ विचारयन् आहिताग्निः सदा पथ्यान्यंतर
ग्नौ जुहोति यः दिवसे दिवसे ब्रह्म जपत्यथ ददाति च नरं निःश्रेयसे युक्तं सात्म्यज्ञं पानभोजने भजंते नामयाः के
चिद्भाविनोप्यंतरादृते षट्त्रिंशतं सहस्राणि रात्रीणां हितभोजनः जीवत्यनातुरो जंतुर्जितात्मा संमतः सतां तत्र श्लोकाः
अंनपानगुणाः सात्म्यवर्गा द्वादश निश्चिताः सगुणान्यनुपानानि गुरुलाघवसंग्रहः अंनपानविधावुक्तं न तस्यैवो
विशेषतः प्राणाः प्राणभृतामन्नमन्नं लोकोभिधावति वर्णः प्रसादः सौस्वर्यं जीवितं प्रतिभा सुखं तुष्टिः पुष्टिर्बलं
मेधा सर्वमन्ने प्रतिष्ठितं लौकिकं कर्म यद्वृत्तौ स्वर्गतौ यच्च वैदिकं कर्मापवर्गे यच्चोक्तं तच्चाप्यन्ने प्रतिष्ठितं॥ इति अ
न्नपानविधिर्नामाध्यायः सप्तविंशः॥ २७ ॥ छ॥ अथातो विविधाशितपीतीयमध्यायं व्याख्यास्यामः॥ ॥इ
ति ह स्माह भगवानात्रेयः विविधमशितपीतलीढखादितं जंतोर्हितमंतरग्निसंधुक्षितबलेन यथास्वेनोष्मणा स
म्यग्विपच्यमानं कालवदनवस्थितसर्वधातुपाकमनुपहतसर्वधातूष्ममारुतस्रोतः केवलं शरीरमुपचयबलव
र्णसुखायुषा योजयति शरीरधातूनूर्जयति च धातवो हि धात्वाहाराः प्रकृतिमनुवर्तंते तत्राहारप्रसादाख्यो रसः
किट्टं च मलाख्यमभिनिर्वर्तते किट्टात्स्वेदमूत्रपुरीषवातपित्तश्लेष्माणः कर्णाक्षिनासिकास्यरोमकूपप्रजननमलाः केशा ५३
श्मश्रुलोमनखादयश्चावयवाः पुष्यंति पुष्यंति त्वाहाररसाद्रसरुधिरमांसमेदोस्थिमज्जशुक्रौजांसि पंचेंद्रियद्रव्या
णि धातुप्रसादसंज्ञकानि भवंति शरीरसंधिबंधपिच्छादयश्चावयवाः ते सर्व एव धातवो मलाख्याः प्रसादाख्या

श्च रसमलाभ्यां पुष्यंतः स्वमानमनुवर्तंते यथावयः शरीरमेवं रसमलौ स्वप्रमाणावस्थितावाश्रयस्य समधातो
र्धातुसाम्यमनुवर्तयतः निमित्ततस्तु क्षीणवृद्धानां प्रसादाख्यानां धातूनां वृद्धिक्षयाभ्यामाहारमूलाभ्यां रसः सा
म्यमुत्पादयत्यारोग्याय किट्टं च मलानामेवं स्थानातिरिक्ताश्चोत्सर्गिणः शीतोष्णपर्यायगुणैश्चोपचर्यमाणा
मलाः शरीरधातुसाम्यकराः समुपलभ्यंते तेषां मलप्रसादाख्यानां धातूनां स्रोतांस्ययनमुखानि तानि यथाविभा
गेन यथास्वं धातूनापूरयंत्येवमिदं शरीरमशितपीतलीढखादितप्रभवमशितपीतलीढखादितप्रभवाश्चास्मि
न् शरीरे व्याधयो भवंति हिताहितोपयोगविशेषास्त्वत्र शुभाशुभविशेषकरा भवंतीत्येवंवादिनं भगवंतमात्रेयम
ग्निवेश उवाच दृश्यंते हि भगवन् हितसमाख्यातमाहारमुपयुंजाना व्याधिमंतश्चागदाश्च तथैवाहितसमाख्यातमेवं
दृष्टे कथं हिताहितोपयोगविशेषात्मकं शुभाशुभविशेषमुपलभामहे इति तमुवाच भगवानात्रेयो न हिताहा
रोपयोगिनामग्निवेश तन्निमित्ता व्याधयो जायंते न चैव केवलं हिताहारोपयोगादेव सर्वव्याधिभयमतिक्रांतं भ
वति। संति ह्यृतेप्याहारोपयोगादन्या रोगप्रकृतयः तद्यथा कालविपर्ययः प्रज्ञापराधः परिणामः शब्दस्पर्श
रसरूपगंधाश्चासात्म्या इत्येता रोगप्रकृतयो रसान् सम्यगुपयुंजानं पुरुषमशुभेनोपपादयंति तस्माद्धिताहारो
पयोगिनोपि दृश्यंते व्याधिमंतः अहिताहारोपयोगिनां पुनः कारणतो न सद्यो दोषवान् भवत्युपचारो न हि स
र्वाण्यपथ्यानि तुल्यदोषाणि न च सर्वे दोषास्तुल्यबलाः न सर्वाणि शरीराणि व्याधिक्षमत्वे समर्थानि भवंति।
तदेव ह्यपथ्यं देशकालसंयोगवीर्यप्रमाणातियोगाद्भूयस्तरमपथ्यं संपद्यते स एव च दोषः संसृष्टयोनिर्विरुद्धो
पक्रमो गंभीरानुगतश्चिरस्थितः॥ प्राणायतनसमुत्थो मर्मोपघाती वा भूयान् कष्टतमः क्षिप्रकारितमश्च संपद्य
ते शरीराणि चातिस्थूलान्यतिकृशान्यनिविष्टमांसशोणितास्थीनि दुर्बलान्यसात्म्याहारोपचितान्यल्पाहाराण्य
ल्पसत्वानि च भवंत्यव्याधिसहानि॥ विपरीतानि पुनर्व्याधिसहानि एभ्यश्चैवापथ्याहारदोषशरीरविशेषेभ्यो
व्याधयो मृदवो दारुणाः क्षिप्रसमुत्थाश्चिरकारिणश्च भवंति त एव च वातपित्तश्लेष्माणः स्थानविशेषेण
प्रकुपिता व्याधिविशेषानभिनिर्वर्तयंत्यग्निवेश तत्र रसादिषु प्रकुपितानां दोषाणां यस्मिन्यस्मिन् स्थाने

चरकसू.

५५ ये ये व्याधयः संभवंति तांस्तान्यथावदनुव्याख्यास्यामः इति भवंति चात्र ॥ अश्रद्धा चारुचिश्चास्यवैरस्यमरसज्ञ
ता नाशोऽग्नेरयथाकालं वलयं पलितानि च रसप्रदोषजा रोगा वक्ष्यंते रक्तदोषजाः कुष्ठवीसर्पपिडका रक्तपित्तम
सृग्दरः गुदमेढ्रास्यपाकश्च प्लीहा गुल्मोऽथ विद्रधिः नीलिका कामला व्यंगः पिप्लवस्तिलकालकाः दद्रुश्चर्मदलं श्वित्रं
पामा कोठास्रमंडलं रक्तप्रदोषाज्जायंते शृणु मांसप्रदोषजान् अधिमांसार्बुदं कीलगलशालूकशुंडिकाः पूतिमां
सालजीगंडगंडमालोपजिह्विकाः विद्यान्मांसाश्रयान्मेदःसंश्रितांस्तु प्रवक्ष्यते निंदितानि प्रमेहाणां पूर्वरूपाणि या
नि च अध्यस्थिदंतौ दंतास्थिभेदशूलं विवर्णता केशलोमनखश्मश्रुदोषाश्चास्थिप्रदोषजाः रुक्पर्वणां भ्रमो मूर्छा
दर्शनं तमसो मनः अरूंषि स्थूलमूलानां पर्वजानां च दर्शनं मज्जप्रदोषाच्छुक्रस्य दोषात्क्लैब्यमहर्षणं रोगिणं क्लीब
मल्पायुर्विरूपं वा प्रजायते गर्भः पतति प्रस्रवत्यपि शुक्रं हि दुष्टं सापत्यं सदारं बाधते नरं इंद्रियाणि समाश्रि
त्य प्रकुप्यंति यदा मलाः उपतापोपघाताभ्यां योजयंतींद्रियाणि ते स्नायौ शिराकंडराभ्यो दुष्टाः क्लिश्यंति मानवं स्तंभ
संकोचखल्लीभिर्ग्रंथिस्फुरणसुप्तिभिः मलानाश्रित्य कुपिता भेदशोषप्रदूषणं दोषा मलानां कुर्वंति संगोत्सर्गावती
व च विविधादशितात्पीतादहिताल्लीढखादितात् भवंत्येते मनुष्याणां विकारा य उदाहृताः तेषामिच्छन्ननुत्पत्तिं सेवेत
मतिमान्सदा हितान्येवाशितादीनि सुखं तेषामसंभवः रसजानां विकाराणां सर्वं लंघनमौषधं विधिशोणितकेऽध्याये
रक्तजानां भिषग्जितं मांसजानां तु संशुद्धिः शस्त्रक्षाराग्निकर्म च अष्टौनिंदितसंख्याते मेदोजानां चिकित्सितं अस्थ्याश्रया
णां व्याधीनां पंचकर्माणि भेषजं बस्तयः क्षीरसर्पींषि तिक्तकोपहितानि च मज्जशुक्रसमुत्थानामौषधं स्वादुतिक्तकम्
अन्नं व्यवायव्यायामौ शुद्धिः काले च मात्रया शांतिरिंद्रियजानां तु त्रिमर्मीये प्रवक्ष्यते स्नाय्वादिजानां प्रशमो वक्ष्यते
वातरोगिके नवेगान्धारणेऽध्याये चिकित्सासंग्रहः कृतः मलजानां विकाराणां सिद्धिश्चोक्ता क्वचित्क्वचित् व्यायामा ५४
दूष्मणस्तैक्ष्ण्याद्धितस्यानवचारणात् कोष्ठाच्छाखां मला यांति द्रुतत्वान्मारुतस्य च तत्रस्थाश्च विलंबंते कदाचि
न्न समीरिताः नादेशकाले कुप्यंति भूयो हेतुप्रतीक्षिणः वृद्ध्याभिष्यंदनात्पाकात्स्रोतोमुखविशोधनात् शाखा
मुक्त्वा मलाः कोष्ठं यांति वायोश्च निग्रहात् अजातानामनुत्पत्तौ जातानां विनिवृत्तये रोगाणां यो विधिर्दृष्टः सुखार्थी

तं समाचरेत् सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः ज्ञानाज्ञानविशेषात्तु मार्गामार्गप्रवृत्तयः हितमेवानुरु
ध्यंते प्रपरीक्ष्य परीक्षकाः रजोमोहावृतात्मानः प्रियमेव तु लौकिकाः श्रुतं बुद्धिः स्मृतिर्दाक्ष्यं धृतिर्हितनिषेवणं वा
ग्विशुद्धिः शमो धैर्यमाश्रयंति परीक्षकं लौकिकं नाश्रयंत्येते गुणा मोहरजःश्रितं तन्मूलाश्चैव रोगाः शा
रीरमानसाः प्रज्ञापराधाद्ध्यहितानर्थान्पंच निषेवते संधारयति वेगांश्च सेवते साहसानि च तदात्वसुखसंज्ञेषु भावे
ष्वज्ञोऽनुरज्यते रज्यते न तु विज्ञाता विज्ञाने ह्यमलीकृते न रागान्नाप्यविज्ञानादाहारमुपजायते परीक्ष्य हितमश्नीयाद्दे
हो ह्याहारसंभवः आहारस्य विधावष्टौ विशेषा हेतुसंज्ञकाः शुभाशुभसमुत्पत्तौ तान्परीक्ष्य प्रयोजयेत् परिहार्या
ण्यपथ्यानि सदा परिहरन्नरः भवत्यनृणतां प्राप्तः साधूनामिह पंडितः यत्तु रोगसमुत्थानमशक्यमिह केनचित् परिह
र्तुं न तत्प्राप्य शोचितव्यं मनीषिणा इति ॥ तत्र श्लोकाः आहारसंभवं वस्तु रोगाश्चाहारसंभवाः हिताहितविशेषाश्च वि
शेषाः सुखदुःखयोः सहत्वे चासहत्वे च दुःखानां देहसत्त्वयोः विशेषो रोगसंघाश्च धातुजा ये पृथक्पृथक् तेषां
चैव प्रशमनं कोष्ठाच्छाखामुपेत्य च दोषा यथा प्रकुप्यंति शाखाभ्यः कोष्ठमेत्य च प्राज्ञाज्ञयोर्विशेषश्च स्वस्थातुरहितं
च यत् विविधाशितपीतीये तत्सर्वं संप्रकाशितं विविधाशितपीतीयो नाम अष्टाविंशोऽध्यायः २८ छ ॥
॥ ॥ अथातो दशप्राणायतनीयमध्यायं व्याख्यास्यामः इति ह स्माह भगवानात्रेयः दशैवायतनान्याहुः प्रा
णा येषु प्रतिष्ठिताः शंखौ मर्मत्रयं कंठो रक्तं शुक्रौजसी गुदं तानींद्रियाणि विज्ञानं चेतनाहेतुमामयान् जानीते यः
स वै विद्वान्प्राणाभिसर उच्यते इति द्विविधास्तु खलु भिषजो भवंत्यग्निवेश प्राणानामेके अभिसरा हंतारो रोगाणां
रोगाणामेके अभिसरा हंतारः प्राणानामिति एवंवादिनमात्रेयमग्निवेश उवाच भगवंस्ते कथमस्माभिर्वेदितव्या भवेयु
रिति भगवानुवाच य इमे कुलीनाः पर्यवदातश्रुताः परिदृष्टकर्माणो दक्षाः शुचयो जितहस्ता जितात्मानः सर्वोपकर
णवंतः सर्वेंद्रियोपपन्नाः प्रकृतिज्ञाः प्रतिपत्तिज्ञास्ते प्राणानामभिसरा हंतारो रोगाणां त एवंविधा केवले शरीरज्ञाने श
रीराभिनिर्वृत्तिज्ञाने प्रकृतिविकारज्ञाने च निःसंशयाः सुखसाध्यकृच्छ्रसाध्ययाप्यप्रत्याख्येयानां च रोगाणां स
मुत्थानपूर्वरूपलिंगवेदनोपशयविशेषज्ञाने व्यपगतसंदेहास्त्रिविधस्यायुर्वेदसूत्रस्य ससंग्रहव्याकरणस्य सत्रिवि

धौषधग्रामस्यप्रकारः पंचाशं शतंश्च मूलफलानां चतुर्णां च स्नेहानां पंचानां लवणानामष्टानां च मूत्राणामष्टानां च क्षीराणां क्षीर
चा.सू. वग्वृक्षाणां शिरोविरेचनादेश्च पंचकर्माश्रयस्यौषधगणस्य अष्टाविंशतेश्च यवागूनां द्वात्रिंशतश्च चूर्णप्रदेहानां षण्णां वि
रेचनशतानां पंचानां च कषायशतानां॥ स्वस्थवृत्तविहितभोजनपाननियमस्थानचंक्रमणशयनासनमात्राद्रव्यांजनपरि
५५. मार्जनवेगाविधारणाविधारणव्यायामसात्म्येंद्रियपरीक्षोपक्रमसद्वृत्तकुशलाः॥ चतुष्पादोपगृहीते च भेषजे षोडशकले सवि
निग्रहे सत्रिपर्येषणे सवातकलाकले तेन्यपगतसंदेहाश्चतुर्विधस्य च स्नेहस्य चतुर्विंशत्युपनयनस्य चतुःषष्टिपर्यंतस्य
व्यवस्थापयितारो बहुविधविधानयुक्तानां स्नेहस्वेदवम्यर्थे स्नेहौषधोपचाराणां कुशलाः॥ शिरोरोगादेश्च दोषांशे
विकल्पजस्य च व्याधिसंग्रहस्य च सक्षयपिडकविद्रधेस्त्रयाणां च शोफानां बहुविधशोफानुबंधानामष्टचत्वारिंशतश्च
रोगाधिकरणानां चत्वारिंशदुत्तरस्य च नानात्मजस्य व्याधिशतस्य तथा विगर्हितानि स्थूलकृशानां सहेतुलक्षणोपक्रमा
णां स्वप्नस्य च हितस्याहितस्य स्वप्नस्यातिस्वप्नस्य च सहेतूपक्रमस्य षण्णां च लंघनादीनामुपक्रमाणां संतर्पणापतर्पणजानां नाना
व्याधीनां मदमूर्च्छायसंन्यासानां च सकारणरूपौषधानां कुशलाः॥ कुशलाश्चाहारविधिविनिश्चयस्य प्रकृत्या च हिता
हितानामाहारविकाराणामग्र्यसंग्रहस्यासवानां चतुरशीतेश्च द्रव्यगुणकर्मविनिश्चयस्य च सविकल्पविरोधिकस्य
रसानुरससंश्रयस्य द्वादशवर्गाश्रयस्य चान्नपानस्य रसगुणप्रभावस्य सानुपानगुणस्य नवविधस्यार्थसंग्रहस्याहार
गतेश्च हिताहितोपयोगविशेषात्मकस्य शुभाशुभविशेषस्य धात्वाश्रयाणां च रोगाणां सौषधसंग्रहाणां दशानां
च प्राणायतनानां वक्ष्याम्यहमर्थे दशमहामूलीये त्रिंशत्तमेऽध्याये तंत्रस्य चाष्टांगस्य तंत्रार्थस्य तंत्रोद्देशलक्षण
स्य तंत्रस्य च श्रवणावग्रहणधारणवचनविज्ञानप्रयोगकर्मकार्यकालकर्तृकरणकुशलाः॥ कुशलाश्च स्मृतिमतिशा
स्त्रयुक्तिज्ञानस्यात्मनः शीलगुणैरविसंवादनेन संपादनेन च सर्वप्राणिषु चेतसो मैत्रस्य मातापितृभ्रातृबंधुवदेवं
युक्ता भवंत्यग्निवेशाः॥ प्राणानामभिसरा हंतारो रोगाणां॥ अतो विपरीता रोगाणामभिसरा हंतारः प्राणानामि ५५
ति॥ भिषक्छद्मप्रतिच्छन्नाः कंटकभूता लोकस्य प्रतिरूपकसधर्माणो राज्ञां प्रमादाच्चरंति राष्ट्राणि तेषामिदं विशेषविज्ञा
नं भवति॥ अत्यर्थं वैद्यवेषेण श्लाघमाना विशिखांतरमनुचरंति कर्मलोभात् श्रुत्वा च कस्यचिदातुर्यमभितः परि

पतंति संश्रवणे चास्यात्मनो वैद्यगुणानुच्चैर्वदंति यश्चास्य वैद्यः प्रतिकर्म करोति तस्य च दोषान्मुहुर्मुहुरुदाहरंति॥ आतु
रमित्राणि च प्रहर्षणोपजापोपसेवादिभिरिच्छंत्यात्मीकर्तुं अल्पेच्छुतां चात्मनः ख्यापयंति कर्म चासाद्य मुहुर्मुहुरवलोक
यंति॥ दाक्ष्येण चाज्ञानमात्मनः प्रच्छादयितुकामा॥ व्याधिं चापावर्तयितुमशक्नुवंतो व्याधितमेवानुपकरणमपरिचा
रकमनात्मवंतमुपदिशंत्यंतगतं चैनमभिसमीक्ष्यान्यमाश्रयंति देशमपदेशमात्मनः कृत्वा प्राकृतजनसंनिपाते चा
त्मनः॥ कौशलमकुशलवत्कुजनसंनिपाते च प्रतिभयमिव कांतारमध्वगाः परिहरंति न चानुयोगमिच्छंत्यनुयोक्तु
नामत्यागमिव चानुयोगाद्विद्विषंते न॥ चैषामाचार्यः शिष्यः सब्रह्मचारी वैवादिको वा कश्चित्प्रज्ञायत इति तत्र श्लो
काः॥ भिषक्छद्म प्रविश्यैवं व्याधितांस्तर्कयंति ये वीतंसमिव संश्रित्य वने शाकुनिका द्विजान् श्रुतदृष्टक्रियाकालमा
त्राज्ञानबहिःकृताः वर्जनीया हि ते मृत्योश्चरंत्यनुचरा भुवि वृत्तिहेतोर्भिषङ्मानपूर्णान्मूर्खविशारदान् वर्जयेदा
तुरो विद्वान् सर्पांस्ते पीतमारुताः ये तु शास्त्रविजितात्मानस्तेभ्यो नित्यकृतं नमः तत्र श्लोकः दशप्राणायतनं वैद्यो
कुशलानार्थं संग्रहः द्विविधा भिषजश्चोक्ताः प्राणस्यायतनानि च॥ ॥ इति दशप्राणायतनीयो नामाध्यायए
कोनत्रिंशः॥ २९ ॥७॥ ॥०॥ अथातोर्थेदशमहामूलीयं व्याख्यास्यामः॥ इति ह स्माह भगवानात्रेयः अ
र्थे दशमहामूलाः समासक्ता महाफलाः महच्चार्थश्च हृदयं पर्यायैरुच्यते बुधैः षडंगमंगविज्ञानमिंद्रियाण्यर्थपं
चकं आत्मा च सगुणश्चेतश्चिंत्यं च हृदि संश्रितं प्रतिष्ठार्थं हि भावानामेषां हृदयमिष्यते गोपानसीनामागारक
र्णिकेवार्थचिंतकैः तस्योपघातान्मूर्च्छायं भेदान्मरणमृच्छति तद्धि तत्स्पर्शविज्ञानं धारि तत्र संश्रितं तत्परस्यो
जसः स्थानं तत्र चैतन्य संग्रहः हृदयं महदर्थश्च तस्मादुक्तं चिकित्सकैः तेन मूलेन महता महामूला मता दशः
ओजो वहाः शरीरेस्मिन्विधम्यंते समंततः येनौजसा वर्तयंति प्रीणिताः सर्वदेहिनः यदृते सर्वभूतानां जीवितं भा
वतिष्ठते यत्सारमादौ गर्भस्य यत्तद्गर्भरसाद्रसः संवर्तमानं हृदयं समाविशति यत्पुरा यस्यानाशात्तु नाशोऽ
स्ति धारि यत्तद्धृदयाश्रितं यच्छरीररसस्नेहः प्राणा यत्र प्रतिष्ठिताः तत्फलास्ताः फलंतीति बहुधा ति महाफलाः ध्मा
नाद्धमन्यः स्रवणात्स्रोतांसि सरणाच्छिराः तन्महत्ता महामूलास्तच्चौजः परिरक्षिताः परिहार्या विशेषेण मन
सो दुःखहेतवः यद्धृदयस्य यदोजस्य स्रोतसां यत्प्रसादनं तत्तत्सेव्यं प्रयत्नेन प्रशमो ज्ञानमेव च इति अथखल्व

च॰ सू॰

५८ कं प्राणवर्धनानामुत्कृष्टतमं ॥ एकं बलवर्धनानामेकं बृंहणानामेकं नन्दनानामेकं हर्षणानामेकमयनानामिति ॥ तत्राहिं
सा प्राणिनां प्राणवर्धनानामुत्कृष्टतमं वीर्यं बलवर्धनानां विद्या बृंहणानामिन्द्रियजयो नन्दनानां तत्त्वावबोधो हर्ष
णानां ब्रह्मचर्यमयनानामिति ॥ आयुर्वेदविदो मन्यन्ते ॥ ॥ तत्रायुर्वेदविदस्तंत्रस्थानाध्यायप्रश्नानां पृथक्त्वेन वाक्यशो
वाक्यार्थशोऽर्थावयवशश्च प्रवक्तारो मन्तव्याः ॥ तत्राह ॥ कथं तंत्रादीनि वाक्यशो वाक्यार्थशोऽर्थावयवशश्चोक्तानि
भवन्तीत्यत्रोच्यते तंत्रमार्षं कार्त्स्न्येन यथाम्नायमुच्यमानं वाक्यशो भवत्युक्तं ॥ बुध्या सम्यगनुप्रविश्यार्थतत्त्वं वाग्भि
र्व्याससमासप्रतिज्ञाहेतूदाहरणोपनयनिगमनयुक्ताभिस्त्रिविधशिष्यबुद्धिगम्याभिरुच्यमानं वाक्यार्थशो भवत्यु
क्तं ॥ तंत्रनियतानामर्थदुर्गाणां पुनर्विभावनैरुक्तमर्थावयवशो भवत्युक्तं ॥ तत्र चेत्प्रष्टारः स्युः ॥ चतुर्णामृक्सामय
जुरथर्ववेदानां कं वेदमुपदिशन्त्यायुर्वेदविदः किमायुः कस्मादायुर्वेदः शाश्वतोऽशाश्वतः कति कानि चास्याङ्गानि
कैश्चायमध्येतव्यः किमर्थं चेति तत्र भिषजा पृष्टेनैवं वाच्यं ॥ चतुर्णामृक्सामयजुरथर्ववेदानामात्मनोऽथर्व
वेदे भक्तिरादेश्या वेदो ह्याथर्वणः स्वस्त्ययनबलिमङ्गलहोमनियमप्रायश्चित्तोपवासमन्त्रादिपरिग्रहाच्चिकि
त्सां प्राह चिकित्सा चायुषो हितायोपदिश्यते वेदं चोपदिश्यायुर्वाच्यं तत्रायुश्चेतनानुवृत्तिर्जीवितमनुबन्धो धारि
चेत्येकोऽर्थः तदायुर्वेदयतीत्यायुर्वेदः कथमिति चेदुच्यते स्वलक्षणतः सुखासुखतो हिताहिततः प्रमाणाप्रमाणत
श्च यतश्चायुष्याण्यनायुष्याणि च द्रव्यगुणकर्माणि वेदयत्यतोऽप्यायुर्वेदः तत्रायुष्याण्यनायुष्याणि च द्रव्यगुण
कर्माणि केवलेनोपदेक्ष्यन्ते तंत्रेण तत्रायुरुक्तं स्वलक्षणतो यथावदिहैव पूर्वाध्याये च । तत्र शारीरमानसाभ्यां रो
गाभ्यामनभिद्रुतस्य विशेषेण यौवनवतः समर्थानुगतबलवीर्ययशःपौरुषपराक्रमस्य ज्ञानविज्ञानेन्द्रियार्थबलसमुद
ये वर्तमानस्य परमर्द्धिरुचिरविविधोपभोगस्य समृद्धसर्वारम्भस्य यथेष्टविचारिणः सुखमायुरुच्यते ॥ असुख ५९
मतो विपर्ययेण हितैषिणः ॥ पुनर्भूतानां परस्वादुपरतस्य सत्यवादिनः शमपरस्य परीक्ष्यकारिणोऽप्रमत्तस्य
त्रिवर्गं परस्परेणानुपहतमुपसेवमानस्य पूजार्हसंपूजकस्य ज्ञानविज्ञानोपशमशीलस्य वृद्धोपसेविनः सुनि
यतरागरोषेर्ष्यामदमानवेगस्य सततं विविधप्रदानपरस्य तपोज्ञानप्रशमनित्यस्याध्यात्मविदस्तत्परस्य लोक

कमिमं चामुं चावेक्ष्यमाणस्य स्मृतिमतो हितमायुरुच्यते ॥ अहितमतो विपर्ययेण प्रमाणमायुषस्त्वर्थेन्द्रियमनोबुद्धिचे
ष्टादीनां विकृतिलक्षणैरुपलभ्यते निमित्तैरिदमस्मात् क्षणान्मुहूर्ताद्दिवसात्त्रिपञ्चसप्तदशद्वादशाहात्पक्षान्मा
सात्षण्मासात्संवत्सराद्वा स्वभावमापत्स्यत इति ॥ ७ ॥ तत्र स्वभावः प्रवृत्तेरुपरमो मरणमनित्यता निरोध इत्येकोऽर्थः ॥
इत्यायुषः प्रमाणमतो विपरीतमप्रमाणमरिष्टाध्याये देहप्रकृतिलक्षणमधिकृत्य चोपदिष्टमायुषः प्रमाणमायुर्वेदे सोऽय
मायुर्वेदः शाश्वतो निर्दिश्यते । अनादित्वात्स्वभावसंसिद्धलक्षणत्वात् भावस्वभावनित्यत्वाच्च न हि नाभूत्कदाचिदा
युषः संतानो बुद्धिसंतानो वा शाश्वतश्चायुषो वेदिता अनादि च सुखदुःखं सद्रव्यहेतुलक्षणमपरापरयोगात् एष चार्थ
संग्रहो विभाव्यते ॥ आयुर्वेदलक्षणमिति ॥ तत्र गुरुलघुशीतोष्णस्निग्धरूक्षादीनां द्वंद्वानां सामान्यविशेषाभ्यां वृ
द्धिह्रासौ यथोक्तं गुरुभिरभ्यस्यमानैर्गुरूणामुपचयो भवत्यपचयो लघूनामेवमितरेषामित्येष भावो नित्यः स्वल
क्षणं च द्रव्याणां पृथिव्यादीनां संति द्रव्याणि गुणाश्च नित्यानित्यानि न ह्यायुर्वेदस्याभूत्वोत्पत्तिरुपलभ्यते ॥
अन्यत्रावबोधोपदेशाभ्यामेतद्द्वयमधिकृत्योत्पत्तिमुपदिशन्त्येके स्वाभाविकं चास्य लक्षणमकृतकं यदुक्त
मिहाद्ये चाध्याये यथाग्नेरौष्ण्यमपां द्रवत्वं भावस्वभावनित्यत्वमपि चास्य यथोक्तं गुरुभिरभ्यस्यमानैर्गु
रूणामुपचयो भवत्यपचयो लघूनामित्येवमादि तस्यायुर्वेदस्याङ्गान्यष्टौ तद्यथा कायचिकित्सा शाला
क्यं शल्यापहर्तृकं विषगरवैरोधिकप्रशमनं भूतविद्या कौमारभृत्यं रसायनानि वाजीकरणमिति ॥ स चाध्येतव्यो
ब्राह्मणराजन्यवैश्यैः ॥ तत्रानुग्रहार्थं प्राणिनां ब्राह्मणैरात्मरक्षार्थं राजन्यैर्वृत्त्यर्थं वैश्यैः सामान्यतो वा धर्मार्थका
मपरिग्रहार्थं सर्वैः सोऽध्येतव्यः भूदेवैर्दुरधिहितो वेदप्रामाण्याद्ध्यापकाध्येतृणामायुःप्रजालोकानामन्य
तमं इति ॥ तत्र यदध्यात्मविदां धर्मपथस्थानां धर्मप्रकाशकानां वा मातृपितृभ्रातृबन्धुगुरुजनस्य वा विकारप्र
शमने प्रयत्नवान् भवति यच्चायुर्वेदोक्तमध्यात्ममनुध्यायति वेदयत्यनुविधीयते वा सोऽस्य परो धर्मः या पुनरी
श्वराणां वसुमतां वा सकाशात्सुखोपहारनिमित्ता भवत्यर्थावाप्तिरारक्षणं च या च स्वपरिगृहीतानां प्राणि
नामातुर्यादाहितानां रक्षा सोऽस्यार्थः यत्पुनरस्य विद्वद्ग्रहणं यशः ॥ शरण्यत्वं च ॥ या च संमानशुश्रूषा यच्च

Dr. BHAU DAJI MEMORIAL

च.क.स.

५७ ह्यानां विषयाणामारोग्यमाचष्टे सोस्यकामइति॥ यथाप्रश्नमुक्रमशेषेण॥ अथभिषगादिताभेषज्ञादृष्ट्वाष्टविधं भवति॥
नयथा॥ तंत्रंतंत्रार्थस्थानानि स्थानार्थनध्यायान ध्यायार्थान प्रश्नान्प्रश्नार्थांश्चेति॥ इत्येनं चैवं वक्ष्यंति विशेषेणवाक्यशोवाक्य
र्थशोर्थावयवश्चेति॥ तत्रायुर्वेदो वेदः शाखाविद्यालक्ष्णं शास्त्रलक्षणंतंत्रमित्यनार्थांतरं तंत्रार्थः पुनः स्वलक्षणैर्भ
वोपदिष्टः सचार्थः पुनः प्रकरणैर्विभाव्यमानो भूयएव॥ शरीरं वृत्तिर्हेतुर्व्याधिःकर्मकार्यकालकर्तृकरणविधिनिश्चयानि
दशप्रकरणानि कीर्तितानोपदेक्ष्यंते॥ तंत्रेणतत्र मष्टौस्थानानि॥ तद्यथा॥ श्लोकस्थाननिदानविमानशारीरेंद्रियचिकित्सित
कल्पसिद्धिस्थानानि॥ तत्राविंशदध्यायकं श्लोकस्थानं॥ ॥अष्टाध्यायकानां निदानविमानशारीरस्थानानि॥ ॥ द्वादशकमिं
द्रियाणां त्रिंशत्कं चाचिकित्सितानां॥ द्वादशके कल्पसिद्धिस्थाने भवत इति॥ तत्र श्लोकाः॥ ॥ द्वात्रिंशकेद्वादशकं पंचत्री
ण्यष्टकान्येवसमासिद्धकाः॥ श्लोकौषधापथ्यविकल्पसिद्धिनिदानमानाश्रयसंज्ञकेषु॥ स्वे स्वे स्थाने यथास्वंच स्थानार्थउप
देक्ष्यते॥ सविंशमध्यायशतं शृणुनामक्रमागतं॥ दीर्घंजीवीयमोपामार्गतंडुलारग्वधादिकौ षड्विरेकाश्रयाश्चेतिच
तुष्कोभेषजाश्रयः मात्रातस्याशितीयौ चनवेगांधारणं तथा॥ इंद्रियोपक्रमश्चेति चत्वारः स्वास्थ्यवृत्तिकाः॥ अध्याय
कंस्थानमितिमिंद्रियाणां प्रकीर्तितं अभयामलकीयं च प्राणकामीयमेवच॥ करप्रचितिकं वेदसमुत्थानं रसायनं॥ संयो
गशरमूलीयमासीक्षीरकं तथा॥ माषवर्णभृतीयं च पुमाञ्जातबलादिकं चतुष्कद्वयमप्येतदध्यायद्वयमुच्यते॥ रसा
यनमितिद्वेयं वाजीकरणमेवच॥ ज्वराणां रक्तपित्तस्य गुल्मानां मेहकुष्ठयोः॥ शोषोन्मादापस्मारक्षतशोफोदरार्शसां
ग्रहणीपांडुरोगाणां श्वासकासातिसारिणां॥ छर्दिवीसर्पतृष्णानां विषमद्यविकारयोः॥ द्विव्रणीयं त्रिमर्मीयं ऊरुस्तं
भिकमेवच॥ वातरोगे वातरक्तेयोनिव्यापादिकं च यत॥ त्रिंशच्चिकित्सितान्युक्तान्यतः कल्पान्परं शृणु॥ फलजीमूतकेक्ष्वा
कुकल्पोधामार्गवस्य च॥ पंचमोवत्सकस्योक्तः षष्ठश्चकृतवेधने॥ श्यामात्रिवृतयोःकल्पः स्तथैवचचतुरंगुले॥ तिल्व ५७
स्यकधायाश्च शंखिनीसप्तलाश्रयोः॥ दंतीद्रवंत्योः कल्पश्च द्वादशोयं समाप्यते॥ कल्पनापंचकर्माख्या बस्तिसूत्री
थैवच स्नेहव्यापादिकी सिद्धिर्नेत्रव्यापादिकी तथा सिद्धिशोधनयोश्चैव बस्तिसिद्धिस्तथैवच॥ प्रासृतीमर्मसंख्याता
सिद्धिर्बस्त्याश्रयाश्चया॥ फलमात्रातथासिद्धिः सिद्धिश्चोत्तरसंज्ञिता॥ सिद्धयोद्वादशैवेतस्तंत्रं चासमाप्यते॥ ॥

स्वेस्वस्थाने तथाध्यायेचाध्यायार्थं निगद्यते॥ तंत्रूयात्सर्वतः सर्वं यथास्वं ह्यर्थसंग्रहात॥ पृच्छातंत्राद्यथाम्नायं विधिनाप्र
श्नउच्यते॥ प्रश्नोर्थोयुक्तिमांश्चैव तंत्रेणेवार्थनिर्णयः॥ निरुक्तं तंत्रणात्तंत्रं स्थानमर्थप्रतिष्ठया॥ अधिकृत्येयमध्याय
नामसंज्ञा प्रतिष्ठिता॥ इतिसर्वं यथाप्रश्नमष्टकं संप्रकाशितं कार्त्स्न्येन प्रोक्तं तंत्रस्य संग्रहः सुविनिश्चितः सतिपाल्लवि
कात्पाताः सक्षाभांजनयंतिये॥ वर्तकानामिवोत्पाताः सहसैवाविभाविताः तस्मात्तान्पूर्वसंजल्पे सर्वत्राष्टकमादिशे
त्॥ परापरपरीक्षार्थं मंत्रशास्त्रह्युदाबलं शब्दमात्रेणतंत्रस्य केवलस्यैकदेशिकाः भ्रमंत्यल्पबलास्तंत्रे ज्याशब्देन
वर्तकाः॥ पशुःपशूनां दौर्बल्यात कश्चिन्मध्ये वृकायते॥ सत्त्वैर्वृकेणमासाद्यप्रकृतिं भजते पशुः॥ तद्वदज्ञः समध्यस्थः क
श्चिन्मौखर्यसाधनः॥ स्थापयत्याप्यमात्मानमाप्तं त्वाप्त्या प्रभिद्यते॥ बभ्रुर्गूढ इवाणीभिरबुधैर्बहुश्रुतः किंवैवक्ष्यति
संजल्पे कुंडभेदीजडो यथा सद्वृत्तैर्न विगृह्णीयात भिषगल्पश्रुतैरपि॥ हन्यात्प्रश्नाष्टकेनादावितरांस्त्वात्ममानिनः॥ दंभिनोमु
खराह्यज्ञाः प्रभूताबद्धभाषिणः प्रायःप्रायेणसमुखाः संतोयुक्ताल्पभाषिणः तत्वज्ञानप्रकाशार्थमहंकारमनाश्रिताः
स्वल्पाभाषाद्यमुखरान्मर्षयेन्नाविवादिनः॥ परोभूतेष्वनुक्रोशस्तत्वज्ञाने परादया येषां तेषामसद्वादनिग्रहेनिरतामति
॥ असत्पक्षाक्षणिकावार्ति दंभपारुष्यसाधनाः भवंत्यनाप्ताः स्वेतंत्रे प्रायः परविकत्थनाः तान्कालपाशसदृशान्वर्जये
च्छास्त्रदूषकान्॥ सेवेत शमान्वितान्ज्ञानपूर्णान्भिषक्तमान्॥ समग्रं दुःखमायत्तमविज्ञाने द्वयाःश्रयं सुखंसमस्तेविज्ञाने
विमलं च प्रतिष्ठितं॥ इदमेवमुदारार्थमज्ञानांनप्रकाशकं शास्त्रंप्रनष्टदृष्टीनां यथैवादित्यमंडलं॥ तत्रश्लोकाः॥ ॥
अर्थेदशमहामूलाः संज्ञाचैषांयथाकृता॥ अयनांताष्टरूपाश्च रूपं वेदाविदांचयत॥ सप्तकश्चाष्टकश्चैव परिप्रश्न
सनिर्णयः॥ यथावाक्यंयथार्थं च याद्युधाश्चैकदेशिकाः॥ अर्थेदशमहामूलेसंज्ञताःसंप्रकाशिताः॥ संग्रहश्चायमध्या
यस्तंत्रस्यास्यैव केवलः॥ यथासुमनसां सूत्रं संग्रहार्थं विधीयते॥ संग्रहार्थं तथार्थानामृषिणां संग्रहः कृतः॥ ७ ॥
इतिश्री दृढबलमहामूलीयोनामात्रिंशोध्यायः ३० ॥ ॥७॥ अग्निवेशकृतेतंत्रेचरकप्रतिसंस्कृते॥ सत्रस्थानमिदंतंत्रं
यथावत्समाप्यते॥ ॥७॥ ॥३०॥ ॥७॥ शाके १७८३ पौषशुक्लचतुर्थीतद्दिने पुण्यग्रामे लेखकोपनामकसख
रामेन हस्तेलिखितं समाप्तं॥ श्रीसांबप्रसन्न॥ शुभमस्तु॥ ७ ७ ७ ७ ७ ॥ ॥

चरकसं०

५८

इति चरकसंहितायां चिकित्सास्थाने रसायने आमलकायसकरपादो नाम तृतीयः पादः संपूर्णः

५८

स्तुतिभिर्गंगाप्रभवममरगंधर्वयक्षकिंनरानुचरितमनेकरत्ननिचयमचिंत्याद्भुतप्रभावं ब्रह्मर्षिसिद्धचारणा
नुचरितं दिव्यतीर्थौषधिप्रभवमतिशरण्यं हिमवंतममराधिपतिगुप्तं जग्मुर्भृग्वंगिरोऽत्रिवसिष्ठः
कश्यपागस्त्यपुलस्त्यवामदेवासितगौतमप्रभृतयो महर्षयः ॥ तानिंद्रः सहस्रदृगमरगुरुरब्रवीत् ॥
स्वागतं ब्रह्मविदां ज्ञानतपोधनानां महर्षीणां ॥ अस्ति ननु वो ग्लानिरप्रभावो वैस्वर्यं वैवर्ण्यं च ग्राम्यवासकृतमसु
खमसुखानुबंधं च ॥ ग्राम्यो हि वासो मूलमशस्तानां ततः कृतः पुण्यकृद्भिरनुग्रहः प्रजानां स्वशरीरमवेक्षि
तुं कालः ॥ कालश्चायमायुर्वेदोपदेशस्य ब्रह्मर्षीणामात्मनः प्रजानामनुग्रहार्थमायुर्वेदमश्विनौ मह्यं
प्रायच्छतां प्रजापतिरश्विभ्यां प्रजापतये ब्रह्मा प्रजानामल्पमायुर्जराव्याधिबहुलमसुखानुबंधमल्पत्वादल्प
तपोदमदानाध्ययनसंचयं मत्वा पुण्यतममायुः ॥ प्रकर्षकरं जराव्याधिप्रशमनमूर्जस्करममृतं शिवं पु
ण्यमुदारमुदात्तं भवंतो मत्तः श्रोतुमर्हथ उपधारयितुं प्रकाशयितुं च प्रजानुग्रहार्थमार्षं ब्रह्मचर्यं प्रति मै
त्रीं कारुण्यमात्मनश्चानुत्तमं पुण्यमुदारं ब्राह्मं धार्म्यं कर्मेति ॥ तच्छ्रुत्वा विबुधपतिवचनमृषयः संक
मर्योवाच ॥ ॥ एतत्सर्वमनुष्ठेयमयं च कालः सर्वरसायनानां दिव्याश्चौषधयो हिमवत्प्रभवाः प्राप्तवीर्या
स्तद्यथा ॥ ऐंद्री ब्राह्मी पयस्या क्षीरपुष्पी श्रावणी महाश्रावणी शतावरी विदारी जीवंती पुनर्नवा स्थिरा वच
छत्रातिछत्रा मेदा महामेदा जीवनीयाश्चान्याः पयसा प्रयुक्ताः षण्मासात्परमायुर्वयस्तरुणम
नामयत्वं स्वरवर्णसंपदुपचयं मेधां स्मृतिमुत्तमबलमिष्टांश्चापरान्भावानावहंति सिद्धाः ॥ ब्रह्म
सुवर्चला नामौषधिर्या सुवर्णक्षीरा पुष्करसदृशपत्रा आदित्यपर्णी नामौषधिर्या सूर्यकांतेति ज्ञायते ॥
सुवर्णक्षीरा सूर्यमंडलाकारपुष्पा नारी नामौषधिर्याश्वबलेति ज्ञायते बल्वजसदृशपत्रा काष्ठगोधा नामौष
धिर्गोधाकारा सर्पा नामौषधिः सर्पाकारा सोमा नामौषधिराजः ॥ पंचदशपर्वा स सोम इव वर्धते हीयते च
॥ पद्मा नामौषधिः पद्माकारा पद्मरक्ता पद्मगंधाः ॥ अजा नामौषधिः साजशृंगी ज्ञायते ॥ नीला नीलक्षी
रपुष्पा लताविनताबहुला ॥ इत्यासामष्टानामौषधीनां यां यामेवोपलभेत तस्यास्तस्याः स्वरसस्य

PAGE(S) MISSING
NOT AVAILABLE

1106

ऋतिभिर्गंगाप्रभवममरगंधर्वयक्षकिंनरानुचरितमनेकरत्ननिचयमचिंत्याद्भुतप्रभावंब्रह्मर्षिसिद्धचारणा
नुचरितंदिव्यतीर्थौषधिप्रभवमतिशरण्यंहिमवंतममराधिपतिगुप्तंजग्मुर्भृग्वंगिरोत्रिवसिष्ठ
कश्यपागस्त्यपुलस्त्यवामदेवासितगौतमप्रभृतयोमहर्षयः॥ तानिंद्रः सहस्रदृगमरगुरुरब्रवीत्॥
स्वागतंब्रह्मविदांज्ञानतपोधनानांमहर्षीणां॥ अस्ति खलु ग्लानिरप्रभावोवैवर्ण्यंचग्राम्यवासकृतमसु
खमसुखानुबंधंच॥ ग्राम्योहिवासोमूलमशस्तानांततः कृतः पुण्यकृद्भिरनुग्रहः प्रजानांस्वशरीरमवेक्षि
तुंकालः॥ कालश्चायमायुर्वेदोपदेशस्यब्रह्मर्षिणामात्मनः प्रजानामनुग्रहार्थमायुर्वेदमश्विनौमह्यं
प्रायच्छतांप्रजापतिरश्विभ्यांप्रजापतयेब्रह्मा प्रजानामल्पमायुर्जराव्याधिबहुलमसुखानुबंधमल्पत्वादल्प
तपोदमदानाध्ययनसंचयंमत्वापुण्यतममाहुः॥ प्रकर्षकरंजराव्याधिप्रशमनमूर्जस्करममृतंशिवंपु
ण्यमुदारमुदारंभवंतोमत्तःश्रोतुमर्हथउपधारयितुंप्रकाशयितुंचप्रजानुग्रहार्थंमार्षंब्रह्मचर्यंप्राणिमे
षि कारुण्यमात्मनश्चानुत्तमंपुण्यमुदारंब्रह्मण्यमक्षयंकर्मेति॥ ततश्रुत्वाविबुधपतिवचनमृषयःसंक
मय्योवाच॥ ॥एतत्सर्वमनुष्ठेयमयंचकालःसर्वरसायनानांदिव्याश्चौषधयोहिमवत्प्रभवाः प्राप्तवीर्या
स्तद्यथा॥ ऐंद्रीब्राह्मीपयस्याक्षीरपुष्पीश्रावणीमहाश्रावणीशतावरीविदारीजीवंतीपुनर्नवास्थिरावच
छत्रातिच्छत्रामेदामहामेदाजीवनीयाश्चान्यायाः पयसाप्रयुक्ताः षण्मासात्परमायुर्वयस्तरुणम
नामयत्वंस्वरवर्णसंपदुपचयंमेधांस्मृतिमुत्तमंबलमिष्टांश्चापरान्भावानावहंतिसिद्धाः॥ ब्रह्म
सुवर्चलानामौषधिर्यासुवर्णक्षीरपुष्पासहस्रपत्राआदित्यपर्णीनामौषधेयासूर्यकांतेतिज्ञायते॥
सुवर्णक्षीरासूर्यमंडलाकारपुष्पानारीनामौषधिर्याश्चबलेतिज्ञायतेश्वेतसदृशपत्राकाष्टगोधानामौष
धिर्गोधाकारासर्पानामौषधिःसर्पाकारासामानामौषधिराजः॥ पंचदशपत्रास्सासोमइववर्धतेहीयतेच
॥ पत्रानामौषधिःपद्माकारापद्मरक्तापद्मगंधाः॥ अजानामौषधिःसाजशृंगीज्ञायते॥ नीलानीलक्षी
रपुष्पालताविनताबहुला॥ इत्यासामष्टानामौषधीनांयांयामेवोपलभेततत्स्यास्तस्याःस्वरसस्य

चरकवि॰ सोऽहित्यं हृत्वा स्नेहभाविताया मार्द्रपलाशद्रोण्यां सापिधानायां दिग्वासाः शयीत ॥ तत्र प्रलीयते षण्मासेन पुनः सं
भवति ॥ तस्याजंपयः प्रत्ययः स्थापनषण्मासेन देवतानुकारी भवति ॥ वयोवर्णस्वराकृतिबलप्रभाभिः स्वयंचा
७ स्य सर्वे वाचोगतानि प्रादुर्भवंति ॥ दिव्यंचास्य चक्षुः श्रोत्रंच भवति ॥ गतिर्योजनसहस्रं दशवर्षसहस्राण्यायुर
नुपद्रवं चेति ॥ भवंति चात्र ॥ दिव्यादीनामोषधीनां यः प्रभावः स भवादृशैः ॥ शक्यः सोढुमशक्यस्तु स सोढुम
कृतात्मभिः ॥ ओषधीनां प्रभावेण तिष्ठतां स्वेच वर्त्मनि ॥ भवतामखिलं श्रेयः सर्वमेवोपपत्स्यते ॥ वानप्र
स्थैर्गृहस्थैश्च प्रयतैर्नियतात्मभिः ॥ सेव्या ओषधयो ह्येता सेवितुं विषयाभिज्ञाः ॥ तृणक्षेत्रगुणैः सर्वा मध्यमेन च
कर्मणा ॥ मृदुवीर्यतरास्तासां विधिर्ज्ञेयः स एव तु ॥ पर्येष्टव्याः प्रयोक्तुं वा यसमर्यादकरवार्थिनः ॥ रसायनविधि
स्तेषामयमन्यः प्रवक्ष्यते ॥ बल्यानां बृंहणीयानां जीवनीयाश्च ये दश ॥ वयसः स्थापनानां च खदिरस्यासन
स्य च ॥ खर्जूराणां मधूकानां मुस्तानामुत्पलस्य च ॥ मृद्वीकानां विडंगानां वचायाश्चित्रकस्य च ॥ शतावर्याः पयस्य
या पिप्पल्या योगकस्य च ॥ ऋध्या नागबलश्वदृ रसादाया धवस्य च ॥ रसाः पृथक् पृथग्ग्राह्याः पलाशक्षीर
एव च ॥ एषां पात्रेणमितान् भाग्याल्लेतथा ज्वरादीन् अथ्यातंकान् मिथ्योपचरितान् कालमृत्यूनपथ्यामद्
ति ॥ अथाग्निवेशः पप्रच्छ ॥ किंतु ॥ खलु भगवन् ज्वरितेभ्यः पानीयमुष्णं प्रयच्छंति ॥ भिषजो भूयिष्ठं ॥ न
च तथा शीतमिति शीतसाध्योपि धातुर्ज्वरकर इति मुवाच भगवान् आत्रेयः ॥ ज्वरितस्य कायसमुत्था
न देशकालपूर्वलिंगभेदेनोयशः विशेषानभिसमीक्ष्य पाचनार्थं च पाचनीयमुष्णं प्रयच्छंति ॥ भिष
जो भूयिष्ठं ज्वरो ह्यामाशयसमुत्थः प्रायो भेषजानि चामाशयसमुत्थानां विकाराणां पाचनवमनापतर्पण
समर्थानि भवंति ॥ पाचनार्थं च पाचनीयमुष्णं तस्मादेतत् ज्वरितेभ्यः प्रयच्छंति ॥ भिषजो भूयिष्ठं ॥ तद्धि
तेषां पीतं वातमनुलोमयति ॥ अग्निं वादर्यमुदीरयति ॥ श्लेष्माणं च परिशोषयति ॥ क्षिप्रं च जरां प्रयच्छं ७
ति ॥ स्वल्पमपि च पीतं तृष्णोपशमनायोपकल्पते ॥ तथायुक्तमपि चैतत् ॥ नात्यर्थोष्णपित्तज्वरे सदाहः
भ्रमप्रलापातिसारे वा देयं उष्णेन हि दाहभ्रमप्रलापातिसारा भूयोभिवर्धंते ॥ शीतेन चोपशाम्यंती

ति ॥ भवति चात्र शीतेनोष्णकृतान् रोगान् शमयंति भिषग्विदः ॥ ये च शीतकृता रोगास्तेषामुष्णं भिषग्जितमिति ॥
एवमितरेषामपि व्याधीनां निदानविपरीतमौषधमिच्छंति ॥ तथापतर्पणनिमित्तानामपि व्याधीनां पूरण
मंतरेण न शांतिरस्ति ॥ तथा पूरणनिमित्तानां व्याधीनामंतरेणापतर्पणमिति ॥ अपतर्पणमपि च त्रिविधं लं
घनं पाचनं दोषावसेचनं च ॥ तत्र लंघनमल्पदोषाणां ॥ लंघनेन ह्यग्निमारुतवृद्ध्या वातातपपरीतमिवा
ल्पमुदकमल्पो दोषः ॥ प्रशोषमापद्यते ॥ लंघनपाचनाभ्यां मध्यबलः सूर्यसंतापमारुताभ्यां पांशुभस्मावकिरणै
रिव चानतिबहूदकं दोषमध्यो दोषः प्रशोषमापद्यते ॥ बहुदोषाणां पुनर्दोषावसेचनमेव कार्यं न ह्यभिन्ने केदार
सेतौ पल्वलप्रसेकोऽस्ति तद्वद्दोषावसेचनं तु खल्वश्रुधानां भेषजं प्राप्तकालमपि आतुरस्य नैवंविधस्य कुर्यात् ॥ तद्य
था ॥ अनपवादप्रतीकारस्याधनस्यापरिचारकस्य वैद्यमानिनश्च ॥ चंडस्यासूयकस्य ॥ तीव्राधर्मरुचेरतिक्षीण
बलमांसशोणितस्यासाध्यरोगोपद्रुतस्य मुमूर्षुलिंगान्वितस्य चेति ॥ एवंविधं ह्यातुरमुपचरन् भिषक् पापीयसा
अयशसा संयोगं गच्छतीति ॥ भवंति चात्र ॥ अल्पोदकद्रुमो यस्तु प्रवातः प्रचुरातपः ॥ ज्ञेयः स जांगलो देशः स्वल्परो
गतमोऽपि सः ॥ प्रचुरोदकवृक्षो यो निवातो दुर्लभातपः ॥ सोनूपो बहुदोषश्च समः साधारणो मतः ॥ तद्वालेषानुबंधेः
वा यस्य स्याद्दशभं पलं ॥ कर्मवत्तु न कर्तव्यमेतद्बुद्धिमतां मतं ॥ पूर्वरूपाणि सामान्यहेतवश्च सलक्षणाः ॥ देशो
ध्वंसश्च भेषज्यं हेतूनां मूलमेव च ॥ प्रागविकारसमुत्पत्तिरायुषश्च क्रियाक्रमः ॥ मरणं प्रति भूतानां कालाका
लविनिश्चयः ॥ यथा वत्कालमरणं यथायुक्तं च भेषजं ॥ सिद्धिं यात्योषधं येषां न कुर्याद्येन हेतुना ॥ तदात्रेयो
ग्निवेशाय निखिलं सर्वमुक्तवान् ॥ देशोध्वंसनिमित्तीये विमाने मुनिसत्तम इति ॥ ॥ इति श्रीचरकसंहितायां
विमानस्थाने जनपदोध्वंसनीयो नाम तृतीयोध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ अथातस्त्रिविधरोगविशेष
विज्ञानीयं विमानं व्याख्यास्यामः ॥ इति हस्माह भगवानात्रेयः ॥ त्रिविधं रोगविशेषविज्ञानं भवति ॥ तद्यथा ॥
उपदेशः प्रत्यक्षमनुमानमिति ॥ तत्रोपदेशो नामाप्तवचनमाप्ता ह्यवितर्कस्मृतिविभागविदो निःप्रीत्युपता
पदर्शिनश्च तेषामेवंगुणयोगात् यद्वचनं तत्प्रमाणं अप्रमाणं पुनर्मत्तोन्मत्तमूर्खरक्तदुष्टादुष्टं वचनमिति
॥

चरकवि॰

८

॥ प्रत्यक्षं तु खलु यत् स्वयमिन्द्रियैर्मनसा चोपलभ्यते ॥ अनुमानं तु खलु तर्को युक्त्यपेक्षः ॥ त्रिविधेन तु खल्वनेन
ज्ञानसमुदयेन पूर्वं परीक्ष्य रोगं सर्वथा सर्वमथोत्तरकालमध्यवसानमदोषं भवति ॥ न हि ज्ञानावयवेन
न कृत्स्ने ज्ञेये ज्ञानमुत्पद्यते ॥ त्रिविधे त्वस्मिन् ज्ञानसमुदाये पूर्वमाप्तोपदेशात् ज्ञानं ततः ॥ प्रत्यक्षानुमानाभ्यां परी
क्षोपपद्यते ॥ किं ह्यनुपदिष्टं पूर्वं प्रत्यक्षानुमानाभ्यां परीक्ष्यमाणो विद्यात् ॥ तस्माद् द्विविधा परीक्षा ज्ञानवतां
प्रत्यक्षमनुमानं च त्रिविधा वा सहोपदेशेन तत्रेदमुपदिशन्ति ॥ बुद्धिमतो रोगमेकैकमेवं प्रकोपणमेवं योनिमे
वमात्मानमेवमधिष्ठानमेवं संस्थानमेवं वेदनमेवं शब्दस्पर्शरसरूपगन्धमेवमुपद्रवमेवं वृद्धिस्थानक्षयसमन्वि
तमेवमुपरिणाममुदर्कमेवं नामानमेवं विद्यात् ॥ ॥ तस्मिन्निदं प्रतीकारार्थं प्रवृत्तिरथवा निवृत्तिरित्युपदेशात् ॥
ज्ञायते ॥ प्रत्यक्षतस्तु खलु रोगतत्त्वं बुभुत्समानः सर्वैरिन्द्रियैः सर्वानिन्द्रियार्थानातुरशरीरगतान् परीक्षेत ॥ तथा ॥
अन्त्रकूजनं सन्धिस्फुटनमङ्गुलीपर्वणां च स्वरविशेषांश्च ये चान्येऽपि केचिच्छरीरोपगताः शब्दाः स्युस्तान् श्रोत्रेण
परीक्षेत ॥ वर्णसंस्थानप्रमाणच्छायाः शरीरप्रकृतिविकारौ चक्षुर्वैषयिकाणि यानि चान्यान्यनुक्तानि तानि चक्षुषा
परीक्षेत ॥ रसं तु खल्वातुरशरीरगतमिन्द्रियवैषयिकमप्यनुमानादवगच्छेत् ॥ न ह्यस्य प्रत्यक्षेण ग्रहणमुपपद्यते ॥
तस्मादातुरपरिप्रश्नेनैवातुरमुखरसं विद्यात् ॥ यूकापसर्पणेन त्वस्य शरीरवैरस्यं मक्षिकोपसर्पणेन श
रीरस्य माधुर्यं लोहितपित्तसंदेहे तु किं धारि लोहितमपित्तमिति ॥ ॥ श्वकाकभक्षणात् धारि लोहितमलक्षणा
त्तु लोहितपित्तमित्यनुमन्तव्यमेवमन्यानप्यातुरशरीरगतान् रसाननुमिमीत ॥ गन्धांस्तु खलु सर्वशरीरगतानातु
रस्य प्रकृतिवैकारिकान् घ्राणेन परीक्षेत ॥ स्पर्शं पाणिना प्रकृतिविकृतियुक्तमिति प्रत्यक्षतोऽनुमानैकदेश
तश्च ॥ इमे तु खल्वन्येऽप्येवमेव भूयोऽनुमानज्ञेया भवन्ति भावाः तद्यथा ॥ अग्निं जरणशक्त्या बलं ॥ व्यायामश
क्त्या श्रोत्रादीनि शब्दादिग्रहणेन मनोऽर्थाव्यभिचारेण विज्ञानं व्यवसायेन रजः संगेन ॥ मोहमविज्ञानेन क्रोध ८
मभिद्रोहेण शोकं दैन्येन हर्षमामोदेन प्रीतिं तोषेण भयं विषादेन धैर्यमविषादेन वीर्यमुत्थानेन अवस्थानम
विभ्रमेण श्रद्धामभिप्रायेण ॥ मेधां ग्रहणेन संज्ञां नामग्रहणेन स्मृतिं स्मरणेन ॥ ह्रियमपत्रपणेन ॥

शीलमनुशीलनेन ॥ द्वेषं प्रतिघातेन ॥ उपधिमनुबन्धेन धृतिमलौल्येन वश्यतां विधेयतया च वयोभक्तिसात्म्यव्याधि
समुत्थानानि देशोपशयवेदनाविशेषेण गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां दोषप्रमाणविशेषमपचारवि
शेषेणायुषः क्षयमरिष्टैरुपस्थितश्रेयस्त्वं कल्याणाभिनिवेशेनामलं सत्त्वमविकारेणेति ग्रहण्यास्तु मृदुदारुण
त्वं स्वप्नदर्शनमभिप्रायं द्विष्टेष्टसुखदुःखानि चातुरपरिप्रश्नेनैव विद्यादिति ॥ तत्र श्लोकः ॥ आप्तश्चोपदे
शेन प्रत्यक्षकरणेन च ॥ अनुमानेन च व्याधीन् सम्यग्विद्याच्चिकित्सकः ॥ सर्वथा सर्वमालोच्य यथासंभवमर्थवि
त् ॥ अथाध्यवस्येत्तत्त्वे च कार्ये च तदनन्तरं ॥ कार्यतत्त्वविशेषज्ञः प्रतिपत्तौ न मुह्यति ॥ अमूढः फलमाप्नोति यदमो
हनिमित्तजं ॥ ज्ञानबुद्धिप्रदीपेन यो नाविशति योगवित् ॥ आतुरस्यान्तरात्मानं न स रोगांश्चिकित्सति ॥ सर्वरोग
विशेषाणां त्रिविधं ज्ञानसंग्रहं ॥ यथा चोपदिशन्त्याप्ताः प्रत्यक्षं गृह्यते यथा ॥ ये यथा चानुमानेन ज्ञेयास्तांश्चाप्यु
दारधीः ॥ भाषितान् रोगविज्ञाने विमाने मुनिरुक्तवान् ॥ इति ॥ ॥ इति श्रीचरकसंहितायां विमानस्थाने त्रिविधरो
गविशेषविज्ञानीयो नाम चतुर्थोऽध्यायः ॥ ४ ॥ ४ ॥ ॥ अथातः स्रोतोविमानं व्याख्यास्यामः ॥ इति ह ॥
यावन्तः पुरुषे मूर्तिमन्तो भावविशेषास्तावन्त एवास्मिन् स्रोतसां प्रकारविशेषाः सर्वभावा हि पुरुषे नान्तरेण स्रोतां
स्यभिनिर्वर्तन्ते ॥ क्षयं वाप्यधिगच्छन्ति ॥ स्रोतांसि खलु परिणाममापद्यमानानां धातूनामभिवाहीनि भवन्त्ययना
र्थेन ॥ अपि चैके स्रोतसामेव समुदयं पुरुषमिच्छन्ति सर्वगतत्वात् सर्वसरत्वाच्च दोषप्रकोपणप्रशमनानां तत्तु
तदेवं यथा वदन्ति ॥ स्रोतांसि यच्च वहन्ति तत्र वावाहितानि सर्वत्र दृश्यन्तेऽपि तु बहुलत्वात् ॥ खलु केचिदपरिसंख्ये
यान्याचक्षते ॥ स्रोतांसि परिसंख्येयानि पुनरन्ये तेषां खलु स्रोतसां यथास्थूलं कालं च चित्तप्रकारान् मूलतश्चैव प्रको
पविज्ञानतश्चानुव्याख्यास्यामः ॥ ये भविष्यन्त्यलमनुक्तार्थज्ञानाय ज्ञानवतां विज्ञानाय चाज्ञेभ्यः ॥ तद्यथा प्राणोद
कान्नरसरुधिरमांसमेदोऽस्थिमज्जशुक्रमूत्रपुरीषस्वेदवहानि वातपित्तश्लेष्मणां पुनः सर्वशरीरचराणां सर्वस्रोतां
स्ययनभूतानि तद्वदतीन्द्रियाणां सत्त्वादीनां केवलं चेतनावच्छरीरमयनभूतमधिष्ठानभूतं च ॥ तदेतत् स्रोतसां प्र
कृतिभूतत्वान्न विकारैरुपसृज्यते ॥ शरीरं चैतत्र प्राणवहानां स्रोतसां हृदयं मूलं महास्रोतश्च प्रदुष्टानां तु खल्वे

चर.वि. षामिदं विशेषविज्ञानं भवति ॥ तद्यथा ॥ अतिसृष्टमतिबद्धं कुपितमल्पाल्पमभीक्ष्णं वा सशब्दशूलमुच्छ्वसंतं दृष्ट्वा प्राणवहा
न्यस्य श्रोतांसि प्रदुष्टानीति विद्यात् ॥ उदकवहानां स्रोतसां तालु मूलं क्लोम च प्रदुष्टानां तु खल्वेषामिदं विशेषविज्ञानं भव
९ ति ॥ जिह्वाताल्वोष्ठकंठक्लोमशोषं पिपासां चातिप्रवृद्धां दृष्ट्वोदकवहान्यस्य स्रोतांसि प्रदुष्टानीति विद्यात् ॥ उदकवहा
नामिव श्रोतांसि प्रदुष्टानीति विद्यात् ॥ अन्नवहानां स्रोतसामामाशयो मूलं वामं च पार्श्वं प्रदुष्टानां तु खल्वेतेषामिदं
विशेषविज्ञानं ॥ अनन्नाभिलषणमरोचकाविपाकौ छर्दिं च दृष्ट्वान्नवहान्यस्य श्रोतांसि प्रदुष्टानीति विद्यात् ॥ रसव
हानां श्रोतसां हृदयं मूलं दश च धमन्यः ॥ शोणितवहानां स्रोतसां यकृन्मूलं ॥ प्लीहा च मांसवहानां स्रोतसां स्नायुर्मू
लं त्वक् च मेदोवहानां स्रोतसां वृक्कौ मूलं वपावहनं च ॥ अस्थिवहानां च श्रोतसां मेदो मूलं जघनं च मज्जवहानां श्रोत
सां मज्जानि मूलं संधयश्च ॥ शुक्रवहानां श्रोतसां वृषणौ मूलं शेफश्च प्रदुष्टानां खल्वेतेषां रसादिश्रोतसां विज्ञानान्यु
क्तानि ॥ विविधाशितपीतीये व्याधयो यान्येव हि धातूनां प्रदोषविज्ञानानि तान्येव यथास्वं धातुश्रोतसां मूत्रवहा
नां श्रोतसां बस्तिर्मूलं वंक्षणौ च दुष्टानां तु खल्वेषामिदं विशेषविज्ञानं मतिसृष्टमतिबद्धं कुपितमल्पाल्पमतीक्ष्णं वा सशू
लं मूत्रयंतं दृष्ट्वा मूत्रवहान्यस्य श्रोतांसि प्रदुष्टानीति विद्यात् ॥ पुरीषवहानां स्रोतसां पक्वाशयो मूलं स्थूलांत्रं गुदं च प्र
दुष्टानां तु खल्वेषामिदं विज्ञानं कृच्छ्रेणाल्पाल्पं ॥ सशब्दशूलमतिद्रवं कुपितमिति बहु चोपविशंतं दृष्ट्वा पुरीषवहान्य
स्य श्रोतांसि प्रदुष्टानीति विद्यात् ॥ स्वेदवहानां श्रोतसां मेदो मूलं रोमकूपाश्च प्रदुष्टानां खल्वेषामिदं विशेषवि
ज्ञानमस्वेदनमतिस्वेदनं पारुष्यमतिश्लक्ष्णतां परिदाहं रोमहर्षं च ॥ दृष्ट्वा स्वेदवहान्यस्य श्रोतांसि प्रदुष्टानी
तिविद्यात् ॥ श्रोतांसि शिरा धमन्यो रसायन्यो रसवाहिन्यो नाड्यः पंथानो अयनानि मार्गाः शरीरच्छिद्राणि
संवृतासंवृतस्थानानि आशयाः क्षयाः निकेताश्चेति ॥ शरीरे धात्ववकाशानां लक्ष्यालक्ष्याणां पर्यायेण नामानि
भवंति ॥ तेषां प्रकोपात्स्थानास्थाश्चैव मार्गगाश्च शरीरधातवः प्रकोपमापद्यंते तेषां वातप्रकोपादितराणि ९
श्रोतांस्येव धातवश्च धातून्प्रदूषयंति ॥ प्रदुष्टास्तेषां सर्वेषामेव वातपित्तश्लेष्माणो दुष्टा दूषयितारो भवंति दो
षस्वभावादिति ॥ तत्र श्लोकाः ॥ क्षयात्संधारणाद्रौक्ष्याद्व्यायामात्क्षुधितस्य च ॥ प्राणवाहीनि दुष्यंति श्रोतां

स्यन्यैश्च दारुणैः ॥ ऊष्मणामाद्भयाद्व्यायामादतिशुष्कान्नसेवनात् ॥ अंबुवाहीनि दुष्यंति तृष्णायाश्चातिपीडनात्
अतिमात्रस्याकाले वाहितस्य च भोजनात् ॥ अन्नवाहीनि दुष्यंति वैगुण्यात्पावकस्य च ॥ गुरुशीतमतिस्नि
ग्धमतिमात्रं समश्नता ॥ रसवाहीनि दुष्यंति चिंत्यानां चातिचिंतनात् ॥ विदाहीन्यन्नपानानि स्निग्धोष्णानि द्र
वाणि च ॥ रक्तवाहीनि दुष्यंति भजतां चातपानलौ ॥ अतिदुष्यंति भोज्यानि स्थूलानि च गुरूणि च ॥ मांसवाहीनि दुष्यं
ति भुक्त्वा च स्वपतां दिवा ॥ अव्यायामाद्दिवास्वप्नान्मेध्यानां चातिभक्षणात् ॥ मेदोवाहीनि दुष्यंति वारुण्याश्चाति
सेवनात् ॥ व्यायामादतिसंक्षोभादस्थ्नां चातिविघट्टनात् ॥ अस्थिवाहीनि दुष्यंति वातलानां च सेवनात् ॥ उत्पेषादत्य
भिष्यंदादभिघातात्प्रपीडनात् ॥ मज्जवाहीनि दुष्यंति विरुद्धानां च सेवनात् ॥ अकालयोनिगमनान्निग्रहादति
मैथुनात् ॥ शुक्रवाहीनि दुष्यंति शस्त्रक्षाराग्निभिस्तथा ॥ मूत्रितोदकभक्ष्यस्त्रीसेवनान्मूत्रनिग्रहात् ॥ मूत्रवाही
नि दुष्यंति क्षीणस्याभिक्षतस्य च ॥ विधारणादत्यशनादजीर्णाध्यशनात्तथा ॥ दुष्यंत्युच्चारवाहीनि दुर्बला
ग्नेः कृशस्य च ॥ व्यायामादतिसंतापाच्छीतोष्णाक्रमसेवनात् ॥ स्वेदवाहीनि दुष्यंति क्रोधशोकभयैस्तथा ॥
आहारश्च विहारश्च यः स्याद्दोषगुणैः समः ॥ धातुभिर्विगुणश्चापि श्रोतसां स प्रदूषकः ॥ अतिप्रवृत्तिः संगो वा
सिराणां ग्रंथयोपि वा ॥ विमार्गगमनं चापि श्रोतसां दुष्टलक्षणं ॥ स्वधातुसमवर्णानि वृत्तस्थूलान्यणूनि च ॥ श्रो
तांसि दीर्घाण्याकृत्या प्रतानसदृशानि च ॥ प्राणोदकान्नवाहानां दुष्टानां श्वासिकी क्रिया ॥ कार्या तृष्णोपशमनी तथै
वामप्रदोषिकी ॥ विविधाशितपीतीये रसादीनां यदौषधं ॥ रसादिश्रोतसां कुर्यात्तद्यथास्वमुपक्रमं ॥ मूत्रविट्स्वे
दवाहानां चिकित्सा मूत्रकृच्छ्रिकी ॥ तथातिसारिकी कार्या तथा ज्वरचिकित्सिकी ॥ ॥ तत्र श्लोकाः ॥ त्रयोदशानां मूला
नि स्रोतसां दुष्टलक्षणं ॥ सामान्यनामपर्यायाः कोपनानि परस्परं ॥ दोषहेतुः पृथक्त्वेन भेषजोद्देश एव च ॥
श्रोतोविमाने निर्दिष्टस्तथा चादौ विनिर्णयः ॥ केवलं विदितं यस्य शरीरं सर्वभावतः ॥ शारीराः सर्वभावाश्च
स कर्मस्कनमुह्यति ॥ ॥ इति श्रीचरकसंहितायां विमानस्थाने श्रोतोविमानं नाम पंचमोध्यायः ॥ ५ ॥
॥ ५ ॥ ॥ ५ ॥ अथातो रोगानीकं विमानं व्याख्यास्यामः ॥ इति ह स्माह भगवानात्रेयः ॥ १ ॥

चरक॰वि॰ द्वे रोगानीके भवतः प्रभावभेदेन साध्यं चासाध्यं च॥ द्वे रोगानीके बलभेदेन मृदु दारुणं च॥ द्वे रोगानीकेऽधिष्ठानभे
देन॥ शरीराधिष्ठानं मनोऽधिष्ठानं च॥ द्वे रोगानीके निमित्तभेदेन॥ स्वधातुवैषम्यनिमित्तं चागंतुनिमित्तं च॥ द्वे
रोगानीके आशयभेदेनामाशयसमुत्थं च पक्वाशयसमुत्थं च॥ एवमेतत्प्रभावबलाधिष्ठाननिमित्ताशयद्वैधं
१० सद्भेदप्रकृत्यंतरेण भिद्यमानमथवा संधीयमानं स्यादेकत्वं बहुत्वं वा॥ एकत्वं तावदेकमेव रोगानीकं दुःखसामान्या
द्बहुत्वं तु दश रोगानीकानि प्रभावभेदादीनि बहुत्वमपि च संख्येयं वा स्यादपरिसंख्येयं वा॥ संख्येयं तावद्यथो
क्तमष्टोदरीयेऽध्याये परिसंख्येयं महति रोगाध्याये रुग्वर्णसमुत्थानादीनामपरिसंख्येयत्वात्॥ न च संख्येया
येषु भेदप्रकृत्यंतरीयेषु विगीतिरित्यतो दोषवती स्यात्तत्र काचित् प्रतिज्ञानं चाविगीतिरित्यतः॥ स्याद्दोषव
ताभिन्नार्थे भेदमन्यथाभिनन्नथवा पुरस्तात्॥ भिन्ने भेदप्रकृत्यंतरेणाभिदनभेदं संख्याविशेषमापादयत्य
नेकधानवपूर्वभेदाग्रमुपहंति॥ समानायामपि तु खलु भेदप्रकृतौ प्रकृतानुयोगांतरमपि स्यं संति ह्यर्थांत
राणि समानशब्दाभिहितानि॥ संति चानर्थांतराणि विपर्यायशब्दाभिहितानि समानो हि रोगशब्दो दोषे
षु च व्याधिषु च दोषा ह्यपि रोगशब्दमातंकशब्दं यक्ष्मशब्दं दोषप्रकृतिशब्दं विकारशब्दं च लभंते॥ व्याध
यश्चाप्येवं॥ तत्र दोषेषु चैव व्याधिषु रोगशब्दः समानः॥ सोऽप्येषु तु विशेषवान्॥ तत्र व्याधयोऽपरिसंख्येया
भवंत्यतिबहुत्वात्॥ दोषास्तु खलु परिसंख्येया भवंत्यनतिबहुत्वात्॥ तस्माद्यथाविकारानुदाहरणार्थं
मनवशेषेण च दोषान् व्याख्यास्यामः॥ रजस्तमश्च मानसौ तयोर्विकाराः॥ कामक्रोधलोभमोहे
र्ष्यामानमदशोकचित्तोद्वेगभयहर्षादयः॥ वातपित्तश्लेष्माणस्तु खलु शारीरा दोषास्तेषामपि विकारा
ज्वरातीसारशोफशोषश्वासमेहकुष्ठादय इति॥ दोषाश्च केवला व्याख्याताः॥ विकारैकदेशश्च॥ तत्र तु खल्वेषां द्वया
नामपि दोषाणां त्रिविधं प्रकोपणं॥ भवत्यसात्म्येंद्रियार्थसंयोगः॥ प्रज्ञापराधः परिणामश्चेति १०
प्रकुपितास्तु खलु प्रकोपणविशेषाद्दूष्यविशेषाच्च विकारविशेषानभिनिर्वर्तयंत्यपरिसंख्येयानि॥
ते च विकाराः परस्परमनुवर्तमानाः कदाचिदनुबध्नंति॥ कामादयो ज्वरादयश्च नियतस्त्वनुबंधो नि

DR. BHAU DAJI MEMORIAL

यतं रजस्तमसोः परस्परं नह्यरजस्कं तमः प्रायः शारीरदोषाणामेकाधिष्ठानीयानां संसर्गो वा समानगुणत्वा
त्॥ दोषा हि दूषणैः समानाः तत्रानुबंध्यानुबंधविशेषः॥ स्वतंत्रो व्यक्तलिंगो यथोक्तसमुत्थानप्रशमो
भवत्यनुबंध्यस्तद्विपरीतलक्षणस्त्वनुबंधः अनुबंधलक्षणसमन्वितास्तत्र यदि दोषा भवंति॥ तत्त्रिकं
सन्निपातलक्षणमाचक्षते॥ द्वयं संसर्गमनुबंध्यानुबंधविशेषकृतस्तु बहुविधो भेद एवमेषसंज्ञा
प्रकृतौ भिषजां दोषेषु व्याधिषु च नानाप्रकृतिविशेषव्यूहः॥ अग्निषु शारीरेषु चतुर्विधा विशेषा बल
भेदेन भवंति॥ तद्यथा॥ तीक्ष्णो मंदः समो विषम इति॥ तत्र तीक्ष्णोऽग्निः सर्वापचारसहः तद्विपरीतस्तु
मंदः॥ समस्तु खल्वपचारतो विकृतिमापद्यते॥ अनपचारतस्तु प्रकृतावेवावतिष्ठते॥ समलक्षणविपरी
तलक्षणस्तु विषम इत्येते चतुर्विधाः अग्नयश्चतुर्विधानामेव पुरुषाणां भवंति॥ तत्र समवातपित्तश्लेष्
मणां प्रकृतिस्थानां समा भवंत्यग्नयो वातलानां तु वाताभिभूतेऽग्न्यधिष्ठाने विषमा भवंत्यग्नयः॥ पित्त
लानां तु पित्ताभिभूते ह्यग्न्यधिष्ठाने तीक्ष्णा भवंत्यग्नयः॥ श्लेष्मलानां तु श्लेष्माभिभूतेऽग्न्यधिष्ठाने मंदाः
भवंत्यग्नयः तत्र केचिदाहुः न समवातपित्तश्लेष्माणो जंतवः संति विषमाहारोपयोगित्वान्मनुष्याणां तस्मा
त्केचन वातप्रकृतयः केचित्पित्तप्रकृतयः॥ केचित्पुनः श्लेष्मप्रकृतयो भवंतीति॥ तच्चानुपपन्नं कस्मा
त्कारणात् समवातपित्तश्लेष्माणं ह्यरोगं कर्तुमिच्छंति भिषजः॥ प्रकृतिश्चारोग्यमारोग्यार्था च भेषज
प्रवृत्तिः सा चेष्टरूपा तस्माद्भवंति॥ समवातपित्तश्लेष्माणो न तु खलु संति॥ वातप्रकृतयः श्लेष्मप्र
कृतयो वा तस्य तस्य हि किल दोषस्याधिकभावात्॥ सा मा दोषप्रकृतिरुच्यते मनुष्याणां न च विकृतिष्ठि
तेषु॥ दोषेषु प्रकृतिस्थत्वमुपपद्यते॥ तस्मान्नैताः प्रकृतयः संति खलु वातलाः पित्तलाः श्लेष्मलाः
श्च॥ प्रकृतिस्थास्तु ते ज्ञेयाः तेषां तु खलु चतुर्विधानां पुरुषाणां चत्वार्येव प्रणिधानानि॥ श्रेयस्करा
णि भवंति॥ तत्र समः सर्वधातूनां सर्वकालं समधिकदोषाणां तु त्रयाणां यथास्वं दोषाधिक्यमभिस
मीक्ष्य दोषप्रतिकूलयोगानि त्रीण्येव प्रणिधानानि श्रेयस्कराणि भवंति॥ यावदग्नेः समीभावात्स

गेतुसममेव ॥ कार्यमेवंचेष्टाभेषजप्रयोगाश्चापरेतानविस्तारेणानुव्याख्यास्यामः ॥ नयखलुपुरुषाभवंत्या
तुराणोवनातुराः तास्त्वत्रांतरीयाणांभिषजां ॥ तद्यथा ॥ वातलः पित्तलः श्लेष्मलइति ॥ तेषांविशेषविज्ञा
नं वातलस्यवातनिमित्ताःपित्तलस्यपित्तनिमित्ताः ॥ श्लेष्मलस्यश्लेष्मनिमित्ताः ॥ व्याधयःप्रायेणबल
वंतश्चभवंति ॥ तत्रवातलस्यवातप्रकोपणोक्तान्यासेवमानस्याक्षिप्रंवातःप्रकोपमापद्यते ॥ नतथेतरौ
दोषौ ॥ सतस्यप्रकोपमापन्नोयथोक्तैर्विकारैःशरीरमुपतपति ॥ बलवर्णसुखायुषामुपघातायतस्यावज
यनं ॥ स्नेहस्वेदौविधिप्रयुक्तौमृदूनिचसंशोधनानि ॥ स्नेहस्वेदौविधिप्रयुक्तौमृदूनिचसंशोधनानि ॥ स्ने
होष्ममधुराम्ललवणयुक्तानि ॥ तद्वदभ्यवहार्याणि अभ्यंगप्रायाणि ॥ उपनाहनोपवेष्टनोन्मर्दनपरिषे
कावगाहनसंवाहनावपीडनवित्रासनविस्मापनविस्मरणानि ॥ सुरासवविधानंस्नेहाश्चानेकयोनयोदी
पनीयपाचनीयवातहरविरेचनीयोपहिताः ॥ तद्यथा ॥ शतपाक्याःसहस्रपाक्याः ॥ सर्वशःप्रयोगाः ॥ बस्त
योबस्तिनियमः ॥ सुखशीलताचेति ॥ पित्तलस्यापिपित्तप्रकोपणोक्तान्यासेवमानस्याक्षिप्रंपित्तंप्रकोपमा
पद्यते ॥ नतथेतरौदोषौ तदस्यप्रकोपमापन्नं ॥ यथोक्तैर्विकारैःशरीरमुपतपति वातवर्णसुखायुषामुप
घाताय ॥ तस्यावजयनंसर्पिःपानंसर्पिषाचस्नेहनमधश्चदोषहरणं ॥ मधुरतिक्तकषायशीतानांचौ
षधाभ्यवहार्याणांउपयोगोमृदुमधुरसुरभिशीतहृद्यानांगंधानांचोपसेवा ॥ मुक्तामणिहारावलीनां
चपरमशिशिरवारिसंस्थितानांधारणमुरसाक्षणेक्षणेचाग्र्यचंदनप्रियंगुकालेयमृणालशीतवारिभिः
रुतालकुमुदकोकनदसौगंधिकपुंडरीकपद्मानुगताभिरद्भिःप्रोक्षणं ॥ श्रुतिसुखमृदुमधुरमनोनुगतानां
चगीतवादित्राणांश्रवणंवाभ्युदयानांच ॥ सुहृद्भिश्चसंयोगश्चेष्टाभिः ॥ स्त्रीभिः ॥ सुशीतोपहितंशुक्
लस्रग्दामधारिणीभिः निशाकरांसुशीतलप्रवाहेतैर्म्यवासः ॥ शैलांतकपुलिनशिशिरसदनवसनव्यज
नपवनसेवारम्याणांचोपवनानांसुखशिशिरसुरभिमारुतोपवीजितानामुपसेवनं ॥ सेवनंच पद्मो

त्पलनलिनकुमुदसौगंधिकपुंडरीकशतपत्रहस्तानांसौम्यानांचसर्वभावानामुपसेवनमिति ॥ श्लेष्मलस्यापिश्ले
ष्मप्रकोपणोक्तान्यासेवमानस्यश्लेष्माक्षिप्रंप्रकोपमापद्यते ॥ नतथेतरौदोषौ सतस्यप्रकोपमापन्नोयथो
क्तैर्विकारैःशरीरमुपतपति ॥ बलवर्णसुखायुषामुपघातायतस्यावजयनंविधियुक्तानि ॥ तीक्ष्णानितीक्ष्
ष्णोष्णानिसंशोधनानिरूक्षप्रायाणिचाभ्यवहार्याणिकटुतिक्तकषायोपहितानितथैवधावनलंघनप्लु
वनपरिसरणजागरणयुद्धनियुद्धव्यवायव्यायामोद्वर्तनस्नानोत्सादनानि ॥ विशेषतश्चतीक्ष्णानांदीर्घकाल
स्थितानांमद्यानामुपयोगः ॥ सर्वशश्चोपवासः सधूमपानेतथोष्णवासः सधूमपानंतथोष्णवासः सुखप्र
तिषेधः ॥ सुखार्थमेवेतितत्रश्लोकः ॥ सर्वरोगविशेषज्ञःसर्वकार्यविशेषवित् ॥ सर्वभेषजतत्त्वज्ञोराज्ञः
प्राणपराभवतु ॥ प्रकृत्यंतरभेदेनरोगानीकविकल्पनं ॥ परस्परविरोधश्चसात्म्यानंरोगदोषयोः ॥
दोषसंख्याविकाराणामेकदेशःप्रकोपनं ॥ जयनंप्रतिचिंताचकायाग्नेर्लक्षणानिधे ॥ नारीणांवातला
दीनांप्रकृतिस्थापनानिच ॥ रोगानीकविमानेस्मिन्व्याहृतानिमहर्षिणा ॥ ॥ इतिश्रीचरकसंहितायां
विमानस्थानेरोगानीकविमानोनामषष्ठोध्यायः ॥ ६ ॥ ॥ ७ ॥ ९ ॥ अथातोव्याधितरूपीयंवि
मानंव्याख्यास्यामः ॥ ॥ इतिहभगवानआत्रेयः ॥ द्वौपुरुषौव्याधितरूपौभवतः तद्यथा ॥ गुरुव्याधितरे
कः ॥ सत्वभालशरीरसंपदुपेतत्वाल्लघु ॥ व्याधिरिवदृश्यते ॥ लघुव्याधिरपरः सत्वादीनांबलत्वात् ॥ गु
रुव्याधिरिवदृश्यते ॥ तयोरकुशलाःकेवलंचक्षुषैवरूपंदृष्ट्वाध्यवस्यंतोव्याधिगुरुलाघवेविप्रतिपद्यं
तेनहिज्ञानावयवेनकृत्स्नेज्ञेयेज्ञानमुपपद्यते ॥ विप्रतिपन्नास्तुखलुरोगज्ञानेउपक्रमयुक्तिज्ञानेभेष
जविकारयुक्तिज्ञानेचविप्रतिपद्यंते ॥ तेयदागुरुव्याधितंलघुव्याधितरूपमासादयंति ॥ तमल्पदोषंमत्वा
संशोधनकालेऽस्मैमृदुसंशोधनंप्रयच्छंतोभूयएवास्यदोषानुदीरयंति ॥ यदातुलघुव्याधितंगुरुव्याधित
रूपमासादयंतितंमहादोषंमत्वासंशोधनकालेस्मैतीक्ष्णंसंशोधनंप्रयच्छंतोदोषानतिनिर्हृत्यशरीर
मस्यक्षिण्वंति ॥ एवमवयवेनज्ञानस्यकृत्स्नेज्ञेयेज्ञानमितिमन्यमानाःस्खलंति ॥ विदितवेदितव्यास्तु

खलु भिषजः सर्वं सर्वथा यथासंभवं परीक्ष्याध्यवस्यंतो न क्वचिदपि विप्रतिपद्यंते ॥ यथेष्टमर्थमभिनिर्वर्तयंति ॥
तत्रश्लोकाः ॥ सत्वादीनां विकल्पेन व्याधीनां रूपमातुरं ॥ दृष्ट्वा विप्रतिपद्यंते बालाव्याधिबलाबले ॥ ते भेषज
१२ मयोगेन कुर्वंत्यज्ञानमोहिताः ॥ व्याधीनां विनाशाय क्लेशायमहतेपि वा ॥ प्राज्ञास्तु सर्वमाज्ञाय परीक्ष्यमिह
सर्वथा ॥ नस्खलंति प्रयोगेषु भेषजानां कदाचनेति ॥ व्याधितरूपाधिकारेश्रुत्वा व्याधिरूपसंख्याग्रसंभवं व्या
धिरूपं हेतुं विप्रतिपत्तौ च कारणं सापवादं विप्रतिपत्तिकारणं चानपवादं च भगवंतमात्रेयमग्निवेशस्ततःप
रं सर्वकृमीणां पुरुषसंश्रयाणां समुत्थानसंस्थानवर्णनामप्रभावचिकित्सितविशेषान् पप्रच्छोपसंगृह्य पा
दौ ॥ अथास्मै प्रोवाच भगवानात्रेयः ॥ इह खल्वग्निवेश विंशतिविधाः ॥ कृमयः पूर्वमुक्ता नानाविधेन प्रविभा
गेनान्यत्र सहजेभ्यस्ते पुनः प्रकृतिभिर्भिद्यमानाश्चतुर्विधा भवंति ॥ तद्यथा बाह्यमलजाः पुरीषजाः श्लेष्म
जाः शोणितजाश्चेति ॥ तत्र मलो बाह्यश्चाभ्यंतरश्च ॥ तत्र बाह्यमले संजातान् मलजान् संप्रचक्षते ॥ तेषां समुत्था
नं मणवास्तिलाकृतयो बहुपादाः ॥ वर्णस्तु शुक्लकृष्णश्च नामानि यूकापिपीलिकाश्च ॥ प्रभावः कंडूजननं कोठपि
टिकाभिनिर्वर्तनं च ॥ चिकित्सितं खल्वेषामपकर्षणं मलोपघातो मलकराणां च भावानामुपसेवनमिति ॥ शो
णितजानां तु कुष्ठैः समानं समुत्थानं स्थानं रक्तवाहिन्यो धमन्यः संस्थानमणवो वृत्ताः श्चापदाश्च सूक्ष्मत्वाच्चै
के भवंत्यदृश्याः ॥ वर्णस्ताम्रो नामानि केशादा लोमादा लोमद्वीपाः ॥ सौरसा उदुंबरा जंतुमातरश्चेति प्रभा
वः केशश्मश्रुलोमपक्ष्मप्रध्वंसो व्रणगतानां च हर्षकंडूतोदसंसर्पणान्यतिवृद्धानां च त्वक्सिरास्नायुमांस
तरुणास्थिभक्षणमिति ॥ चिकित्सितमप्येषां कुष्ठैः समानं ॥ तदुत्तरकालमुपदेक्ष्यामः ॥ श्लेष्मजाः क्षीरगु
डतिलमत्स्यानूपमांसपिष्टान्नपरमान्नकुसुंभस्नेहाजीर्णपूतिक्लिन्नसंकीर्णविरुद्धासात्म्यभोजनसमु १२
त्थानास्तेषामामाशयः स्थानं ॥ प्रवर्धमानास्तूर्ध्वमधोवा विसर्पंत्युभयतो वा संस्थानवर्णविशेषास्तु श्वेता ॥
पृथुब्रध्नसंस्थानाः केचित् केचिद्वृत्तपरिणाहा गंडूपदाकृतयः ॥ श्वेताश्च ताम्रावभासाः ॥ केचिदणवो दी

र्घास्तंत्वाकृतयः श्वेताः तेषां त्रिविधानां श्लेष्मनिमित्तानां कृमीणां नामानि ॥ अंत्रादा उदरादा हृदयादा हृदयचराश्चु
रवो दर्भपुष्पाः ॥ सौगंधिका महागुदाश्चेति प्रभावो हृल्लासः ॥ आस्यस्रवणमरोचकाविपाकौ ज्वरो मूर्छा जृंभा
मर्दः ॥ छर्दिः क्षवथुरानाहः कार्श्यं पारुष्यमिति ॥ पुरीषजास्तुल्यसमुत्थानाः श्लेष्मजैस्तेषां स्थानं ॥ पक्वाशयः
प्रवर्धमानास्त्वधो विसर्पंति ॥ यस्य ते पुनरामाशयाभिमुखाः स्युः यदंतरं तस्योद्गारनिश्वासाः ॥ पुरीषगंधि
नः स्युः ॥ संस्थानवर्णविशेषास्तु सूक्ष्मवृत्तपरिणाहाः श्वेता दीर्घा ऊर्णांशुसंकाशाः केचित् ॥ केचित्पुनः स्थूलवृ
त्तपरिणाहाः श्यावनीलहरितपीताः तेषां नामानि ककेरुका मकेरुका लेलिहाः सशूलकाः ॥ सौसुरादाश्चे
ति ॥ प्रभावः पुरीषभेदः ॥ कार्श्यपारुष्यलोमहर्षाभिनिर्वर्तनं च ॥ एत एव चास्य गुदमुखं परितुदंतः ॥ कंडूं चोप
जनयंतः ततो गुदमुखं पर्यासते ॥ संजातहर्षा गुदनिष्क्रमणमतिवेलं कुर्वंत्येवमेष श्लेष्मजानां पुरीषजानां च कृ
मीणां समुत्थानादिविशेषः ॥ चिकित्सितं तु खल्वेषां समासेनोपदिश्य पश्चाद्विस्तरेणोपदेक्ष्यामः ॥ तत्र सर्वकृ
मीणामपकर्षणमेवादितः कार्यं ततः प्रकृतिविघातोनंतरं निदानोक्तानां भावानामनुपसेवनमिति तत्राप
कर्षणं ॥ हस्तेनाभिक्रमोपकरणवतापनं ॥ यनमनुपकरणेन चस्थानगतानां च भेषजमपकर्षणं न्यायत
श्चतुर्विधं ॥ तद्यथा ॥ शिरोविरेचनं वमनं विरेचनमास्थापनमित्यपकर्षणविधिः ॥ प्रकृतिविघातस्त्वेषां ॥
कटुतिक्तकषायक्षारोष्णानां द्रव्याणामुपयोगः ॥ यच्चान्यदपि किंचित् श्लेष्मपुरीषप्रत्यनीकभूतं तस्याहित ॥ प्रकृ
तिविघातानंतरं निदानोक्तानां भावानामनुपसेवनं ॥ इतियदुक्तं निदानविधौ ॥ तस्य तस्य वर्जनं तथाविधप्राया
णां चापरेषां द्रव्याणां विवर्जनमिति लक्षणतश्चिकित्सितमनुव्याख्यातमेतदेव पुनर्विस्तरेणोपदेक्ष्यते ॥ तत्रैनं
कृमिकोष्ठिनमातुरमग्ने षडहं सप्तरात्रं वा स्नेहस्वेदाभ्यामुपपाद्य श्वोभूते एनं संशोधनं पाययितास्मी
ति क्षीरदधिगुडतिलमत्स्यानूपमांसपिष्टान्नपरमान्नकुसुंभस्नेहसंप्रयुक्तैर्भोज्यैः ॥ सायं प्रातश्चोपपाद
येत् ॥ समुदीरणार्थं चैव कृमीणां कोष्ठाभिसरणार्थं च ॥ अथ भिषक् व्युष्टायां रात्र्यां सुखोषितं सुप्रजीर्णभुक्तं
चाहायास्थापनवमनविरेचनैस्तदहरेवोपपादयेत् उपपादनीयश्चेत्स्यात् सर्वान् परीक्ष्य विकारान् सम्य

चरक.वि. गथाहरेति ब्रूयात्॥ मूलकसर्षपलशुनकरंजशिग्रुकमधुशिग्रुकखरपुष्पाभूस्तृणसुमुखसुरसकुठेरकगंडीर
कालमालकपर्णासक्षवकफणिज्झकानि सर्वाणि अथवा यथालाभं तान्याहृत्याभिसमीक्ष्य खंडशः छेदयित्वा प्र
क्षाल्य पानीयेन सुप्रक्षालितायां स्थाल्यां समवाप्य गोमूत्रेणार्धोदके॥ नालोड्याभ्यासिच्य साधयेत्॥ दाध्यासं
३३ ततमवघट्टयन् तमुपयुक्तभूयिष्ठेंऽभसि गतरसेष्वौषधेषु स्थालीमवहृत्य सुपरिस्रुतं कषायं सुखोष्णं मदनफलः
पिप्पलीमवहृत्य सुपरिस्रुतं कषायं सुखोष्णं मदनफलपिप्पलीविडंगकल्कतैलोपहितं स्वर्जिकालवणितमभ्या
सिच्य बस्तौ॥ विधिवदास्थापयेदेनं तथार्कालर्ककुटजाढकीकुष्ठकैडर्यकषायेण तथाशिग्रुपीलुतुंबुरुकटुकसर्ष
पकषायेण तथामलकशृंगवेरदारुहरिद्रा॥ पिचुमर्दकषायेण मदनफलादिसंयोगसंयोजितेन त्रिरात्रं सप्तरात्रं वा
स्थापयेत्॥ प्रत्यागते च पश्चिमे बस्तौ प्रत्याश्वस्तं तदहरेवोभयतोदोषहरं संशोधनं पाययेत्॥ युक्त्या तस्य विधिरु
पदेक्ष्यते॥ मदनफलपिप्पलीकषायस्यार्धांजलिमात्रेण त्रिवृत्कल्काक्षमात्रमालोड्य पातुमस्मै प्रयच्छेत्॥ तद्
स्य दोषमुभयतो निर्हरति सोऽधः एवमेव कल्पोक्तानि च वमनविरेचनानि प्रतिसंसृज्य पाययेदेनं बुध्या सर्वविशे
षानवेक्ष्यमाणः॥ अथैनं सम्यग्विरक्तं विज्ञायापराह्णे शैखरिककषायेण सुखोष्णेन परिषेचयेत्॥ तेनैव च क
षायेण बाह्याभ्यंतरान् सर्वोदकार्थान् कारयेत्॥ शश्वत् तदभावे वा कटुतिक्तकषायाणामौषधानां क्वाथैर्मू
त्रक्षारैर्वा परिषेचयेत्॥ परिषिक्तं चैनं निवातमगारमनुप्रवेश्य पिप्पलीपिप्पलीमूलचव्यचित्रकशृंगवेरस
दृसिद्धेन यवाग्वादिना क्रमेणोपविलेप्यादिना वा क्रमेणोपचरेत्॥ क्रममागतं चैनमनुवासयेत्॥ विडंगतैले
नैकांतरं द्विस्त्रिर्वा युनरस्यातिरुधानमौषधादानक्रमान् संमन्येत॥ शिरस्येवाभिसंतर्प्यतेः॥ कांश्चित्॥ ततः
स्नेहस्वेदाभ्यामस्य शिर उपपाद्य विरेचयेत्॥ अपामार्गतंडुलादिना शिरोविरेचनेन यस्त्वभ्यवहार्यो विधिः ३३
प्रकृतिघातीकृमीणां तमनुव्याख्यास्यामः॥ मूषिकपर्णीं समूलाग्रां मनवीनामाहृत्य कंडशः छेदयित्वा दृष
ले क्षोदयित्वा पाणिभ्यां पीडयित्वा रसं गृह्णीयात्॥ तेन रसेन लोहितकशालितंडुलपिष्टं समालोड्य पूपलि
कां कृत्वा विधूमेष्वंगारेषु पक्त्वा विडंगतैललवणोपहितां कृमिकोष्ठाय भक्षयितुं प्रयच्छेत्॥ तदनंतरं चाम्लकां

जिकमुदश्विद्वा पिप्पल्यादिपंचवर्गसंसृष्टं सलवणमनुपानं पाययेत्॥ अनेनैव च कल्पेनार्कसहचरनीपनि
र्गुंडीसुरससुमुखकुठेरकगंडीरकालमालकपर्णासक्षवकफणिज्झकबकुलकुटजसुवर्णक्षीरीस्वरसानाम
न्यतमस्मिन् कारयेत्॥ तथा किणिहीकिराततिक्तकसुवहामलकहरीतकीबिभीतकस्वरसेषु कारयेत्॥ पूपलिका
ः॥ स्वरसांश्चैतानेकैकशो द्रोणशः सर्वशो वा मधुविलुलितान् प्रातरन्ननाशितं पाययेत्॥ अथाश्वशकृदाहृत्य मह
ति किलिंजे प्रस्तीर्यातपे शोषयित्वोदूखले क्षोदयित्वा दृषदि पुनः श्लक्ष्णचूर्णानि कारयित्वा विडंगकषायेणात्रि
फलाकषायेण वाष्टकृत्वो द्वात्रिंशत्कृत्वो वा तमेवमुपरिभावितं भावयित्वा दृषदि सूक्ष्माणि श्लक्ष्णानि चूर्णानि कारयि
त्वा नवे कलशे समावेद्यांगकेवाप्यानुगुप्तं निधापयेत्॥ तेषां खलु चूर्णानां पाणितलेवावद्वा साधु मन्येत क्षौ
द्रेण संसृज्य कृमिकोष्ठाय लेढुं प्रयच्छेत्॥ तथा भल्लातकास्थीन्याहृत्य कलशप्रमाणेन संपोथ्य स्नेहभाविते
दृढे कलशे सूक्ष्मानेकच्छिद्रबुध्ने मृदावलिप्ते समावाप्य पिधानेनापिधाय भूमावाकंठं निखातस्य स्नेहभा
वितस्यैव दृढस्य कुंभोपरि समारोप्य समंतात् गोमयैरुपचित्य दाहयेत्॥ स यदा जानीयात् साधु दग्धानि गो
मयानि विगतस्नेहानि भल्लातकास्थीनि इति॥ ततस्तं कुंभमुद्धारयेत्॥ अथ तस्मात् द्वितीयात् कुंभात्तं स्नेह
मादाय विडंगतंडुलचूर्णैः स्नेहार्धमात्रैः प्रतिसंसृज्यातपे भर्वमहः॥ स्थापयित्वा ततोऽस्मै मात्रां प्रयच्छेत्॥
पानाय तेन साध्वा विरिच्यते॥ विरिक्तस्य चानुपूर्वीयथोक्ता एवमेव च॥ भद्रदारुसरलकाष्ठस्नेहाननुकल्पं पा
यितुं॥ प्रयच्छेदनुवासयेच्चैनमत एवानुवासनकाले॥ अथाहरेति ब्रूयाच्छारदं नवं॥ तिलान् सम्यगुपेतान्
स्तानाहृत्य सुनिष्पूतान् निष्पूय सुशुद्धान् शोधयित्वा विडंगकषाये सुखोष्णे प्रक्षिप्य सुनिर्वापितान्निर्वापयेदादो
षगमनात्॥ गतदोषानभिसमीक्ष्य सुप्रलूनान् प्रलुच्य पुनरेव सुनिष्पूयात्॥ निष्पूय सुशुद्धान् शोधयि
त्वा विडंगकषायेणात्रिः सप्तकृत्वः सुपरिभावितान् भावयित्वा आतपे शोषयित्वोदूखले समवक्षुद्य पुनर्दृ
षदि श्लक्ष्णपिष्टान् कारयित्वा द्रोण्यामभ्यवधार्य विडंगकषायेण मुहुर्मुहुः रवसिंचेत्॥ पाणिमर्दं मर्दये
त्॥ तस्मिंस्तु खलु प्रपीड्यमाने यत्तैलमुदियात् तत्पाणिभ्यामादाय शुचौ दृढे कलशे समावाप्यानुगतानि

चरकवि·
धापयेत्॥ तमादद्यादिति ब्रूयात्॥ तिल्वकोद्दालकयोर्धो विल्वमात्रो पिंडोश्लक्ष्णपिष्टो विडंगकषायेण अतोर्धमात्रो
श्यामात्रिवृतयोरतोर्धमात्रो वस्याविल्वकयोश्चैसेतं संभारं विडंगकषायाधाढकमात्रेण प्रति संसृज्य ततस्तैलधः
स्यमावाप्य सर्वमालोड्य महति पात्रे पर्योगे समासिच्याग्न्यावधिश्रित्य महत्यासने सुखोपविष्टः सर्वतः॥ स्निदूम
१५ वलोड्यमस्रं मृद्वग्निना साधयेत्॥ दर्व्यासततमयहनस्य दृजानीयात्॥ विरमति शब्दः प्रसरति फेनः प्रसादमा
पद्यते। यथास्वं वर्णगंधरसोपपत्तिः॥ संवर्तते भैषज्यमंगुलिभ्यां विमर्द्यमानमनतिमृदु अनतिदारुणमंगुलि
ग्राहि चेति॥ स कालस्तस्यावतरणाय ततस्तमवहृत्य शीतीभूतमहतेन वाससा परिपूय शुचौ दृढे कलशे समासिच्य
पिधाय शुक्लेन वस्त्रापट्टेनावच्छाद्य सूत्रेण सुबद्धं सुगुप्तं निधापयेत्॥ ततोस्मै मात्रां प्रयच्छेत्॥ पानाय तेन साधु विरि
च्यते। सम्यगपहृतदोषस्य यथोक्तानुपूर्व्या तैलेनैव मनुवासयेत्॥ अनुवासनकाले एतेनैव च पाकविधिना सर्ष
पतैलमेकाकरंजकोशातकीस्नेहानन्तकल्प्य पाययेत्॥ सर्वविशेषानवेक्ष्यमाणस्तेनागदो भवतीत्येते दूष्याणां श्ले
ष्मपुरीषसंभवानां कृमीणां समुत्थानसंस्थानसंवर्णनामप्रभावचिकित्सितविशेषा व्याख्याताः॥ सामान्यतो वि
शेषतस्त्वत्य मात्रमासापनानुलोमीकरणभूमित्वं॥ तेषां बधेषु पुरीषजानां कृमीणां चिकित्सितं कार्यं अत्राधिकं पुनः
शिरोविरेचनवमनोपशमनभूयिष्ठं॥ तेषां बधेषु श्लेष्मजानां कृमीणां चिकित्सितं कार्यमित्येष कृमिघ्नो भेषजः
विधिरनुव्याख्यास्यामः॥ तमनुतिष्ठता यथास्वं हेतुवर्जने प्रयतितव्यं॥ यथोद्देशमेवमिदं कृमिकोष्ठचिकित्सितं
यथावदनुव्याख्यातं भवति भवंति चात्र॥ अपकर्षणमेवादौ कृमीणां भेषजं मतं॥ ततो विघातः प्रकृतेर्निदा
नस्य च वर्जनं एष एव विकाराणां सर्वेषामपि निग्रहे॥ विधिर्दृष्टस्त्रिधायोयं कृमीनुद्दिश्य कीर्तितः॥ संशोधनं सं
शमनं निदानस्य विवर्जनं। एतावद्भिषजा कार्यं रोगे रोगे यथाविधीयते। तत्र श्लोकौ॥ व्याधितौ पुरुषा ज्ञातोभि १५
षजौ समयोजने॥ विंशतिकृमयस्तेषां हेत्वादिः सप्तको गणः॥ उक्तो व्याधितरूपीये विमाने परमर्षिणा॥ शिष्यसंबो
धनार्थाय व्याधिप्रशमनाय च॥ ॥ इति श्रीचरकसंहितायां विमानस्थाने व्याधितरूपीयं विमानं नाम सप्तमो
ध्यायः॥७॥ ॥ ७॥ ॥ ॐ॥ अथातो रोगभिषग्जितीयं विमानं व्याख्यास्यामः॥ ॥ ७॥

बुद्धिमानात्मनः कार्यगुरुलाघवं कर्मफलमनुबंधं देशकालौ च विदित्वा युक्तिदर्शी भिषक् बुभूषुः॥ शास्त्रमे
वादितः परीक्षेत विविधानि हि शास्त्राणि भिषजां प्रचरंति लोके। यत्र यन्मन्येत महद्यशस्विधीरपुरुषसेवि
तमर्थबहुलमाप्तजनपूजितं त्रिविधशिष्यबुद्धिहितमपगतपुनरुक्तदोषमार्षं सुप्रणीतसूत्रभाष्यसंग्रह
क्रमं स्वाधारमनवपतितशब्दमकष्टशब्दं पुष्कलाभिधानं क्रमागतार्थमर्थतत्वविनिश्चयप्रधानं संगतार्थ
ममसंकुलप्रकरणमाशुप्रबोधकं लक्षणवच्चोदाहरणवच्च तदभिप्रपद्येत॥ शास्त्रं शास्त्रं ह्येवंविधममलं आदि
त्य इव तमो विधूय प्रकाशयति॥ सर्वमतो नियमाचार्यं परीक्षेत॥ तद्यथा॥ पर्यवदातश्रुतं परिदृष्टकर्माणं दक्षं द
क्षिणं॥ शुचिं जितहस्तमुपकरणवंतं सर्वेंद्रियोपपन्नं॥ प्रकृतिज्ञं प्रतिपत्तिज्ञमनुपस्कृतविद्यमनहंकृतम
नसूयकमकोपनं क्लेशक्षमं शिष्यवत्सलमध्यापकं ज्ञापनासमर्थमित्येवं गुणो ह्याचार्यः सुक्षेत्रमार्तवो मेघ
इव॥ शस्यगुणैः सुशिष्यमाशु वैद्यगुणैः संपादयति तमुपसृत्याराधयितुः परिचरेदग्निवच्च देववच्च
राजवच्च पितृवच्च भर्तृवच्चाप्रमत्तस्तत्प्रसादात् कृत्स्नं शास्त्रमधिगम्य शास्त्रस्य दृढतायामभिधानस्य सौष्ठवेर्थ
स्य विज्ञाने वचनशक्तौ च भूयो भूयः प्रयतेत॥ सम्यक् तत्रोपायाननुव्याख्यास्यामः॥ अध्ययनमध्यापनं
॥ तद्विद्यसंभाषेत्युपायाः तत्रायमध्ययनविधिः॥ कल्यः कृतक्षणः प्रातरुत्थायोपव्युषं वा कृत्वा आवश्य
कमुपस्पृश्योदकं गोवृषब्राह्मणगुरुवृद्धसिद्धाचार्येभ्यो नमस्कृत्य समे शुचौ देशे सुखोपविष्टो मनःपुरःसराभि
र्वाग्भिः सूत्रमनुपरिक्रामन् पुनः पुनरावर्तयेत्॥ बुद्ध्या सम्यगनुप्रविश्यार्थतत्वं स्वदोषपरिहारार्थं परदोषप्रमाणा
र्थमेवमेव मध्यंदिने अपराह्णे रात्रौ च शश्वदपरिहापयन् अध्ययनमभ्यस्येदित्यध्ययनविधिः॥ अथाध्या
पनविधिः॥ अध्यापनकृतबुद्धिराचार्यः शिष्यमेवादितः परीक्षेत॥ तद्यथा॥ प्रशांतमार्यप्रकृतिमक्षु
द्रकर्माणमृजुचक्षुर्मुखनासावंशं तनुरक्तविशदजिह्वमविकृतदंतौष्ठमम्मिणं धृतिमंतमनहंकृतं मे
धाविनं वितर्कस्मृतिसंपन्नमुदारसत्वं तद्विद्यकुलजमथवा तद्विद्यवृत्तं तत्वाभिनिवेशिनमव्यंगमव्यापन्
नेंद्रियं निभृतमनुद्धतमव्यसनिनमकोपनं शीलशौचाचारानुरागदाक्ष्यप्रादक्षिण्योपपन्नमध्ययना

चर०वि० भिक्षामनर्थाविष्टानां च कर्मदर्शने चानन्यकार्यमलुब्धमनलसं सर्वभूतहितैषिणमाचार्यसर्वानुशिष्टप्रतिप
त्तिकरमनुरक्तमेवंगुणसमुदितमध्याप्यमाहुः॥ एवंविधमध्ययनार्थिनमुपस्थितमाराधयिषुमनुभाषेत॥
अथोदगयने शुक्लपक्षे प्रशस्तेहनि पुष्यहस्तश्रवणाश्वियुजामन्यतमेन नक्षत्रेण योगमुपगते भगवति
१५ शशिनि कल्याणे मैत्रे मुहूर्ते स्नानकृतोपवासो मुंडितमुंडः॥ काषायवस्त्रसंवीतः समिधोग्निमाज्यमुपलेपन
मुदकुंभांश्च सद्गंधहस्तक् माल्यदामदीपहिरण्येन हेमरजतमणिमुक्ताविद्रुमक्षौमपरिधानसकुशलाजसर्षपाक्ष
तांश्च शुक्लाः सुमनसो ग्रथिताग्रथिता मेध्यान्भक्ष्यान्गंधांश्च पिष्टापिष्टानादायोपतिष्ठस्वेति॥ स तथा कुर्यात्तथा समुप
स्थितमाज्ञाय समे शुचौ देशे प्राक्प्रवणे उदक्प्रवणे वा चतुष्किष्कुमात्रं चतुरस्रं स्थंडिलं गोमयोदकोपलिप्तं कृत्वा
कुशास्तीर्णं सुपरिहितं परिधिभिश्चतुर्दिशं यथोक्तचंदनोदकुंभक्षौमहिरण्यरजतमणिमुक्ताविद्रुमालंकृतम्॥
मेध्यभक्ष्यगंधशुक्लपुष्पफललाजसर्षपाक्षतोपशोभितं कृत्वा तत्र पालाशीभिरैंगुदीभिरौदुंबरीभिर्माधुकीभिर्वा स
मिद्भिरग्निमुपसमाधाय प्राङ्मुखः शुचिरध्ययनविधिमनुविधाय मधुसर्पिर्भ्यां त्रिस्त्रिर्जुहुयादग्निमाशीः संप्रयु
क्तैर्मंत्रैर्ब्रह्माणमग्निं धन्वंतरिं प्रजापतिमश्विनाविंद्रमृषींश्च सूत्रकारानभिमंत्रयमाणः पूर्वं स्वाहेति
शिष्यश्चैनमन्वारभेत॥ हुत्वा च प्रदक्षिणमग्निमनुक्रामेत॥ ततोनुपरिक्रम्य ब्राह्मणान्स्वस्ति वाचयेत॥ भिष
जश्चाभिपूजयेत॥ अथैनमग्निसकाशे ब्राह्मणसकाशे भिषक्सकाशे चानुशिष्यात् ब्रह्मचारिणा श्मश्रुधारिणा
सत्यवादिना मांसाहिना निमत्सरेण शास्त्रधारिणा मद्वचसेविना च भवितव्या न च ते मद्वचनात्किंचि॥ दकार्यं स्याद
न्यत्र राजद्विष्टात्प्राणहराद्विपुलादधर्माद्नर्थसंयुक्ताद्वाप्यर्थात् मदर्पणेन मत्प्रधानेन मत्प्रियहितानुवर्तिना च
शश्वद्भवितव्यं पुत्रवद्दासवदर्थिवच्चोपचरतानुवस्तव्योहमनुत्सेकेनावहितेनानन्यमनसा विनीतेनावेक्ष्यकारि
णानसूयकेन चाभ्यनुज्ञातेन प्रविचरितव्यमनुज्ञातेन प्रविचरता च पूर्वं गुर्वर्थोपाहरणे च यथाशक्ति प्रयतितव्यं १५
कर्मसिद्धिमर्थसिद्धिं यशोलाभं प्रेत्य च स्वर्गमिच्छता भिषजा गोब्राह्मणमादौ कृत्वा सर्वप्राणभृतां कर्माशासि
तव्यमहरहरुत्तिष्ठता चोपविशता च सती सर्वात्मना चातुराणामारोग्याय प्रयतितव्यमिति॥ जीवितहेतोरपि

चातुरेभ्यो नाभिद्रोग्धव्यं मनसापि च परस्त्रियो नाभिगंतव्याः तथा सर्वमेव परस्वं निभृतवेषपरिच्छदेन च भवितव्य
मशौंडेनापापसहायेन श्लक्ष्णशुक्लकर्मधर्मधन्यसत्यहि॥ तमितवचसा देशकालविचारिणा स्मृतिमता ज्ञानो
त्थानोपकरणसंपत्सु नित्यं यत्नवता न कदाचिद्राजद्विष्टानां राजद्वेषिणां वा महाजनद्विष्टानां महाजनद्वेषिणां वाप्यौषधम
नुविधातव्यं॥ एवमेव सर्वेषामत्यर्थविकृतदुष्टदुःखशीलाचाराणामपवादप्रतीकाराणां मुमूर्षूणां च तथैवा
संनिहितेश्वराणां स्त्रीणामनध्यक्षाणां वा न कदाचित्स्त्रीदत्तमामिषमादातव्यमननुज्ञातं च भर्त्रा यथाध्यक्षे
णातुरकुलं चानुप्रविशता विदितेनानुमतप्रवेशिना सार्धं पुरुषेण सुसंवीतेनावाक्शिरसा स्मृतिमता स्ति
मितेनावेक्ष्य बुद्ध्या सर्वमाचरता सम्यगनुप्रवेष्टव्यमनुप्रविश्य च वाङ्मनोबुद्धींद्रियाणि न क्वचित्प्रणिधात
व्यानि अन्यत्रातुरादातुरोपकारार्थादातुरगतेष्वन्येषु भावेषु चातुरकुलप्रवृत्तयो बहिर्न निश्चारयितव्या॥ ह्र
सितं चायुषः प्रमाणमातुरस्य नानिर्वर्णयितव्यं जानतापि॥ तत्र यत्रोच्यमानमातुरस्यान्यस्य वाप्युपघाताय
संपद्यते॥ ज्ञानवतापि च नात्यर्थमात्मनो ज्ञानेन विकत्थयितव्यमाप्तादपि हि विकत्थमानादत्यर्थमुद्विजंत्यनेके न
चैवास्ति सुतरामायुर्वेदस्य पारं॥ तस्मादप्रमत्तः शश्वदभियोगमस्मिन्गच्छेत॥ एतच्चैवं कार्यमेवं॥ भूय
श्च प्रवृत्तश्च सौष्ठवमनसूयता परेभ्योप्यागमयितव्यं॥ कृत्स्नो हि लोको बुद्धिमतामाचार्यः शत्रुश्चाबुद्धि
मतामतमित्रस्यापि धन्यं यशस्यमायुष्यं लौकिकमित्युपदिशतो वचः श्रोतव्यमनुविधातव्यं चेत्यतः परमि
दं ब्रूयात॥ देवताग्निद्विजातिगुरुवृद्धसिद्धाचार्येषु सम्यग्वर्तितव्यं॥ तेषु ते सम्यग्वर्तमानस्यायमग्निः
सर्वरसगंधरत्नबीजानि यथेरिताश्च देवताः शिवाय स्युरतोन्यथा वर्तमानस्याशिवायेति॥ एवं ब्रु
वंतं चाचार्यं शिष्यस्तथेति ब्रूयात॥ यथोपदेशं च कुर्वन्नध्याप्यो ज्ञेयोतोन्यथा त्वनध्याप्यः॥ अध्याप्यमध्या
पयन्ह्याचार्यो यथोक्तैश्चाध्ययनफलैर्योगमवाप्नोत्यन्यैश्चानुक्तैः॥ श्रेयस्करैर्गुणैः शिष्यमात्मानं च युनः
क्तीत्युक्तावध्ययनाध्यापनविधी यथावत्संभाषाविधिमत ऊर्ध्वं मनुव्याख्यास्यते॥ भिषक् भिषजा सह संभा
षेत॥ तद्विद्यसंभाषा हि ज्ञानाभियोगसंहर्षकरी भवति॥ वैशारद्यमपि चाभिनिर्वर्तयति॥ वाचनशक्ति

चर॰वि॰ मपि चाधत्ते॥ यच्चाश्याभिदीपयति॥ सा सर्वश्रुते च संदेहवतः पुनः श्रवणात् श्रुतसंशयमपकर्षयति॥ श्रुत
संशयस्य श्रुते चासंदेहवतो भूयोऽध्यवसायमभिनिर्वर्तयति॥ अश्रुतपूर्वमपि कंचिदर्थं श्रोत्रविषयमापाद
यति॥ यं चाचार्यः शिष्याय शुश्रूषवे प्रसन्नः क्रमेणोपदिशति॥ गुह्याभिमतमर्थजातं तं परस्परेण सह जल्प
१६ न्वितं डेन विजिगीषुराह संहर्षात् तस्मात्तद्विद्यसंभाषां प्रशंसंति॥ कुशलाः॥ द्विविधा तु खलु तद्विद्यसंभाषा
भवति संधायसंभाषा विगृह्यसंभाषा च॥ तत्र ज्ञानविज्ञानवचनप्रतिवचनशक्तिसंपन्नेनाकोपनेनानुपस्कृ
तविद्येनानसूयकेनानुनयेनानुनयकोविदेन क्लेशक्षमाणेऽपि प्रियसंभाषणेन च संधाय संभाषा विधीयते॥
तद्विधेन सह कथयन् विस्रब्धः कथयेत् पृच्छेत्॥ अपि च विस्रब्धं पृच्छते चास्मै विस्रब्धाय विशदमर्थं ब्रूयात्॥
न च निग्रहभयादुद्विजेत निगृह्य चैनं न हृष्येत॥ न च परेषु विकत्थेत॥ न च मोहादेकांतग्राही स्यात् न चाविदि
तमर्थमनुवर्णयेत॥ सम्यक् चानुनयेनानुनयेत॥ अनुनीते च तत्रावहितः स्यादित्यनुलोमसंभाषाविधिः
अत ऊर्ध्वमितरेण सह संभाषायां श्रेयसा योगमात्मनः पश्यन् प्रायेणान्वेतावत् जल्पात् जल्पांतरं परावरांत
रं परिषद्विशेषांश्च सम्यक् परीक्षेत सम्यक्परीक्षा हि बुद्धिमतां कार्यप्रवृत्तिकालौ शंसति॥ तस्मात्प
रीक्षामभिप्रशंसंति कुशलाः परीक्ष्यमाणस्तु खलु परावरांतरं जल्पकस्येमान् जल्पकगुणान् श्रेयस्करांश्च दो
षवतश्च परीक्षेत॥ सम्यक् तथा॥ श्रुतं विज्ञानं धारणं प्रतिभानं वचनशक्तिरित्येतान् गुणान् श्रेयस्करानाहु
रिमान् पुनर्दोषवतः॥ तद्यथा॥ कोपनत्वमवैशारद्यं भीरुत्वमधारणत्वमनवहितत्वमिति॥ एतान् द्वया
नपि गुणान् गुरुलाघवतः परस्य चात्मनश्च तुलयेत् त्रिविधः परः संपद्यते॥ प्रवरः प्रत्यवरः समो वा गु
णविनिक्षेपतो न त्वेवं खलु कार्त्स्न्येन परिषत्तु खलु द्विविधा ज्ञानवती मूढपरिषच्च॥ सैव द्विविधा सती त्रि
विधा वा॥ पुनरनेककारणविभागेन॥ सुहृत्परिषदुदासीनपरिषत्प्रतिनिविष्टपरिषच्चेति॥ तत्र प्रति १६
विष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनशक्तिसंपन्नायामपि मूढायां वा न कथंचित् केनचित् सह जल्पो वि
धीयते॥ मूढायां तु सुहृत्परिषद्युदासीनायां वा ज्ञानविज्ञानमंतरेणापि दीप्तयशसा महाजनविद्विष्टेन च स

ह जल्पो विधीयते॥ तथाविधेन च सह कथयता आविद्धदीर्घसंकुलैर्वाक्यदंडकैः कथयितव्यमतिहृष्टं मुहु
र्मुहुरुपहसता परं निरूपयता परिषदमाकारैर्ब्रुवतश्चास्य वाक्यावकाशो न देयः॥ कष्टशब्दं च ब्रुवता वक्तव्यो
नोच्यते इत्यथवा पुनर्हीना प्रतिज्ञेति॥ पुनश्चाहूयमानः प्रतिवक्तव्यः परिसंवत्सरो भवान् शिक्षस्व तावत्॥
गुरुमुपास्य स्वनत्वया गुरुरुपासितो नूनं॥ अथवा पर्याप्तमेव वा वद त्वासकृद्विवादे परिक्षेपिकं विहितमाहु
रिति॥ नास्याभियोगः कर्तव्यः कथंचिदित्येवं श्रेयसा सह विगृह्य वक्तव्यमित्याहुरेके॥ न त्वेवं ज्यायसा वि
ग्रहं प्रशंसंति॥ कुशलाः॥ प्रत्यवरेण समानाभिमतेन वा विगृह्य जल्पता सुहृत्परिषदि कथयितव्यमथवाप्युदा
सीनपरिषदवधानश्रवणज्ञानविज्ञानपरिधारणवचनशक्तिसंपन्नायां कथयता चावहितेन परस्य साद्गुण्य
दोषबलमन्ववेक्षितव्यं॥ भवति समवेक्ष्य च॥ यत्रैनं श्रेष्ठं मन्येत नास्य तत्र जल्पं योजयेत॥ अनाविष्कृतसंयोगं कुर्व
न् यत्र त्वेनमवरं मन्येत तत्रैवैनमाशु विगृह्णीयात्॥ तत्र खल्विमे प्रत्यवराणामाशु निग्रहे भवंत्युपायाः॥ तद्य
था॥ श्रुतहीनं महता सूत्रपाठेनाभिभवेद्विज्ञानहीनं पुनः पुनः कष्टशब्देन वाक्येन वाक्यावधारणहीनमाविद्धदी
र्घसूत्रसंकुलैर्वाक्यदंडकैः प्रतिभाहीनं पुनर्वचनेनानेकविधिनानेकार्थवाचिना वाचनशक्तिहीनमर्धोक्तस्य
वाक्यस्याक्षेपेणाविशारदमपत्रपणेन कोपनमायासेनाभिरुविवित्रासनेनानवहितं नियमनेनेति॥ तत्रश्लो
कः॥ विगृह्य कथयेद्युक्त्या युक्तं च न निवारयेत्॥ विगृह्यभाषा तीव्रं हि केषांचिद्द्वेषमावहेत्॥ नाकार्यमस्ति
क्रुद्धस्य नावाच्यमपि विद्यते॥ कुशला नाभिनंदंति कलहं संहिताः सतां॥ इत्येवमेतैरुपायैः परमेवम
भिभवेच्छीघ्रमेव प्रवृत्ते वादे कुर्यात्॥ प्रागेव तु तावद्वादार्थं कर्तव्यते॥ संधाय परिषदर्थमभूतेमात्म
ज्ञानप्रकारेणामादेशयितव्यं॥ यद्वा॥ परस्य भृशमर्थदुर्गं स्यात्तत्पक्ष - - - परस्य भृशं विमुखमानयेत्परि
षदि वोपसंहितायामशक्यमस्माभिर्वक्तुमिति तूष्णीमासीत॥ एषैव ते परिषद्यथेष्टं यथायोगं यथाभि
प्रायं॥ वादं वादमर्यादां च स्थापयिष्यतीत्युक्त्वा न त्वेवं वादमर्यादालक्षणं भवतादं वाच्यमेवं सातिपराजि
तो भवतीति॥ इमानि खलु पदानि भिषग्भिर्वादमार्गज्ञानार्थमधिगंतव्यानि भवंति॥ तथाहि॥ वादः

DR BH... DAJI MEMORIAL

द्रव्यं गुणाः कर्म सामान्यविशेषः समवायः॥ प्रतिज्ञापना प्रतिस्थापना हेतुरुपनयो निगमनमुत्तरं दृष्टांतः सि
द्धांतः शब्दः प्रत्यक्षमनुमानमैतिह्यमौपम्यं संशयः प्रयोजनं सव्यभिचारं जिज्ञासा व्यवसायोऽर्थप्राप्तिः सं
भवानुयोज्यमननुयोज्यमनुयोगः॥ प्रत्यनुयोगो वाक्यदोषो अधिक अनर्थकं अपार्थिकं विरुद्धं वाक्यप्रशंसा छ
लमहेतुरतीतकालमुपालंभः॥ परिहारः प्रतिज्ञाहानिरभ्यनुज्ञा हेत्वंतरमर्थांतरं निग्रहस्थानमिति॥ तत्र वादः
नाम यत्परः परेण सह शास्त्रपूर्वकं विगृह्य कथयति स वादः स द्विविधः॥ संग्रहेण जल्पो वितंडा च तत्र पक्षा
श्रितयोर्वचो जल्प आजल्पविपर्ययो वितंडा॥ यथैकस्य पक्षः पुनर्भवोऽस्ति॥ नाजल्पविपर्ययो वितंडा॥ वितंडा ना
म परपक्षे दोषवचनमात्रमेव॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाः स्वलक्षणैः श्लोकस्थाने पूर्वमुक्ताः क्रम
प्राप्ताः प्रतिज्ञा कथ्यते प्रतिज्ञा नाम साध्यवचनं॥ यथा नित्यः पुरुष इति॥ स्थापना स्थापना नाम तस्या एव प्रति
ज्ञाया हेतुभिर्दृष्टांतोपनयाति॥ गमनैश्च स्थापना पूर्वं हि प्रतिज्ञा॥ पश्चात्स्थापना किंचिह्यन प्रतिज्ञावस्तुतं॥
स्थापयिष्यतीति यथा नित्यः पुरुष इति प्रतिज्ञा हेतुरकृतकत्वं दृष्टांतोऽकृतकमाकाशं तच्च नित्यमुपनयो यथा
कृतकमाकाशं तथा पुरुषः निगमनं तस्मान्नित्य इति॥ प्रतिष्ठापना नाम॥ तस्याः प्रतिज्ञाया या परप्रतिविपरी
तार्थस्थापना॥ यथानित्यः पुरुषः प्रतिज्ञा हेतुरैंद्रियकत्वं दृष्टांतो घटः घटश्चैंद्रियकः स चानित्य उपनयो य
था घटश्चैंद्रियकस्तथा पुरुषो निगमनं॥ तस्मादनित्य इति हेतुः॥ हेतुर्नामोपलब्धिका दृष्टांतस्तु स्वलक्षणे रूपेता
श्च तथा सत्क्रियाश्चाः सक्रियाश्चा पुरुषाः शीघ्रसंज्ञाः स्थिरसंज्ञा विनश्वमदुभयदृष्टत्वात्॥ संशयः॥ किंत्व
स्त्यकालमृत्युरस्ति नास्ति॥ प्रयोजनं प्रयोजनं नाम यदर्थमारभ्यंते आरंभाः यथा यद्यकालमृत्युरस्ति सव्य
भिचारः॥ सव्यभिचारो नाम सव्यभिचारणं॥ यथा भवेदिदमौषधमस्मिन्व्याधौ यौगिकमथवा नेति॥
जिज्ञासा जिज्ञासा नाम परीक्ष्या यथा भेषजपरीक्षोत्तरकालमुपदेक्ष्यते॥ व्यवसायो व्यवसायो नाम निश्च
यो यथा वाहमेवाभिषक्॥ वातिक एवायं व्याधिरिदमेव चात्र भेषजमित्यर्थः प्राप्तिरर्थप्राप्तिर्नाम॥ यत्रैकेना
र्थेनोक्तेनापरस्यार्थस्यापि सिद्धिर्यथा नायं संतर्पणसाध्यो व्याधिरित्युक्ते भवत्यर्थप्राप्तिरपतर्पणसाध्यो

ऽयमिति नानेनादिवा भोक्तव्यमित्युक्ते भवत्यर्थप्राप्तिर्निशायां भोक्तव्यमिति॥ संभवः संभवो नाम यो यतः संभ
वति स तस्य संभवो यथा षड्धातवो गर्भस्य व्याधेरहितं हितमारोग्यस्येति॥ अनुयोज्यमनुयोज्यं नाम यद्वा
क्यं वाक्यदोषयुक्तं तदनुयोज्यमित्युच्यते॥ सामान्यव्याहृते ह्यर्थे वा विशेषग्रहणार्थमनुयोज्यं॥ यथा संशोधनः
साध्योऽयं व्याधिरित्युक्ते किं वमनसाध्यो विरेचनसाध्य इत्यनुयुज्यते॥ अननुयोज्यमनुयोज्येनामातो विपर्ययेण
॥ अनुयोगोऽनुयोगो नाम॥ यत्तद्विद्यानां तद्विद्यैरेव सार्धं तंत्रे तंत्रैकदेशे वा प्रश्नः प्रश्नैकदेशो वा॥ ज्ञानविज्ञान
वचनप्रतिवचनपरीक्षार्थमादिश्यते॥ अथ यानित्यः पुरुष इति॥ प्रतिज्ञाते सति परः को हेतुरित्याह॥ सोऽनु
योगः प्रत्यनुयोगो प्रत्यनुयोगो नामानुयोगस्यानुयोगो यथास्यानुयोगस्य पुनः को हेतुरिति॥ वाक्यदोषो ना
म यथा खल्वस्मिन्नर्थे न्यूनमधिकमनर्थकमपार्थकं विरुद्धं च तत्र प्रतिज्ञाहेतूदाहरणोपनयनिगमनाना
न्यतमेनापि न्यूनं भवति॥ यद्वा॥ बहूपदिष्टहेतुकमेकेन हेतुना साध्यते॥ तच्च न्यूनमेतानि॥ ग्रंतरेणाप्र
रुतेप्यर्थः॥ प्रणस्येति॥ अधिकमधिकं नाम यदायुर्वेदे भाष्यमाणे बार्हस्पत्यमौशनसमन्यद्वा पुनरप्र
तिसंबद्धार्थमुच्यते॥ यद्वा॥ पुनः प्रतिसंबद्धार्थमादुरभिधीयते॥ तत्पुनरुक्तदोषादधिकं तच्च पुनरुक्तं
द्विविधमर्थपुनरुक्तं शब्दपुनरुक्तं च तत्रार्थपुनरुक्तं नाम॥ यथा भेषजमौषधं साधनमिति॥ शब्दपुनरुक्तं पु
नर्भेषजं भेषजमिति॥ अनर्थकमनर्थकं नाम॥ यद्वचनमक्षरग्राममात्रमेव स्यात्॥ पंचवर्गवत्॥ न चार्थतो
गृह्यते॥ अपार्थकमपार्थकं नाम यदर्थवच्च॥ परस्परेणायुज्यमानं यथा तक्रनक्रवंशवज्रद्रुमाकरा इति॥
विरुद्धं विरुद्धं नाम यथा दृष्टांतसिद्धांतसमयैर्विरुद्धं तत्र दृष्टांतसिद्धांतावुक्तौ समयः पुनस्त्रिधा भवत्यायु
र्वैदिकसमयो याज्ञिकसमयो मोक्षशास्त्रिकसमय इति॥ तत्रायुर्वैदिकसमयः पशव आलभ्या इति॥ मो
क्षशास्त्रिकसमयः सर्वभूतेष्वहिंसेति॥ तत्र स्वसमयविपरीतमुच्यमानं विरुद्धं भवतीति वाक्यदोषाः वाक्य
प्रशंसा नाम यथा खल्वस्मिन्नर्थे न्यूनमनधिकमर्थवदनपार्थकमविरुद्धमधिगतपदार्थं च॥ तद्वाक्यम
ननुयोज्यमिति प्रशस्यते॥ छलं छलं नाम॥ परिशठमर्थावभासमर्थकं वा वस्तुमात्रमेव तद्विधं वाक्य

छलं सामान्यछलं च॥ तत्र वाक्छलं नाम॥ यथा कश्चिद्ब्रूयात् नवतन्त्रोऽयं भिषगिति भिषग्ब्रूयात् नाहं नवतन्त्रः॥
च०वि० एकतन्त्रोऽहमिति॥ परो ब्रूयात् नाहं ब्रवीमि॥ नव तन्त्राणि॥ नवाभ्यस्तं तन्त्रमिति भिषक्॥ ब्रूयात्॥ न मया नवधा
भ्यस्तं तन्त्रमनेकधा तत्राभ्यस्तं तन्त्रमित्येतद्वाक्छलं॥ सामान्यछलं सामान्यछलं नाम यथा व्याधिप्रशमना
१८ यौषधमित्युक्ते परो ब्रूयात् सत् सत्प्रशमनायेति भवानाह॥ सन् हि रोगः सदौषधं यदि च सत् सत्प्रशमनाय भवति॥
सन् कासः सन् क्षयः सत्सामान्यात्॥ कासस्ते क्षयप्रशमनाय भविष्यतीति॥ एतत्सामान्यछलं॥ स हेतुरहेतुर्ना
म॥ प्रकरणसमः संशयसमो वर्ण्यसम इति तत्र प्रकरणसमो नामाहेतुर्यथान्यः शरीरादात्मा नित्य इति॥
पक्षे ब्रूयात् यस्मादन्यः शरीरादात्मा तस्मान्नित्यः शरीरं ह्यनित्यमतो विधर्मिणा चानेन भवितव्यमिति एष
चाहेतुर्न हि य एव पक्षः स एव हेतुः संशयसमानो समाहेतुः॥ स एव संशयहेतुः॥ स एव संशयछेदहेतुर्यथा
यमायुर्वेदैकदेशमाह॥ किं त्वयं चिकित्सकः स्यादिति संशये परो ब्रूयात्॥ यस्मादायुर्वेदैकदेशमाह॥ त
स्मात् चिकित्सकोऽयमिति॥ न च संशयछेदहेतुं विशेषयत्येव वा हेतुः॥ नहि य एव संशयहेतुः॥ स एव संश
यछेदहेतुः॥ वर्ण्यसमो नामाहेतुः॥ यो हेतुर्वर्ण्याविशिष्टो यथा कश्चिद्ब्रूयात् अस्पर्शत्वात्॥ बुद्धिरनित्या शब्दवदि
ति॥ तत्र वर्ण्यः शब्दो बुद्धिरपि च वर्ण्या न दुभयवर्ण्याविशिष्टत्वाद्वर्ण्यसमोऽप्यहेतुः॥ अतीतकालमतीतका
लं नाम॥ यत्पूर्वं वाच्यं॥ तत्पश्चादुच्यते तत्कालातीतत्वात्॥ अग्राह्यं भवति॥ पूर्वं वा निग्रहप्राप्तमितिरस्तप
क्षांतरितं पश्चान्निगृह्णीते॥ तत्तस्यातीतकालवचनसमर्थत्वान्निग्रहवचनमनर्थकं भवति॥ उपलंभ उप
लंभो नामहेतो दोषवचनं॥ यथापूर्वमहेतवो हेत्वाभासा व्याख्याताः॥ परिहारः परिहारो नाम॥ तस्यैव दोषव
चनस्य निर्हरणं॥ यथा नित्यमात्मनि शरीरस्थे जीवितलिंगान्युपलभ्यंते॥ तस्य पुनरण्यमापन्नोपलभ्यं १८
ते॥ तस्मादन्यः शरीरादात्मा नित्यश्चेति॥ प्रतिज्ञाहानिर्नाम॥ यः पूर्वपरिगृहीतां प्रतिज्ञां पर्यनुयुक्तः पर्य
नुयुक्तः परित्यजति॥ यथा प्राक् प्रतिज्ञां कृत्वा नित्यः पुरुष इति॥ पर्यनुयुक्तस्त्वाहानित्य इति॥ अभ्यनुज्ञा
भ्यनुज्ञा नाम॥ य इष्टानिष्टाभ्युपगमः हेत्वंतरं हेत्वंतरं नाम॥ प्रकृतिहेतो वाच्ये विकारहेतुनाम॥ अर्थांतरं

अर्थांतरं नाम स्वरलक्षणे वाच्ये प्रमेहलक्षणमाह॥ निग्रहस्थानं निग्रहस्थानं नाम॥ निरुक्तस्य वाक्यस्याविज्ञा
नं॥ परिषदि विज्ञानवत्यामननुयोज्यस्यानुयोगाप्रतिज्ञाहानिरभ्यनुज्ञा कालातीतवचनमहेतवो न्यूनमति
रिक्तं व्यर्थकमयार्थकं पुनरुक्तं॥ विरुद्धं हेत्वंतरमर्थांतरं निग्रहस्थानमिति॥ एतानि वादमार्गपदानि यथो
द्देशमभिनिर्दिष्टानि भवंति॥ वादस्तु खलु भिषजां वर्तमानो वर्तेतायुर्वेद एव नान्यत्र॥ तत्र हि वाक्यप्रति
वाक्यविस्ताराः केवलाश्चोपपत्तयः सर्वाधिकरणेषु नाः सर्वाः सम्यगवेक्ष्यावेक्ष्य वाक्यं ब्रूयात्॥ नाप्रकृतकमशा
स्त्रकमपरीक्षितमसाधकमाकुलमव्यापकं सर्वं च हेतुमत् ब्रूयात्॥ हेतुमंतो ह्यकलुषाः सर्व एव वादा विग्रहाः
चिकित्सिते कारणभूताः प्रशस्तबुद्धिवर्धकत्वात्॥ सर्वारंभसिद्धिं ह्यावहत्यनुपहता बुद्धिरिति॥ इमा
नि खलु तावदिह कानिचित् प्रकरणानि उपदेक्ष्यामः॥ ज्ञानपूर्वकं कर्मणां समारंभं प्रशंसंति॥ कुशलाः॥
ज्ञात्वा हि कारणकरणकार्ययोनि कार्यकार्यफलानुबंधदेशकालप्रवृत्त्युपायान् सम्यगभिवर्तमानः कार्या
भिनिर्वृत्ताविष्टफलानुबंधं कार्यमभिनिर्वर्तयति॥ अनतिमहता यत्नेन कर्ता तत्र कारणं नाम॥ यद्यत्क
रोति स एव हेतुः स कर्ता करणं पुनस्तद्यदुपकरणायोपकल्पते॥ कर्तुः कार्याभिनिर्वृत्तौ प्रयतमानस्य का
र्ययोनिस्तु सा याधिक्रियमाणा कार्यत्वमापद्यते॥ कार्यं तु तद्यस्याभिनिर्वृत्तिमभिसंधाय प्रवर्तते क
र्ता कार्यफलं पुनस्तद्यथा प्रयोजनं॥ कार्याभिनिर्वृत्ता भविष्यति॥ अनुबंधस्तु खलु यः कर्तारमवश्यमनु
बध्नाति॥ कार्यदुत्तरकालं कार्यनिमित्तः शुभो वाप्यशुभो भावः देशस्त्वधिष्ठानं॥ कालः परिणामः॥
प्रवृत्तिस्तु खलु चेष्टा कार्यार्था सैव क्रिया कर्म यत्नः कार्यसमारंभश्च उपायः पुनः कारणादीनां सौष्ठ
वमभिविधानं च सम्यक्कार्यफलानुबंधवर्ज्यानां कार्याणामभिनिर्वर्तक इत्यतोऽभ्युपायः कृतेऽभ्युपायार्थो
ऽस्ति न चाविद्यते॥ तदाश्रये कृते कृताच्चोत्तरकालं फलं फलाच्चानुबंध इति॥ एतद्दशविधमग्रे परीक्ष्यं॥ ततो
नंतरं कार्यार्थाप्रवृत्तिरिष्टा तस्माद्भिषक् कार्यं चिकीर्षुः॥ प्राक्कार्यसमारंभात्परीक्षया केवलं परीक्ष्यं प
रीक्ष्यार्थकर्मसमारभेत॥ तत्र चेद्भिषक् अभिषग्वाभिषज्यं पृच्छेत्॥ वमनविरेचनास्थापनानुवास

च०वि० नश्चिरेणविरेचनानि॥ प्रयोक्तुकामेनभिषजाकतिविधयापरीक्ष्याकतिविधंपरीक्ष्यंकश्चात्रपरीक्ष्याविशे
षः कथंचपरीक्षितव्यंकिंप्रयोजनाचपरीक्षा॥ क्वचवमनादीनांप्रवृत्तिः॥ क्वचनिवृत्तिः प्रवृत्तिनिवृत्तिलक्ष
१९ णसंयोगेचाकिंनैष्ठिकंकानिचवमनादिषुभेषजद्रव्याण्युपयोगंगच्छंतीति सएवंपृष्टोयदिमोहयितुमिच्छेत्
ब्रूयादेनंबहुविधाखलुपरीक्षातथापरीक्ष्याविधिभेदः॥ कतमेनपरीक्षाविधिभेदेनभिन्नयापरीक्ष्यः
पाकेनवाविधिभेदेनप्रकृत्यंतरेणपरीक्षस्याभिन्नस्यभेदाग्रंभवानिच्छत्याख्यायमानमिदानींभवतोन्येनप
रीक्ष्याविधिभेदेनभिन्नयापरीक्ष्यायान्येनवाविधिभेदेनप्रकृत्यंतरेणपरीक्ष्यार्थस्याभिन्नस्याद्विभिवित
मर्थंश्रोतुमहंमन्येनपरीक्षाविधिभेदेनान्येनवाविधिभेदेनप्रकृत्यंतरेणपरीक्षार्थमाचक्षाणश्छंदनपूर
येयमितिसयत्कुत्तरंब्रूयात्॥ तत्समीक्ष्योत्तरमुत्तरंवाच्यं॥स्याद्यथोक्तंचप्रतिवचनविधिमपेक्ष्यसम्यक्यादिः
तुब्रूयात्॥ नचैनंमोहयितुमिच्छेत्प्राप्तंवचनकालंमन्येतकाममस्मैब्रूयाद्याप्तमेवनिखिलेनद्विविधाखलु
परीक्ष्याज्ञानवतांप्रत्यक्षमनुमानंचएतद्धिद्वयमुपदेशश्चपरीक्षात्रयमेवमेषाद्विविधापरीक्ष्यात्रि
विधा॥ सहोपदेशेनदशविधंतुपरीक्ष्यंकारणादियदुक्तमग्रेतदिहभिषजागादिषुसंसार्ययिष्यामः॥
इहकार्यप्राप्तौकारणंभिषक्कारणंपुनर्भेषजंकार्ययोनिर्धातुवैषम्यंकार्यंधातुसाम्यं॥ कार्यफलंसु
खावाप्तिः॥ अनुबंधस्तुखल्वायुर्देशोभूमिरातुरश्चकालःपुनःसंवत्सरश्चातुरावस्थाच॥ प्रवृत्तिःप्रति
कर्मसमारंभः उपायःपुनर्भिषगादीनांसौष्ठवमभिविधानंचसम्यगादिष्टस्योपायस्यविषयःपूर्वेषु
षोपायविशेषेणव्याख्यास्यतइति॥ कारणादीनिदशदशस्वभिषगादिषुसंसार्यसंदर्शितानिभवंति॥
तथैवानुपूर्व्येणदशविधंपरीक्ष्यमुक्तं॥ तस्ययोयःपरीक्ष्यविशेषोयथाययाचपरीक्षितव्यः॥ सतथा
तथानुव्याख्यास्यते कारणंभिषगित्युक्तमग्रेतस्यपरीक्षाभिषङ्नामकियोभिषज्यति॥ यस्तंत्रार्थप्रयोग १९
कुशलायस्यचायुःसर्वथाविदितं॥ यथावत्सचसर्वथाधातुसाम्यंचिकीर्षन्नात्मानमेवादितःपरीक्षेत
तद्यथा॥ गुणिभिर्गुणितःकार्याभिनिर्वृत्तिपथ्यन्नकश्चिदेतमस्यकार्यस्याभिनिर्वर्तनेसमर्थोनवेति॥

तत्रमेभिषग्गुणायैरुपपन्नोभिषक्धातुसाम्याभिनिर्वर्तनेसमर्थोभवेति॥ तद्यथा॥ पर्यवदातश्रुतताप
रिदृष्टकर्मतादाक्ष्यंशौचंजितहस्तता॥ उपकरणवत्तासर्वेंद्रियोपपन्नता॥ प्रकृतिज्ञता॥ प्रतिपत्तिज्ञताश्चेति॥
कारणंपुनर्भेषजंनामतद्यथाउपकरणयोपकल्पते॥ भिषजोधातुसाम्याभिनिर्वृत्तौप्रयतमानस्यविशेषत
श्चोपपन्नेभ्यः तद्द्विधंव्यपाश्रयभेदात्॥ दैवव्यपाश्रयं॥ युक्तिव्यपाश्रयंच॥ तत्रदैवव्यपाश्रयंमंत्रौष
धिमणिमंगलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि युक्तिव्यपाश्रयंतु
संशोधनोपशमनेचेष्टाश्चदृष्टफलाः॥ एतच्चैवभेषजमंगभेदादपिद्विविधमेवभवति॥ द्रव्यभूतमद्र
व्यभूतंचतत्रयदद्रव्यभूतंतदुपायाभिप्लुतं॥ उपायोनामतद्यथा॥ भयदर्शनविस्मापनक्षोभणहर्षणभ
र्त्सनवधबंधनस्वप्नसंवाहनादिरमूर्तोभावविशेषोयथोक्ताःसिद्ध्युपायाश्चेतितत्र द्रव्यभूतंतद्वमनादिषुयो
गमुपैति॥ तस्यापीयंपरीक्षा इदमेवंप्रकृत्यैवंगुणमेवंप्रभावमस्मिन्देशेजातमस्मिन्नृतावेवंगृहीतमे
वंनिहितमेवमुपस्कृतमनयाचमात्रयायुक्तमस्मिन्व्याधावेवंविधस्यपुरुषस्यैतावंतंदोषमपकर्षय
त्युपशमयति॥ अन्यदपिचैवंविधंभेषजमभूत्तच्चानेनान्येनवाविशेषेणयुक्तमिति भवंतिचात्र॥
अनूपःप्रायशोयस्मिन्देशःसपरिकीर्तितः॥ अनूपस्तत्रजायतेतत्रमधुरःस्निग्धशीतलः॥ योऽन्येदे भ
समीपेदेशेनित्यमर्कांशुतापिताः॥ जायतेम्लोरसस्तत्रस्निग्धोष्णोलवणस्तथा॥ अत्योदकाश्च
येदेशानित्यसूर्यांशुतापिताः॥ जायतेप्रायशस्तत्ररूक्षोष्णःकटुकोरसः॥ आखेटाश्चापियेदे
शाप्रायेणानिलसेविताः॥ कषायतिक्तोतेभ्योपिजायतेरूक्षशीतलो॥ जायतेन्येष्वभिप्रायोव्य
क्तादेशेषुषड्रसाः॥ नतेषांवाहशांवीर्यास्पर्शोवाप्युपलभ्यते॥ यथास्वयोनौजातानांमहाभूत
विशेषतः॥ संमतिष्ठनुरसाःकेचित्मधुराद्याःसंगताः॥ यथागोक्षुरकोदृष्टःस्वादुरूक्षःस्ववीर्य
जः॥ कपित्थमम्लमुद्दिष्टंतच्चरूक्षणगुणंस्मृतं॥ क्षारस्तुलवणोष्णश्चसंगतोरूक्षसंमतः॥ सस्नेहाः

चर॰वि॰ सर्षपाश्चापि लवणं तैकटुकारसे विशालारसं तश्चाद्गुस्लिका मुष्मगुणान्वितां। उष्णां वतरतामाहुः कषा
यां रसतस्त्वयेति॥ ॥ कार्ययोनिर्धातुवैषम्यं तस्य लक्षणं विकारागमः॥ परीक्षात्वस्य विकारप्रकृतेश्चै
वोनातिरिक्तलिंगात्विशेषावेक्षणं विकारस्य च साध्यासाध्यमृदुदारुणलिंगविशेषावेक्षणमिति
२० कार्यं धातुसाम्यं तस्य लक्षणं विकारोपशमः॥ परीक्षात्वस्य रुजोपशमनं स्वरवर्णयोगः॥ शरीरोप
चयो बलवृद्धिरभ्यवहार्याभिलाषो रुचिराहारकाले काले ऽभ्यवहृतस्य चाहारस्य सम्यग्जरणं॥ निद्राल ग
भो यथाकालं विकारिकाणां च स्वप्नानामदर्शनं॥ सुखेन च प्रतिबोधनं॥ वातमूत्रपुरीषरेतसां च सुख
मुक्तिः सर्वाकारैर्मनोबुद्धींद्रियशरीरतुष्टिः॥ अनुबंधस्तु खल्वायुस्तस्य लक्षणं। प्राणैः संयोगः॥ देशो
भूमिरातुरश्च तत्र भूमिपरीक्षा आतुरपरिज्ञानहेतोः यथास्या दौषधपरिज्ञानहेतोर्वा तत्र तावदियमातुर
परिज्ञानहेतोस्तद्यथा॥ कस्मिन्नयं भूमिदेशे जातः संवृद्धो व्याधितो वेति॥ तस्मिंश्च भूमिदेशे मनुष्या
णामिदमाहारजातमिदं विहारजातमेतावद्बलमेवंसत्वमेवंविधं सात्म्यमेवंविधो दोषो भक्तिरियमि
मे गदा य एते हितमिदमहितमिति॥ प्रायोग्रहणेन औषधऔषधमपरिज्ञानहेतोस्तु खलुकल्पे भूमिप
रीक्षा वक्ष्यते॥ आतुरस्तु खलु कार्यदेशः तस्य परीक्षाः॥ आयुषः प्रमाणज्ञानहेतोर्वा स्याद्बलदोष
प्रमाणज्ञानहेतोर्वा दोषप्रमाणानुरूपो ह्यभेषज्यप्रमाणविकल्पो बलदोषप्रमाणविशेषापेक्षो भवति॥
सहसा ह्यतिबलमौषधमपरीक्षकप्रयुक्तमल्पबलमातुरमतिपातयेत्॥ न ह्यतिबलान्याग्नेयसौम्य
वायव्यान्यौषधान्यग्निक्षारशस्त्रकर्माणि वा शक्यान्यल्पबलैः सोढुमविषह्यातितीक्ष्णवेगत्वाद्धि सद्यःप्रा २०
णहराणि स्युरेतच्चैवं कारणमवेक्ष्यमाणा हीनबलमातुरमविषादकरैर्मृदुसुखैः सुकुमारप्रायैरुत्तरो
त्तरगुरुभिरविभ्रमैरनात्ययिकैश्चौपचरेदौषधैर्विशेषतश्च नारीस्ता ह्यनवस्थितमृदुविवृतविक्लु
व हृदयप्रायः सुकुमार्योऽबलाः परसंस्तभ्याश्च तथा बलवति बलवद्व्याधिपरिगते स्वल्पबलमौ

मौषधमपरीक्षकप्रयुक्तमसाधकं भवति॥ तस्मादातुरं परीक्षेत॥ प्रकृतितश्च विकृतितश्च सारतश्च संहननत
श्च प्रमाणतश्च सात्म्यतश्च सत्वतश्चाहारशक्तितश्च व्यायामशक्तितश्च वयस्तश्चेति॥ बलप्रमाणविशे
षग्रहणहेतोस्तत्रेमान्प्रकृत्यादीन्भावाननुव्याख्यास्यामः॥ तद्यथा॥ शुक्रशोणितप्रकृतिं कालगर्भाश
यप्रकृतिं मातुराहारविहारप्रकृतिं महाभूतविकारप्रकृतिं गर्भशरीरमेतेनैकेनानेकेन वा समनुबध्यंते तेन तेन दो
षेण गर्भोऽनुबध्यते॥ तस्मात्सा सा दोषप्रकृतिरुच्यते मनुष्याणां गर्भादिप्रवृत्ता॥ तस्माद्वातलाः प्रकृत्या के
चित्पित्तलाः श्लेष्मलाः केचित्केचित्संसृष्टाः केचित्समधातवः॥ प्रकृत्यान भवंति॥ तेषां लक्षणानि व्याख्या
स्यामः॥ श्लेष्मा हि स्निग्धश्लक्ष्णमृदुमधुरसारसांद्रमंदस्तिमितगुरुशीतविज्जलाच्छः तस्य स्नेहात्श्ले
ष्मलाः स्निग्धांगाः श्लक्ष्णत्वात्श्लक्ष्णांगा मृदुत्वात्दृष्टिसुखसुकुमारावदातगात्राः माधुर्यात्प्रभूतशुक्र
व्यवायापत्याः सारत्वात्सारसंहतस्थिरशरीराः सांद्रत्वादुपचितपरिपूर्णसर्वगात्राः॥ मंदत्वान्मंदचेष्टाहा
रव्याहाराः स्तैमित्यादशीघ्रारंभक्षोभविकाराः गुरुत्वात्साध्वधिष्ठितावस्थितगतयः॥ शैत्यादल्पक्षुत्तृष्णा
संतापस्वेददोषाः विज्जलत्वात्सुश्लिष्टसारसंधिबंधनाः॥ तथाच्छत्वात्प्रसन्नदर्शनाननाः प्रसन्नस्निग्
धवर्णस्वराश्च भवंति॥ त एवं गुणयोगात्श्लेष्मला बलवंतो वसुमंतो विद्यावंत ओजस्विन आयुष्मंत
श्च भवंति॥ सप्रबंधेन वसनभवनकुसुमाकरजलधरपुलिनरमणीयानीरूपाणि पश्यंति॥ श्लेष्मदराणां चे
षामुपद्रवा याविपरीतानां चानुप्रशयप्रकृतिश्लेष्मप्रकृतयः॥ पित्तमुष्णं तीक्ष्णं द्रवं विश्रमम्लं कटुकं च तस्यौ
ष्म्यात्पित्तला भवंति॥ उष्णासहाः सुकुमारवदनगात्राः प्रभूतपिप्लुव्यंगतिलकपिडकाः॥ क्षुत्पिपासाव
तः शिघ्रवलीपलितखालित्यदोषाः प्रायो मृद्वल्पकपिलश्मश्रुलोमकेशास्तैक्ष्ण्यात्तीक्ष्णपराक्रमाः॥
तीक्ष्णाग्नयः प्रभूताशनपानाः॥ क्लेशासहिष्णवो दंदशूकाः द्रवत्वाच्छिथिलमृदुसंधिबंधमांसाः॥
प्रभूतसृष्टस्वेदमूत्रपुरीषाश्च विश्रत्वात्प्रभूतपूतिकक्षास्यशिरःशरीरगंधाः कटुम्लत्वाद
ल्पशुक्रव्यवायापत्याः त एवं गुणयोगात्पित्तला मध्यबला मध्यायुषो मध्यज्ञानविज्ञानवित्तोपकरण

चरकवि० वंतश्च भवंति॥ वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविशदः॥ तस्य रौक्ष्याद्वातलारूक्षापचिताल्पशरीराः
प्रततरूक्षक्षामभिन्नसन्नसक्तजर्जरस्वरा जागरूकाश्च भवंति॥ लघुत्वाच्च लघुचपलगतिचेष्टाहारव्यवहाराः च
२१ लत्वादनवस्थितसंध्यक्षिभ्रूहन्वोष्ठजिह्वाशिरःस्कंधपाणिपादाः॥ बहुत्वाद्बहुप्रलापकंडराशिराप्रता
नाः॥ शीघ्रत्वाच्छीघ्रसमारंभक्षोभविकाराः शीघ्रोत्रासरागविरागाः श्रुतग्राहिणोल्पस्मृतयश्च शैत्याच्छी
तासहिष्णवः प्रततशीतकोद्वेपकस्तंभाः पारुष्यात्परुषस्फुटितकेशश्मश्रुनखरोमदशनवदनपाणिपादां
गाः॥ वैशद्यात्स्फुटितांगावयवाः॥ सततसंधिशब्दगामिनश्च भवंति। त एवंगुणयोगाद्वातलाः प्रायेणाल्प
बलाश्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्च धन्याश्च भवंति। संसर्गात्संसृष्टलक्षणाः सर्वगुणसमुदि
तास्तु समधातवो भवंति॥ एवं प्रकृतितः परीक्षेत॥ विकृतितश्चेति विकृतश्चेति विकृतिरुच्यते विकारः॥ त
त्र विकारं हेतुदूष्यदोषप्रकृतिदेशकालबलविशेषैर्लिंगतश्च परीक्षेत॥ न ह्यंतरेण हेत्वादीनां बलविशेषा
न्व्याधिबलविशेषोपलब्धिः यस्य यस्य हि व्याधेर्दोषदूष्यप्रकृतिदेशकालसाम्यं भवति। महच्च हेतु
लिंगबलं स व्याधिर्बलवांस्तद्विपर्ययाच्चाल्पबलः॥ मध्यबलस्तु दूष्यादीनामन्यतमसामान्याद्धेतुलिंगमध्य
बलत्वाच्चोपलभ्यते। सारतश्चेति साराण्यष्टौ पुरुषाणां बलमानविशेषज्ञानार्थमुपदिश्यंते। तद्यथा
त्वग्रक्तमांसमेदोस्थिमज्जशुक्रसत्त्वानीति॥ तत्र स्निग्धश्लक्ष्णमृदुप्रसन्नसूक्ष्माल्पगंभीरसुकुमारलो
मसप्रभेव त्वक् त्वक्साराणां सा सारता सुखसौभाग्यैश्वर्योपभोगबुद्धिविद्यारोग्यप्रहर्षान्यायुष्यानितरत्वमा
चष्टे॥ कर्णाक्षिमुखजिह्वा॥ नासौष्ठपाणिपादतलनखललाटमेहनं स्निग्धं रक्तं श्रीमद्भ्राजिष्णु रक्तसा २१
राणां सा सारता॥ सुखमुद्धततां मेधां मनस्वित्वं॥ सौकुमार्यमनतिबलमक्लेशसहिष्णुतां चाचष्टे॥ शंखल
लाटकृकाटिकाक्षिगंडहनुग्रीवास्कंधोदरवक्षःकक्षापाणिपादसंधयः॥ स्थिरगुरुमांसोपचिता मांससा
राणां सा सारता॥ क्षमां धृतिमलौल्यं वित्तं विद्यां सुखमार्जवं आरोग्यं बलमायुश्च दीर्घमाचष्टे वर्णस्वरने

त्रकेशलोमनखदंतौष्ठमूत्रपुरीषेषु विशेषेण स्नेहो मेदःसाराणां सा सारता। वित्तैश्वर्यसुखोपभोगप्रदानान्यार्जवं
सुकुमारोपचारतां चाचष्टे। पार्ष्णिगुल्फजान्वरत्निजत्रुचिबुकशिरःपर्वस्थूलास्थिनखदंताश्चास्थिसाराः। सास
रतानि महोत्साहाः क्रियावंतः क्लेशसहाः सारस्थिरशरीरा भवंत्यायुष्मंतश्च। तन्वंगा बलवंतश्च स्निग्धवर्ण
स्वराः स्थूलदीर्घवृत्तसंधयश्च मज्जसाराः ते दीर्घायुषो बलवंतः श्रुतविज्ञानवित्तापत्यसंमानभाजश्च भवं
ति॥ सौम्याः सौम्यप्रेक्षिणः क्षीरपूर्णलोचना इव प्रहर्षबहुलाः स्निग्धवृत्तसारसमसंहतशिखरदशनाः।
प्रसन्नस्निग्धवर्णस्वरा भ्राजिष्णवो महास्फिचश्च शुक्रसाराः स्त्रीप्रियाः प्रियोपभोगा बलवंतः सुखारोग्यब
लवित्तैश्वर्यसंमानापत्यभाजश्च भवंति॥ स्मृतिमंतो भक्तिमंतः कृतज्ञाः प्राज्ञाः शुचयो महोत्साहा दक्षा धीराः समर
विक्रांतयोधिनः त्यक्तविषादाः सुव्यवस्थितगतिगंभीरबुद्धिचेष्टाः॥ कल्याणाभिनिवेशिनश्च सत्त्वसाराः तेषां
स्वलक्षणैरेव गुणा व्याख्याताः॥ तत्र सर्वैः सारैरुपेताः पुरुषा भवंत्यतिबलाः परमगौरवयुक्ताः क्लेशसहाः
सर्वारंभेष्वात्मनि जातप्रत्ययाः कल्याणाभिनिवेशिनः स्थिरसमाहितशरीराः समाहितगतयः सानुनादस्नि
ग्धगंभीरमहास्वराः॥ सुखैश्वर्यविशेषभोगमानभाजो मंदजरसो मंदविकाराः प्रायस्तुल्यगुणविस्ती
र्णापत्याश्चिरजीविनश्च भवंति॥ अतो विपरीतास्त्वसाराः मध्यानां मध्यैः सारविशेषैः गुणविशेषा
व्याख्यास्यामः॥ इति साराण्यष्टौ पुरुषाणां बलमानविशेषज्ञानार्थमुद्दिष्टानि भवंति॥ कथं नु शरीरमात्रद
र्शनादेव भिषक् मुह्येदयमुपचितत्वाद्बलवानयमल्पबलः कृशत्वादयं बलवान्महाशरीरत्वादयमल्पश
रीरत्वाद्दुर्बल इति॥ दृश्यंते ह्यल्पशरीराः कृशाश्चैके बलवंतः तत्र पिपीलिकाभारहरणवत्सिद्धिरत
श्च सारतः परीक्षेत इत्युक्तं॥ संहननश्चेति॥ संहननं संघातः संयोजनमित्येकोर्थः॥ तत्र समसुविभ
क्तास्थि सुबद्धसंधि सुनिविष्टमांसशोणितं सुसंहतं शरीरमित्युच्यते॥ तत्र सुसंहतशरीराः पुरुषा बल
वंतो भवंति विपर्ययेणाल्पबलाः प्रवरावरमध्यत्वात्संहननस्य प्रवरावरमध्यबला भवंति॥ प्रमाण
तश्चेति शरीरप्रमाणं पुनर्यथास्वेनांगुलप्रमाणेनोपदिश्यते उत्सेधविस्तारायामैर्यथाक्रमं॥

च०वि० तत्र पादौ चतुर्दशांगुलौ जंघे त्वष्टादशांगुले॥ षोडशांगुलपरीक्षेपे जानुनी चतुरंगुले॥ षोडशांगुलपरीक्षेपे अंत्रश
दंगुलीपरीक्षेपौ यावच्चाष्टादशांगुलवृ. षडंगुलदीर्घौ वृषणौ अष्टांगुलपरिमाणो शेफः षडंगुलदीर्घो पंचांगुलपरि
२२ णाहो॥ द्वादशांगुलविस्तारो भगः षोडशांगुलविस्तारा कटी। दशांगुलं बस्तिशिरः॥ द्वादशांगुलमुदरं। दशां
गुलविस्तीर्णे द्वादशांगुलायामे पार्श्वे द्वादशांगुलं स्तनांतरं। द्व्यंगुलं स्तनपर्यंतं॥ चतुर्विंशत्यंगुलविशालं द्वा
दशांगुलोत्सेधमुरः॥ द्व्यंगुलं हृदयं॥ अष्टांगुलौ स्कंधौ षडंगुलावंसौ षोडशांगुलौ प्रबाहू पंचदशांगुलौ प्रप
ाणी॥ हस्तौ द्वादशांगुलौ कक्षावष्टांगुलौ॥ त्रिकं द्वादशांगुलोत्सेधम् अष्टादशांगुलोत्सेधं पृष्ठं चतुरंगुलोत्सेधा
द्वाविंशत्यंगुलपरिणाहा शिरोधरा द्वादशांगुलोत्सेधं चतुर्विंशत्यंगुलपरिणाहमाननं पंचांगुलमास्यं। चि
बुकोष्ठकर्णाक्षिमध्यनासिकाललाटं चतुरंगुलं। षडंगुलोत्सेधं द्वात्रिंशदंगुलपरिणाहं शिर इति॥ पृथक्
त्वेनांगावयवानां मानमुक्तं केवलं पुनः शरीरमंगुलिपर्वाणि चतुरशीतिः॥ तदायामविस्तारसमं सममुच्य
ते॥ तत्रायुर्बलमोजः सुखमैश्वर्यं वित्तमिष्टाश्चापरे भावा भवंत्यायत्ताः॥ प्रमाणवति शरीरे विपर्ययस्तु
हीने अधिके वा॥ सात्म्यतश्चेति। सात्म्यं नाम तद्यत्सातत्येनोपसेव्यमानमुपशेते॥ तत्र ये घृतक्षीरतैलमांसर
ससात्म्याः पुनः एकरससात्म्याश्च ते प्रायेणाल्पबलाश्चाक्लेशसहाश्चाल्पायुषोऽल्पसाधनाश्च भवंति॥ व्या
मिश्ररससात्म्यास्तु ये ते मध्यबलाः सात्म्यनिमित्ततो भवंति। सत्वतश्चेति सत्वमुच्यते। अतश्च प्रवरमध्या
वरसत्वाः पुरुषा भवंति। तत्र प्रवरसत्वाः तेसारेषूपदिष्टाः स्वल्पशरीरा ह्यपि ते निजागंतुनिमित्तासु मह
तीष्वपि पीडास्वव्यथा दृश्यंते। सत्वगुणविशेषान्मध्यसत्वास्तु परानात्मन्युपनिधाय संस्तंभयंत्यात्मना २२
त्मानं परैर्वा संस्तभ्यंते। हीनसत्वास्तु नात्मना परैः सत्वबलं प्रति शक्यंते उपस्तंभयितुं महाशरीरा ह्यपि
स्व्याना मपि वेदनानामसहा दृश्यंते। संनिहितभयशोकलोभमोहमानरौद्रभैरवद्विष्टबीभत्सवि
तत्कथास्वपि पशुपुरुषमांसशोणितानि वावेक्षावषादवैवर्ण्यमूर्छोन्मादभ्रमप्रपतनानामन्यतम

मवाप्नुवंत्यथवा मरणमिति॥ आहारशक्तितश्चेत्याहारशक्तिरभ्यवहरणशक्त्या जरणशक्त्या च परीक्ष्या बलायुषी ह्या
हारायत्ते व्यायामशक्तितश्चेति व्यायामशक्तिरपि कर्मशक्त्या परीक्ष्या कर्मशक्त्या ह्यनुमीयते बलत्रैविध्यं वयस्त
श्चेति॥ कालप्रमाणविशेषापेक्षिणी हि शरीरावस्था वयोऽभिधीयते॥ तद्वयो यथास्थूलभेदेन त्रिविधं॥
बालं मध्यं जीर्णमिति। तत्र बालमपरिपक्वधातुमजातव्यंजनं सुकुमारमक्लेशसहमसंपूर्णबलं श्लेष्मधातुः
प्रायमाषोडशवर्षं विवर्धमानधातुगणं पुनः प्रायेणानवस्थितसत्वमात्रिंशद्वर्षमुपदिष्टं मध्यं पुनः समत्वागत
बलवीर्यपौरुषपराक्रमग्रहणधारणस्मरणवचनविज्ञानसर्वधातुगुणं बलस्थितमवस्थितसत्वमविशीर्यमा
णधातुगुणं पित्तधातुप्रायमाषष्टिवर्षमुपदिष्टमतः परं हीयमानधात्विंद्रियबलवीर्यपौरुषपराक्रमग्रहण
धारणास्मरणवचनविज्ञानं भ्रस्यमानधातुगुणं वायुधातुप्रायं क्रमेण जीर्णमुच्यते॥ आवर्षशतं वर्षशतं
खल्वायुः प्रमाणं॥ अस्मिन्काले संति॥ पुनरधिकोनवर्षशतजीविनो मनुष्याः तेषां विकृतिवर्ज्यैः प्रकृत्यादिब
लविशेषैरायुषो लक्षणतश्च प्रमाणमुपलभ्य वयसस्त्रित्वं विभजेदेवं प्रकृत्यादीनां विकृतिवर्ज्यानां भा
वानां प्रवरावरमध्यविभागेन बलविशेषं विभजेत्॥ विकृतिबलत्रैविध्येन तु दोषबलं त्रिविधमनुमिमी
त॥ ततो भैषज्यस्य तीक्ष्णमृदुमध्यविभागेन त्रैविध्यं विभज्य भिषक्॥ यथा दोषं भेषज्यमवचारये
दित्युपदेशः॥ प्रमाणज्ञानहेतोः पुनरिंद्रियेषु ज्ञानि सर्वशक्तीयं बलक्षीणान्युपदेक्ष्यंते। कालः संवत्सरश्चा
तुरावस्था च॥ तत्र संवत्सरो द्विधा त्रिधा षोढा॥ द्वादशधा भूयश्चातः प्रविभज्यते॥ तत्रैकार्यमभिस
मीक्ष्य खलु तत्र तावत्षोढा प्रविभज्य कार्यमुपदेक्ष्यते॥ हेमंतो ग्रीष्मो वर्षाश्चेति॥ शीतोष्णवर्षलक्षणा
स्त्रय ऋतवस्तेषामंतरेष्वितरे साधारणलक्षणास्त्रयः ऋतवः प्रावृट्शरद्वसंता इति॥ तत्र प्रावृडिति प्र
थमः प्रविष्टः कालः तस्यानुबंधो वर्षा॥ एवमेते संशोधनमधिकृत्य षड्विभज्यंते ऋतवः॥ तत्र साधार
णलक्षणेष्वृतुषु वमनादीनां प्रवृत्तिर्विधीयते। निवृत्तिरितरेषु तासाधारणलक्षणा हि मंदः
शीतोष्णवर्षत्वात्सुखतमाश्च भवंत्यविकल्पकाश्च शरीरौषधानामितरेषु पुनरत्यर्थशीतोष्णवर्ष

Dr. BH... DAJI MEMORIAL

चरकवि० त्वात् दुःखेन माश्च भवति ॥ विकल्पकृतश्च शरीरौषधीनामभिः तु प्रदेमंते मातिमात्रशीतोपहतत्वात् ॥ शरीरम
सुखोपपन्नं भवत्यतः शीतवाताध्मानमतीहरणीभूतमवयमवबधोदोषं भेषजं पुनः संशोधनार्थमुष्णस्
वभावं शीतोपहतत्वान्मंदवीर्यत्वमापद्यते ॥ तस्मात्तयोः संयोगे संशोधनमतियोगायोपपद्यते ॥ शरीरं च वातोपद्रवायग्री
२३ ष्मेषु पुनर्भृशोष्णमतीपतोपहतत्वात् ॥ शरीरमसुखोपपन्नं भवति ॥ उष्णमुष्णवाताभवाध्मानमतिशिथिलमत्य
र्थप्रक्लिन्नदोषं भेषजं पुनः संशोधनार्थमुष्णस्वभावमुष्णानुगमनात् ॥ तीक्ष्णतरत्वमापद्यते ॥ तस्मात्तयोः
संयोगे संशोधनमतियोगायोपपद्यते ॥ शरीरं पिपासोपद्रवाय वर्षासु नु मेघजालावतते ॥ गूढार्कचंद्रतारे
धाराकुले वियति भूमौ पंकजलपटलसंवृतायामत्यर्थोपक्लिन्नशरीरेषु भूतेषु विहतस्वभावेषु च केवलेष्वौ
षधग्रामेषु तोयतोयानुगतमारुतोपहतेषु गुरुप्रवृत्तीनि वमनादीनि भवंति ॥ गुरुसमुत्थानत्वमानि च
शरीराणि तस्मात् वमनादीनां निवृत्तिर्विधीयते ॥ वर्षाभागं ते दृतु पुनर्वेद्यात्ययिकं वा त्ययिके पुनः कर्मा
णि काममृतुं विकल्प्य कृत्रिमगुणोपधानेन यथर्तुगुणविपरीतेन भेषजं संयोगसंस्कारप्रमाणविकल्पेनोपपा
द्य प्रमाणवीर्यसमं कृत्वा ततः प्रयोजयेन्नेनुत्तमेन यत्नेनावहित आतुरावस्थास्वपि तु खलु कार्याकार्यं प्रतिका
लकालसंज्ञा ॥ तद्यथा ॥ अस्यामवस्थायामस्य भेषजस्याय मकालः ॥ कालः पुनरस्येत्येतदपि भवत्यवस्था
विशेषेण तस्मादातुरावस्थास्वपि कार्याकार्यं प्रतिकालाकालसंज्ञा ॥ तस्य परीक्षा मुहुर्मुहुरातुरस्य सर्वावस्था
विशेषावेक्षणं ॥ यथावत् भेषजप्रयोगार्थं न ह्यतिपतितकालमप्राप्तकालं वा भेषजमुपयुज्यमानं योगिकं भ
वति ॥ कालो हि भेषजयोगपर्याप्तिमभिनिर्वर्तयति ॥ प्रवृत्तिस्तु प्रतिकर्मसमारंभः तस्य लक्षणं भिषगातु
रौषधपरिचारकाणां क्रियासमायोगः उपायः पुनर्भिषगादीनां सौष्ठवमभिधानं च सम्यक्कृतस्य लक्षणं भि २३
षगादीनां च यथोक्तगुणसंपदेशकालप्रमाणसात्म्यक्रियादिभिश्च सिद्धिकारणैः सम्यगुपपादितस्यौ
षधस्यावचारणमिति ॥ एवमेते दशपरीक्ष्यविशेषाः पृथक् पृथक् परीक्षितव्या भवंति ॥ परीक्षायास्तु खलु
प्रयोजनं ॥ प्रतिपत्तिज्ञानं प्रतिपत्तिज्ञानं नाम यो यथा भावः प्रतिपत्तव्यः तस्य तथानुष्ठानज्ञानं ॥ यत्र तु

खलु वमनादीनां प्रवृत्तिर्यत्र निवृत्तिस्तद्व्यासतः सिद्धिषूत्तरकालमुपदेक्ष्यामः ॥ प्रवृत्तिनिवृत्तिलक्षणसंयोगे तु
खलु गुरुलाघवं तु प्रधार्य सम्यगध्यवस्येदन्यतरनिष्ठायां संनिहिता व्याधयः ॥ शास्त्रोत्सर्गापवादैरुपक्रमा निर्दि
ष्टाः ॥ तस्मात्संप्रधार्य सम्यगध्यवस्येदित्युक्तं यानि तु खलु वमनादिषु भेषजद्रव्याण्युपयोगं गच्छंति ॥ तान्य
नुव्याख्यास्यामः ॥ तद्यथा ॥ फलजीमूतकेक्ष्वाकुधामार्गवकुटजकृतवेधनफलानि फलजीमूतकेक्ष्वाकुधामार्ग
वपुष्पपत्राणि च ॥ आरग्वधवृक्षकमदनघा - कंटकपाठापाटलाशार्ङ्गेष्टामूर्वासप्तपर्णनक्तमा - चुमुदपलि
णेलसुषवीगडूचीचित्रकसोमवल्कद्वीपीशिग्रुमूलकषायैश्च मधुमधूककोविदारकर्बुदारनीपविदुलबिंबी
शणपुष्पीसदापुष्पीप्रत्यक्पुष्पीकषायैश्च एलाहरेणुप्रियंगुपृथ्वीकाकुस्तुंबुरुतुंबरुतगरनलदह्रीबेरताली
शागरकषायैश्च इक्षुकांडेक्षुवालिकादर्भपोटगलतगरकालंकतकषायैश्च ॥ सुमनासौमनस्यायनीहरिद्रादा
रुहरिद्रावृश्चीवपुनर्नवामहापुनर्नवावाश्च शाल्मलीशाल्मलकश्रीपर्णीभद्रपर्ण्येलापर्ण्युपोदकोद्दालकध
न्वनराजादनोपचित्राशार्ङ्गीपीशृंगाटिकाचित्राभिश्च शाल्मलीपिप्पलीपिप्पलीमूलचव्यचित्रकशृंगवेरसर्षप
फाणितक्षीरसलवणोदकैश्च यथोपलाभं यथेष्टं ॥ चाप्युपसंस्कृत्य लेह्यक्रियाचूर्णासवलेहस्नेहकषायमांसरसयवा
गूषकांबलिकक्षीरोपपेयामोदकानन्यांश्च भक्ष्यप्रकारान् विविधानुविधाय यथार्थं वमनार्थाय दद्याद्विधि
मनाममति ॥ कल्पसंग्रहो वमनद्रव्याणां कल्पस्तेषां विस्तारेणोत्तरकालमुपदेक्ष्यामः ॥ विरेचनद्रव्याणि तु श्यामा
त्रिवृच्चतुरंगुलतिल्वकमहावृक्षसप्तलाशंखिनीदंतीद्रवंतीनां क्षीरमूलत्वक्पत्रपुष्पफलानि यथा
योगमेतैश्चैव क्षीरमूलत्वक्पत्रफलैर्विकृताविकृतैरजगंधाश्वगंधाजशृंगीक्षीरिणीनीलिनीक्लीतक
कषायैश्च प्रकीर्योदकीर्यामसूरविदलाकंपिल्लकविडंगगवाक्षीकषायैश्च ॥ पीलुप्रियालमृद्वीकाकाश्म
र्यपरूषकबदरदाडिमामलकहरीतकीविभीतकवृश्चीरपुनर्नवाविदारीगंधादिकषायैश्च सीधुसुरा
सौवीरकतुषोदकमैरेयमेदकमदिरामधुमध्वम्लबकुलंबदरखर्जूरकर्कंधुसीधुभिश्च ॥ दधिदधि
मंडोदश्विद्भिश्च गोमहिष्यजादीनां च क्षीरमूत्रैर्यथोपलाभं यथेष्टं चाप्युपसंस्कृत्य वर्तिगारक्षीर

चरकवि०
२५

रेयकल्पस्तेषां विस्तरेणोत्तरकालमुपदेक्ष्यते॥ आस्थापनेषु भूयिष्ठकल्पानि द्रव्याणि यानि योगमुपयान्ति तेषु
तेष्ववयवांतरेषु गुणाणां तानि द्रव्याणि नामतो विस्तरेणोपदिश्यमानान्यपरिसंख्येयानि स्युरति बहुत्वात् इष्ट
श्च नाभिसंक्षेपविस्तरेणैषामुपदेशः तन्त्रेष्टं च केवलज्ञानं॥ तस्मात्प्रसन्नत एतान्यत्र व्याख्यास्यते रससंस
र्गसमवायविकल्पविस्तरेणैषामपरिसंख्येयः॥ समवेतानां रसानामंशांशबलविकल्पानि बहुत्वात् तस्मात्
द्रव्याणां चैकदेशमुदाहरणार्थं रसेष्वनुविभज्य -- चैकैकेन च नामलक्षणार्थं षडास्थापन -- रसतो विभज्य व्याख्या
स्यंते विभज्यव्याख्यास्यते॥ यन्तु षाड्रसमास्थापनमेकरसमित्याचक्षते भिषजः॥ तन्तु द्रुतमसंसृष्टरसभूयिष्ठ
त्वात् द्रव्याणां तस्मान्मधुराणि च मधुरप्रायाणि च मधुरप्रभावाणि मधुरविपाकप्रायाण्यपि च मधुरस्कंधे म
धुराण्येव कृत्वोपदेक्ष्यंते। अथेतराणि द्रव्याणि॥ तद्यथा॥ जीवकर्षभकौ जीवंती वीरा तामलकी काकोली
क्षीरकाकोली मुद्गपर्णी माषपर्णी शालपर्णी पृश्निपर्णी असनपर्णी मधुपर्णी पीलुपर्णी मेदा महामेदा कर्क
टशृंगी शृंगाटकाछिन्नरुहाछत्रातिछत्रा श्रावणी महाश्रावणी सहदेवा विश्वदेवा॥ शुक्ला क्षीरशुक्ला बलातिब
ला विदारी क्षीरविदारी क्षुद्रसहा महासहा स्वयंगुप्ता ऋष्यगंधा अश्वगंधा पयस्या वृश्चीव पुनर्नवा बृहती कंटकारिकैरं
डोरुबूकमोरटश्वदंष्ट्रा संहर्षा शतावरी शतपुष्पा मधूकपुष्पी यष्टीमधुकं मधूलिका मृद्वीका खर्जूरं परूषका
त्मगुप्ता पुष्करबीजं कसेरुका राजादनं राजकसेरुका कालतककाश्मर्यं शीतपाकी ओदनपाकी तालखर्जूरमस्त
केक्षुवालिकादर्भकुशकाशशालिगुंद्रेत्कटशरमूलराजक्षवकर्ष्यप्रोक्तद्वारदाभारद्वाजीवनत्रपुष्यार्लि
रूपत्री हंसपादीकाकनासाकुलिंगाक्षीरवल्लीकपोतवल्लीगोपवल्लीसोमवल्ली इत्येतेषामेवंविधानां चान्ये
षां मधुरवर्गपरिसंख्यातानां औषधद्रव्याणां यानि लभ्यंते तानि छेदयित्वा॥ यानि चाणुशो भेदयित्वा प्रक्षाल्य
पानीयेन सुप्रक्षालितायां स्थाल्यां समवाप्य पयसार्धोदकेनाभ्यासिच्य साधयेद्दर्व्या संततमवघट्टयन् स उ २५
पयुक्तभूयिष्ठे भूयिष्ठगतरसेष्वौषधेषु पयसि चानुपदग्धे स्थालीमवतार्य सुपरिपूतं पयः सुखोष्णं घृत
तैलवसामज्जलवणफाणितोपहितं सुखोष्णं वस्तिं वातविकारिणे विधिज्ञो विधिवद्दद्यात्॥ शीतं तु मधुसर्पिर्भ्यां

मुपसंसृज्य पित्तविकारिणे दद्यादिति मधुरस्कंधः॥ आम्रातकलकुचकरमर्दवृक्षाम्लवेतसकुवलबदरदाडिमामल
कमातुलुंगकर्कंधुवंदीरलेन्धातककालमालतमालसातकंदंतशठैरावतकोशाम्रधवंधनानां फलानि पत्राणि च
चाम्रातकाश्मंतकचांगेरीणां चतुर्विधानां चाम्लीकानां द्वयोश्च कोलयोरामशुष्कयोर्द्वयोश्चैव शुष्काम्लिकयो
र्ग्राम्यारण्ययोरासवद्रव्याणि च सुरासौवीरकतुषोदकमैरेयमेदकमदिरामधुशुक्तसमासाधु दधिमंडोद
श्विद्धान्याम्लानीति॥ एषामेवंविधानां चाम्लवर्गपरिसंख्यातानां औषधद्रव्याणां छेद्यानि खंडशः छेदयि
त्वा भेद्यानि चाणुशो भेदयित्वा द्रवैः हिरण्यवासिच्य साधयित्वोपसंस्कृत्य यथावत्तैलवसामज्जलवण
फाणितोपहितोपहितं सुखोष्णं वस्तिं वातविकारिणे विधिज्ञो विधिवद्दद्यादित्यम्लस्कंधः॥ सैंधवसौवर्च
लकालवर्णविडपाक्यानूपकूप्यवालकैलकमूलकसामुद्ररोमकौद्भिदौषरपाथ्योपाटलेयकपांशुजान्ये
वंप्रकाराणि चान्यानि लवणवर्गपरिसंख्यातान्यम्लोपहितान्युष्णोदकोपहितानि वा स्नेहवंति सुखोष्णानि व
स्तिं वातविकारिणे विधिवद्दद्यादिति लवणस्कंधः॥ पिप्पली पिप्पलीमूलहस्तिपिप्पलीचव्यचित्रकशृं
गवेरमरिचाजमोदार्द्रकविडंगकुस्तुंबुरुपीलुतेजोवत्येलाकुष्ठभल्लातकास्थिहिंगुकिलिममूलकसर्षपल
शुनकरंजशिग्रुमधुशिग्रुकरवीरखरपुष्पाभूस्तृणसुरसकुठेरकगंडीरकालमालपर्णाश
फणिज्झकक्षारमूत्रपित्तानीत्येवंविधानां चान्येषां कटुकवर्गपरिसंख्यातानामौषधद्रव्याणां छेद्यानि खंड
शः॥ छेदयित्वा भेद्यानि चाणुशो भेदयित्वा गोमूत्रेण सह साधयित्वोपसंस्कृत्य यथावन्मधुतैललव
णोपहितं सुखोष्णं वस्तिं श्लेष्मविकारिणे विधिवद्दद्यादिति कटुकस्कंधः॥ चंदननलदकृतमालनक्तमा
लनिंबतुंगबिंबतुंगबिंबतुंबरुकुटजहरिद्रादारुहरिद्रामुस्तमूर्वाकिराततिक्तककटुरोहिणीत्रायमाणा
करवीरकेबुककठिल्लवृषमंडूकपर्णीकर्कोटकवार्ताककर्कशकाकमाचीकारवेल्लीकाकोदुंबरिकासु
षव्यतिविषापटोलकुलकपाठागुडूचीवेत्राग्रवेतसविकंकतबकुलसोमवल्कसप्तपर्णसुमनार्काव
ल्गुजवचातगरागुरुवालकोशीराणीत्येवंविधानां चान्येषां तिक्तवर्गपरिसंख्यातानामौषधद्रव्या

णांछेद्यानिखंडशः॥ छेदयित्वाभेद्यानि वाणुशोभेदयित्वाप्रक्षाल्यपानीयेनाभ्यासिच्य साधयित्वोपसंहृ
चरवि॰ त्य यथावन्मधुतैललवणोपहितं सुखोष्णं बस्तिं श्लेष्मविकारिणे विधिज्ञो विधिवद्दद्यात्॥ शीतं तु मधुसर्पि
र्भ्यांउपसंहृत्य पित्तविकारिणे विधिवद्दद्यादिति॥ तिक्तस्कंधः॥ प्रियंगवनंताम्रास्थित्वंबष्टकारोध्रकट्वं
गमोचरससमंगाधातकीपुष्पपद्मापद्मकेसरजंबूवाम्रप्लक्षवटकपीतनोदुंबराश्वत्थभल्लातका
२५ श्मंतकशिरीषशिंशपासोमवल्कतिंदुकपियालबदरीखदिरकदरसप्तपर्णाश्वकर्णस्यंदनार्जुनासनारिमेदैल
वालुकपरिपेलकदंबशल्लकीजिंगिणीकाशकाशेरुकराजकाशेरुकट्फलवंशपद्मकाशोकशाल
धवसर्जभूर्जशणशरबरपुरखरपुष्पा शमीवरकमाचीकतुंगाजकर्णाश्वकर्णस्फूर्जकबिभीतककुं
भीकपुष्करबीजबिसमृणालतालखर्जूरतरुणानीत्येवंविधानाचान्येषां कषायवर्गपरिसंख्यातानामौष
धद्रव्याणां वछेद्यानिखंडशः॥ छेदयित्वाभेद्यानि वाणुशोभेदयित्वा पानीयेनाभ्यासिच्य साधयित्वो
पसंहृत्य यथावन्मधुतैललवणोपहितं सुखोष्णं बस्तिं श्लेष्मविकारिणे विधिज्ञो विधिवद्दद्यात्॥ शीतं
तु मधुसर्पिर्भ्यामुपसंहृत्य पित्तविकारिणे दद्यादिति कषायस्कंधः इति॥ ॥ तत्र श्लोकः॥ षड्वर्गाः परिसंख्याता
य एते रसभेदतः॥ आस्थापनमभिप्रेत्य तानद्यात् सार्वयौगिकान्॥ सर्वशो हि प्रणिहिताः सर्वरोगेषु जा
नता॥ सर्वान् रोगान्नियच्छंति येभ्य आस्थापनं हितं॥ येषां येषां प्रशांत्यर्थे येन येन प्रकीर्तिताः॥ द्रव्यव
र्गा विकाराणां तेषां ते परिकोपनाः इति षडास्थापनस्कंधाः॥ रसतोनुविभज्य व्याख्याताः तेभ्यो भिषक् बुद्धिमा
न् परिसंख्यातमपि यद्द्रव्यं यौगिकं मन्येत तत्तदपि कल्पयेत्॥ यच्चानुक्तमपि यौगिकं मन्येत तदपि दद्यात्॥ २५
वर्गमपि च वर्गेणोपसंसृज्य एकमेकेनानेकेन वा युक्तिप्रमाणीकृत्य प्रचरणमिव भिक्षुकस्य बीजमिव कर्ष
कस्य सूत्रं बुद्धिमतामल्पमप्यनल्पज्ञानाय भवति॥ तस्माद्बुद्धिमतामूहापोहवितर्काः मंदबुद्धेस्तु यथोक्ता
नुगमनमेव श्रेयो यथोक्तं हि मार्गमनुगच्छन् भिषक् संसाधयति॥ कार्यमनतिमहत्त्वाद्विनिपातयत्यन
तिह्रस्वत्वादुदाहरणस्येत्यतः परमनुवासनद्रव्याण्यनुव्याख्यास्यामः॥ अनुवासनं तु स्नेह एव स्नेहः

स्तु द्विविधः स्थावरात्मको जंगमात्मकश्च॥ तत्र स्थावरात्मकस्नेहस्तैलमतैलं तैलमेव कृत्वोपदेक्ष्यंते सर्वतै
लप्राधान्यात्॥ जंगमात्मकस्तु वसामज्जासर्पिरिति॥ तेषां तु तैलवसामज्जसर्पिषां यथापूर्वं श्रेष्ठं वातपि
त्तश्लेष्मविकारेष्वनुवासनीयेषु यथोत्तरं पित्तविकारेषु सर्व एव वा सर्वेषु योगमायांति॥ संस्कारविधि
विशेषादिति॥ शिरोविरेचनद्रव्याणि पुनरपामार्गपिप्पलीमरिचविडंगशिग्रुशिरीषकुस्तुंबरुबिल्वाजाज्यजमोदवा
र्ताकप्रथ्वीकैलाहरेणुकाफलानि च॥ सुमुखसुरसकुठेरकगंडीरकालमालकपर्णासक्षवकफणिज्झकतर्को
रीसर्षपपत्राणि चार्कालार्ककुष्ठनागदंतीवचाभार्गीश्वेताज्योतिष्मतीगवाक्षीगंडीरपुष्पीवृश्चिकालीवयस्था
तिविषामूलानि च॥ हरिद्राश्रृंगवेरमूलकलशुनकंदाश्च॥ लोध्रमदनसप्तपर्णपुष्पाणि च॥ देवदार्वगुरु
सरलसल्लकीजिंगिण्यसनहिंगुनिर्यासाश्च तेजोवतीवरांगीगुदीशोभांजनकबृहतीकंटकारिकात्वचश्चे
ति॥ शिरोविरेचनं सप्तविधं मूलफलपत्रकंदपुष्पनिर्यासत्वगाश्रयभेदात्॥ लवणकटुतिक्तकानि चेंद्रियो
पशयानि॥ तथापराण्यनुक्तान्यपि द्रव्याणि योगविहितानि शिरोविरेचनार्थमुपदिश्यंत इति॥ तत्र
श्लोकाः॥ लक्षणाचार्यशिष्याणां परीक्षाकारणं च यत्॥ अध्येयाध्यापनविधिः संभाषाविधिरेव च
षड्भिरूनानि पंचाशद्वादमार्गपदानि च॥ पदानि दशचान्यानि कारणादीनि तत्त्वतः॥ संप्रश्नश्च परीक्षार्थी
वाकाच मन्वादिषु॥ भिषक्जितीये रोगाणां विमाने संप्रकाशितमिति बहुविधमिदमुक्तमर्थजालं बहुवि
धवाक्यविचित्रमर्थकांतं बहुविधशुभशब्दसंधियुक्तं॥ बहुविधवादनिषूदनं परेषां इममतिं बहुवि
धहेतुसंश्रयं विजज्ञिवान् परिमितवाक् सूदनीनदीयते परवचनाच्च महन्नैन शक्यते परवचनैश्च मर्दि च
तुं दोषादीनां च भावानां च सर्वेषामिह हेतुमत्मानात सम्यग्विमानानि निरुक्तानि विभागश इति॥ अ
ग्निवेशकृते तंत्रे चरकप्रतिसंस्कृते॥ विमानस्थानमेतत्तु यथापारिसमाप्यते॥ ७ ७ ७ ७॥
इति श्रीचरकसंहितायां विमानस्थाने रोगभिषग्जितीयं नाम अष्टमोध्यायः॥८॥ ॥समाप्तः॥ ७

।। ।।इतिचरकसंहिताविमानस्थानेप्रथमःसमाप्तः।।

अथचरकसंहिताशारीरस्थानेज्ञातिसूत्रस्थानेप्रकरणं ४ प्रारंभः

ॐनमोश्रीगणेशायनमः अथातःकतिधापुरुषीयंव्याख्यास्यामः इतिहस्माहभगवानात्रेयः कतिधापुरु
षोधीमनधातुभेदेनभिद्यतेःपुरुषःगाकारणंकस्मात् प्रभवंपुरुषस्यकः किमज्ञोज्ञःसनित्यःकिंकिमपिनित्यःप्र
दर्शितः प्रकृतिःकाविकाराःकेकिंलिंगंपुरुषस्यच निष्क्रियंचस्वतंत्रंचवशिनंसर्वगंविभुं वदंत्यात्मानमात्मज्ञाःक्षे
त्रज्ञंसाक्षिणंतथा क्रियम्यक्रियास्यभगवान्विद्यावेकथं। स्वतंत्रश्चेदनिष्टासकथंयोनिषुजायते वशीयद्यसुखैः
कस्मानभावैराक्रम्यतेबलात् सर्वाःसर्वगतत्वाच्चवेदनाःकिन्नवेत्तिसः नपश्यतिविभुःकस्मात्शैलकुड्यतिरस्कृतं
क्षेत्रज्ञःक्षेत्रमथवाकिंपूर्वमितिसंशयः ज्ञेयाक्षित्रहिनापूर्वंक्षेत्रज्ञंहिनयुज्यते क्षेत्रंहियदिपूर्वस्यात्क्षेत्रज्ञस्यादशा
श्वतः साक्षिभूतस्यश्चकस्यायंकर्ताह्यन्योनविद्यते स्यात्कथंचाविकारस्यविशेषोवेदनाकृतः अथचार्त्तस्यभवंशाव
न्तिस्तणांकाविकित्सति अतीतांवेदनांवैद्योवर्त्तमानांभविष्यती भवीत्ष्वस्याअसंप्राप्तिरातीतायास्त्वनागमाः सांप्रति
निकायाअपिस्थानंनास्त्यर्त्तेसंप्रयोयतः कारणंवेदनानांकिंकिमधिष्टानमुच्यते कचैतावेदनाःसर्वानिवृत्तिंयांत्यशेषतः
सर्ववित्सर्वसंन्यासीसर्वसंयोगसंस्मृतः एकःप्रशांतोभूतात्माकैर्लिंगैरुपलभ्यते वचस्तदग्निवेशस्यश्रुत्वामतिमा
तांवरः उवाचनिखिलंसर्वंप्रशांतात्मापुनर्वसुः खादयःश्चेतनाषष्टाधातवःपुरुषःस्मृतः चेतनाधातुरप्येकःस्मृतःपु
रुषसंज्ञकः पुनश्चधातुभेदेनचतुर्विंशतिकःस्मृतः मनोदशेंद्रियाण्यर्थाःप्रकृतिश्चाष्टधातुकी लक्षणंमनसोज्ञान
स्याभावोभावएवच सतिह्यात्मेंद्रियार्थानांसंनिकर्षेणवर्त्तते वैवृत्यान्मनसोज्ञानसान्निध्यात्तच्चवर्त्तते अणुत्वमथचैक
त्वंद्वौगुणौमनसःस्मृतौ। चिंत्यंविचार्यमुह्यंचध्येयंसंकल्पमेवच यत्किंचिन्मनसोज्ञेयंतत्सर्वंह्यर्थसंज्ञकं इंद्रियाभिग्रहः
कर्ममनसःस्वस्यनिग्रहः ऊहोविचारश्चयतः रंवुधिप्रवर्त्तते इंद्रियेणेंद्रियार्थोहिसमनस्केनगृह्यते कल्प्यतेमनसा
तूर्द्धंगुणतोदोषतोथवा जायतेविषयैयत्रयाबुद्धिर्निश्चयात्मिका व्यवस्यतितयावक्तुंकर्तुंवाबुद्धिपूर्वकं एकैका
धिकमुक्तानिखादिनामिंद्रियाणितु पंचकर्मानुमेयानियेभ्योबुधिःप्रवर्त्तते हस्तौपादौगुदोपस्थंवागिंद्रियमथापिच कर्मे १
द्रियाणिपंचैवपादौगमनकर्मणि पायूपस्थंविसर्गार्थेहस्तौग्रहणधारणे जिह्वावागिंद्रियंवाक्सत्याज्योतिस्तमोनृता
महाभूतानिखंवायुरग्निरापःक्षितिस्तथा शब्दस्पर्शश्चरूपश्चरसोगंधश्चतद्गुणाः तेषामेवगुणःपूर्वोगुणवृद्धिःपरेपरे

पूर्वःपूर्वोगुणःश्चैवक्रमशोगुणिषुस्मृतः खरद्रवोचलोष्णत्वंभूजलानिलतेजसां ॥आकाशस्याप्रतीघातोदृष्टंलिंगंयथा
क्रमं लक्षणंसर्वमेवैतत्स्पर्शनेंद्रियगोचरः स्पर्शनेंद्रियविज्ञेयःस्पर्शोहिसविपर्ययः गुणाःशरीरेगुणिनांनिर्दिष्टाश्चिह्न
मेवच अर्थाशब्दादयो चराविषयागुणाः योयदिंद्रियमाश्रित्यजंतोबुद्धिःप्रवर्त्तते यातिसातेननिर्द्दिशंमनसाचम
नोभवा भेदात्कार्येंद्रियार्थानांबाह्याबैबुधयःस्मृताः आत्मेंद्रियमनोर्थानामेकैकासन्निकर्षजा अंगुल्यंगुष्ठतलजतंत्री
वीणानखोद्भवः शब्दोयथायथाबुद्धिर्दृष्टासंयोगजातथा मंबुद्धिंद्रियमनोर्थानांविद्यायोगंधरंपरं चतुर्विंशतिकाह्येष
राशिःपुरुषसंज्ञकः रजस्तमोभ्यांयुक्तश्चसंयोगोयमनंतवान् ताभ्यांनिराकृताभ्यांतुमन्वव्याभिवर्त्तते अत्रकर्मफलंचा
त्रज्ञानंचात्रप्रकाशितं अत्रमोहःसुखंदुःखंजीवितंमरणंतथा एतद्योवेदतत्वेनसवेदप्रलयोदयौ पारंपर्यंचिकित्सांचवे
द्यं-यज्ञान्नकिंचन भास्तमःसत्यमनृतंवेदाःकर्मशुभाशुभं नस्युःकर्तासवोद्धाचपुरुषोनभवेद्यदि नाश्रयोनसुखंनार्त्तिर्न
गतिर्नागतिर्नवाक् नविज्ञानंनशास्त्राणिनजन्ममरणंनच नबंधोनचमोक्षस्यात्पुरुषोनभवेद्यदि कारणंपुरुषस्तस्मा
त्कारणज्ञैरुदाहृतः नचेत्कारणमात्मास्यात्खादयस्युरहेतुका नचैषुसंभवेज्ज्ञानंनचतैःस्यात्प्रयोजनं मृद्दंडचक्र
प्रकृतंकुंभकारादृतेघटं कृतंमृत्तृणकाष्ठैर्वागृहकाराद्विनागृहं योवदेत्सवदेद्देहंसंभूयकरणैःकृतं विनाकर्तारम
ज्ञानात्युक्त्यागमबहिष्कृतः कारणंपुरुषःसर्वैःप्रमाणैरुपलभ्यते येभ्यःप्रमेयंसर्वेभ्यःआगमेभ्यःप्रमीयते नतेत
त्सदृशास्त्वन्येपारंपर्यसमुत्थिताः सारूप्यादेतएवेतिनिर्दिश्यंतेनवानवाः भावास्तेषांसमुदयोनिरीहःसत्वसंज्ञकः क
र्त्ताभोक्ताचसपुमान्इतिकेचिद्व्यवस्थिताः तेषामन्यैःकृतस्यान्येभावैर्भावोनवाःफलं भुंजंतेसदृशप्राप्तंयैरात्मानोपलभ्य
तेः कारणान्यान्यताहृष्टाचास्यकर्तासएवतुः कर्त्ताहिकरणैर्युक्तःकारणंसर्वकर्मणां निमेषकालाद्भावानांकालःशीघ्रत
रोत्यये भग्नानांवापुनर्भावःकृतंनान्यमुपैतिच मतंतत्वविदामेतत्यस्मात्तस्कारणं क्रियोपभोगेभूतानांनित्यःपु
रुषसंज्ञिकः अहंकारःफलंकर्मदेहांतरगतिःस्मृतिः विद्यतेसतिदेहानांकारणेदेहमंतरा अनादिमत्वात्प्रभवोविद्य
तेनांतरात्मनः पुरुषोराशिसंज्ञस्तुमोहेच्छाद्वेषकर्मजः आत्माज्ञःकरणैर्योगात्ज्ञानंतस्यप्रवर्त्तते करणानांचवैकल्या
तमसोयोगाद्वानवर्त्तते पश्यतोपियथादर्शेसंक्लिष्टेनास्तिदर्शनं तत्वंजलेवाकलुषेचेतस्युपहतेतथा करणानिमनोबु

धिः बुद्धिः कर्मेंद्रियाणिच कर्तृसंयोगजंकर्मवेदनाबुद्धिरेवच एकःप्रवर्त्तनेकर्त्ताभूतात्मानाश्नुतेफलं संयोगाबर्द्ध
तेसर्वंनमृतेनास्तिकिंचनात नह्येकोवर्ततेभावोवर्ततेनाथहेतुकः शीघ्रगत्वात्स्वभवंतुभावोनव्यभिवर्त्तते॥ अनादिः
पुरुषोनित्योविपरीतस्तुहेतुजः सदकारणवंनित्यंदृष्टंहेतुजमन्यथा तदेवभावादग्रेयंनित्यत्वाद्धुतश्चन भावादग्रे
यमदव्यमिचिंत्यंव्यक्तमन्यथा अव्यक्तमात्माक्षेत्रज्ञःशाश्वतोविभुरव्ययः तस्माद्यदन्यत्तद्व्यक्तंवक्ष्यतेचापरद्वयं
व्यक्तमैंद्रियकंचैवगृह्यतेतद्यदिंद्रियैः अतोन्यत्पुनरव्यक्तंलिंगग्राह्यमतिंद्रियं खादिनीबुद्धिरव्यक्तमहंकारस्तथा
ष्टमः भूतप्रेततिरुद्दिष्टाःविकारांपोडशैवतु ।बुद्धिंद्रियाणिपंचैवपंचकर्मेंद्रियाणिच समनस्कार्थ्रपंचार्थाविकाराइ
तिसंज्ञिताः इतिक्षत्रमसमुद्दिष्टंसर्वमव्यक्तवर्जितं अव्यक्तमस्यक्षेत्रस्यक्षेत्रज्ञमृषयोविदु जायतेबुद्धिरव्यक्तात्बु
ध्याहमितिमन्यते परंखादिन्यंकारउपाद्त्तेयथाक्रमं ततःसंपूर्णसर्वांगोजातोभ्युदितउच्यते पुरुषःप्रलयेचेष्टै
पुनर्भावैर्वियुज्यते अव्यक्तात्व्यक्ततांयातिव्यक्तादव्यक्ततांयाति रजस्तमोभ्यामाविष्टःचक्रवत्परिवर्तते येषांद्वंद्वेप
राशक्तिरहंकारपराश्चये उदयप्रलयौतेषांनतेषांयेत्वतोन्यथा प्राणापानौनिमेषाद्याजीवितंमनसोगतिः इंद्रियांत
रसंचारःप्रेरणंधारणंचयत् देशांतरगतिःस्वप्नेपंचत्वग्रहणंतथा दृष्टस्यदक्षिणेनाक्ष्णासव्येनावगमस्तथा इच्छाद्वेषः
सुखंदुःखंप्रयत्नश्चेतनाधृतिः बुद्धिःस्मृतिरहंकारोलिंगानिपरमात्मनः यस्मात्समुपलभ्यंतेलिंगान्येतानिजीविनः
नमृतस्यात्मलिंगानितस्मादाहुर्महर्षयः शरीरंहिगतेतस्मिन्शून्यागारमचेतनं पंचभूतावशेषत्वात्पंचत्वंगतमुच्यते
अचेतनंक्रियावच्च मनश्चेतयितापरं युक्तस्यमनसातस्यनिर्दिश्यंतेविभोःक्रियाः चेतनावान्यतश्चात्माततःकर्ताहिरुच्य
ते अचेतनत्वाच्चमनःसक्रियावदपिनोच्यते यथास्वेनात्मनात्मा सर्वःसर्वास्वयोनिषु प्राणैस्तंत्रयतेप्राणीनह्यन्योन्य
स्यवक्रूर दर्शिनत्कुरुतेकर्मयत्कृत्वाफलमश्नुते वशीचेतनसमाधत्तेदर्शीसर्वंनिरस्यति देहेसर्वगतश्चात्मास्वेस्वे
संस्पर्शनेंद्रिये सर्वाःसर्वाश्रयस्थास्तत्मात्मानोवेत्तिवेदना विभुत्वमतएवास्ययस्मात्सर्वगतामहान् मनसश्चसमाना
त्पश्यत्यात्मातिरस्कृतं नित्यानुबंधमनसोदेहकर्मानुपातिना सर्वयोगेनिगतंविद्यादेकयोनाववस्थितं अनादिरात्म
क्षेत्रस्यपारंपर्यमनादिकं अनादिमत्वाच्चनयोःकिंपूर्वमितिनोच्यते ज्ञःसाक्षित्युच्यतेनाज्ञःसाक्षिवात्मायतःस्मृतः

DR BH DAJI MEMORIAL
डाक्टर भाऊदाजी

सर्वेभावाहिसर्वेषांभूतानामात्मसाक्षिकाः नैकःकदाचिद्भूतात्मलक्षणैरुपलभ्यते विशेषोनुपलब्धस्यतस्यनैकस्य
विद्यते संयोगेपुरुषस्येष्टाविशेषोवेदनाकृतः वेदनायत्रनियताविशेषस्तत्रतत्कृतः चिकित्सतिभिषक्सर्वास्त्रिकालावेद
नाइति यथायुक्त्यावदत्येकेसायुक्तिरुपधार्यतां पुनस्तच्छिरसःशूलंज्वरःसपुनरागतः पुनःसकासोबलवान्छर्दिःसापु
नरागता प्रएभिःप्रसिद्धवचनैरतीतागमनंमतं कालश्चायमतीतानामार्तिनांपुनरागतः तमर्त्तिःकालमुद्दिश्यभेषजंप्र
युज्यते अतीतानांप्रशमनंवेदनानांनदुच्यते आयस्तापुनरापूर्वाभिःसस्यंपुराहं यथाप्रकृतयेसेतुःप्रतिकर्म्मंत
थाश्रये पूर्वरूपंविकाराणांदृष्टाप्रादुर्भविष्यतां याक्रियाक्रियतेसाचवेदनाहंत्यनागतां पारंपर्यानुबंधस्तुदुःखा
नांविनिवर्तते सुखहेतूपचारेणसुखंचापिप्रवर्त्तते नसमायांतिवैषम्यंविषमासमतांनच हेतुभिःसमतानित्यंज्ञा
यंतेदेहधातवं युक्तिमेतांपुरस्कृत्यत्रिकालांवेदनांभिषक् हंतीत्युक्तंचिकित्सातुनेष्टकीयाविनैषधं उपधाहिपरो
हेतुःसुखदुःखाश्रयन्नुदाः न्यागसर्वोपधानांतुसर्वदुःखव्यपोहकः कोशकारोयथात्यंशूनुपादत्तेवधःप्रदान् उपाद
त्तेतथार्थेभ्यतृष्णामज्ञःसदातुरः यस्त्वग्निकल्पानर्थान्ज्ञोज्ञात्वातेभ्योनिवर्त्तते अनारंभादसंयोगात्तंदुःखंनोपतिष्टते
धीधृतिस्मृतिविभ्रंशःसंप्राप्तिःकालकर्मणां असात्म्यार्थागमश्चेतिज्ञातव्यादुःखहेतवः विषमाभिनिवेशोयोनित्यानित्ये
हिताहिते ज्ञेयःसबुद्धिविभ्रंशःसमंबुद्धिर्हिपश्यति विषयप्रवणंचित्तंधृतिभ्रंशान्नशक्यते नियंतुमहितादर्थाद्धृतिर्हिनि
यमात्मिका तत्वज्ञानेस्मृतिर्यस्यरजोमोहावृतात्मनः भ्रश्यतेसस्मृतिविभ्रंशःस्मर्तव्यंहिस्मृतौस्थितं धीधृतिस्मृतिविभ्रष्टः
कर्मयत्कुरुतेशुभं प्रज्ञापराधंतंविद्यात्सर्वदोषप्रकोपणं उदीरणंस्थितिमता दीर्णानांचनिग्रहः सेवनंसाहसानांचना
रीणांचातिसेवनं कर्मकालातिपातश्चमिथ्यारंभश्चकर्मणा विनयाचारलोपश्चपूज्यानांचाभिधर्षणा ज्ञातानांस्वयमर्था
नांसहितार्थानिषेवणां चपेचंमोन्मादिकानांचप्रत्ययानांनिषेवणं अदेशाचारसंपचारोमैत्रीसंक्लिष्टकर्मभिः इंद्रियो
द्भवक्रमोत्सृस्यसद्वृत्तस्यचवर्जनं ईर्ष्यामानभयक्रोधलोभशोकमदभ्रमाः तज्जंवाकर्मयत्क्लिष्टंय ह्कर्मच य
च्चान्यदीदृशंकर्मरजोमोहसमुत्थितं प्रज्ञापराधंतंशिष्टाब्रुवतेव्याधिकारणं बुध्याविशममविज्ञानंविषमंचप्रवर्त्तनं
प्रज्ञापराधंतंशिष्टाब्रुवतेव्याधिकारणं बुध्याविशममविज्ञानंविषमंचप्रवर्त्तनं प्रज्ञापराधंजानीयात्मनसोगोचरंहितत्

निर्दिष्टाकालसंप्राप्तिर्व्याधीनांव्याधिसंग्रहे: चयप्रकोपप्रशमाः पित्तादीनांयथापुरा मिथ्यातिहीनयोगाश्चवर्षाद्यारोगहे
तवः जीर्णभुक्तप्रजीर्णान्नकालाकालस्थितिश्चयाः पूर्वमध्यापराह्णाश्चरात्रिभागास्त्रयश्चये तेषुकालेषुनियताये रोगा
स्तेकालजा अन्येद्युष्कद्व्यहग्राहीतृतीयकश्चतुर्थकौ स्वेस्वेकालेप्रवर्त्तन्तेकालेह्येषांबलागमः एतेचान्येचयेकेचित्कालजा
विविधागदाः अनागतचिकित्सार्थमृतुकालौविजानता कालस्यपरिणामेनजरामृत्युनिमित्तजा रोगाःस्वाभाविकादृ
ष्टाःस्वभावोनिःप्रतिक्रिया निर्दिष्टंदैवशब्देनकर्मयत्पौर्वदेहिकं हेतुस्तदपिकालेनरोगाणामुपलभ्यते नहिकर्ममहत्किं
चित्फलंयस्यनभुज्यते क्रियाघ्नाःकर्मजारोगाःप्र यांतितत्क्षयात् अत्युच्चशब्दश्रवणात्श्रवणात्सर्वशोनचः। शब्दा
नांचातिहीनानांभवतिश्रवणाजडः परुषोद्भीषणाशस्ताप्रियव्यसनसूचकैः शब्दैःश्रवणसंयोगोमिथ्यासंयोगउच्यते
असंस्पर्शोतिसंस्पर्शोहीनसंस्पर्शएवच स्पृश्यानांसंग्रहेणोक्तःस्पर्शेन्द्रियबाधकः योभूतविषवातानामकालेनागतश्च
यः स्नेहशीतोष्णसंस्पर्शोमिथ्यायोगःसउच्यते रूपाणांनश्यतेदृष्टिर्भास्वतामतिदर्शनात् दर्शनाच्चातिसूक्ष्माणांसर्वशश्चा
प्यदर्शनात् द्विष्टभैरवबीभत्सदूरातिश्लिष्टदर्शनात् तामसानांचरूपाणांमिथ्यासंयोगउच्यते अत्यादानमनादानमोक
सात्म्यादिभिश्चयत् रसानांविषमादानंतत्सर्वदोषदूषणं अतिमृदुतितीक्ष्णानांगंधानामुपसेवनं असेवनंसर्वशश्चनतघ्रा
णेन्द्रियनाशनं पूतिभूतविषद्विष्टगंधायेचास्यनार्त्तवो तेगंधैर्घ्राणसंयोगोमिथ्यायोगःसउच्यते इत्यसात्म्यार्थसंयोगस्त्रिवि
धोदोषकोपनः असात्म्यमितितद्विद्याद्यन्नयातिसहात्मतां मिथ्यातिहीनयोगेभ्योयोव्याधिरुपजायते शब्दादीनांसविज्ञेयो
व्याधिरैन्द्रियकोबुधैः वेदनानामसात्म्यानामित्येतेहेतवःस्मृताः सुखहेतुर्मतस्त्वेकःसमयोगःसुदुर्लभः नेन्द्रियाणिनचै
वार्थाःसुखदुःखस्यहेतवः हेतुस्तुसुखदुःखस्ययोगोदृष्टश्चतुर्विधः सन्तीन्द्रियाणिसन्त्यर्थाःयोगोनचनचास्तिरुक् नसुखं
कारणंतस्मात्योगएवचतुर्विधः नात्मेन्द्रियमनोबुद्धिगोचरंकर्मवाविना सुखंदुःखंयथायच्चबोद्धव्यंतत्तथोच्यते
स्पर्शनेन्द्रियसंस्पर्शस्पर्शोमानसएवच द्विविधःसुखदुःखानांवेदनानांप्रवर्त्तकं इच्छाद्वेषात्मिकातृष्णासुखदुःखात्प्रवर्त्त
ते तृष्णाचसुखदुःखानांकारणंपुनरुच्यते उपादत्तेहिसाभावान्वेदनाश्रयसंज्ञकान् स्पृश्यतेनानुपादानोनास्पृष्टोवे १
त्तिवेदनाः वेदनानामधिष्ठानंमनोदेहश्चसेन्द्रियः केशलोमनखाग्रान्नमलद्रवगुणैर्विना योगेमोक्षेचसर्वासांवेदना

नामवर्त्तनं मोक्षनिवृत्तिर्निःशेषायोगोमोक्षप्रवर्त्तकः आत्मेन्द्रियमनोर्थानांसन्निकर्षात्प्रवर्त्तते सुखंदुःखमनारंभादात्म
स्थेमनसिस्थिरे निवर्त्ततेतदुभयंवशित्वंचोपजायते सशरीरस्ययोगज्ञास्तंयोगमृषयोविदुः आवेशश्चेतसोज्ञानमर्थानांछं
दतःक्रिया दृष्टिःश्रोत्रंस्मृतिःकांतिरिष्टतश्चाप्यदर्शनं इत्यष्टविधमाख्यातंयोगिनांबलमैश्वरं शुद्धसत्त्वसमाधानात्सर्वमु
पजायते मोक्षोरजस्तमोभावाद्बलवत्कर्मसंक्षयात् वियोगःसर्वसंयोगैरपुनर्भावउच्यते सतामुपासनंशश्वदसतांपरिवर्जनं
व्रतचर्योपवासश्चनियमाश्चपृथग्विधाः धारणंधर्मशास्त्राणांविज्ञानंविजनेरतिः विषयेष्वरतिर्मोक्षेव्यवसायपराधृतिः
कर्मणामसमारंभःकृतानांचपरिक्षयः नैष्कर्म्यमनहंकारःसंयोगेभयदर्शनं मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणं तत्त्वस्मृ
तेरुपस्थानात्सर्वमेवप्रवर्त्तते स्मृतिःसत्सेवनाद्यैश्चधृत्यन्तैरुपजायते स्मृत्वास्वभावंभावानांस्मरन्दुःखात्प्रमुच्यते व
क्ष्यन्तेकारणान्यष्टौस्मृतिर्यैरुपजायते निमित्तरूपग्रहणात्सादृश्यात्सविपर्ययात् सत्त्वानुबंधादभ्यासात्ज्ञानयोगात्
पुनःश्रुतात् दृष्टश्रुतानुभूतानांस्मरणात्स्मृतिरुच्यते एतत्तदेकमयनंमुक्तैर्मोक्षस्यदर्शितं तत्त्वस्मृतिबलंयेनग
तानपुनरागताः अयनंपुनराख्यातमेतद्योगस्ययोगिभिः संख्यातधर्मैःसांख्यैश्चमुक्तैर्मोक्षस्यचायनं सर्वंकारणवद्दुःखमस्व
स्वंचानित्यमेवच नचात्मकृतकंतद्धितत्रचोत्पद्यतेस्वता यावन्नोत्पद्यतेसत्याबुद्धिर्नैतदहंतथा नैतन्ममेतिविज्ञायज्ञःसर्व
मतिवर्त्तते तस्मिंश्चरमसंन्यासेसमूलाःसर्ववेदनाः ससंज्ञाज्ञानविज्ञानानिवृत्तिंयान्त्यशेषतः अतःपरंब्रह्मभूतोभूतात्मानो
पलभ्यते निःसृतःसर्वभावेभ्यश्चिह्नंयस्यनविद्यते गतिर्ब्रह्मविदांब्रह्मतच्चाक्षरमलक्षणं ज्ञानंब्रह्मविदांचात्रनाज्ञस्तज्
ज्ञातु तत्रश्लोकः प्रश्नाःपुरुषमाश्रित्यत्रयोविंशतिरुत्तमाः कतिधापुरुषीयेऽस्मिन्निर्णीतास्तत्त्वदर्शिनेति इतिश्रीचर
कसंहितायांशारीरस्थानेकतिधापुरुषीयोनामप्रथमोध्यायः अथातोतुल्यगोत्रीयंशारीरंव्याख्यास्यामः इतिह॰
अतुल्यगोत्रस्यरजःक्षयान्तेरहोविसृष्टंमिथुनीकृतस्य किंस्याच्चतुष्पात्प्रभवंचषड्भ्योयत्स्त्रीषुगर्भत्वमुपैतिपुंसः शुक्रं
तदस्यप्रवदन्तिधीरायद्धीयतेगर्भसमुद्भवाय वाय्वग्निभूम्यब्गुणपादवत्तत्षड्भ्योरसेभ्यःप्रसवश्चतस्य संपूर्णदेहःसम
येसुखंचगर्भःकथंकेनचजायतेस्त्री गर्भंचिरात्विन्दतिसप्रजापिभूत्वाथवानश्यतिकेनगर्भः शुक्रासृगात्माशयका
लसंपद्यस्योपचारश्चहितैस्तथार्थैः गर्भःसकालेनसुखीचसुखंजायतेसंपरिपूर्णदेहः योनिप्रदोषान्मनसो

भितापातशुक्राशृगाहारविहारदोषान् अम्लरुयोगाद्रुसंक्षयाच्च गर्भश्चिराद्दिनसप्रजायते अस्यन्निरुद्धपवनेननार्या
गर्भंदिवस्यंत्यबुधाः कदाचित् गर्भस्यरूपंहिकरोतितस्यास्तदास्तगस्याविवीवर्धमानं तदग्निसूर्यश्रमशोकरोगैरुष्णा
न्नपानैरथवाप्रवृत्तं दृष्ट्वास्रगेकंचनगर्भसंज्ञाः केचिन्नराभूतहृतंवदंति उग्रौजसानांरजनीचराणामाहारहेतोर्मशरीर
मिष्टं गर्भंहरेयुर्यदितेनमातुर्लब्धावकाशास्तनहरेयुरोजः कन्यांसुतंवासहितौपृथग्वासुतेसुतौ यानवकुत्वा सुते
कथंस्त्रीसुचिरेणगर्भमेकोनिबद्धिद्वयमोप्यपैति रक्तेनकन्यामधिकेनपुत्रंशुक्रेणतेनोभययथाकृतेन बीजेनकन्यांचसुतंच
यथास्वबीजान्यतराधिकेन शुक्राधिकंद्वैधमुपैतिबीजंयस्यासुतौसासहितौप्रसूती रक्ताधिकंवायदिभेदमेतिद्विधासु
तेसासहितेप्रसूते भिन्नेनबीजेयावद्रुधाप्रपन्नशुक्रार्तवंवावायुरतिप्रवृद्धः ना न्ययस्यानियथाविभागंकर्मात्मकान्यस्वव
शात्प्रसूते आहारमाप्नोतियदानगर्भःशोषंसमाप्नोतिपरिस्रवंवा तस्त्रीप्रसूतेसुचिरेणगर्भंपुष्टोयदावर्षगणैरपिस्यात् कर्मा
त्मकत्वाद्विषमांशभेदात्शुक्रासृजोर्वृद्धिमुपैतिकुक्षौ नाधिकोन्यूनतरोहितीयोयमेधिकेष्वेषभवेद्विशेषः कस्माद्विरेताः
पवनेंद्रियोवासंस्कारवाहीनरनारिषंढो वक्रीतथेर्ष्याभिरतिः कथंवासंजायतेवातिकपंडकोवा बीजात्मसंमांशादुपतप्त
बीजात्स्त्रीपुंसलिंगीभवतिद्विरेताः शुक्राशयंगर्भगतस्यहत्वाकरोतिवायुत्यवनेंद्रियत्वं शुक्राशयद्वारविघट्ट
नेनसंस्कारवाहंहिकरोतिवायुः मंदाल्पबीजावबलावहर्षौक्लीयौचहेतुविकृतिद्वयस्य मातुश्चवायप्रतिघेनवक्री
स्याद्बीजदौर्बल्यतयापितुश्च ईर्ष्याभिभूतावपिमंदहर्षावीर्ष्यारतयस्येचवदंतिहेतुं वाय्वग्निदोषाद्वृषणौतुयस्य
नाशंगतौवातिकपंडकःसः इत्येवमष्टौविकृतप्रकाराःकर्मात्मकानामुपलक्षणीयाः गर्भस्यसद्योनुगतस्यकुक्षौ
स्त्रीपुंनपुंसामुदरस्थितानां किंलक्षणंकारणमिष्यतेकिंसरूपतांयेनचयात्यपत्यं निष्ठीविकागौरवमंगसाद
स्तंद्राप्रहर्षौहृदयव्यथाच तृप्तिश्चबीजग्रहणंचयोन्यागर्भस्यसद्योनुगतस्यलिंगं सव्यांगचेष्टापुरुषार्थिनीस्त्रीस्त्री
स्वप्नेप्युपाशानसुशीलरत्नष्टा सव्यानगर्भानचवृत्तगर्भासव्यप्रदुग्धास्त्रियमेवसूते पुत्रत्वंतोलिंगविपर्ययेणव्यामिश्रं ४
लिंगाप्रकृतितृतीया गर्भोपपत्तौतुमनःस्त्रियायंजंतुंव्रजेत्तत्सदृशंप्रसूते गर्भस्यचत्वारिचतुर्विधानिभूतानिमाता
पितृसंभवानि आहारजान्यात्मकृतानिचैवसर्वस्यसर्वाणिभवंतिदेहे तेषांविशेषाद्बलवंतियानिभवंतिमाताऽपि

पितृकर्मजानां तानिव्यवस्येत्सदृशत्वहेतुं सत्वंयथानूकमपिव्यवस्येत् कस्मात्प्रजांस्त्रीविकृतांप्रसूतेहीनाधिकांगां
विकलेंद्रियांच देहात्कथंदेहमुपैतिचान्यमात्मासदाकैरनुबध्यतेच शुक्रासृगात्माशयकालदोषैर्मातुस्तथाहारविहा
रदोषैः कुर्वंतिदोषाविविधानिदुष्टाः संस्थानवर्णेंद्रियवैकृतानि वर्षासुकाष्ठाश्मघनांबुवेगास्तरोःसरिच्छ्रोतसिसं
स्थितस्य यथैववकुर्वंतिविकृतिंतथैवगर्भस्यकुक्षौनियतस्यदोषाः भूतैश्चतुर्भिःसहितःसुसूक्ष्मैर्मनोजवोदेहमुपै
तिदेहात् कर्मात्मकत्वान्नतुतस्यदृश्यंदिव्यंविनादर्शनमस्तिरूपं सर्वत्रगःसर्वशरीरभृच्चसविश्वकर्मासचविश्वरूपः सचे
तनाधातुरतीन्द्रियोसौसनित्ययुक्सानुशयःसएवः रसात्ममातापितृसंभवानीभूतानिविद्यादृशषच्चदेहे चत्वारिव
आत्मनिसंश्रितानिस्थितस्तथात्मावचतुर्षुतेषु भूतानिमातापितृसंभवानीरजश्चशुक्रंचवदंतिगर्भे आप्यायतेशुक्रम
सृक्चभूतैर्यैस्तानिभूतानिरसोद्भवानि भूतानिचत्वारितुकर्मजानियान्यात्मनावैप्रविशंतिगर्भे सबीजगर्भाण्यपरापराणि
देहांतराण्यात्मनियानि रूपादिरूपःप्रभवःप्रसिद्धःकर्मात्मकानांमनसोमनस्तः भवंतियेत्वाकृतिबुद्धिभेदारजस्तमःक
र्मचहेतुः अतींद्रियैस्तैरतिसूक्ष्मरूपैरात्माकदाचिन्नवियुक्तपूर्वः नकर्मणानैवमतोमतीर्योनवास्यहंकारविकारदोषैः
रजस्तमोभ्यांतुमनोनुबंधंज्ञानंविनातत्रहिसर्वदोषाः गतिप्रवृत्त्योस्तुनिमित्तमुक्तंमनसादोषंबलवच्चकर्म रोगाकृतः
संशमनंकिमेषांहर्षस्यशोकस्यचकिंनिमित्तं शरीरसत्वप्रभवाविकाराःकथंनशांतापुनरायतेषुः प्रज्ञापराधोविष
मास्तथार्थाःहेतुस्तृतीयःपरिणामकालः सर्वामयानांत्रिविधाचशांतिर्ज्ञानार्थकालाःसमयोगयुक्ताः धर्म्याक्रियाहर्षनि
मित्तमुक्ताभूतान्यथाशोकविपर्ययांति शरीरसत्वप्रभवास्तुरोगास्तयोर्नवृत्त्यानभवंतिभूयः रूपस्यसत्वस्यचसंततिर्या
नोक्तस्तदादिर्नहिसोस्तिकश्चित् तयोरवृत्तिक्रियतेपराभ्यांयथार्थयोगात्परयाधियाच सव्याश्रयेवाद्विविधेयथो
क्तेपूर्वंगदेभ्यःप्रतिकर्मनित्यं जितेंद्रियंनानुपतंतिरोगास्तत्कालयुक्तंयदिनास्तिदैवं दैवंपुरायत्कृतमुच्यतेतत्तन्मानु
षंयत्त्विहमंकर्मदृष्टं प्रवृत्तिहेतुर्विषमःसदृष्टोनिवृत्तिहेतुःसुसमःसएव हेमंतीकंदोषचयंवसंतेप्रवाहयन्ग्रैष्मि
कमभ्रकाले घनात्ययेवार्षिकमाशुसम्यक्प्राप्नोतिरोगानृतुजान्नजंतु नरोहिताहारविहारसेवीसमीक्ष्यकारीविष

येषसक्तः धृतासमःरात्मपरःक्षमावानाप्तोपसेवीचभवत्यरोगः मतिर्वचःकर्मसुखानुबंधसत्वंविधेयंविशदाचबुद्धिः
ज्ञानंतपस्तत्परताचयोगेयस्यास्तितंनानुपतंतिरोगाः तत्रश्लोकः इतिहाग्निवेशस्यमहार्थयुक्तंषट्त्रिंशकंप्रश्नगणंमह
र्षिभिः अतुल्यगोत्रेभगवान्यथावन्निर्णीतवान्ज्ञानविवर्धनार्थं इतिश्रीचरकसंहितायांशारीरस्थानेऽतुल्यगोत्रीयं
नमद्वितीयोध्यायः अथातःखुड्डाकांगर्भावक्रांतिंशारीरंव्याख्यास्यामः इतिह॰ पुरुषस्यानुपहतरेतसःस्त्रियाश्चा
प्रदुष्टयोनिशोणितगर्भाशयायायदाभवतिसंसर्गः ऋतुकालेयदानयोस्तथायुक्तेसंसर्गेशुक्रशोणितसंसर्गंगर्भाशयगतंजीवो
वक्रामति सत्वसंप्रयोगात्तदागर्भोभिनिर्वर्तते ससात्म्यरसोपयोगादरोगोभिसंवर्धते सम्यगुपचारैश्चोपचार्यमाणश्च
नःप्राप्तकालःसर्वेंद्रियोपपन्नःपरिपूर्णशरीरोबलवर्णसत्वसंहननःसंपदुपेतःसुखेनजायते समुदायादेषांभावानां
मातृजश्चायंगर्भःपितृजश्चात्मजश्चसात्म्यजश्चरसजश्चसत्वमौपपादिकमितिहोवाच भगवानात्रेयोनेतिभरद्वाजःकिं
कारणं नहिमातानपितानात्मानसात्म्यंनपानाशनभक्षलेह्योपयोगागर्भंजनयंति नचपरलोकादेत्यसत्वंगर्भ
मवक्रामति यदिह्यमातापितरौगर्भंजनयेतां भूयस्यस्त्रियःपुमांसश्चभूयांसःपुत्रकामास्तेसर्वेपुत्रजन्माभिसंधायमै
थुनधर्ममापद्यमानाःपुत्रानेवजनयेयुः दुहितॄर्वादुहितृकामाः नचकाश्चितस्त्रियःकेचिद्वापुरुषानिरपत्याःस्युरन
पत्यतांनपरिदेवेरन् नचात्मात्मानंजनयति यदिह्यात्मात्मानंजनयेज्जातोवाजनयेदात्मानमजातोवातच्चोभयथा
प्ययुक्तं नहिजातोजनयति सत्वान्नचैवाजातोजनयत्यसत्वात्तस्मादुभयथाप्यनुपपत्तिः तिष्ठतुतावदेतद्यद्यात्मात्मा
नंजनयितुंस्यात् नत्वनिष्टास्वेवयोनिषूत्पादयेदात्मानंवशीसन्नप्रतिहतगतिंकामरूपिणंतेजउजोबलवर्णसत्वसंहननसमुदितम
जरमरुजममरमेवंविधंह्यात्मात्मानमिच्छत्यतोवाभूयः असात्म्यजश्चायंगर्भोयदिहिसात्म्यजःस्यात्तदासात्म्यसेवि
नामेवैकांते नप्रजास्यादसात्म्योपसेवनश्चनिखिलेनानपत्याःस्युस्तदुभयमुभयत्रदृश्यते अरसजश्चायंगर्भोय
दिहिरसजःस्यात्नसेत् स्त्रीपुरुषेषुनयत्स्यंतास्यु नहिकश्चिदस्त्येतेषांयोरसान्नोपयुंक्तेश्रेष्ठरसोपयोगिनांचगर्भाजा
यंतइत्यभिप्रेतमेणसत्वाजौरभ्रमार्गमायूरगोक्षीरदधिघृतमधुतैलसैंधवेक्षुरसमुद्गशालिभृतानामेवैकांतेनप्रजा
स्याच्छ्यामाकवरकोद्दालककोरदूषकंदमूलभक्ष्याश्चनिखिलेनानपत्याःस्युस्तच्चोभयथादृश्यतेनरवल्वपिपरलोका ९

देत्यसत्वंगर्भमवक्रामति यदिह्येनमवक्रामेन्नास्यकिंचिदपौर्वदेहिकंस्यादविदितमश्रुतमदृष्टंवासर्वकिंचिदपिनस्मरति॥
तस्मादेतद्ब्रूमहे अमातृजश्चायंगर्भोपितृजश्चायंनात्मजश्चासात्म्यजश्चारसजश्चनचास्तिसत्वमौपपादिकमितिहोवा
चाभरद्वाजेनेति भगवानात्रेयः सर्वेभ्यएभ्योभावेभ्यःसमुदितेभ्योगर्भोभिनिर्वर्ततेमातृजश्चायंगर्भोनहिमातुरृ
तेगर्भोत्पत्तिःस्यान्नजन्मजरायुजानांयानितुखल्वस्यगर्भस्यमातृजानियान्यस्यमातृतःसंभवतःसंभवंती तान्यनु
व्याख्यास्यामः तद्यथा त्वक्चलोहितंचमांसंचमेदश्च नाभिश्चहृदयंचक्लोमचयकृच्चप्लीहाचवृक्कौचबस्तिश्चपुरीषा
धानंचामाशयश्चोत्तरगुदंचाधरगुदंचक्षुद्रांत्रंचस्थूलांत्रंचवपावहनंचेति मातृजानी पितृजश्चायंगर्भोनहिपितुरृतेगर्भो
त्पत्तिःस्यान्नजन्मजरायुजानांयानिखल्वस्यगर्भस्यपितृजानियानिचास्यपितृतःसंभवतःसंभवंती तान्यनुव्या
ख्यास्यामः तद्यथाः केशश्मश्रुलोमनखदंतास्थिसिरास्नायुधमन्यःशुक्रमितिपितृजानि आत्मजश्चायंग
र्भोगर्भात्माह्यंतरात्मायस्तंजीवमित्याचक्षते शाश्वतमरुजमजरामरमक्षयमछेद्यमभेद्यमक्षोभ्यंविश्वरूपंवि
श्वकर्माणमव्यक्तमनादिमनिधनमक्षरंसगर्भाशयमनुप्रविश्यशुक्रशोणिताभ्यांसंयोगमेत्यगर्भत्वेनजनयत्यात्म
नात्मानमात्मसंज्ञाहिजन्मादिर्भवेतस्यपुनरात्मनोनादिमत्त्वादुपपद्यते तस्मान्नजातएवायमजातंगर्भंजनयति
सचैवगर्भःकालांतरेणबालयुवस्थविरभावान्प्राप्नोति सयस्यांयस्यामवस्थायांवर्तते तस्यांतस्यांजातोभवति
जातत्वंचैवजनिष्यमाणत्वंचसजातोजन्यते सचैवानागतेष्ववस्थांतरेष्वजातोजनयत्यात्मनात्मानं सतोह्यवस्थांतर
गमनमात्रमेवजन्मोच्यते तत्रतत्रवयसितस्यांतस्यामवस्थायांयथासतामेवशुक्रशोणितजीवानांप्राक्संयोगाद्भवति
यतस्तस्यैवपुरुषस्यप्रागपत्याद् पितृत्वंनभवति तच्चापत्याद्भवति यथासतस्तस्यैवगर्भस्य तस्यांतस्यामवस्था
यांजातत्वमजातत्वंचोच्यते नतुखलुगर्भस्यनमातुर्नापितुर्नचात्मनः सर्वभावेषुयथेष्टकारित्वमस्ति किंचित्स्ववशाः
कर्मकुर्वंति किंचित्कर्मवशात्किंचित्तेषांकरणशक्तिर्भवति क्वचिन्नभवति यत्रसत्वादिकरणसंपत्तत्रयथाबलंयथे
ष्टकारित्वमतोन्यथा विपर्ययेणनचकरणदोषादकारणमात्मागर्भ जननेभवति दृष्टंचेष्टायोनिरैश्वर्यंमोक्षश्चात्माधि
क्षिरात्मायत्तं नह्यन्यःसुखदुःखयोःकर्ता नचान्यतोजायतेजायमानोनांकुरोत्पत्तिरबीजात् यानितुखल्वस्यगर्भ

स्यात्मजानियान्यस्यात्मनःसंभवतः संभवंति तान्यनुव्याख्यास्यामः तद्यथाः तास्तास्युयोनिषूपपत्तिरायुरात्मज्ञानं
मनः इंद्रियाणि प्राणापानौ प्रेरणंधारणमाकृतिस्वरस्ववर्णविशेषाःसुखदुःखेच्छाद्वेषाः स्मृतिरहंकारःप्रयत्नश्चेत्या
त्मजानि सात्म्यजश्चायंगर्भोनह्यसात्म्यसेवित्वमंतरेणस्त्रीपुरुषयोर्वंध्यत्वमस्ति यावाश्चनिष्टोभावोयावत्खल्वसा
त्म्यसेविनांस्त्रीपुरुषाणांदोषाःप्रकुपिताः शरीरमनुसर्पंति नशुक्रशोणितगर्भाशयोपघातायोपपद्यंते नतावत्समर्थो
जननायभवंति सात्म्यसेविनांपुनःस्त्रीपुरुषाणामनुपहतशुक्रशोणितगर्भाशयनामृतुकालेसन्निपतितानांजीव
स्यानुपक्रमणाद्गर्भाःप्रादुर्भवंति नहिकेवलंसात्म्यजएवायंगर्भःसमुदायोऽत्रकारणमुच्यते यानितुखल्वस्यगर्भ
स्यसात्म्यजानियान्यस्यसात्म्यतःसंभवतःसंभवंति तान्यनुव्याख्यास्यामः तद्यथा आरोग्यमनालस्यमलोलुपत्वमिं
द्रियप्रसादःस्वरवर्णबीजसंपत्प्रहर्षभूयस्त्वंचेति सात्म्यजानिरसजश्चायंगर्भोनहिरसादृतेमातुःप्राणयात्रापिस्यात्
किंपुनर्गर्भजन्मनचैवासात्म्यमुपयुज्यमानारसागर्भमभिनिर्वर्तयंतिनचकेवलंसम्यगुपयोगादेवरसानांगर्भाभिनिर्वृ
त्तिर्भवतिसमुदायोऽप्यत्रकारणमुच्यते यानितुखल्वस्यगर्भस्यरसजानियान्यस्यरसतःसंभवतःसंभवंति तान्यनुव्याख्या
स्यामः तद्यथाः शरीराभिनिर्वृत्तिरभिवृद्धिःप्राणानुबंधस्तृप्तिपुष्टिरुत्साहश्चेतिरसजानिः अस्तिसत्वमौपपा
दिकंयज्जीवस्पृक्शरीरेणाभिसंबध्नाति यस्मिन्नपगमनपुरस्कृतेशीलमस्यव्यावर्तते भक्तिर्विपर्यस्यते सर्वेंद्रि
याणिचोपतप्यंते बलंचहीयते व्याधयश्चआप्यायंते यस्माद्धीनःप्राणान्जहाति यत्तदिंद्रियाणामभिग्राहकंमनइ
त्यभिधीयते यत्त्रिविधमाख्यायते शुद्धंराजसंतामसमिति येनचास्यभूयिष्ठंनद्वितीयास्माजातिसंप्रयोगोभव
ति यदातुतेनैवशुद्धेनसंयुज्यते तदाजातेरतिक्रांतायाअपस्मरति स्मार्तंहिज्ञानमात्मनस्तस्यैवमनसोऽनुबंधाद
नुवर्तते यस्यानुवृत्तिंपुरस्कृत्यपुरुषोजातिस्मरइत्युच्यते इतिसत्वमुक्तं तस्ययानिसात्वजानियान्यस्यसत्वतःसंभव
तःसंभवंतिः तान्यनुव्याख्यास्यामः तद्यथाः भक्तिःशीलं शौचंद्वेषःस्मृतिर्मोहस्त्यागोमात्सर्यंभयंक्रोधस्तंद्राउत्सा
हस्तैक्ष्ण्यंमार्दवंगांभीर्यमानवस्थितत्वमिति एवमादयश्चान्येसत्वजाविकाराः यानुत्तरकालंसत्वभेदमधिकृत्योपदे
क्ष्यामइति सत्वजानिनानाविधानितुंखलुसत्वानिसर्वाण्येवपुरुषेभवंति नचाभवत्येककालमेकंतुप्रायोवृत्त्याह ६

एवमयंनानाविधानामेषांगर्भकारणानांभावानांसमुदायादभिनिर्वर्तते गर्भस्तद्यथा कूटागारंनानाद्रव्यसमुदायाद्य
थावारथांगसमुदायात्तस्मादेतदूचुः मातृजश्चायंगर्भःपितृजश्चरसजश्चास्ति सत्वमौपपादिकमितिहोवाच भगव
नात्रेयः भरद्वाजउवाच यद्ययंनानेत्रद्वयंतयोरंतर्वर्तनेनेद्वेकनीनिके दृष्टिद्वयंकृष्णगोलौश्वेतभागौचवर्त्मनी
पक्ष्माण्यपांगौभ्रूश्चैवचकर्णौतच्छुष्कुलीद्वयं पालिद्वयंकपोलौचनासिकाचप्रकीर्तिता ओष्ठाधरौचसृक्किण्यौमु
खंतालुहनुद्वयं दंताश्चदंतवेष्टाश्चरसनाचिबुकंगलः द्वितीयमंगलंग्रीवातुयस्यांमूर्धाविधार्यते तृतीयंबाहुयुगलं
तदुपांगान्यथब्रुवे तत्रोपरिमितौस्कंधौप्रगंडौभवतोऽप्यधः कूर्परौनियुग्मंतदधप्रकोष्ठयुगलंतथा मणिबंधौतलेहस्तौ
तयोश्चांगुलयोदश नखाश्चदशतेप्यातोदशच्छेद्याःप्रकीर्तिताः चतुर्थमंगंवक्षस्तत्तदुपांगान्यथब्रुवे स्तनौपुंसस्तथानार्या
विशेषउभयोरयं यौवनागमनेनार्याःपीवरौभवतःस्तनौ गर्भवत्याःप्रसूतायास्तावेवक्षीरपूरितौ हृदयंपुंडरीकेणसदृशंशी
र्षाद्धोमुखं जाग्रतस्तद्विकसतिस्वपतस्तुनिमीलति आशयस्तत्तुजीवस्यचेतनास्थानमुत्तमम् अतस्तस्मिंस्तमोव्याप्तेप्रा
णिनःप्रस्वपंतिहि चेतनास्थानमुत्तममिति अयमभिप्रायः चेतनानामधिष्ठानंमनोदेहश्चसेंद्रियः॥केशलोमनखाम्ना
न्नमलंद्रव्यगुणैर्विना इत्युक्तत्वनाचरकेणसकलंशरीरंचेतनास्थानमुक्तंतदपेक्षयाहृदयंविशेषतश्चेतनास्थानमिति
कक्षयोर्वक्षसःसंधीयेत्रुणीसमुदाहृते कक्षेउभेसमाख्यातेतयोःस्यातांचवंक्षणौ उदरंपंचमंचांगंषष्ठंयान्नवर्द्धयमंतं
सपृष्ठवंशपृष्ठंतुसमस्तंसप्तमंस्मृतं उपांगानिचकथ्यंतेतानिजानीहियत्नतः शोणिताज्जायतेप्लीहावामतोहृदयादधः
रक्तवाहिशिराणांसमूलंख्यातोमहर्षिभिः हृदयाद्वामतोऽधश्चफुप्फुसोरक्तफेनजः अधोदक्षिणतश्चापिहृदयाद्यक
तःस्थितिः तत्तुरंजकपित्तस्यस्थानंशोणितजंमतम् अधस्तुदक्षिणेभागेहृदयात्क्लोमतिष्ठति जलवाहिशिरामूलंतृष्णा
च्छादनकृन्मतं क्लोमतिलकंएतत्तुवातरक्तजं अथवृद्धवाग्भटः रक्तालंदनिलसंयुक्तात्कालीयकसमुद्भवइतिमेदःशो
णितयोःसाराद्वृक्कयोर्युगलंभवेत् तौतुपुष्टिकरौप्रोक्तौजठरास्थस्यमेदसः उक्ताःसार्द्धास्त्रयोचतुर्हस्तमितपुंसामंत्रा
णिसूरिभिः अर्द्धव्यामेनहीनानियोषितांआणिनिर्दिशेत् उंडकश्चकटीवापिपिंडिकंबस्तिश्चवंक्षणौ शिराणांप्ररोहः
हस्यान्मेढ्रेध्वावीर्यमूत्रयोः सएवगर्भस्याधानंकुर्याद्गर्भाशयोस्त्रियः शंखनाभ्याकृतिर्य्योनिस्त्र्यावर्त्तासाचकीर्तिता

तस्यास्तृतीयेत्वावर्त्तेगर्भशय्याप्रतिष्ठिता वृषणौभवतःसारौकफासृङ्मांसमेदसां वीर्यवाहिशिराधारौतोमतौपुरुषाव
हौ गुदस्यमानंसर्वस्यसर्वस्याश्चतुरंगुलं तत्रस्युर्वलयस्तिस्रःशंखावर्त्तनिभाःकृताः प्रवाहणीभवेत्पूर्वासार्द्धांगुल
मितामता उत्सर्जनीतुतदधःसासार्द्धांगुलसंमिता तस्याअधःसंवरणीस्यादेकांगुलसंमिता अर्द्धांगुलप्रमाणंतुबुधैर्गुद
मुखंमतं मलोत्सर्गस्यमार्गोयंपायुर्देहेविनिर्मितः पुंसःप्रोथौस्मृतौयौतुनितंबौचयोषितः तयोःकुकुंदरेस्यातांसक्थिनी
लंगमष्टकं तदुपांगानिचक्षूंषिजानुनीपिंडिकाद्वयं जंघेद्वेघुंटिकेपार्ष्णीतलेचप्रपदेतथा पादांगुलयस्तत्रदशतासा
नाविधानांमेषांगर्भकराणांभावानांसमुदायाद्भिनिर्वृत्तेनमर्मःकथमयंसंधीयते यदिचापिसंधीयतेतस्मात्समुदयःप्र
प्रभव सन्गर्भोमनुष्यविग्रहेणजायतेमनुष्योमनुष्यप्रभवउच्यते तत्रमिदिष्टमेतद्यस्मान्मनुष्योमनुष्यप्रभवस्तस्मान्म
नुष्यविग्रहेणजायते यथागौर्गोप्रभवोयथाश्वोश्वप्रभवइति एवंसतियदुक्तं मनैरसमुदायात्मकद्वितिदुक्तंयदिच
मनुष्योमनुष्यप्रभवः तस्माज्जडांधकुब्जमूकवामनमिम्मिणव्यंगोन्मत्तकुष्ठिकिलासिभिर्ज्जाताः पि॰तृसदृशरूपानभ
वंत्यथापित्रावुद्धिरेवंस्यात् स्वेनैवायमात्माचक्षुषारूपाणिवेत्तिश्रोत्रेणशब्दान्घ्राणेनगंधानरसेनरसान्स्पर्शनेनस्पर्शा
नबुध्याबोद्धव्यमिति अनेनहेतुनानजडादिभिर्जाताःपितृसदृशरूपाभवंतीत्यत्रापिप्रतिज्ञादोषः स्यादेवमुक्तेत्यात्मास
त्स्विंद्रियेषुज्ञः स्यादसत्स्वज्ञोयत्रचैतदुभयंसंभवति ज्ञत्वमज्ञत्वंचसविकारः प्राकृतश्चात्मानिविकारोज्ञश्चयदिचदर्श
नादिभिरात्माविषयानवेत्तिनिरिंद्रियोदर्शनादिविरहादज्ञःस्यादज्ञत्वाच्चाकारणम कारणत्वाच्चात्मेतिवाग्वस्तुमा
त्रमेतद्वचनमनर्थकंस्यादितिहोवाचभरद्वाजः आत्रेयउवाच पुरस्तादेतत्प्रतिज्ञातंसत्वंजीवस्पृक्शरीरेणाभिसं
बध्नाति यस्मात्तुसमुदयप्रभवःसंगर्भोमनुष्यविग्रहेणजायते मनुष्यश्चमनुष्यप्रभवउच्यते तद्वक्ष्यामोभूतानां
चतुर्विधायोनि जरायुजांडजस्वेदजोद्भिज्जातासांचतसृणामपियोनिनामेकैकायोनिरपरिसंख्येयभेदाभवति
भूतानामाकृतिविशेषापरिसंख्येयत्वात्तत्रजरायुजानामंडजानांचप्राणिनांयायामेतेगर्भकराभावायोनिमा
यंते तस्यांतस्यांयोनौतथारूपाभवंति तद्यथा कनकरजतताम्रत्रपुसीसान्यासिच्यमानानितेषुतेषुमधू
च्छिष्टविग्रहेषुयदामनुष्यबिंबमापद्यंतेतदामनुष्यविग्रहेणजायंते तस्मात्समुदयःप्रभवःगर्भोमनुष्यविग्रहेण

जायते मनुष्यप्रभवउच्यते तद्योनित्वाद्यच्चोक्तंयदिचमनुष्योमनुष्यप्रभवः तस्मात्तजडादिभिर्जाताः पितृसदृश
रूपाभवंतीत्यत्रोच्यते यस्ययस्यहिपितृजनस्यांगावयवस्यबीजेबीजभागउपतप्तोभवति तस्यतस्यांगावयवस्यवि
कृतिरुपजायते नोपजायते चानुपतापात्तस्मादुभयोरुपपत्तिरत्रसर्वस्यचात्मजानींद्रियाणितेषांभावाभावहेतुर्दैवं
तस्मान्नैकांततोजडादिभिर्जाताःपितृसदृशरूपाभवंतिनचात्मासत्स्विंद्रियेषुसत्सुचाज्ञोभवत्यज्ञोभवत्यज्ञोनज्ञेषु
सत्वःकदाचिदात्मासत्वविशेषाच्चोपलभ्यतेज्ञानविशेषाइति तत्रश्लोकाः नकर्तुरिंद्रियाभावात्कार्यज्ञानंप्रवर्त्तते येः
क्रियावर्त्ततेयातुसाविनातैर्नवर्त्तते जानन्नपिमृदोभावात्कुंभकृन्नप्रवर्त्तते श्रूयतांचेदमध्यात्मज्ञानबलंमह
त् देहेंद्रियाणिसंक्षिप्यमानःसंगृह्यचंचलं प्रविश्याध्यात्मसमात्मज्ञःस्वेज्ञानेपर्यवस्थितः सर्वत्रमहीतम्नानः
सर्वभावान्परिक्षते गृह्यतांचचेदमपरंभरद्वाजविनिर्णयं निवृत्तेंद्रियवाक्चेष्टःसुप्तःस्वप्नगतोयथाः विषयान्
सुखदुःखेचवेत्तिनाज्ञोप्यतःस्मृतः नात्मज्ञानादृतेचैकंजातंकिंचित्प्रवर्त्तते नह्येकोवर्त्ततेभावोवर्त्ततेनाप्यहेतु
कः तस्माज्ञःप्रकृतिश्चात्माद्रष्टाकारणमेवच सर्वमेतद्भरद्वाजनिर्णीतंजहिसंशयमिति तत्रश्लोकौ हेतुर्गर्भ
स्यनिर्वृत्तौवृद्धौजन्मनिचैवयः पुनर्वसुमतिर्याचभरद्वाजमतिश्चया प्रतिज्ञाप्रतिषेधश्चविशोदश्चात्मनिर्णयः
गर्भावक्रांतिमुद्दिश्यखुड्डाकांसंप्रकाशितमिति इतिश्रीचरकसंहितायांशारीरस्थानेखुड्डाकागर्भावक्रांतिर्नामतृतीयोऽ
ध्यायः छ अथातोमहतींगर्भावक्रांतिशारीरंव्याख्यास्यामः इतिह यतश्चगर्भःसंभवति यस्मिंश्चगर्भसंज्ञाविका
रश्चगर्भोययाचानुपूर्व्याभिनिवर्त्तते कुक्षौयश्चास्यहेतुवृद्धिहेतुर्यतश्चास्यजन्मभवतियतश्चजायमानःकुक्षौविनाशंप्राप्नो
तियतश्चकार्त्स्न्येनविनश्यन्विकृतिमापद्यते तदनुव्याख्यास्यामः मातृततःपितृतश्चात्मतःसात्म्यतोरसतःसत्वतइत्येतेभ्यो
भावेभ्यःसमुदितेभ्योगर्भः संभवतिः तस्ययेयेवयवायतोयतोवाअवयवतःसंभवतःसंभवंति तानविभज्यमातृजादीन
वयवान्पृथक्पृथग्युक्तमग्रेशुक्रशोणितजीवसंयोगेतुखलुकुक्षौगतेगर्भसंज्ञाभवति गर्भस्तुखल्वंतरीक्षवाय्वग्नितो
यभूमिविकारश्चेतनाधिष्ठानभूतयेनमनयायुक्त्यापंचमहाभूतविकारसमुदायात्मकोगर्भश्चेतनाधिष्ठानभूतःसत्वस्पृष्टो
धातुरुक्तोययाचानुपूर्व्याभिनिवर्त्तते कुक्षौतामनुव्याख्यास्यामः गतेपुराणेरजसिनवेचावस्थितेशुद्धस्नातांस्त्रियम

च० शा० गव्यापन्नयोनिशोणितगर्भाशयागृतुमतीमाचक्ष्मः हेतयासहतथाभूतयायदापुमानव्यापन्नबीजोमिश्रीभावंगच्छति त
स्यहर्षोदीरितःपरशरीरधातुमलात्माशुक्रभूतोगांदंगात्संभवति सतथाहर्षभूतेनात्मनोदीरितश्चाधिष्ठितश्चाबीजधातुःपु
८ रुषशरीरादभिनिष्पत्योपचितेनपृथागर्भाशयमनुप्रविश्यार्त्तवेनसहसंसर्गमेति तत्रपूर्वंचेतनाधातुःसत्त्वक्षरं कर्तामं
तावोद्भावेदिनाद्रष्टाधाता ब्रह्माविश्वकर्माविश्वरूपः पुरुषःप्रभवोव्ययोनित्योगुणीग्रहणप्रधानमव्यक्तंजीवोज्ञःपुद्गलः
श्चेतनावानविभुर्भूतात्माचेंद्रियात्माचांतरात्माचेति सगुणोपादानकालेंतरिक्षंपूर्वतरमन्येभ्योगुणेभ्यउपादत्तेयथाप्रलया
त्ययेसिसृक्षुर्भूतान्यक्षरभूतः सत्वोपादानकालेपूर्वमाकाशंसृजति ततःक्रमेणव्यक्ततरगुणानुत्तरकालंधातून्वाय्वादिकां
श्चतुरस्तथा देहग्रहणेपिवर्तमानःपूर्वतरमाकाशमेवोपादत्ते ततःक्रमेणव्यक्ततरगुणानुत्तरकालंधातून्वाय्वादिकांश्च
तुरःसर्वमपितुखल्वेतद्गुणोपदानमणुनाकालेनभवति सर्वगुणवान्गर्भत्वमापन्नः प्रथमेमासिसंमूर्छितःसर्वधातुकलु
षीकृतंखेटभूतोभवत्यव्यक्तविग्रहः सदसद्भूतांगावयवोद्वितीयेमासिघनःसंपद्यतेपिंडःपेश्यर्बुदंवाघनःपुमान्स्त्रीपेशीनपुंसकमर्बु
दंनपुंसकं तृतीयेमासिसर्वेंद्रियाणिसर्वांगावयवाश्चयौगपद्येनाभिनिर्वर्तंते तत्रास्यकेचिदंगावयवामातृजादिमवयवा
मातृजानविभज्यपूर्वमुक्तायथावन्महाभूतविकारस्य॰ताश्चाप्रविभागेनविदानीमतश्चैवांगावयवानुपयार्यांतरेणोपांगांश्च
व्याख्यास्यामः मातृजादयोप्यस्यमहाभूतविकाराएव तत्रास्याकाशात्मकःशब्दःश्रोत्रंलाघवंसौक्ष्म्यंविवेकश्च
वाय्वात्मकंस्त्वस्यस्पर्शःस्पर्शनंरौक्ष्यंप्रेरणंधातुव्यूहनंचेष्टाश्चशारीराः अग्न्यात्मकंत्वस्यरूपंदर्शनंप्रकाशःपंक्तिरौष्ण्यंच
जलात्मकस्त्वस्यरसोरसनंशैत्यमार्दवस्नेहःक्लेदश्च पृथिव्यात्मकंत्वस्यगंधोघ्राणंगौरवंस्थैर्यंमूर्तिश्च एवमयंलोकस
म्मितः पुरुषोयावंतोलोकेमूर्तिमंतोभावविशेषास्तावंतःपुरुषेयावंतःपुरुषेतावंतोलोकइति बुधास्त्वेवंद्रष्टुमिच्छंत्येवमस्य
युगपदिंद्रियाण्यंगावयवाश्चयौगपद्येनाभिनिर्वर्त्तंतेन्यत्रभावेभ्योयस्यजातस्योत्तरकालंजायंते तद्यथा दंताव्यंजनानि ५
प्रव्यक्तीभावः तथायुक्तानिचापराण्येषां प्रकृतिर्विकृतिःपुनरतोन्यथा संतिखल्वस्मिनगर्भेनित्याभावसंतित्वानित्याः
स्तस्ययएवांगावयवाःसंतिष्ठंते तएवस्त्रीपुरुषलिंगंनपुंसकलिंगंवाबिभ्रति तत्रस्त्रीपुरुषयोर्वैशेषिकाभावाःप्रधानसं
श्रयागुणसंश्रयाश्चतेषांयतोभूयास्त्वंततोन्यतराभावः तद्यथा क्लैव्यभिरुत्वमवैशारद्यंमोहोनवस्थानमधोगुरुत्वमसं

हननंशैथिल्यंमार्दवंगर्भाशयबीजभागस्तथायुक्तानिचपराणिस्त्रीकराण्यंतोविपरीतानिपुनःपुरुषकराण्युभयाभावान्नपुं
सककराणिभवंति तस्यतत्कालमेवेंद्रियाणिसंतिष्ठते तत्कालमेवास्यवेदनाचेतसिनिबंधंप्राप्नोतितस्मात्तदाप्रभृतिगर्भः
स्पंदतेप्रार्थयतेच किंचित्तद्दौहृद यमाचक्षतेवृद्धाःमातृजंह्यस्यहृदयंतदस्यमातृहृदयेनाभिसंबद्धंभवतिः रसहारिणीभिः
संवाहिनीभिःतस्मात्तयोस्ताभिर्भक्तिःसंस्पंदतेतच्चैवकारणमवेक्षमाणा नद्वैहृदयविमानितंगर्भमिच्छंति कर्तुंविमानने
ह्यस्यदृश्यतेविनाशोगर्भस्याविकृतिर्वासमानयोगक्षेमाहिमातातदाहिभवति गर्भेणकेषुचिदर्थेषुतस्मात्प्रियहिताभ्यांगर्भिणीं
विशेषेणोपचरंति कुशलास्तस्यागर्भोपपत्तेर्द्विहृदयस्यचविज्ञानार्थंलिंगानिसमासेनोपदेक्ष्यामः उपचारसंरोधनंह्यस्या
ज्ञानेदोपास्ताज्ञानंच लिंगंतस्मादिष्टोलिंगोपदेशःतद्यथा आर्तवादर्शनमास्यसंस्रवणमनन्नाभिलाषः छर्दिररोचकोम्लकाम
ताच विशेषेणश्रद्धाप्रणयनंचोच्चावचेषुभावेषुगुरुमागात्रत्वंचक्षुषोर्ग्लानिस्तनयोःस्तन्यमोष्ठयोःस्तनमंडलयोश्चका
र्ष्ण्यमत्यर्थंश्वयथुश्चपादयोरीषल्लोमराज्युद्गमोयोन्याश्चाट्टमोदत्वमितिगर्भपर्यागतेरूपाणिभवंति साध्यंयदिच्छेत्तत्तदस्यै
दद्यादन्यत्रगर्भोपघातकरेभ्योभावेभ्योगर्भोपघातकरास्त्विमेभावाभवंति तद्यथा सर्वमतिगुरुतीक्ष्णंदारुणाश्चाइमांश्चान्यां
श्चोपदिशंतिवृद्धाः देवतारक्षोनुचरपरिरक्षणार्थंनरक्तानिवासांसिबिभृयान्नमदकराणिमद्यान्यभ्यवहरेन्नयानमधिरोहे
न्नमांसमश्नीयात् सर्वेंद्रियप्रतिकूलांश्चभावान्दूरतःपरिवर्जयेत् यच्चान्यदपिकिंचित् स्त्रियोविद्युर्वाञ्छायांत्वखलुगर्भ
गोयांनुकामंमहितमप्यस्यैहितेनोपहितंदद्यात्प्रार्थनाविनयनार्थं प्रार्थनासंधारणाद्धिवायुः प्रकुपितोंतःशरीरमनु
चरन् गर्भस्यापद्यमानस्यविनाशंवैरूप्यंवाकुर्याच्चतुर्थेमासिस्थिरत्वमापद्यते गर्भस्तस्मात्तदागर्भिणीगुरुगात्रत्वमधिक
मापद्यते विशेषेणपंचमेतुमासेगर्भस्यमांसशोणितोपचयोभवत्यधिकमन्येभ्योमासेभ्यः तस्मात्तदागर्भिणीकार्श्यमाप
द्यविशेषेणषष्ठेतुमासिगर्भस्यबलवर्णोपचयोभवत्यधि कमन्येभ्योमासेभ्यस्तस्मात्त गर्भिणीबलवर्णहानिमापद्यतेविशेषे
णसप्तमेतुमासिगर्भःसर्वभावैराप्याय्यते तस्मात्तदागर्भिणीसर्वाकारैः क्लांततराभवति अष्टमेतुमासिगर्भश्चमातृतोन्यो
न्यंगर्भतश्चमातानाडीरसवहारिणीभिःसंवाहिनीभिःमुहुर्मुहुरोजःपरस्परतआदत्ते गर्भस्यासंपूर्णत्वात् तदागर्भिणीमुहु
र्मुदायुक्ताभवति मुहुर्मुहुर्ग्लानातथाचगर्भस्तस्मात्तदागर्भस्यजन्मव्यापत्तिमद्भवत्योजसोऽनवस्थितत्वात्तंचैवार्थमभिसमि

Dr. BHAU DAJI MEMORIAL

क्ष्याष्टमंमासमगण्यमित्याचक्षते कुशलास्तस्मिन्नेकोऽपिदिवसादितिक्रांतेपिनवमंमासमुपादायकालमित्याहुरादशमासादेतावा
न्कालोवैकारिकमतःपरंकुक्षौस्थानंगर्भस्यएवमयमनयाऽऽनुपूर्व्याभिनिवर्त्तते कुक्षौतुमात्रादीनांतुखलुगर्भकराणांभावानां
संपदस्तथावृत्तस्यतौष्टवान्मातृतश्चैवोपस्नेहोपस्वेदाभ्यांकालपरिणामात्स्वभावसंसिधेश्च कुक्षौवृद्धिंप्राप्नोति मात्रादि
नामेवतुखलुगर्भकराणांभावानांव्यापन्निमित्तंव्यापत्तिमवदस्यजन्मभवति येत्वस्यकुक्षौवृद्धिहेतुसमाख्याताभावास्तेषांवि
विपर्ययादुदरेविनाशमापद्यते यथावाप्यचिरजातोयतस्तुकार्त्स्न्येनाविनश्यनविकृतिमापद्यते तथानुव्याख्यास्यामः यदा
स्त्रियादोषप्रकोपणोक्तान्यासेवमानायादोषाःप्रकुपिताः शरीरमनुसर्पंतःशोणितगर्भाशयोपघातयोपपद्यंते नचसतत्रका
र्त्स्न्येनशोणितगर्भाशयौदूषयंति यदयंगर्भंलभतेस्त्रीतदातस्यगर्भस्यमातृजानामवयवानामन्यतमोवयवोविकृतिमापद्यते
एकाथवाऽनेकायस्यत्ववयवस्यबीजभागेदोषाःप्रकोपमापद्यंते ततःसर्वमवयवंविकृतिराविशति यदाह्यस्याःशोणितेगर्भा
शयबीजभागःप्रदोषमापद्यते तदाबंध्याजनयति यदापुनरस्याःशोणितेगर्भाशयबीजभागावयवःस्त्रीकराणांचशरीरबी
जभागानामेकदेशःप्रदोषमापद्यते तदास्याकृति यिष्टामस्त्रियंवार्तानामजनयति तांस्त्रीव्यापदमाचक्षते एवमेवंपुरुष
स्ययदाबीजेबीजभागः प्रदोषमापद्यतेतदाबंध्यंजनयति यदापुनरस्यबीजेबिजभागवयवःप्रदोषमापद्यतेतदापूतिप्रजंजनय
ति यदात्वस्यबीजेबीजभागावयवःपुरुषकराणांबीजभागानामेकदेशःप्रदोषमापद्यते तदापुरुषाकृतिभूयिष्टमपुरुष
पूलिकंनामजनयति तांपुरुषव्यापदमाचक्षते एतेनमातृजानांपितृजानांचांगावयवानांविकृतिव्याख्यानेनसात्म्यसत्वरज
सजानांचांगावयवानांविकृतिर्व्याख्याताभवति निर्विकारःपरस्त्वात्मासर्वभूतानांनिर्विशेषः सर्वशरीरयोस्तुविशेषोत्विशेषो
पल स्तत्रयःशरीरदोषावातपित्तश्लेष्माणस्तेशरीरंदूषयंति द्वौपुनःसत्वदोषौरजस्तमश्चतौचसत्वंदूषयतस्ताभ्यां
शरीराभ्यांप्रदुष्टाभ्यांविकृतिरुपजायतेनोपनायते वादुष्टाभ्यांतत्रशरीरंयोनिविशेषाच्चतुर्विधमुक्तमग्नेत्रिविधंतुखलुसत्वं
शुद्धंराजसंतामसंइति तत्रशुद्धमदोषमाख्यातं कल्याणंकल्याणंशत्वात् राजसंतुसदोषमाख्यातं रोशांशत्वात्तमपि ९
तामसमपिसदोषमाख्यातंमोहांशत्वात्तेषांतुत्रयाणामपिसत्वानामेकैकस्यभेदाग्रमपरिसंख्येयंतरतमयोगाच्छरीरयोनि
विशेषेभ्यश्चान्योन्यानुविधानाच्चशरीरंह्यपिसत्वमविधियते सत्वंचशरीरंतस्मात्कतिचित्सत्वभेदाननूकाभिनिर्देशेननिद

शेनार्थमनुव्याख्यास्यामः तद्यथा शुचिंसत्याभिसंधंजितात्मानंसंविभागिनं ज्ञानविज्ञानवचनशक्तिसंपन्नंस्मृतिमंतंका
मक्रोधलोभमोहहर्षामर्षापेतंसमंसर्वेषुभूतेषुब्राह्मंविद्यात् इज्याध्ययनव्रतहोमब्रह्मचर्यमपरमतिथिव्रतमुपशां
तमदमानरागद्वेषमोहहर्षलोभरोषं प्रतिभावचनविज्ञानोपधारणभक्तिसंपन्नमार्षंविद्यात् ऐश्वर्यवंतमादेयवा
क्यंयथाशूरमोजस्विनंतेजसोपपन्नमक्लिष्टक दीर्घदर्शिनंधर्मार्थकामेष्वभिरतमैद्रंविद्यात् लेखास्तवृत्तप्राप्तकारि
णमहत्सहोर्यमुत्थानवंतंस्मृतिमतमैश्वर्यलंभिनंव्यपगतभयरागद्वेषमोहंयाम्यंविद्यात् शूरंशुचिमाशुचिद्वेपिणंय
ज्वानमंभोविहाररुचिमं तमक्लिष्टकर्माणंस्थानप्रकोपप्रसादंवारुणंविद्यात् स्थानमानोपभोगपरिवारसंपन्नंधर्मा
र्थकामनित्यंशुचिंसुखविहारंव्यक्ताकोपप्रसादंकौबेरंविद्यात् प्रियनित्यगीतवादित्रोल्लोपकश्लोकाख्यायिकेतिहास
पुराणकुशलंगंधमाल्यानुलेपनवस्त्रस्त्रीविहारकामनित्यमनसूयकंगांधर्वंविद्यात् कल्माणांशत्वात्तत्सर्वंयोगा
त्ब्राह्ममत्यंतंसंशुद्धंव्यवस्येत् शूरचंडमसूकामैश्वर्यं मौपधिकंरौद्रमननुक्रोशकमात्मपूजकमासुरंवि
द्यात् अमर्षणामनुबंधकोपंछिद्रप्रहारिणंक्रूरमाहारातिः मौत्ररुचिमामिषप्रियंस्वप्नायासबहुलमीर्ष्यराक्षसं
विद्यात् हहाशनंस्त्रैणंस्तेनंस्त्रीरहःकाममशुचिंशुचिद्वेषिणं भीरुंभीषयितारंविकृताहाराचारशीलंस्वप्नशीलं
पैशाचंविद्यात् क्रुद्धंशूरमभीरुंतीक्ष्णमयासबहुलंसंत्रस्तगोचरमहारविहारपरंसार्पंविद्यात् आहाकाममती
दुःखशीलाचारोपचारमसूयकमसंविभागिनमतिलोपमकर्मशीलंप्रैतंविद्यात् अनुषक्तकाममजस्रमहाविहा
रपरमनवस्थितममर्षिणमसंचयंशाकुनंविद्यात् इत्येततुराजसस्यसत्वस्यषड्विधंभेदंविद्यात् रोषांसत्वात्
निरलंकारिष्णुममेधसंजुगुप्सिताचाराहारविहारंमैथुनपरंस्वप्नशीलंपाशवंविद्यात् भीरुमबुधमहारलुब्धम
नवस्थितमनुषक्तकामक्रोधंसरणशीलंतोयकामंमात्स्यंविद्यात् अलसंकेवलमभिनिविष्टमहारसर्वबुध्यंगहि
तंवानस्पत्यंविद्यात् इत्येवंतामसस्यसत्वस्यत्रिविधंभेदंविद्यात् मोहांशत्वादित्यपरिसंख्येयभेदानांत्रयाणा
मपिसत्वानांभेदैकदेशोव्याख्यातः शुद्धस्यसत्वस्यसप्तविधोभेदोब्रह्मर्षिशक्रयमवरुणकुबेरगंधर्वसत्वानुकारे
णराजसस्यषड्विधोदैत्यराक्षसपिशाचसर्पप्रेतसकुनिसत्वानुकारेण तामसस्यत्रिविधःपशुमत्स्यवनस्पतिसत्वा

नुकारेणकथंयथासत्वमुपचारः स्यादितिकेवलश्चायमुद्देशोयथोदेशमभिनिर्दिष्टोभवति गर्भावक्रांतिसंप्रयुक्त
स्यार्थस्यविज्ञानेसामर्थ्यंगर्भकारणांचभावानामनुसमाधिर्विघातोचितकारणामिति तत्रश्लोकाः निमित्तमात्माप्रकृति
र्वृद्धिःकुक्षौक्रमेणच वृद्धिहेतुश्चगर्भस्यपंचार्थाःशुभसंज्ञिकाः अजन्मनिचयोहेतुर्विनाशेविकृतावपि इमांस्त्रीनशु
भान्भावान्कुर्गर्भविघातकान् शुभाशुभसमाख्यातानष्टौभावानिमान्भिषक् सर्वथाविदयःसर्वान्सराज्ञःकर्तुमर्ह
ति अर्थांवाप्तुयायानगर्भस्यसएवज्ञातुमर्हति येचगर्भविभाक्तौतेभावांस्तांश्चापिबोधितुं इतिश्रीचरकसंहिता
यांशारीरस्थानेमहतीगर्भावक्रांतिनमिचतुर्थोऽध्यायः ४ अथातःपुरुषविचयंनामशारीरंव्याख्यास्यामः
इतिहस्माह० पुरुषोयंलोकसंमितइत्युवाच भगवान्पुनर्वसुरात्रेयोयावंतोहिमूर्तिमंतोलोकेभावविशेषास्ता
वंतःपुरुषेयावंतःपुरुषेतावंतोलोकइतिवादिनंभगवंतमात्रेयमग्निवेशउवाच नैतावतावाक्येनाक्तंवाक्यार्थम
वगाहामहेः भगवतोबुध्याभूयस्तातोनुव्याख्यायमानंशुश्रूषामहेइति तमुवाचभगवानात्रेयः अपरिसंख्ये
यालोकावयवविशेषाः पुरुषावयवविशेषाश्चापरिसंख्येयास्तेषांयथास्थूलंकतिचित्भावानसामान्यमभिप्रेत्यो
दाहरिष्यामः तानेकमनानिबाधसत्यमपवर्ण्यमानानग्निवेशषड्धातवः समुदितालोकपुरुषइतिशब्दंलभं
ते तद्यथा पृथिव्यापस्तेजोवायुराकाशंब्रह्मचाव्यक्तमिति एतएवषड्धातवःसमुदिताःपुरुषइतिशब्दंलभंते
तस्यपुरुषस्यपृथिवीमूर्त्तिरापःक्लेदस्तेजोभिसंतापोवायुःप्राणोवियत्छिद्राणिब्रह्मांतरात्मायथाखल्वाह्मीविभूतिर्लो
केतथापुरुषेप्यांतरात्मिकीविभूतिर्ब्रह्मणोविभूतिर्लोकेप्रजापतिरंतरात्मनोविभूतिःपुरुषेसत्वंयस्त्विंद्रोलोकेसपुरु
षेहंकारः आदित्यस्त्वादानंरुद्रोरोषःसोमप्रसादोवसवःसुखमश्विनौकांतिर्मारुतउत्साहोविश्वेदेवाःसर्वेंद्रिया
णिसर्वेंद्रियार्थश्चतमोमोहोज्योतिर्ज्ञानंयथालोकस्यसर्गादिस्तथापुरुषस्यगर्भाधानं यथाद्वापरमेवंस्थाविरं यथा
कालिरेवमातुर्यथायुगांतरस्तथामरणमिति एवमनेनानुक्तानामपिलोकपुरुषयोरवयवविशेषामग्निवेशसामान्यंवि ९०
द्यादिति एवंवादिनंभगवंतमात्रेयंअग्निवेशउवाच एवमेतत्सर्वमनपवादंयथोक्तंभगवतालोकपुरुषयोसामान्ये
किंत्वस्यसामान्योपदेशस्यप्रयोजनमिति तंभगवानुवाचात्रेयः कथमग्निवेशसर्वलोकमात्मान्यात्मानंचसर्वलोके

पश्यतः सत्याबुबुद्धिरुत्पद्यतइति सर्वलोकंह्यात्मनिपश्यतोभवत्यात्मैवसुखदुःखयोःकर्तानान्यइतिकर्मात्मकत्वाद्धेत्वा
द्यहेत्वादिभि रयुक्तःसर्वलोकोहमितिविदित्वाज्ञानंपूर्वमुत्थाप्यतेवर्गाद्वैर्नियेति तत्रसंयोगापक्षीलोकशब्दःशब्दधातुसमुदा
योहिसामान्यतः सर्वलोकस्तस्यहेतुरुत्पत्तिवृद्धिरुपप्लवोवियोगश्चतत्रहेतुरुत्पत्तिकारणंमुत्पत्तिजन्मवृद्धिराप्यायनमुपप्ल
वोदुःखागमः षड्धातुवियोगःसजीवापमःसप्राणनिरोधःसभंगःसलोकस्वभावस्तस्यमूलंसर्वोपप्लवानाच्चप्रवृत्तिर्निवृ
तिरुपरमःप्रवृत्तिर्दुःखंनिवृत्तिःसुखमिति यतज्ज्ञानमुत्पद्यतेनत्सत्यं तस्यहेतुःसर्वलोकसामान्यज्ञानमेतत्प्रयोजनं
सामान्योपदेशस्यति अथाग्निवेशउवाच किंमूलाचभगवन्प्रवृत्तिर्निवृत्तौचकउपायइतिभगवानुवाच मोहेच्छाद्वेषक
र्ममूलाप्रवृत्तिस्तज्जात्यहंकारसंगः संशयाभिसंप्लवाभ्यवयातप्रविप्रत्ययाविशेषानुपायास्तरुणमिवल्लममतिविपु
लशाखास्तरवोऽभिरूयपुरुषमवतत्यातिष्ठंति यैरभिभूतोनसत्तामतिवर्त्तते तत्रैवंजातिरूपवित्तवृत्तबुद्धिशीलविद्याभि
जनवयोवीर्यप्रभावसंपन्नोहमित्यहंकारः यद्यन्मनोवाक्कायकर्म्मणामनपवर्गायसंसर्गः कर्मफलमोक्षपुरुषप्रेत्यभावा
दयःसंतिनेतिसंशयःसर्वावस्थमनन्योहमहंस्रष्टास्वभावसंसिद्धोहमहंशरीरेंद्रियबुद्धिविशेषःराशिरीतिग्रहणमभिसं
प्लवाममातृपितृभ्रातृदारापत्यबंधुमित्रभृत्यगणोगणस्यचाहमित्यभ्यवपातःकार्याकार्यहिताहितशुभाशुभेषुविपरीताभि
निवेशोविप्रत्ययः ज्ञानयोःप्रकृतिविकृतियोःप्रवृत्तिनिवृत्त्योश्चैवसामान्यदर्शनमविशेषःप्रोक्षणानशनाग्निहोत्रत्रिषवण
भ्युक्षणावाहनायाचनसलिलहुताशनप्रवेशादयः समारंभाः प्रोच्यंतेह्यनुपायाःएवमयमधीधृतिस्मृतिरहंकाराभि
निविष्टःसक्तसंशयाभिसंप्लुतबुद्धिरव्ययतितोऽन्यथादृष्टिरविशेषग्राहीविमार्गगतिः निवासवृक्षसत्वस्वशरीरदोषमूला
नीसर्वदुःखानांभवति एवमहंकारादिभिर्दोषैर्भ्राम्यमाणोनातिवर्त्तते प्रवृत्तिंचसाचमूलमघस्यानिवृत्तिरपवर्गस्तत्प
रंप्रशांतंतदक्षरंतद्ब्रह्मसमोक्षस्तत्रमुमुक्षतामुदयनानिव्याख्यास्यामः तत्रलोकदोषदर्शिनोमुमुक्षोरादितएवाचार्या
भिगमनं तस्योपदेशानुष्ठानमग्नेरिवचोपचर्याधर्मशास्त्रार्थेनगमनं तदर्थावबोधस्तेनावष्टंभस्तत्रयथोक्ताःक्रियाः
सतामुपसेवनमसतांपरिवर्जनमसंगतिर्दुर्जनेन सत्यंसर्वभूतहितमपुरुषमनतिकालेपरीक्ष्यवचनं सर्वप्राणिष्वात्म
नीवचापेक्षासर्वासामस्मरणमसंकल्पनमप्रार्थनमनभिभाषणंचस्त्रीणांसर्वपरिग्रहत्यागः कौपीनःप्रच्छादनार्थं

चर॰ सू॰ शा॰ धातुरागंनिवसनं कंथासीवनहेतोः सूचिपिप्पलकं शौचाधानहेतोर्जलकुंडिकाग्रहणंस्तंभार्थंदंडधारणं भैक्षचर्यार्थंपा
११ त्रं प्राणधारणार्थमेककालमग्राम्योयथोपपन्नोऽभ्यवहारः श्रमापनयनार्थंशीर्णशष्पपर्णस्तृणास्तरेणोपसंध्यानहेतो
कार्यनिबंधनं वनेघनिकेतवासः संद्रानिद्रालस्यादिकर्मवर्जनमिंद्रियार्थेष्वनुरागोपतापनिग्रहः सुप्तस्थितगत
प्रेक्षिताहारप्रत्यंगचेष्टादिकथारंभेषुस्मृतिपूर्विकाप्रवृत्तिः सत्कारस्तुतिगर्हावमानक्षमित्वं क्षुत्पिपासायासश्रमशीतोष्ण
वातवर्षासुखदुःखसंस्पर्शसहत्वं शोकसंस्पर्शरागोद्वेगमदमानलोभेर्ष्याभयक्रोधादिभिरसंवसनमहंकारादिषूपसर्गसं
ज्ञालोकपुरुषयोः सर्गादिसामान्यावेक्षणंकार्यकालात्ययभयंयोगारंभेसततमनिर्वेदः सत्वोत्साहोपवर्गाय धीधृतिस्मृ
तिबलाधानंनियमनमिंद्रियाणांचेतसिचेतसश्चात्मन्यात्मनश्चधातुभेदेन शरीरावयवसंख्यानमभीक्ष्णंसर्वकारणव
द्दुःखमस्वमनित्यमित्यभ्युपगमः सर्वप्रवृत्तिष्वघसंज्ञासर्वसंन्यासेसुखमित्यस्याभिनिवेशः एषमार्गोपवर्गाय अतोऽन्य
थाबध्यतइत्युदयनानिव्याख्यातानिभवंति भवंतीचात्रश्लोकाः एतैरविवलंसत्वंशुद्धरुपायैर्विशुध्यति मृज्यमानइ
वादर्शस्तैलचैलकचादिभिः महांबुदंदरजोधूमनीहारैरसमावृतं यथार्कमंडलंभातिभातिभतिसर्वंतथामलं ज्वल
त्यात्मनिसंरुद्धंतत्सत्वंसंवृतायने शुद्धःस्थिरःप्रसन्नार्चिर्दीपोदीपाशयेयथा शुद्धसत्वस्यमाशुद्धासत्यासंबुद्धिप्र
वर्तते ययाभिनत्त्यतिबलंमहामोहमयंतमः सर्वभावस्वभावज्ञोययाभवतिनिस्पृहः योगंययासाधयतिसांख्य
संपद्यतेयथा ययानोपैत्यहंकारंनोपास्तेकारणंयथा ययानालंबतेकिंचित्सर्वंसंन्यस्यतेयथा यातिब्रह्मय
यानित्यंमरजंशांतमक्षयं विद्यासिद्धिःस्मृतिर्मेधाप्रज्ञाज्ञानंचसामता लोकेचिंतनमात्मानंलोकंचात्मनिप
श्यतः परावरदृशःशांतिर्ज्ञानमूलानतद्यति पश्यय सर्वभूतानिसर्वविरक्तःसर्वदा ब्रह्मभूतस्यसंयोगो
नशुद्धस्योपपद्यते नात्मनःकारणाभावात्लिंगमप्युपयन्ते ते ससर्वकरणात्यागात्मुक्तइत्यभिधीयते
विपापंविरजःशांतंपरमक्षरमव्ययं अमृतंब्रह्मनिर्वाणंपर्यायैःशांतिरुच्यते एतत्तत्सौम्यदुर्ज्ञेयंयतज्ञा ११
त्वामृत्यकांशयाः मुनयःप्रशमंजग्मुर्वितमोहरजःस्पृहाः इतितत्रश्लोकाः सप्रयोजनमुद्दिष्टंलोकस्य
पुरुषस्यच सामान्यमूलमुत्पत्तोमार्गएवच शुद्धसत्वसमाधानंसंन्याबुद्धिस्तुनैष्ठिकी विचयेपुरुषस्यो

क्तानिष्ठाचपरमर्षिणी इतिश्रीचरकसंहितायांशारीरस्थानेपुरुषविचयंनामपंचमोध्यायः ५ अथातः
शारीरविचयंनामशारीरंव्याख्यास्यामः इतिह॰ शारीरविचयःशारीरोपकारार्थमिष्यते ज्ञात्वाहिशरीरतत्वं
शरीरोपकारकेषुभावेषुज्ञानमुत्पद्यते तस्मात्शरीरविचयंप्रशंसंतिकुशलाः तत्रशारीरंनामचेतनाधिष्ठानभूतं
पंचमहाभूतविकारसमुदायात्मकंसमयोगवाहियदास्मिन्शरीरेधातवोवैषम्यमापद्यंते तदाक्लेशंविनाशंवा
प्राप्नोतिवैषम्यगमनंपुनर्धातूनांविशेषकृतंवृद्धिह्रासगमनमकार्त्स्न्येनप्रकृत्याचयोगपद्येनतुखलुविरोधिनां
धातूनांवृद्धिह्रासौभवतः यद्ध्यस्यधातोर्वृद्धिकरंतत्ततोविपरीतगुणस्यधातोःप्रत्यवायकरंसंपद्यते तदेवतस्मा
द्भेषजंसम्यगवचार्यमाणंयुगपद्यूनातिरिक्तानांधातूनांसाम्यकरंभवति अधिकमपकर्षति न्यूनमाप्याययति
एतावदेवभैषज्यप्रयोगेफलमिष्टंस्वस्थवृत्तानुष्ठानेचयावद्धातूनांसाम्यकरंभवति स्वस्थस्यापिहिधातूनांसाम्यानु
ग्रहार्थमेवकुशलाःसगुणानाहारविकारांश्चपर्यायेणेत्थंत्युपयोक्तं सात्म्यसमनुज्ञानानेकप्रकारःगुणभूयिष्ठांश्चोप
युंजानास्तद्विपरीतकरसमज्ञानयायेष्टयासममिच्छंतिकर्तुंदेशकालात्मगुणविपरीतानांहिकर्मणामहारविकाराणां
चक्रियोपयोगः सम्यक्सर्वातियोगसंधारणमुदीर्णानांचगतिमतांसाहसानांचवर्जनं स्वस्थवृत्तवद्धातूनांसा
म्यानुग्रहार्थमुपदिश्यते धातवःपुनः राःसमानगुणैःसमानगुणभूयिष्ठैर्वाप्याहारविहारैरभ्यस्यमानैर्वृद्धिंप्रा
प्नुवंति ह्रासंतुपरितोविपरीतगुणभूयिष्ठैर्वाप्यभ्यस्यमानैस्तत्रमेशरीरधातुगुणासंख्यासामर्थ्यकराभवंति
तद्यथा गुरुलघुशीतोष्णस्निग्धरूक्षमंदतीक्ष्णस्थिरसारमृदुकठिनविशदपिच्छलश्लक्ष्णखरसूक्ष्मस्थूलसांद्रद्र
वास्तेषुयेगुरुभिराहारविकारगुणैरभ्यस्यमानैराप्यायंते लघवश्चह्रसंति लघवस्तुलघुभिराप्यायंते गुरव
श्चह्रसंतेएवमेवसर्वधातूनांसामान्ययोगात्वृद्धिविपर्ययात् ह्रासस्तस्मान्मांसमाप्यायते मांसेनभूयस्तरम
न्येभ्यःशरीरधातुभ्यःतथालोहितंलोहितेनमेदोमेदसावसयावसाअस्थितरुणास्थ्ना मज्जामज्ज्ञाशुक्रंशुक्रेण
गर्भस्त्वामगर्भेण यत्रत्वेवंलक्षणेनसामान्येनसामान्य महारविकाराणामसान्निध्यंस्यात् संनिहितानांचाथवा
क्तवहरणंघृणित्वादन्यस्माद्वाकोणारात्चकतुरभि यितव्यः ८ तस्ययेसमानगुणास्युराहारविहारविकारा

चर० शा० समानगुणभूयिष्ठानामन्यप्रकृतिनामथाहारविकारामुपयोगः स्यात् तद्यथा शुक्रक्षये क्षीरसरु
१२ गः मधुरस्निग्धशीतसमाख्यातानांचापरेषांद्रव्याणां येपुनर्थिक्षरसवारुणीमंडद्रवाणांमधुराम्ललवणा
दिनांचपुरीषक्षयेकुल्माषमाषकुष्मांडाजमध्यय धान्याम्लानांच वातक्षयेकटुतिक्तकषायरुक्षलघुशीता
नांपित्तक्षयेम्ललवणकटुकक्षारतीक्ष्णोष्णानांश्लेष्मक्षयेस्निग्धगुरुमधुरसांद्रपिच्छलानांद्रव्याणांकर्माणिपतय
स्यधातोर्वृद्धिकरंतत्तदासेव्यं एवमन्येषामपिशरीरधातूनांसामान्यविपर्ययाभ्यांवृद्धिह्रासौयथाकालंकार्यौ
विति सर्वशरीरधातूनामेकैकशोतिदेशतश्ववृद्धिह्रासकराणिव्याख्यातानिभवंति कृत्स्नशरीराभिवृद्धिकरा
स्त्विमेभावाभवंति तद्यथाकालयोगस्वभावसंसिद्धिराहारस्यसौष्टमंवमविघातश्चेति बलवृद्धिकरास्त्विमेभावाभ
वंति तद्यथा बलवत्पुरुषदेशेजन्मबलवत्क पचकालेस्तस्वश्चकालयोगोबीजक्षेत्रगुणसंपच्च शरीरसंपच्चा
हारसंपच्चसत्वसंपच्चस्वभावसंसिद्धिश्चयौवनंचकर्मचहर्षश्चेति आहारपरिणामधातुसात्म्यकरास्त्विमेभावाभ
वंति तद्यथा ऊष्मावायुःक्लेदःस्नेहःकालःसमयोगतत्रखल्वेदोषामूष्मादीनामहारपरिणामकराणांभावानामि
मेकर्मविशेषाभवंति तद्यथा ऊष्मापचतिवायुरपकर्षतिक्लेदःशैथिल्यमापादयति स्नेहोमार्दवंजनयति कालः
पर्याप्तिमभिनिवर्त्तयति समयोगस्त्वेषांपरिणामधातुसाम्यकरःसंपद्यते परिणामतस्त्वाहारस्यगुणाःशरीरगु
णमापद्यंते यथास्वमविरुद्धाःविरुद्धास्तुविहन्युर्विहताश्चविरोधिभिःशरीरंशरीरगुणाःपुनर्द्विविधाःसंग्रहे
णमलभूताः प्रसादभूताश्चतत्रमलभूतास्तेयेशरीरस्याबाधकराः तद्यथा शरीरछिद्रेष्टपदेहाःपृथक्जन्मा
नोबहिर्मुखाश्चापरिपक्वाश्चा॰ न प्रकुपिता श्चवातपित्तश्लेष्माणःयेचान्येपि चित्शरीरेतिष्ठंतोभावाःशरीरस्यो
पयाना पद्यंते सर्वास्तान्मलान्संप्रचक्ष्महे इतरांस्तु गुर्वादींश्चद्रवांतान्गुणभेदेनरसादींश्चैवशु म
द्रव्यभेदेनतेषांसर्वेषामेववातपित्तश्लेष्माण ष्टादूषयितारोभवंति दोषस्वभावात्वाता पुनदर्स्यितरेषुप्रदुष्टा
नांविविधाशितपितीयेध्यायेविज्ञानान्युक्तानि एता॥वत्योवहिदुष्टदोषगतिर्यावत्संस्पर्शनात् शरीरधातुनांप्र १२
कृतिभूतानांखलुवातादिनांफलमासंग्यंतस्मादेषांप्रकृतिभावेप्रयतितव्यमिति तत्रश्लोकः सर्वथासर्वदासर्व

शरीरंवेदयोभिषक् आयुर्वेदंसकार्त्स्न्येनवेदलोकसुखप्रदमिति तमेवमुक्तवंतंभगवंतमात्रेयमग्निवेशउवा
च यदुक्तंभगवताशरीराधिकारेवचः किंतुखलुगर्भस्यांगंपूर्वमभिनिवर्त्तते कुक्षौकुतोमुखः कथंवाचांतर्गतस्ति
ष्ठति किमाहारश्चवर्तयति कथंभूतश्चनिष्क्रामतिकेश्चास्ययमाहारोपचारै।जतिःसद्योहन्यते केरव्याधिभिःर
भिवर्द्धते किंचास्यदेवादिप्रकोपनिमित्तविकाराःसभवंत्याहोस्विन्नकिंचास्यकालाकालमृत्योर्भावाभावयोर्भगवानध्य
वस्यति किंचास्यापरमायुः कानिचास्यपरमायुषोनिमित्तानीति तमेवमुक्तवंतमग्निवेशंभगवान्पुनर्वसुरात्रेयउवा
च पूर्वमुक्तमेतत्गर्भावक्रांतौयथायमभिनिवर्त्तते कुक्षौयथास्ययदासंतिष्ठतेगजातं विप्रतिपत्तिवादास्त्वत्रबहुवि
विधास्तत्कारणामृषीणांसर्वेषांतानपिनिबोधोउच्यमानान् शिरःपूर्वमभिनिवर्त्तते कुक्षाविति कुमारशिराभरद्वाजः
पश्यति सर्वेंद्रियाणांतदधिष्ठानमिति कृत्वाहृदयमिति मितीकांकायनोवाह्लिकभिषक्चेतनाधिष्ठानत्वान्नाभि
रिति भद्रकाप्यआहारायननंइतिकृत्वामितिर्भद्रकाप्यसौनाकोमारुताधिष्ठानत्वात्हस्तपादमितिवडिशस्तत्क
रणत्वान्पुरुषस्येंद्रियार्णीतिजनकोवैदेहस्तान्यस्यबुध्यधिष्ठानानितिकृत्वाबुद्धिपरोक्षत्वादविचिंत्यमितिमारीचिः
काश्यपः सर्वांगाभिनिर्वृत्तियुगपदितिधन्वंतरीस्तदुपपन्नंसर्वांगानांतुल्यकालवृद्धित्वात्हृदयप्रभृतीनांसर्वांगानांतुल्य
तुल्यकालाभिनिर्वृत्तिर्यस्यहृदयंमू॰लमधिष्ठानंचकेशांचित्केषांचित्भावानांचनतस्मात्पूर्वाभिनिर्वृत्तिरेषांतस्मात्
हृदयप्रभृतिनासर्वांगानांतुल्यकालाभिनिर्वृत्तिः सर्वभावाह्यन्योन्यप्रतिबद्धा तस्माद्यथाभूतंसाध गर्भस्तुखलुमा
तुःपृष्ठाभिमुखऊर्द्धशिराःसंकुच्यांगान्यास्ते नतकुक्षौव्यपगतबुभुक्षापिपाससस्तुखलुगर्भः परतंत्रवृत्तिर्मातरमा
श्रित्यवर्त्तयत्यपस्नेहोपस्वेदाभ्यांगर्भाशयेसदसद्भूतांगावयवस्तदनंतरंह्यस्यकश्चिल्लोमकूपायनैरुपस्नेहः कश्चि
न्नाभिनाड्ययनैः ताभ्यांह्यस्यनाडीप्रसक्तानाड्यांचापराअपराचास्यमातुःप्रसक्ता हृदयेमातृहृदयंह्यस्यतामप
रामभिसंप्लवतेशिरोभिःसंस्यंदमानाभिःसतस्यरसोबलवर्णकरःसंपद्यते सशरीरंविधत्तेयेनाहारःस्त्रीयाह्यापन्नग
र्भायास्त्रिधारसःप्रतिपद्यते स्वशरीरवृद्धयेस्तन्यायगर्भपुष्टयेच यस्तेनाहारेणोपस्तब्धःपरतंत्रवृत्तिर्मातरमाश्रि
त्यवर्तयत्यंतर्ग।तःसचोपरिशुंनिकालेजन्मनिप्रसूतिमारुतयोगात्परिवृत्त्यावाकशिनिःक्रामत्यपत्यपथेनएषाम्रकृ

निर्विकृतिः रतोन्यथापरंत्वतः स्वतंत्रवृत्तिर्भवति तस्याहारोपचारोजातिसूत्रीयोपदिष्टाविकारकरोवाभिवृद्धिक
रोभवतस्ताभ्यामेवचविषमाभ्यांतः सद्योपहन्यतेतरुरिवाप्रतिरोपितोवातातपाभ्यामप्रतिष्ठितमूलआप्तोपदेशादद्भु
तरूपदर्शनात्समुत्थानलिंगविकारसिनविशेषात्वदोषप्रकोपानुरूपादेवाद्विप्रकोपनिमित्तविकाराःसमुपलभ्यंते का
लाकालमृत्योनुखलुभावाभावयोरिदमध्यवसितंयः कश्चिम्रियतेससर्वःकालेऽनम्रियतेः नहिकालछिद्रंनाछिद्रताकल
स्योपपद्यते कालस्वलक्षणादेवानथाहुरपरेयोयदाम्रियते सतस्यनियतोमृत्युकालः कालःसर्वभूतानां
सत्यःसमक्रियत्वादिति तदपिचान्यथार्थग्रहणंनह्येकश्चिन्नम्रियतइति समक्रियःकालेनत्वायुषःप्रमाणम
धिकृत्योच्यते। यस्यवेष्टंयोयदाम्रियतेसतस्यनियतोमृत्युकालइति तस्यसर्वेभावायथास्वंनियतकालाभविष्यं
तिः तच्चनोपपद्यते प्रत्यक्षंह्यकालाहारवचनकर्मणोफलमनिष्टंविपर्ययेचेष्टंप्रत्यक्षतोश्चोपलभ्यते कालाका
लव्यक्तिःतासुतास्ववस्थासुतंतमर्थमभिसमीक्ष्य तद्यथा कालोयमस्यव्याधेराहारस्यौषधस्यप्रतिकर्मणोविसर्गस्याका
लोवेति लोकेप्येतद्भवति कालेदेवोवर्षत्यकालेवर्षति कालेशीतमकालेशीतं कालेतपत्यकालेतपति कालेपुष्प
विषवृक्षानिलस्पर्शात्तथान्यैर्विषसंभवैः॥अभिषिक्तस्य चाप्याहुर्ज्वरमेकेभिषंगजं॥चिकित्सया विषघ्न्यैव
प्रशमं लभते नरः॥अभिशापाभिचाराभ्यां सिद्धानां यः प्रवर्तते॥सन्निपातज्वरो घोरः स विज्ञेयः सुदुःसह
तं॥चित्तेंद्रियशरीराणामार्तयोन्याश्च नैकशः॥प्रयोगस्त्वभिचारस्य दृष्ट्वा शापस्य चैव हि॥स्वयं श्रुत्वानुमाने
न लक्ष्यते प्रशमेन वा तेषु र्वकेवलाः॥पश्चात्त्रिजैर्व्यामिश्रलक्षणाः हेत्वौषधविशेषाश्च भवंत्यागंतवो ज्वरा
द्वैविध्यादभिचारस्य शापस्य च तदात्मके॥यथाकर्मप्रयोगेन लक्षणं स्यात्पृथग्विधं॥ध्यानं निश्वासबहुलं
लिंगं॥ संसृष्टाः सन्निपतिताः पृथग्वा कुपिता मलाः॥रसाख्यं धातुमभ्येत्य पंक्तिं लस्थानाभिरस्यच स्वेनेते
नोष्मणा चैव कृत्वा देहोष्मणो बलं॥स्रोतांसि रुध्वा संप्राप्ताः केवलं देहमुल्बणाः॥संतापमधिकं देहे जन

यंति नरस्तदा॥भवत्यत्युष्णसर्वांगो ज्वरितस्तेन चोच्यते॥स्रोतसां सविबंधत्वात्स्वेदं नानाधिगच्छति
स्वस्थानात्प्रच्युते चाग्नौ प्रायशस्तरुणे ज्वरे॥अरुचिश्चाविपाकश्च गुरुत्वमुदरस्य च॥हृदयस्याविशुद्धिश्च
तंद्रा चालस्यमेव च॥ज्वरोविसर्गी बलवान्दोषाणामप्रवर्तनं। लालाप्रसेको हृल्लासो क्षुन्नाशोविशदं मुखं
स्तब्धसुप्तगुरुत्वं च गात्राणां बहुमूत्रता॥नविड्जीर्णा न च ग्लानिर्ज्वरस्यामस्य लक्षणं॥क्षुत्क्षामता लघुत्वं
च गात्राणां ज्वरमार्दवं दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणं नावज्वरे दिवास्वप्नस्नानाभ्यंगान्नमैथुनं
क्रोधप्रवातव्यायामकषायांश्च विवर्जयेत् ज्वरे लंघनमेवादावुपदिष्टमृते ज्वरात् क्षयानिलभयक्रोधका
मशोकश्रमोद्भवात्। लंघनेन क्षयं नीते दोषे संधुक्षितेनले।विज्वरत्वं लघुत्वं च क्षुच्चैवास्योपजायते प्रा
णाविरोधिना चैनं लंघनेनोपपादयेत्॥ बलाधिष्ठानमारोग्यं यदर्थोयं क्रियाक्रमः॥लंघनं स्वेदनं कालो य
वाग्वस्तिक्तको रसः पाचनान्यविपक्वानां दोषाणां तरुणे ज्वरे॥तृष्यतः सलिलं चोष्णं दद्याद्वातकफज्वरे॥
मद्योत्थे पैत्तिके चाथ शीतलं तिक्तकैः शृतं॥दीपनं पाचनं चैव ज्वरघ्नमुभयं च तत् स्रोतसां शोधनं बल्यं रु
चिस्वेदप्रदं शिवं मुस्तपर्प्पटकोशीरचंदनोदीच्यनागरैः शृतशीतं जलं दद्यात्पिपासाज्वरशांतये॥कफ
प्रधानानुत्क्लिष्टान्दोषानामाशयस्थितान् शोकजे वाप्यबहुलं भास प्रायं भयज्वरे॥क्रोधजे बहुसंरंभस्त्वावेशोत्त्व
मानुषं मूर्छामोहमदग्लानिभूयिष्टं विषसंभवे केषांचिदेषां लिंगानां संतापो जायते पुरः पश्चात्तुल्यं

तुकेषांचिदेषुक्तामज्वरादिषु॥कामादिजानामुद्दिष्टंज्वराणांपद्धिशोषणं॥कामादिजानांरोगाणामन्येषामपि
नतस्मृतं॥वरीतदोषानामाशयस्थितान्॥बुध्वाज्वरकरान्कालेवम्यानांवमनैर्हरेत्॥अनुपस्थितदोषाणां
नमनंतरुणोज्वरे॥हृद्रोगंश्वाससमानाहंमोहंचकुरुतेकृतं॥सर्वदेहानुगाःसमाधातुस्थादुखसनिर्हणः॥दो
षाःफलानामामानांस्वरसाइवसात्ययाः॥वमितांलंघितंकालेयवागूभिरुपाचरेत्॥यथास्वौषधसिद्धा
भिर्मंडपूर्वाभिरादिताः॥यावज्वरमृदूभावाषडहंवाविचक्षणाः॥तस्याग्निर्दीप्यतेताभिःसमिद्भिरिवपाव
कः॥ताश्चभेषजसंयोगाल्लघुत्वाच्चाग्निदीपनाः॥वातमूत्रपुरीषाणांतादोषाणांचानुलोमिकाः॥स्वेदनायद्र
वोष्णत्वाद्द्रवत्वात्तृट्प्रशांतये॥आहारभावात्प्राणायसरत्वाल्लाघवायच॥ज्वरघ्नोज्वरसात्म्यत्वात्तस्मात्पू
र्वमुपाचरेत्॥यवागूभिर्यवान्विद्वान्तेमघसमुल्लितान्॥मदासयेमघनित्येग्रीष्मेपित्तकफाधिके॥
उर्द्ध्वगेरक्तपित्तेचयवागूरहिताज्वरे॥तत्रतर्पणमेवाग्रेप्रदेलाजैःसक्तुभिः॥ज्वरापहैःफलरसैर्युक्तंसम
धुशार्करं॥ततःसात्म्यबलापेक्षीभोजयेज्जीर्णतर्पणं॥तनुनामुद्गयूषेणजांगलानांरसेनच॥अन्नकालेषु
चान्यस्मैविधेयंदंतधावनं॥योस्यवक्त्ररसस्तस्माद्विपरीतंप्रियंचयत्॥तदस्यमुखवैशद्यंप्राकांक्षाचा ४
न्नपानयोः॥धत्तेरसविशेषाणामभिज्ञत्वंकरोतिच॥विशोध्यद्रुमशाखाग्रैरास्यंप्रक्षाल्यचासकृत्॥म
स्तिक्षुरसमद्याद्यैर्यथाहारमवाप्नुयात्॥बलपाचनंशमनीयंहिकषायंपाययेत्ततः॥ज्वरितंषडहेती

तेलघ्वन्नंप्रतिभोजितं॥स्तभ्यंतेनविपच्यंतेकुर्वंतेविषमज्वरं॥दोषाबद्धाकषायेणास्तंभितास्तरुणोज्वरे
यूषैरम्लैरनम्लैर्वाजांगलैर्वारसैर्हितैः॥दशाहंवाषदश्रीयाल्लघ्वनंज्वरशांतये॥अतऊर्ध्वंकफेमंदेवा
तपित्तोत्तरेज्वरे॥पाचनंशमनीयंहिकषायंपाययेत्ततः॥ज्वरितंषडहेतीतेलघ्वन्नंप्रतिभोजितं॥स्तभ्यं
तेनविपच्यंतेकुर्वतेविषमज्वरं॥दोषाबद्धाकषायेणास्तंभितास्तरुणेज्वरे॥नतुकल्पनमुद्दिश्यकषा
यःप्रतिषिध्यते॥यःकषायःकषायस्तुसवर्ज्यस्तरुणेज्वरे॥सवर्ज्यस्तरुणेज्वरंनतुकल्पनमुद्दिश्ययू
षैरम्लैरनम्लैर्वाजांगलानांरसैर्हितैः॥दशाहंयावदश्नीयाल्लघ्वन्नंज्वरशांतये॥अतऊर्ध्वंकफेमंदेवातपित्ति
केषुदोषेषुसार्ध्येषुपानंयथामतंनिर्दिशाहमपिज्ञात्वाकफोत्तरमलंघितंनसर्पिःपाययेत्ततःकषायैस्तमु
पाचरेत्॥यावल्लघुत्वादशनंदद्यान्मांसरसेनच॥बलंह्यलंनिग्रहायदोषाणांबलकृच्चतत्॥दाहतृष्णापरीतस्य
वातपित्तोत्तरंज्वरं॥बध्वप्रच्युतदोषंवानियमंपयसाजयेत्॥क्रियाभिराभिःप्रशमंनप्रयातियदिज्वरः॥अक्षीणा
बलमांसस्यशमयेत्तंविचक्षणैः॥ज्वरक्षीणस्यनहितंवमनंनविरेचनंकामंतुपयसातस्यनिरूहैर्वाहरेन्मलान्
निरूहोबलमग्निंचविज्वरत्वंमुदंरुचिं॥परिपक्वेषुदोषेषुप्रयुक्तःशीघ्रमावहेत्॥पित्तंवाकफपित्तंवापित्ताश
यगतंहरेत् स्रंसनंत्रीन्मलान्वस्तिर्हरेत्पक्वाशयस्थितान्॥ज्वरेपुराणेसंक्षीणेकफपित्तेदृढाग्नये॥रूक्षबद्धपुरी
षायप्रदद्यादनुवासनं॥गौरवेशिरसःशूलेविबद्धेष्विंद्रियेषुच॥जीर्णज्वरेरुचिकरंदद्याच्छीर्षविरेचनं॥

अभ्यंगाश्च प्रदेहाश्च सस्नेहान् सावगाहनान्॥ विभज्य शीतोष्णकृतान् प्रयोद्जीर्णज्वरे भिषक्॥ तैराशु प्रश
मं याति बहिर्मार्गस्थितो ज्वरः॥ लभंते सुखमंगानि बलं वर्णश्च वर्द्धते॥ धूपनांजनयोगैश्च यांतिजीर्णज्वरा
शयं॥ त्वङ्मात्रशेषो येषांच भवत्यागंतुरन्वयः॥ इति क्रियाक्रमः सिद्धो ज्वरघ्नः संप्रकाशितः॥ येषां त्वेषक्रम
स्तानि द्रव्याण्यूर्द्ध्वमतः शृणु॥ रक्तशाल्यादयः शस्ताः पुराणं षष्टिकैः सह॥ यवाग्वोदनलाजार्थे ज्वरितानां
ज्वरापहाः॥ लाजपेयां सुखजरां पिप्पलीनागरैः शृतां॥ पिबेज्ज्वरी ज्वरहरां क्षुद्वानल्पाग्निरादितः॥ अम्ला
भिलाषी तामेव दाडिमाम्लां प्रणापणं॥ सृष्टविट्पैत्तिको वाथ शीतां मधुयुतां पिबेत्॥ पेयां वा रक्तशालीनां
पार्श्ववस्तिशिरोरुजि॥ श्वदंष्ट्राकंटकारीभ्यां सिद्धां ज्वरहरां पिबेत्॥ ज्वरातीसारि पेयां वा पिबेच्छाम्लां कृतां
नरः॥ पृश्निपर्णी बलाबिल्वनागरोत्पलधान्यकैः॥ शृतां विदारिगंधाद्यैर्दीपनैः स्वेदनां नरः॥ कासी श्वासी
च हिक्की वा यवागूं ज्वरितः पिबेत्॥ विबद्धवर्चाः सयवां पिप्पल्यामलकैः शृतां॥ सर्पिष्मतीं पिबेत्पेयां ज्वरी दोषा
नुलोमिनीं॥ कोष्ठे विबद्धे सरुजि पिबेत्पेयां शृतां ज्वरी॥ मृद्वीका पिप्पलीमूलचव्यामलकनागरैः॥ पिबेत्स बि
ल्वां पेयां वा ज्वरे सपरिकर्त्तिके॥ बलावृक्षाम्लकोलाम्लकलसीधावनीशृतां॥ अस्वेदनिद्रात्तृष्णार्त्तः पिबे
त्पेयां सशर्करां॥ नागरामलकैः सिद्धां घृतभ्रष्टां ज्वरापहां॥ मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ठ
कान्॥ यूषार्थे यूषसात्म्यानां प्रकल्पयेत्॥ पटोलपत्रं सफलं कुलकं पापचैलिकं॥ कर्कोटकं कटिल्लंच

दद्याच्छाकं ज्वरे हितं॥ लावान् कपिंजलानेणांश्चकोरानुपचकान्॥ कुरंगान् कालपुच्छांश्च हरिणान् पृषतो
रसान्॥ प्रदद्यान्मांससात्म्यानां ज्वरितानां ज्वरापहं॥ ईषदम्लाननम्लान्वा रसान्काले विचक्षणः॥ कुक्कु
टांश्च मयूरांश्च तित्तिरक्रौंचवर्त्तकान्॥ गुरूष्णत्वान्नशंसंति ज्वरे केचिच्चिकित्सकाः॥ लंघनेनातिल
बणं ज्वरे यद्यधिकं भवेत्॥ भिषङ्मात्राविकल्पज्ञो दद्यात्तानपि कालवित्॥ धर्म्याम्बुवानुपानार्थं तर्षिताय प्र
दापयेत्॥ मद्यं वा मद्यसात्म्याय यथादोषं यथाबलं॥ गुरूष्णस्निग्धमधुरान् कषायांश्च नवज्वरे॥ आहार
दोषयुक्त्यर्थं प्रायशः परिवर्जयेत्॥ अन्नपानक्रमः सिद्धो ज्वरघ्नः संप्रकाशितः॥ अतऊर्ध्वं कषायाणां ज्वर
घ्नानुपदेक्ष्यते॥ दाक्ष्यं शीतकषायं वा मस्तपर्पटकं पिबेत्॥ सनागरं पर्पटकं पिबेद्वा सदुरालभं॥ किरात
तिक्तकं मुस्तं गुडूचीं विश्वभेषजं॥ पाठामुशीरं सोदीच्यं पिबेद्वा ज्वरशांतये॥ ज्वरघ्ना दीपनाश्चैते कषाया दो
षपाचनाः॥ तृष्णारुचिप्रशमना मुखवैरस्यनाशनाः॥ कलिंगकाः पटोलस्य पत्रं कटुकरोहिणी॥ पटोलं सा
रिवा मुस्तं पाठा कटुकरोहिणी॥ निंबः पटोलं त्रिफला मृद्वीका मुस्तवत्सकौ॥ किराततिक्तममृता चंदनं विश्व
भेषजं॥ गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापनाः॥ कषायाः शमयंत्याशु पंचपंचविधं ज्वरं॥ वत्सकारग्वधौ पाठां
षड्ग्रंथां कटुरोहिणीं॥ मूर्वा सातिविषां निंबपटोलं धन्वयासकं॥ वचात्रिमुशीरणि मधुकं मुस्तफला बला॥

च॰चि॰ पाक्यं शीतकषायं वा पिबेज्ज्वरहरं नरः ॥ मधूकं मुस्तमृद्वीका काश्मर्याणि परूषकं ॥ त्रायमाणामशीरा णि
६ त्रिफलां कटुरोहिणीं ॥ स्तमुपित्तश्लेष्महरश्चैव कषाया स्यातु लोमिकः ॥ धान्यामलकमुस्तानि मद्दन्त्वयथा सक
विबद्धदोषो ज्वरितः कषायं सगुडं पिबेत् ॥ त्रिफलां त्रायमाणां च मृद्वीकां कटुरोहिणीं ॥ कषायो त्स्यात्रिवृता
शार्करायुक्तः पित्तश्लेष्मज्वरापहः ॥ शठीपुष्करमूलं च व्याघ्री शृंगी दुरालभा ॥ गुडूची नागरं पाठा किरातं क
टुरोहिणी ॥ एव शठ्यादिको वर्गः सन्निपातज्वरापहः ॥ कासहृद्ग्रहपार्श्वार्तिश्वासे तंद्र्यां च शस्यते ॥ बृहती
पौष्करं मार्गी सटी शृंगी दुरालभा ॥ वत्सकस्य च बीजानि पटोलं कटुरोहिणी ॥ बृहत्यादिगणः प्रोक्तः सन्निपात
ज्वरापहः ॥ कासादिषु च सर्वेषु हितः सोपद्रवेषु च ॥ कषायाश्च येयाग्नश्च विपासाज्वरनाशनाः ॥ निर्दिष्टा भेषजा
ध्याये भिषक्तानपि योजयेत् ॥ ज्वराः कषायैर्वमनैर्लंघनैर्लघुभोजनैः ॥ रूक्षस्य ये न शाम्यंति सर्पिस्तेषां भि
षग्जितं ॥ रूक्षं तेजो ज्वरकरं तेजसा रूक्षितस्य च ॥ यस्यादनुबलो धातुः स्नेहवध्यः स चानिलः ॥ कषायाः सर्व
एवैते सर्पिषा सह योजिताः ॥ प्रयोज्या ज्वरशांत्यर्थमग्निसंधुक्षणाः शिवाः ॥ पिप्पल्यश्चंदनं मुस्तमुशीरं क
टुरोहिणी ॥ कलिंगकास्तामलकी सारिवातिविषास्थिरा ॥ द्राक्षामलकबिल्वानि त्रायमाणा निदग्धिका ॥
सिद्धमेतैर्घृतं सद्यो ज्वरं जीर्णमपोहति ॥ क्षयं कासं शिरःशूलं पार्श्वशूलं हलीमकं ॥ अंसाभितापमग्निं च वि ६
षमं संनियच्छति ॥ वासां गुडूचीं त्रिफलां त्रायमाणां यवासकं ॥ पक्त्वा तेन कषायेण पयसा द्विगुणेन च ॥

पिप्पली मुस्त मृद्वीका चंदनोत्पलनागरैः ॥ कल्कीकृतैश्च विपचेद् घृतं जीर्णज्वरापहं ॥ बलां श्वदंष्ट्रां बृहतीं
कलसीं धावनीं स्थिरां ॥ निंबपर्पटकं मुस्तं वा त्रायमाणां दुरालभां ॥ कृत्वा कषायं पेष्यार्थे श्रेष्ठया त्रामलकीं स
टीं ॥ द्राक्षां पुष्करमूलं च मेदयामलकानि ॥ घृतं पयश्च तत्सिद्धं सर्पिर्ज्वरहरं परं ॥ क्षयकासप्रशमनं शिरः
पार्श्वरुजापहं ॥ ज्वरिणां बहुदोषाणां मृद्वंचाथश्च बुद्धिमान् ॥ दयात्संशोधनं काले कल्पे यदुपदेक्ष्यते ॥ मदनं
पिप्पली मिर्वा कलिंगैर्मधुकेन वा ॥ युक्तमुष्णांबुना पेयं वमनं ज्वरशांतये ॥ क्षौद्रांबुना रसेनेक्षोरथ वा लवणां
बुना ॥ ज्वरे प्रमर्दनं शस्तं मद्यैर्वा तर्पणेन वा ॥ मृद्वीकामलकानां च रसं प्रस्कंदनं पिबेत् ॥ रसमामलकानां वाघृ
तभृष्टं ज्वरापहं ॥ लिह्याद्वा त्रैवृतं चूर्णं संयुक्तं मधुसर्पिषा ॥ पिबेद्वा क्षौद्रमासाद्य सघृतं त्रिफलारसं ॥ आरग्वधं
वा पयसा मृद्वीकानां रसेन वा ॥ त्रिफलां त्रायमाणां वा पयसा ज्वरितः पिबेत् ॥ ज्वराद्विमुच्यते पीत्वा मृद्वीकाभिः सहा
भयां ॥ पयोनुपानमुष्णं वा पीत्वा द्राक्षारसं नरः ॥ कासाच्छ्वासाच्छिरःशूलात्पार्श्वशूलाच्चिरज्वरात् ॥ मुच्यते ज्व
रितः पीत्वा पंचमूलीशृतं पयः ॥ एरंडमूलेः कथितं ज्वरात्सपरिकर्तिकान् ॥ पयो विमुच्यते पीत्वा तद्वद् बिल्वश
टुभिः ॥ त्रिकंटकबलाव्याघ्रीगुडनागरसाधितं ॥ वर्चोमूत्रविबंधघ्नं शोफज्वरहरं पयः ॥ सनागरं समृद्वीकं सघृत
क्षौद्रशर्करं ॥ शृतं पयः सखर्जूरं पिपासाज्वरनाशनं ॥ चतुर्गुणेनांभसा वा शृतं ज्वरहरं पयः ॥ धारोष्णं वा पयः स
द्यो वातपित्तज्वरं जयेत् ॥ जीर्णज्वराणां सर्वेषां पयः प्रशमनं परं ॥ पेयं तदुष्णं शीतं वा यथास्वं रौषधैः शृतं ॥

पाक्यं शीतकषायं वा पिबेज्ज्वरहरं नरः॥मधूकं मुस्तमृद्वीका काश्मर्याणि परूषकं॥त्रायमाणामशीराणि
त्रिफलां कटुरोहिणीं॥त्तमुष्णं श्लेष्महरश्चैव कषाया स्यात्तु लोमिकः॥धान्यामलकमुस्तानि मद्दरन्वयथालक
विमद्दु दोषोज्वरितः कषायं सगुडं पिबेत्॥त्रिफलां त्रायमाणां च मृद्वीकां कटुरोहिणीं॥क्वाथो त्रिवृत्ता
शर्करायुक्तः पित्तश्लेष्मज्वरापहः॥सटीपुष्करमूलं च व्याघ्री शृंगी दुरालभा॥गुडूची नागरं पाठा किरातं क
टुरोहिणीं॥एवशट्यादिकोवर्गः सन्निपातज्वरापहः॥कासहृद्ग्रहपार्श्वार्तिश्वासे तंद्रां च शस्यते॥बृहत्यौ
पौष्करं भार्गी सटी शृंगी दुरालभा॥वत्सकस्य च बीजानि पटोलं कटुरोहिणीं॥बृहत्यादिगणः प्रोक्तः सन्निपात
ज्वरापहः॥कासादिषु च सर्वेषु हितः सोपद्रवेषु च॥कषायाश्च येयाग्नश्च पिपासाज्वरनाशनां॥निर्दिशाभेषजा
ध्याये भिषक्तान पिपोजयेत्॥ज्वराः कषायैर्वमनैर्लंघनैर्लघुभोजनैः॥रूक्षस्य येन शाम्यंति सर्पिस्ते भि
षग्जितं॥रूक्षं तेजो ज्वरकरं तेजसा रूक्षितस्य च॥यस्यादनुबलो धातुस्नेहव ध्यः सचानिलः॥कषायाः सर्व
एवैते सर्पिषा सह योजिताः॥प्रयोज्याज्वरशांत्यर्थमग्निसंधुक्षणाशिवाः॥पिप्पल्यश्चंदनं मुस्तमुशीरक
टुरोहिणी॥कलिंगकास्ता मलकी सारिवातिविषा स्थिरा॥द्राक्षामलकबिल्वानि त्रायमाणा निदग्धिका॥
सिद्धमेतैर्घृतं सद्यो ज्वरं जीर्णमपोहति॥सपंकासं शिरःशूलं पार्श्वशूलं हलीमकं॥अंसाभितापमग्निं च वि
षमं संनियच्छति॥वासां गुडूचीं त्रिफलां त्रायमाणां यवासकं॥पक्त्वा तेन कषायेण पयसा द्विगुणेन च॥

पिप्पलीमुस्तमृद्वीकाचंदनोत्पलनागरैः॥कल्कीकृतैश्च विपचेद्घृतं जीर्णज्वरापहं॥बलांश्वदंष्ट्रां बृहतीं
कलसीं धावनीं स्थिरां॥निंबपर्पटकं मुस्तं त्रायमाणां दुरालभां॥कृत्वा कषायं पेष्यार्थे श्रेष्ठ्या त्रामलकीं स
मां॥द्राक्षां पुष्करमूलं च मेदामामलकानि॥घृतं पयश्च तत्सिद्धं सर्पिर्ज्वरहरं परं॥क्षयकासप्रशमनं शिरः
पार्श्वरुजापहं॥ज्वरिणां बहुदोषाणां मूर्द्धं चाधश्च बुद्धिमान्॥दद्यात्संशोधनं काले कल्पेयदुपदेश्यते॥मदनं
पिप्पली मिर्वा कलिंगैर्मधुकेन वा॥युक्तमुष्णांबुना पेयं वमनं ज्वरशांतये॥क्षौद्रांबुना रसेनेक्षोरथ वा लवणां
बुना॥ज्वरे प्रमच्छनं शस्तं मद्यैर्वा तर्पणेन वा॥मृद्वीकामलकानां च रसं प्रस्कंदनं पिबेत्॥रसमामलकानां वा घृ
तभृष्टज्वरापहं॥लिह्याद्वा त्रैवृतं चूर्णं संयुक्तं मधुसर्पिषा॥पिबेद्वा क्षौद्रमासाद्य सघृतं त्रिफलारसं॥आरग्वधं
वा पयसा मृद्वीकानां रसेन वा॥त्रिफलां त्रायमाणां वा पयसा ज्वरितः पिबेत्॥ज्वराद्विमुच्यते पीत्वा मृद्वीकाभिः सहा
भयां॥पयोनुपानं पुमुष्णं वा पीत्वा द्राक्षारसं नरः॥कासाच्छ्वासाच्छिरःशूला पार्श्वशूलाच्चिरज्वरात्॥मुच्यते ज्व
रितः पीत्वा पंचमूलीसृतं पयः॥एरंडमूलेः कथितं ज्वरात्परिकीर्तितान्॥पयो विमुच्यते पीत्वा तद्वद्धिष्णशाला
टुभिः॥त्रिकंटकबलाव्याघ्रीगुडनागरसाधितं॥वर्चोमूत्रविबंधघ्नं शोफज्वरहरं परं॥सनागरं समृद्वीकं सघृत
क्षौद्रशर्करं॥शृतं पयः सखर्जूरं पिपासाज्वरनाशनं॥चतुर्गुणेनांभसा वा शृतं ज्वरहरं पयः॥धारोष्णं वा पयः स
द्यो वातपित्तज्वरं जयेत्॥जीर्णज्वराणां सर्वेषां पयः प्रशमनं परं॥पेयं तदुष्णं शीतं वा यथास्वं रौषधैः शृतं॥

प्रयोजयेज्वरहरान्निरुहान् सानुवासनान्॥ पक्वाशयगतेदोषे सिध्यैयानुपदेक्ष्यते॥ पटोलारि
ष्टपत्राणि सोसीरं चतुरंगुलं॥ न्हीबेरं रोहिणी तिक्ता स्वदंष्ट्रा मदनानि च॥ स्थिरां बलां च तत्सर्वं पयस्य
र्धोदके स्रुतं॥ क्षीरावशेषं निर्यूहं संयुक्तं मधुसर्पिषा॥ कल्कैर्मदनमुस्तानां पिप्पली मधुकस्य च॥ वत्सक
स्य च संयुक्तं बस्तिं दद्याज्वरापहं॥ शुध्येमार्गे कृते दोषे स्रुप्रसन्नेषु धातुषु॥ गतांगशूलो लध्वंगः सद्यो भ
वति विज्वरः॥ आरग्वधः शीराणि मदनस्य फलानि च॥ परार्पश्चतस्रो मधुकं निर्यूहमुपकल्पयेत्॥ प्रियं
गु मदनं मुस्तं मधुकं शाशलाह्वय कल्क सर्पि गुडक्षौद्रं ज्वरघ्नो बस्ति रुत्तमः॥ गुडूचीं त्रायमाणां च चंदनं म
धुकं वृषं॥ स्थिरां बलां प्रश्निपर्णी मदनं चेति साधयेत्॥ रसं जांगलमांसस्य रसेन सहितं भिषक्॥ पिप्पलि
फलमुस्तानां कल्केन मधुकस्य च॥ इषत्सलवणां युक्त्वा निरूहं मधुसर्पिषा॥ ज्वरप्रशमनं दद्याद्बलस्वेद
रुचिप्रदं॥ जीवंति मधुकं मेदां पिप्पलिं मरिचं वचां॥ ऋधिं रास्नां बलां बिल्वं शतपुष्पां शतावरीं॥ पिष्ट्वा क्षी
रं जलं सर्पिस्तैलं च विपचेद्भिषक्॥ अनुवासिनिकं स्नेहमेतद्याज्वरापहं॥ पटोलपिचुमंदाभ्यां गुडूच्यां
मधुकेन वा॥ मदनैश्च स्रुतः स्नेहो ज्वरघ्नमनुवासनं॥ चंदनागरुकाश्मर्यपटोलमदनोत्पलैः॥ सिद्धः स्ने
हो ज्वरहरः स्नेहबस्तिः प्रशस्यते॥ यदुक्तं भेषजाध्याये विमाने रोगभेषजं॥ शिरोविरेचनं कुर्यात्यु
क्तिमत्तज्वरापहं॥ यच्च नावनिकं तैलं धूममप्यश्च या पुरा॥ मात्राशितीये निर्दिष्टाः प्रयोज्यास्ताज्व

रेष्वपि॥ अभ्यंगांश्च प्रदेहांश्च परिषेकांश्च कारयेत्॥ यथाभिलाषं शीतोष्णं विभज्य द्विविधं ज्वरं॥ सहस्र
धौतं सर्पिर्वा तैलं वा चंदनान्वितं॥ दाहज्वरप्रशमनं दद्यादभ्यंजनं भिषगिति॥ अथ चंदनाद्यं तैलमुपदेक्ष्यामः॥
चंदनभद्रश्रिकाकालानुसार्यकालीयकपद्मापद्मकोशीरसारिवामधुकप्रपौंडरीकनागपुष्पोदीच्यधान्यो
त्पलनलिनकुमुदसौगंधिकपुंडरीकशतपत्रविसमृणालशालूकसेवालकसेरुकानंतकुशकासेक्षुसा
रनरशालिमूलफलजंबूवेत्रवेतसवानीरगुंद्राककुभासनाश्वकर्णस्यंदनातपोथशालतालधवतिनिस
खदिरकदरकदंबकाश्मर्यसर्जप्लक्षवटकपीतनोदुंबराश्वत्थन्यग्रोधरोध्रधातुकीदूर्वोत्कटशृंगाटक
मंजिष्ठाज्योतिष्मतीपुष्करबीजक्रौंचादनबदरीकोविदारयाकदलीसंवर्तकारिष्टतिष्मतपर्णशीतकुंभी
काशतावरीश्रीपुणीश्रावणीशालिपर्ण्योदनपाकीकालांबलांपयस्याविदारीजीवकर्षभकमेदामहामेदा
मधुरसर्ष्यप्रोक्तातृणशून्यमोचरसाटरूषकबकुलकुटजपटोलनिंबशाल्मलीनालिकेरखर्जूरमृ
द्वीकाप्रियालप्रियंगुधन्वनात्मगुप्तामधुकानामन्येषां च शीतवीर्याणं यथालाभमौषधानां कषायं कारयेत्॥
तेन कषायेण द्विगुणितपयसा तेषामेव च कल्केन कषायार्द्धमात्रं सर्पिर्नासाधयेत्॥ तैलमभ्यंगादेव सद्यो
दाहमपज्वरमयस्येतोरेयौषधैः स्रुश्लक्ष्णपिष्टैः स्रुशीतलैः प्रदेहं कारयेत्॥ एतैरेव च॥ स्रुतशीतं सलिल
मवगाहपरिषेकार्थं प्रयुंजीत॥ मधारनालक्षीरदधिघृतसलिलसेकावगाहाश्च सद्यो दाहज्वरमपनयंति॥

च·चि· ८

शीतस्पर्शाः स्युरिति॥ भवति चात्र पौष्करेषु पद्मोत्पलदलेषु च॥ कदलीनां च पत्रेषु क्षौमेषु विमलेषु च॥ चंद
नोदकशीतेषु दाहीस्वप्यात्स्वनरः॥ हिमांबुशीतशयने शीतेधारागृहेपि वा॥ हेमशंखप्रवालानां मणीनां मौ
क्तिकस्य च॥ चंदनोदकशीतानां संस्पर्शाननुरसाननुस्पृशेत्॥ स्रग्भिर्नीलोत्पलैः पद्मैर्व्यजनैर्विविधैरपि॥ शीत
वातवहैर्वीज्यश्चंदनोदकवर्षिभिः॥ नद्यस्तडागाः पद्मिन्यो ह्रदाश्च विमलोदकाः॥ अवगाहे हिता
दाहतृष्णाग्लानिज्वरापहाः॥ स्त्रियः प्रदक्षिणाचारा प्रमदाश्चंदनोक्षिताः॥ सांत्वयेनोदः परैः कामैः मणिमौ
क्तिकभूषिताः॥ शीतानि चान्नपानानि शीतान्युपवनानि च॥ वायवश्चंद्रपादाश्च शीतदाहज्वरापहाः॥ अथो
ष्णाभिप्रायाणां ज्वरिणामभ्यंगादीनुपक्रमाननुव्याख्यास्यामः॥ तद्यथा॥ अगरुकुष्ठतगरपत्रनलदशैलेय
कध्यामकरेणुकस्थौणेयकक्षौमकैर्वं एगदलपुरतमालपत्रभूतिकरोहिषसरलशल्लकीदेवदार्वग्निमंथ
बिल्वशोनाकपाटलाकाश्मर्यपुनर्नवावृश्चीवकंटकारिकाबृहतीशालिपर्णीमुद्गपर्णीगोक्षुररेणुकंशोभां
जनकवरुणार्कचिरिबिल्वकरीपुष्करमूलमंडीरोहवृकपत्तूरक्षीरवाश्मंतकशिग्रुमातुलिंगमूलपर्णीति
लपर्णीपीलुपर्णीमेषशृंगीहिंस्रादंतशठैरावतकभल्लातकास्फोतकंडीरात्मजकैबीककरंजधाभ्यकाज
मोदपृथ्वीकासुमुखसुरसकुठेरककुंडीरकालमालकपर्णासक्षवकफणिज्जकभृंगबेरपिप्पलीसर्षपा
श्वगंधारास्नारुहारोहावचा॥ बलातिबलागुडूचीशतपुष्पाशीतपर्णानाकुलीगंधनाकुलीश्वेताज्योतिष्मती
चित्रकाध्यंडाम्लचांगेरीबदरकुलत्थमाषाणामन्येषांचोष्णवीर्याणां यथालाभमौषधानां कषायं कारयेत्॥

तेन कषायेणा तेषामेव च कल्केन सुरासौवीरकतुषोदकमैरेयमेदकदधिमंडारनालकट्वरप्रति वि
नीतेन तैलपात्रं पाचयेत्॥ तेन सुखोष्णेन तैलेनोष्णाभिप्रायं ज्वरितमभ्यंज्यात्तथा शीतज्वरप्रशाम्यत्येतै
रौषधैः श्लक्ष्णपिष्टैः सुखोष्णैः प्रदेहं कारयेदेषामेव च सुखोष्णमुत्क्वाथमवगाहनपरिषेकार्थं प्रयुंजीत शी
तज्वरप्रशमायेति॥ भवति चात्र॥ त्रयोदशविधः स्वेदः स्वेदाध्याये निदर्शितः॥ मात्राकालविदा युक्तः स च शी
तज्वरापहः॥ साकुशीतकाशयं चांतर्वत्सादनं ज्वरं॥ शीतं प्रशमयंत्याशु धूपाश्चागरुजा घनाः॥ चारुपत्तिनगा अ
श्वतरुण्यो यौवनोष्मणा॥ आश्लेषाच्छमयंत्याशु प्रमदा शिशिरं ज्वरं॥ स्वेदनान्यत्रपानानि वातश्लेष्महराणि च
शीतज्वरं जयंत्याशु प्रमदा शिशिरज्वरं॥ स्वेदनान्ययोयानानि वातश्लेष्महराणि च॥ शीतज्वरं तत्पंत्याशु सं
सर्गबलनजनात्॥ वातजे श्रमजे चैव पुराणे क्षतजे ज्वरे॥ लंघनं तन्न पानं वा प्रभूतं पुनरुल्लिखेत्॥ सान्नं
प्रभूतं मद्यं वा पीत्वा स्वप्याद्धोमरा॥ आस्थापनं यापनं वा कारयेद्विषमज्वरे॥ पयसा रक्तदंशस्य शाक
ह्लादहः पिबेत्॥ रुषस्य दधिमंडेन सुरया वा ससैंधवं॥ पिप्पल्या त्रिफलायाश्च दध्नस्तक्रस्य सर्पिषः॥
पंचगव्यस्य पयसः प्रयोगो विषमज्वरे॥ लशुनस्य सतैलस्य प्राग्भक्तमुपसेवनं॥ मेध्यानामुष्णवीर्याणा
मामिषाणां च भक्षणं॥ व्याघ्रीं च वा हिंगुसमानस्तः महितं विपात्क्षस नैस्तानुपाचरेत्॥ विक्षिप्यमाणयो
ष्माणां यस्मात् गत्वार संततं॥ ज्वरं कुर्वंति दोषास्तु हीयतेग्निबलं ततः॥ पक्तिस्थानात्तथा दोषैरुक्ष्मा
क्षितो हिर्नर्णां॥ नपत्तसभ्यपत्तं कष्टा स च निवा लघु॥ अतोग्निबलरक्षार्थं लंघनादिः क्रमो हितः॥

च॰चि॰ सप्ताहेन हि पच्यन्ते सप्तधातुगता मलाः॥ निरामश्चाप्यतः प्रोक्तो ज्वरः प्रायोऽष्टमेऽहनि॥ उदीर्णदोषस्तत्याग्नि
रश्यन्गुरुर्विशेषतः॥ मुच्यते सहसा प्राणैश्चिरं क्लिश्यति वा नरः॥ एतस्मात्कारणाद्धिहान्वानिकेप्याहितो ज्वरे
नातिकुर्वति वा स्निग्धं भोजयेत्सह सानलं॥ ज्वरे माहतृज्जे स्वादावनपेक्ष्यापि हि क्रमं॥ कुर्यात्तिरनुबंधाना मभ्यं
गादीनुपक्रमान्॥ पाययित्वा कषायं च भोजयेद्रसभोजनं॥ जीर्णज्वरहरं कुर्यात्सर्वशश्चाप्युपक्रमं॥ श्लेष्म श्रा
नामवातानां ज्वरो नुष्णे कफाधिकः॥ परिपाकं न सप्ताहे नापि याति मृदूष्मणां॥ तं क्रमेण यथोक्तेन लंघनाद्याशा
नादिना॥ आद्यशाहमुपक्रम्य कषायापैरुपाचरेत्॥ सामावेयेच्च कफजाः कफपित्तज्वराश्च ये॥ लंघनं लंघनीयो
क्तं तेषु कार्यं प्रतिप्रति॥ वमनैश्च विरेकैश्च बस्तिभिश्च यथाक्रमं॥ ज्वरानुपाचरेत्धीमान् कफपित्तानिलोद्भवा
न्॥ संसृष्टान्संनिपतितान्बुध्वा तरतमैः समैः॥ ज्वरान्दोषक्रमापेक्षी यथोक्तैरौषधैर्जयेत् वर्धनेनैकदो
षस्य क्षपणेनोच्छ्रितस्य वा॥ कफस्थानानुपूर्व्या वा संनिपातज्वरं जयेत्॥ सन्निपातज्वरस्यांते कर्णमूले सुदा
रुणः॥ शोफः संजायते येन कश्चिदेव प्रमुच्यते॥ रक्तावसेचनैः शीघ्रं सर्पिःपानैश्च तं जयेत् प्रदेहैः कफ
पित्तघ्नैः नावनैः कवलग्रहैः॥ शीतोष्णस्निग्धरूक्षाद्यैर्ज्वरो यस्य न शाम्यति॥ शाखानुसारी रक्तस्य सो
ऽवसेकात्प्रशाम्यति॥ विसर्पेणाभिघातेन पश्च विस्फोटके ज्वरः॥ तत्रादौ सर्पिषः पानं कफपित्तोत्तरो न
चेत्॥ दौर्बल्याद्देहधातूनां ज्वरो जीर्णोनुवर्तते॥ बल्यैस्तं बृंहणैस्तस्मादाहारैस्तमुपाचरेत्॥ कर्मसाधा
रणे जह्यात्तृतीयक चतुर्थकैः॥ आगंतुरनुबंधो हि प्रायशो विषमज्वरे॥ वातप्रधानं सर्पिर्भिर्बस्तिभिस्सा

नुवासनैः॥ स्निग्धोष्णैरनुपानैश्च शमयेद्विषमज्वरं॥ विरेचनेन पयसा सर्पिषा संस्कृतेन च॥ विषमं तिक्तशी
तैश्च ज्वरं पित्तोत्तरं जयेत्॥ वमनं पाचनं रुक्षमनुपानं विलंघनं॥ कषायोष्णं च विषमे ज्वरे शस्तं कफोत्तरे॥ योगाः परं
प्रवक्ष्यंते विषमज्वरनाशनाः॥ प्रयोक्तव्यामतिमता दोषादीन्प्रविभज्य ये॥ सुरा समंडपानार्थे भक्षार्थे चरणायुधाः
तित्तिरिश्च मयूरश्च प्रयोज्या विषमज्वरे॥ पिबेद्वा षट्पलं सर्पिः रभयां वा प्रयोजयेत्॥ त्रिफलायाः कषायं वा गुडू
च्या रसमेव वा॥ नीलिनीमजगंधां च त्रिवृतां कटुरोहिणीं॥ पिबेत्ज्वरागमे युक्त्या स्नेहस्वेदोपपादितः॥ सर्पिषो महँ
ती मात्रां पीत्वा वा छर्दयेत्पुनः उपयुज्यात्कार्यसः सैंधवः पुराणसर्पिः सिंहस्य वसा तद्वत् ससैंधवा सैंधवं पिप्पलीना
च तंडुलाः समनःशिलाः नेत्रांजनं तैलपिष्टं शस्यते विषमज्वरे पलंकषा निंबपत्रं वचा कुष्टं हरीतकी सर्षपाः सय
वाः सर्पिर्धूपनं ज्वरनाशनं येधूमा धूपनं यच्च नावनं चांजनं च यत् मनोविकारे निर्दिष्टं कार्यं तद्विषमज्वरे। मणी
नामौषधीनां च मंगल्यानां विषस्य च धारणादगदानां च सेवनात्प्रभवेज्ज्वरः सोमं सानुचरं देवं समातृगणमीश्वरं पूज
यन्प्रयतः शीघ्रं मुच्यते विषमज्वरात् विष्णुं सहस्रमूर्धानं चराचरपतिं विभुं स्तुवन्नामसहस्रेण ज्वरान् सर्वान्
पोहति ब्रह्माणमश्विनाविंद्रं हुतभक्षं हिमाचलं गंगां मरुद्गणान् श्रेष्ठान् पूजयन्जयति ज्वरान् भक्त्या मातुः पि
तुश्चापि गुरूणां पूजनेन च ब्रह्मचर्येण तपसा सत्येन नियमेन च जयहोमप्रदानेन वेदानां श्रवणेन च ज्वराद्वि
मुच्यते शीघ्रं साधूनां दर्शनेन च ज्वरे रसस्येव मनमुपवासं च कारयेत् त्वेक प्रदेहो रक्तस्थे तथा संशमना
नि च विरेचनं सोपवासं मांसमेदःस्थिते हितं अस्थिमज्जागते देया निरूहाः सानुवासनाः शापाभिचाराद्भूता
नामभिषंगाच्च यो ज्वरः दैवव्यपाश्रयं तत्र सर्वमौषधमिष्यते अभिघातज्वरो नश्येत्पानाभ्यंगेन सर्पिषः

रक्तावसेकैर्मधैश्च सात्म्यैर्मांसरसौदनैः॥स्नानाद्यैर्मघषात्म्यानां मदिरारसभोजनैः॥क्षतानां व्रणिनानां
च ज्ञात्वा व्रणचिकित्सिया तु॥आश्वासेनेष्टलाभेन वायोः प्रशमनेन च॥हर्षणैश्च शमं याति कामशोकभयज्वरः
दैवव्यपाश्रयं तत्र सर्वमौषधमिष्यते॥काम्यैरर्थैर्मनोज्ञैश्च पित्तघ्नैश्चाप्युपक्रमैः॥सद्वाक्यैश्च शमं याति ज्वरः क्रो
धसमुत्थितः॥कामात्क्रोधज्वरो नाशं क्रोधात्कामसमुद्भवः॥याति ताभ्यामुभाभ्यां च भयशोकसमुत्थितः॥
ज्वरकालं च वेगं च चिन्तयन् ज्वर्यते तु यः॥तस्येष्टैश्च विचित्रैश्च विषयैर्नाशयेत्स्मृतिं॥ज्वरप्रमोक्षे पुरुषः
कूजन् वमति चेष्टते॥श्वसन् विवर्णः स्विन्नाङ्गो वेपते लीयते मुहुः॥प्रलपत्युष्णसर्वाङ्गः शीताङ्गश्च भवत्य
पि॥विषमज्वरवेगार्तः सक्रोध इव वीक्ष्यते सदोषशब्दं च शकृद्द्रवं सृजति वेगवत् लिङ्गान्येतानि जानीयात्
ज्वरमोक्षे विचक्षणः बहुदोषस्य बलवान्प्रायेण्याभिनवो ज्वरः सक्रियादोषपक्वा वे द्विमुंचंति स दारुणं कृत्वा
दोषवशाद्वेगं क्रमादुपरमंति ते तेषां मदारुणो मोक्षो ज्वराणां चिरकारिणां ज्वरांते त्वर्यमाणश्च निद्रायायो
भिभूयते तस्य मूर्छापठं कर्म्म शीतवर्ज्यं प्रयोजयेत् विगतक्लमसंतापमव्यथं विमलेंद्रियं युक्तं प्रकृति
सत्वेन विंद्यात्पुरुषमज्वरं सज्वरो ज्वरमुक्तश्च विदाहीनि गुरूणि च असात्म्यान्यन्नपानानि विरुद्धानि विवर्जये
त् व्यवायमतिचेष्टां च स्नानमत्यासनानि च ज्वरः प्रशाम्यति तथा प्रशांतो जायते न च व्यायामं च व्यवायं
च स्नानं चंक्रमणानि च ज्वरमुक्तेन सेवेत यावन्न बलवान्भवेत् तस्यां तस्यावस्थायां ज्वरितानां विचक्ष
णः ज्वरक्रियाक्रमापेक्ष्याकुर्यात्तत्र चिकित्सितं रोगराट् सर्वभूतानां मंतकृद्दारुणो ज्वरः तस्माद्विशेषत १०
स्तस्य जयने प्रयामे भिषगिति भवति चात्र यथाक्रमं यथाप्रश्नमुक्तं ज्वरचिकित्सितं आत्रेयेणाग्नि

वेशाय भूतानां हितमिच्छता॥ ॥इतिश्रीचरकसंहितायां चिकित्सास्थाने ज्वरचिकित्सं नाम
प्रथमोध्यायः॥ ॥अथातो रक्तपित्तचिकित्सं व्याख्यास्यामः॥इति ह स्माह भगवानात्रेयः विहरंतं जि
तात्मानं पंचगंगे पुनर्वसुं॥प्रणम्योवाच विनिर्मोहमग्निवेशोऽग्निवर्चसं॥भगवन् रक्तपित्तस्य हेतुरुक्तः स
लक्षणः॥वक्तव्यं यत्परं तस्य वक्तुमर्हसि तद्गुरो॥गुरुरुवाच॥महागदं महावेगमग्निवच्छीघ्रकारि च॥हेतुलक्ष
णविच्छीघ्रं रक्तपित्तमुपाचरेत्॥तस्योष्णं तीक्ष्णमम्लं च कटूनि लवणानि च॥धर्मश्चान्नविदाहश्च हेतुः पूर्वं नि
दर्शितः॥तैर्हेतुभिः समुत्क्लिष्टं पित्तं रक्तं प्रपद्यते॥तद्योनित्वात्प्रपन्नं च वर्द्धते तत्प्रवर्त्तयन्॥तस्योष्मणा द्र
वो धातुर्धातोर्धातोः प्रसिच्यति॥स्विद्यतस्तेन संवृद्धिं भूयस्तदधिगच्छति॥संयोगाद्दूषणात्तत्तु सामान्याद्गन्ध
वर्णयोः॥रक्तपित्तस्य माख्यातं रक्तपित्तं मनीषिभिः॥प्लीहानं च यकृच्चैव तदधिष्ठाय वर्द्धते॥स्रोतांसि रक्त
वाहीनि तन्मूलानि हि देहिनां॥सांद्रं सपांडु सस्नेहं पिच्छिलं च कफान्वितं॥श्यावारुणं सफेनं च तनु रूक्षं च वा
तिकं रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभं॥मेचकागारधूमाभमंजनाभं च पैत्तिकं॥संसृष्टलिंगं संसर्गा
त्रिलिंगं सान्निपातिकं॥एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते॥यत्त्रिदोषमसाध्यं तन्मंदाग्नेरतिवेगवत्॥व्या
धिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत्॥गतिरूर्ध्वमधश्चैव रक्तपित्तस्य दर्शिता॥ऊर्ध्वा सप्तविधद्वारा द्विद्वा
रा त्वधरा गतिः॥सप्तच्छिद्राणि शिरसि द्वे चाधः साध्यमूर्ध्वगं॥याप्यं त्वधोगमं गैर्ह्यावसाध्यं प्रपद्यते॥यदा तु स
र्वैश्छिद्रैर्भ्यो रोमकूपेभ्य एव च॥वर्त्तते तामसंख्येयां गतिं तस्याहुरांतिकीं॥यच्चोभयाभ्यां मार्गाभ्यामतिमात्रं प्रव

DR. BHAU DAJI MEMORIAL

र्तते॥ पुत्यं कुणपगंधेन रक्तं कृष्णमतीव च॥ संयुक्तं कफवाताभ्यां यद्रक्तं तेष्व सज्जते॥ यच्चाप्युपद्रवैः
सर्वैः यथोक्तैः समभिद्रुतं॥ वर्णैर्हरितहारिद्रनीलतायैरुपद्रुतं॥ क्षीणास्य कासिनो यद्वा वर्त्तते तच्च सि
ध्यति॥ यद्द्विदोषानुगं यद्वा शांतं शांतं प्रकुप्यति॥ मार्गान्मार्गं चरेद्यद्वा याप्यं पित्तमसृक्च यत्॥ एकमार्गं
बलवतो नातिवेगं नवोत्थितं॥ रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवं॥ स्निग्धोऽष्ममुष्णरूक्षं च रक्तपि
त्तस्य कारणं॥ अधोगा स्योत्तरं प्रायः पूर्वं स्यादूर्ध्वगस्य तु॥ ऊर्ध्वगं कफसंसृष्टमधोगं मारुतानुगं॥ द्विमार्गं
कफवाताभ्यामुभाभ्यामनुबध्यते॥ अक्षीणबलमांसस्य रक्तपित्तं यदश्नतः॥ तद्दोषदुष्टमुत्क्लिष्टमादौ स्तं
मनमर्हति॥ गलग्रहं पूतिनस्यं मूर्छायमरुचिं ज्वरं॥ गुल्मं प्लीहानमानाहं किलासं कृच्छ्रमूत्रतां॥ कुष्ठा
न्यर्शांसि वीसर्पं वर्णनाशं भगंदरं॥ बुद्धींद्रियोपरोधं च कुर्यात्स्तंभितमादितः॥ तस्मादुपेक्ष्यमच्छिन्नं बल
दोषैः प्रपश्यते॥ प्रायेण हि समुत्क्लिष्टमामदोषाच्छरीरिणां॥ वृद्धिं प्रयाति पित्तासृक्तस्मात्तं लंघ्यमादितः
रक्तपित्तस्य प्रथमतः प्रवृत्तं सिद्धिमिच्छता॥ मार्गदोषानुबंधं च निदानं प्रसमीक्ष्य च॥ लंघनं रक्तपित्तादौ
तर्पणं वा प्रयोजयेत्॥ ह्रीवेरचंदनोशीरमुस्तपर्पटकैः शृतं॥ केवलं शृतशीतं वा तोयं दद्यात्पिपासवे
ऊर्ध्वगे तर्पणं पूर्वं पेयां पूर्वमधोगमे॥ कालसात्म्यानुबंधज्ञो दद्यात्प्रकृतिकल्पवित्॥ जलं खर्जूरमृद्वी
कामधुकैः सपरूषकैः॥ शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करं॥ तर्पणं सघृतः क्षौद्रं लाजचूर्णं प्रदा
पयेत्॥ ऊर्ध्वगं रक्तपित्तं तत्पीतं काले व्यपोहति॥ मंदाग्नयेऽम्लसात्म्याय नतसाम्लमिति कल्पयेत्॥

दाडिमामलकैर्विद्वानम्लार्थं च प्रदापयेत्॥ शालिषष्टिकनीवारकोरदूषप्रसातिकाः॥ श्यामाकाश्च प्रियंगुश्च
भोजनं रक्तपित्तिनां॥ मसूरमुद्गचणकाः समकुष्टकीफलाः॥ प्रशस्ताः सूपयूषार्थं कल्पिता रक्तपित्तिनां॥ पटोल
निंबवेत्राग्रप्लक्षवेतसपल्लवाः॥ किराततिक्तकं शाकं कांडीरः सकठिल्लकः॥ कोविदारस्य पुष्पाणि काश्म
र्यस्याथ शाल्मलेः॥ नवविधौ शाकं कंडीरः सकठिल्लकः॥ कोविदारस्य पुष्पाणि काश्मर्यस्याथ शाल्मलेः
अन्नपानविधौ शाकं यच्चान्यद्रक्तपित्तनुत्॥ शाकार्थं शाकसात्म्यानां तत्स्तं रक्तपित्तिनां॥ स्विन्नं वा सर्पि
षाभ्रष्टं यूषवद्वा विपाचितं॥ पारावतान्कपोतांश्च लावरक्ताक्षवर्त्मिकान्॥ शशानकपिंजलानेणान् हरिणान्
कालपुच्छकान्॥ रक्तपित्ते हितान्विद्याद्रसांस्तेषां प्रयोजयेत्॥ ईषदम्लाननम्लान्वा घृतभ्रष्टान् सशर्करा
न्॥ कफानुगे यूषशाकं दद्याद्वातानुगे रसां॥ रक्तपित्ते यवागूनामतः कल्पं प्रवक्ष्यते॥ पद्मोत्पलानां किंजल्कं
पृश्निपर्णी प्रियंगुका॥ जले साध्या रसे तस्मिन्पेया स्याद्रक्तपित्तिनां॥ चंदनोशीरलोध्राणां रसे तद्वत्सनागरे
किराततिक्तकोशीरमुस्तानां तद्वदेव च॥ धातकीधन्वयासांबुबिल्वानां वा रसे शृतां॥ मसूरपृश्निपर्ण्योर्वा स्थि
रामुद्गरसे ऽथवा॥ हरेहरेणुकानां वा सघृते त्रिफलारसे॥ सिद्धाः पारावतादीनां रसे वा स्युः पृथक्पृथक्॥ इत्य
क्ता रक्तपित्तघ्नाः शीतास्समधुशर्कराः॥ यवाग्वः कल्पनाश्चैषां कार्या मांसरसेष्वपि॥ शशः सवास्तुकः शस्तो निं
बधे रक्तपित्तिनां॥ वाते ल्वणो तित्तिरिः स्यादुदुंबररसे शृतः॥ मयूरः प्लक्षनिर्यूहे न्यग्रोधस्य च कुक्कुटः॥ रसे बिसो
त्पलादीनां वर्त्तकः क्रकरो हितौ॥ तृष्यते तिक्तकैः सिद्धं तृष्णाघ्नं काकोफादन॥ सिद्धं विदारिगंधाद्यैरथवा
शृतशीतलं॥ ज्ञात्वा दोषावनुबलौ नलमाहारमेव च॥ जलं पिपासवे दद्याद्विसर्गादल्पशोऽथवा॥ निद्रानं

रक्तपित्तस्य यत्किंचित्सं प्रकाशितं ॥ जीवितारोग्यकामैस्तन्नसेवं रक्तपित्तिभिः ॥ इत्यन्नपानं निर्दिष्टं क्रम
शो रक्तपित्तनुत् ॥ वक्ष्यते बहुदोषाणां कार्यं बलवतां च यत् ॥ अक्षीणबलमांसस्य यस्य संतर्पणोच्छ्रितं ॥ बहु
दोषं बलवतो रक्तपित्तं शरीरिणः ॥ काले संशोधनार्हस्य तद्धरेन्निरुपद्रवं ॥ विरेचनेनोर्ध्वभाग मधोगं वमनेन तु
तत्र त्रिवृदभया धान्यफलान्यारग्वधस्त्रायमाणा गवाक्ष्योर्वा मूलमामलकानि वा ॥ विरेचनं प्रयुंजीत प्रभूतम
धुशर्करं ॥ रसः प्रशस्यते तेषां रक्तपित्ते विशेषतः ॥ वमनं मदनोन्मिश्रं मंथः सक्षौद्रशर्करं ॥ सशर्करं वा स लिल
मिक्षूणं रसमेव च ॥ वत्सकस्य फलं मुस्तं मदनं मधुकं मधु ॥ अधोवहे रक्तपित्ते वमनं परमुच्यते ॥ ऊर्ध्वगे शुध्य
कोष्टस्य तर्पणादिक्रमो हितः ॥ अधोगमे यवाग्वादिन चेत्स्यान्मारुतो बली ॥ बलमांसपरिक्षीणं शोकभाराध्वक
र्शितं ॥ ज्वलनादित्यसंतप्तमन्यैर्वा क्षीणमामयैः ॥ गर्भिणीं स्थविरं बालं रूक्षाल्पप्रमिताशनं ॥ अवम्यमविरेच्यं
वा यं पश्येद्रक्तपित्तिनं ॥ शोषेण सानुबंधो वा तस्य संशमनी क्रिया ॥ शस्यते रक्तपित्तस्य पुरे तु या प्रवक्ष्यते
आटरूषकमृद्वीकापथ्याक्काथः सशर्करः ॥ मधुमिश्रः श्वासकासरक्तपित्तनिबर्हणः ॥ आटरूषकनिर्यूहे प्रि
यंगुं मृत्तिकांजने विनीय लोध्रं क्षौद्रं च रक्तपित्तहरं पिबेत् ॥ पद्मकं पद्मकिंजल्कं दूर्वा वास्तकमुत्पलं ॥ नाग
पुष्पं च रोध्रं च तेनैव विधिना पिबेत् ॥ प्रपौंडरीकं मधुकं मधु चाश्वशकृद्रसे ॥ यवासभृंगरजसो मूत्रं वा गोश
कृद्रसे ॥ विलीय रक्तपित्तघ्नं पेयं स्यात्तंडुलांबुना ॥ पेयं स्यात्तंडुलांबुना युक्तं वा मधुसर्पिभ्यां लिह्याद्वाश्वश १२
कृद्रसं खदिरस्य प्रियंगूणां कोविदारस्य शाल्मलेः ॥ पृथक्चूर्णानि मधुना लिह्यात्पुष्पाणि रक्तपित्तनुत् ॥ शृंगाटकानां
लाजानां मुस्तखर्जूरयोरपि ॥ लिह्याच्चूर्णानि मधुना पद्मानां केसरस्य च ॥ रक्ते लिह्याद्वल्कजानां मधुना मृग

पक्षिणां ॥ सक्षौद्रं ग्रथिते रक्ते लिह्यात्पारावतं शकृत् ॥ उशीरकालीयकरोध्रपद्मकाः प्रियंगुकाकट्फलशंख
गैरिकाः ॥ पृथक्पृथक्चंदनतुल्यभागिकाः सशर्करास्तंडुलधावनप्लुताः ॥ रक्तं सपित्तं नमकं पिपासां दाहं च
पांति रामपतिसयः ॥ किरातनिक्तकमुकः समुस्तः प्रपौंडरीकं कमलोत्पलं च ॥ ह्रीबेरमूलानि पटोलपत्रं दुरालभा
भापर्प्पटकं मृणालं ॥ धनंजयोदुंबरचेतसत्वग्न्यग्रोधजं क्षुद्रहयमारकत्वक् ॥ नुगाल नाकेसरनंडुलीयकं ससारि
वं मोचरसः समंगा ॥ पृथक्पृथक्चंदनयोजितानि तेनैव कल्पेन हिताय यत्र ॥ निशिस्थिता वा स्वरसीकृता वा कल्की
कृता मृदिता शृता वा ॥ एते समस्ता गणशः पृथग्वा रक्तं सपित्तं शमयंति योगाः ॥ मुद्गाः सलाजाः सयवाः सकृष्णाः
सोशीरमुस्ताः सह चंदनेन ॥ बलाजले पर्युषितः कषायः स रक्तपित्तं शमयत्युदीर्णं ॥ वैडूर्यमुक्तामणिगैरिकाणां मृ
च्छंकहेमामलकोदकानां ॥ मधुदकस्येक्षुरसस्य चैवं पानाच्छमं गच्छति रक्तपित्तं ॥ उशीरपद्मोत्पलचंदनानां
पक्वस्य लोष्टस्य च यः प्रसादः सशर्करः क्षौद्रयुतः सुशीतो रक्तातियोगप्रशमाय देयः ॥ प्रियंगुकाचंदनलोध्रसा
रिवामधूकमुस्ताभयधातकीजलं ॥ समृत्प्रसादं सह यष्टिकांबुना सशर्करं रक्तनिबर्हणं परं ॥ कषायवेगैर्विवि
धैर्यथोक्तैर्दीप्तेन ले श्लेष्मणि निर्जिते वा यद्रक्तपित्तं प्रशमं न याति ॥ तत्रानिलः स्यादनु तत्र कार्यं छागं पयः स्यात्परमं
प्रयोगो गव्यं शृतं पंचगुणे जले वा ॥ सशर्करं माक्षिकसंप्रयुक्तं विदारिगंधादिगणे शृतं वा ॥ द्राक्षाशृतं नागरकेशृतं
वा बलाशृतं गोक्षुरकेशृतं वा ॥ सजीवकं सर्षभकं ससर्पिः पयः प्रयोज्यं सितया सवत्सदाशतावरीगोक्षुरकेः शृ
तं वा शृतं पयो वाप्यथ पर्णिनाभिः ॥ रक्तं निहंत्याशु विशेषतस्तु यन्मूत्रमार्गात्सहजं प्रयाति ॥ विशेषतो विप्रथ

मम रक्ते पयो हितं मोचरसेन सिद्धं ॥ वटावरोहैर्वटशृंगकैर्वा ह्रीवेरनीलोत्पलनागरैर्वा ॥ कषाययोगास्तय
सा पुराणा पीत्वानुपायात्पयसानुशालीन् ॥ कषाययोगैरथवा विपक्वमेतैः पिबेत्सर्प्पिरतिस्रवेद्या ॥ आसां सशा
खां सफलां समूलां कृत्वा कषायं कुसुमानि चास्याः ॥ प्रदाय कल्कं विपचेद्घृतं तत्सक्षौद्रमाश्वेव निहंति रक्तं ॥ पलाश
वल्कस्वरसेन सिद्धं ॥ वटावरोहैर्वटशृंगकैर्वा ह्रीवेरनीलोत्पलनागरैर्वा ॥ कषाययोगास्तयसा पुराणा पीत्वानुपाय
त्पयसानुशालीन् ॥ कतस्येव कल्केन मधुद्रवेणान लिह्याद्घृतं वत्सककल्कसिद्धं ॥ तद्वत्समंगोत्पललोध्रसिद्धं त्रा
यमाणाविधिरेषएव ॥ सोदुंबरेत्वैवपटोलपत्रे सर्प्पिषि पित्तज्वरनाशनःनि ॥ सर्वाणि शस्तानि च रक्तपित्ते
अभ्यंगयोगाः परिषेचनानि ॥ सेकावगाहाः शयनानि वेश्म ॥ शीतो विधिर्बस्ति विधानमग्र्यं पित्तज्वरे यत्प्रशमा
यरष्टं ॥ तद्रक्तपित्ते निखिलेन कार्यं कालं च मात्रां च पुरः समीक्ष्य ॥ सर्प्पिर्गुडा ये विहिताः क्षतानां ते रक्तपित्तं श
मयंति सद्यः ॥ कफानुबंधे रुधिरे सपित्ते कंठागमे स्यात्प्रथितः प्रयोगः ॥ युक्तस्य युक्त्या मधुसर्प्पिषोश्च क्षारस्य
चैवोत्पलकेसराणां ॥ मृणालपद्मोत्पलकेसराणां तथा पलाशस्य तथा प्रियंगोः ॥ तथा मधूकस्य तथासनस्य
क्षारः प्रयोज्याविधिनैवतेन ॥ शतावरीदाडिमतिंतिडीकं ॥ काकोलमेदे मधुकं विदारी पिष्ट्वा च मूलं फलपू
रकस्य ॥ घृतं पचेत्क्षीरचतुर्गुणज्ञः कासज्वरानाहविबंधशूलं तद्रक्तपित्तं च घृतं निहन्यात् ॥ फलैश्च मूलैर
थपंचभिर्वा सिद्धं घृतं तच्च तदर्थकारि ॥ कषाययोगा य इहोपदिष्टास्ते चावपीडे भिषजा प्रयोज्याः ॥ घ्राणा
त्प्रवृत्तं रुधिरं सपित्तं ॥ यदा भवेन्निःश्रुतदुष्टदोषं ॥ रक्तेप्रदुष्टेप्यवपीडबंधे दुष्टप्रतिश्यायशिरोविकाराः

रक्तस्य दृष्टं कुणपस्य गंधः स्याद्घ्राणनाशः कृमयस्य दुःस्थाः ॥ नीलोत्पलं गैरिकशंखयुक्तं सचंदनं स्याच्च
सिताजलेन ॥ नस्यं तथाम्रास्थिरसः समंगा सधातकीमोचरसः सरोध्रः ॥ द्राक्षारसस्येक्षुरसस्य नस्यं
क्षीरस्य दूर्वास्वरसस्य चैव ॥ यथा समूलानि पलंडुमूलं न तथा दाडिमपुष्पतोयं ॥ प्रियालतैलं मधुकंप
यश्च सिद्धं घृतं माहिषमाजकं वा ॥ आम्रास्थिपूर्वैः पयसान्वनस्यं ससारिवैः स्यात्कमलोत्पलैश्च ॥ भद्र
श्रियं लोहितचंदनं च ॥ प्रपौंडरीकं कमलोत्पलं च ॥ उशीरवानीरजटामृणालं सहस्रवीर्यं मधुकं पयस्या
शालीयमूलानि यवासगुंद्रामूलं नलानां कुशकासयोश्च ॥ सचंदनं शैवलमप्यनंता कालानुसार्यं तणतुल्ममृद्धिः ॥ मू
लानि पुष्पाणि च वारिजानां लेपोथमत्स्यक्षकरणी भवश्च ॥ उदुंबराश्वत्थमधूकलोध्राः कषायवृक्षाः सशिराश्च सर्वे प्रदे
हकल्ले परिषेचने च ॥ तथावगाहे घृततैलशीतैः रक्तस्य पित्तस्य च शांतिमिच्छन् ॥ भद्रश्रियोर्दाभिमिषक्प्रद्य
त् ॥ धारागृहं भूमिगृहं च शीतं वनं च रम्यं जलवातवत्तु ॥ शीतं च वैडूर्यमुक्तामणिभाजनानां ॥ स्पर्शाश्च दारे शिशिरांबुशीताः
पद्मानि पुष्पाणि च वारिजानां क्षौमं च शीतं कदलीदलाश्च प्रच्छादनार्थं शयनासनार्थं ॥ पद्मोत्पलानां च कलापवाताः
सरिद्ध्रदानां हिदलाः प्रशस्ताः वहद्दरीणां चंद्रोदयानां कमलाकराणां ॥ पद्मोत्पलानां च दलाः प्रशस्ताः प्रियंगुकाचंदन
भूषितानां ॥ स्पर्शाः प्रियाणां च वरांगनानां ॥ दाहे प्रशस्ताः जलदाः सशीताः ॥ पद्मोत्पलानां च कलापवाताः मनोनुकूलाः
शिशिराश्च सर्वाः ॥ कथं सरक्तं शमयंति पित्तमिति ॥ भवति चात्र हेतुं वृद्धिं संज्ञां स्थानं लिंगं पृथक् पृथक् प्रदुष्टस्य
मार्गौ साध्यमसाध्यं याप्यं कार्यक्रमं चैव पानान्नमिष्टमेव च ॥ वर्ज्यं संशोधनं च संशमनं गुरुरुक्तवान् यथावत्त्रिवि

त्सितेरक्तपित्तस्य॥ इतिश्रीचरकसंहितायांचिकित्सितस्थानेरक्तपित्तचिकित्सितंनाम द्वितीयोऽध्यायः ॥ ॥
अथातोगुल्मचिकित्सितंव्याख्यास्यामः॥ इतिह सर्वप्रजानांपितृवच्छरण्यः॥पुनर्वसुर्भूतभविष्यदीशः चिकि
त्सितंगुल्मनिबर्हणार्थंप्रोवाचसिद्धंयदतोवरिष्ठः॥ विट्श्लेष्मपित्तातिपरिस्रवाद्वातैरेववृद्धैरतिपीडनाद्वावेगैरुदी
र्णैर्विहितैरधोवावाह्याभिघातैरतिघट्टणैर्वारूक्षान्नपानैरतिपीडितैर्वाशोकेनमिथ्याप्रतिकर्म्मणावा॥ विचेष्टितै
र्वाविषमातिमात्रैःकोष्ठेप्रकोपंसमुपैतिवायुः॥कफंचपित्तंचसदुष्टवायुरुद्धूयमार्गान्विनिबध्यताभ्यां॥हृन्नाभिपार्श्वो
दरबस्तिशूलंकरोत्यधोयातिनबद्धमार्गः॥सस्वाशयेप्यस्तिकफाशयेवास्थितःस्वतंत्रःपरसंश्रयोवा॥स्पर्शोपलभ्यःप
रिपीडनत्वाद्गुल्मोयथादोषमुपैतिनाम॥बस्तौहिनाभ्यांहृदिपार्श्वयोर्वास्थानानिगुल्मस्यभवंतिपंच॥ पंचात्मकस्य
प्रभवंतुतस्यवक्ष्यामिलिंगानिचिकित्सितंच॥ रूक्षान्नपानंविषमातिमात्रंविचेष्टितंवेगविनिग्रहश्च॥शोको
ऽभिघातोऽतियलक्षयश्चनिरन्नताचानिलगुल्महेतुः॥ यःस्थानसंस्थानरुजाविकल्पंविड्वातसंगलवक्त्र
दोषं॥ श्यावारुणत्वंशिशिरज्वरंचहृत्कुक्षिपार्श्वांसशिरोरुजंच॥ करोतिजीर्णेऽभ्यधिकंप्रकोपंभुक्तेमृदुत्वं
समुपैतियश्च॥वातात्सगुल्मोनचतत्ररूक्षंकषायतिक्तंकटुचोपसेवेत्॥कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधा
र्कमद्यातिहुताशसेवा॥आमाभिघातोरुधिरंचदुष्टंपैत्तस्यगुल्मस्यनिमित्तमुक्तं॥ज्वरःपिपासावदनांगरागः
शूलंमहज्जीर्यतिभोजनेचस्वेदोविदाहोव्रणवच्चगुल्मः॥स्पर्शासहःपैत्तिकगुल्मरूपंशीतंगुरुस्निग्धमचेष्टनंच
संपूरणंप्रस्वपनंदिवाचगुल्मस्यहेतुःकफसंभवस्य॥ सर्वत्रदृष्टोनिचयात्मकस्यस्तैमित्यशीतज्वरसादनानि १४
हृल्लासकासारुचिगौरवाणिशैत्यंरुगल्पाकठिनोन्नतत्वं॥गुल्मस्यरूपाणिकफात्मकस्यनिमित्तलिंगान्यु

पलस्यगुल्मे॥ द्विदोषजेदोषबलाबलंचव्यामिश्रलिंगानपरांस्तुगुल्मान्॥ स्त्रीनादिशेदोषधकल्पनार्थंमहा
रुजंदाहपरीतमश्मवद्घनोन्नतंशीघ्रविदाहिदारुणं मनःशरीराग्निबलापहारिणंत्रिदोषजंगुल्ममसाध्यमादि
शेत्॥ व्याकृतामनाहारतयाभयेनविरूक्षणैर्वेगविनिग्रहैश्च॥संस्तंभनोल्लेखनयोनिदोषैःगुल्मःस्त्रियो
रक्तभवोभ्युपैति॥ यःस्पंदतेपिंडितएवनांगैश्चिरात्सशूलःसमगर्भशूलः॥सरौधिरःस्त्रीभवएवगुल्मोमा
सेव्यतीतेदशमेचिकित्स्यः॥क्रियाक्रममतःसिद्धं गुल्मिनांगुल्मनाशनं॥प्रवक्ष्याम्यतऊर्ध्वंतुयोगान्गुल्म
निबर्हणान्॥रूक्षव्यपामजंगुल्मंवातिकंतीव्रवेदनं॥बद्धविरामारुतंस्नेहैरादितःसमुपाचरेत्॥भोजनाभ्यं
भजनैःपानैर्निरूहैःसानुवासनैः॥स्निग्धस्यभिषजास्वेदःकर्त्तव्योगुल्मशांतये॥स्रोतसांमार्द्दवंकृत्वाजित्वा
मारुतमुल्बणं॥भित्वाविबंधंस्निग्धस्यस्वेदोगुल्मंव्यपोहति॥ स्नेहपानंहितंगुल्मेविशेषेणोर्ध्वनाभिजे॥पक्वाश
यगतेबस्तिरुभयंजठराश्रये॥दीप्तेग्नौवातिकेगुल्मेविबंधेनिलवर्चसोः॥बृंहणान्यन्नपानानिस्निग्धोष्णानिप्रदा
पयेत्॥ पुनःपुनःस्नेहपानंनिरूहाःसानुवासनाः॥प्रयोज्यावातगुल्मेषुकफपित्तानुरक्षिणा॥कफेवातजितप्राये
पित्तंशोणितमेववा॥यदिकुप्यतिवातस्यक्रियमाणेचिकित्सिते॥ यथोल्बणस्यदोषस्यतत्रकार्यंभिषग्जितं॥आ
दावंतेचमध्येचमारुतंपरिरक्षितं॥ वातगुल्मेकफेवृद्धेहत्वाग्निमरुचिंयदि॥ हृल्लासंगौरवंतंद्रांजनयेदुल्लि
खेत्तुतं॥शूलनाहविबंधेषुवातगुल्मेकफोल्बणे॥वर्त्तिश्चूर्णानिगुटिकाःकफवातहराहिताः॥पित्तंवायदिसंसृष्टं
संतापंवातगुल्मिनः॥कुर्याद्विरेचस्यभवेत्सस्नेहैरनुलोमकैः॥गुल्मोयद्यनिलादीनांकृतेसम्यग्भिषग्जिते।नप्रशा
म्यतिरक्तस्यसंस्रावेणोपशाम्यति॥स्निग्धोष्णेनोदितेगुल्मेपैत्तिकेस्रंसनंहितं॥रूक्षोष्णेनतुसंभूतेसर्पिःप्रशमनंपरं

पित्तं वापित्तगुल्मवाञ्छाखा पक्वाशयस्थितं॥ कालविन्निर्हरेत्सद्यः सतिक्तैः क्षीरबस्तिभिः॥ पयसा वा सकृत्प्रोक्तेन सति
क्तेन विरेचयेत्॥ भिषगग्निबलापेक्षी सर्पिषा तैल्वकेन वा॥ तृष्णाज्वरपरीदाहशूलस्वेदाग्निमार्दवे। गुल्मिनामरुचौ वा
पि रक्तमेवावसेचयेत्॥ छिन्नमूला विदह्यंते न गुल्मा यान्ति च क्षयं। रक्तं हि व्यम्लतां याति तच्च नास्ति रुक्॥ यदि गुल्मो
विदह्येत शस्त्रं तत्र भिषग्जितं॥ गुरुः कठिनसंस्थानो गूढमांसोन्तराश्रयः॥ अविवर्णः स्थिरश्चैव ह्यपक्वस्तं दोषं परि
म्लानं जांगलैस्तर्पितं रसैः॥ समाश्वस्तं सदोषं तं सर्पिषा पुनराचरेत्॥ रक्तपित्तातिवृद्धत्वात्क्रियामनुपलभ्य वा गु
ल्म उच्यते॥ दाहशूलातिसंक्षोभस्वप्ननाशारतिज्वरैः॥ विदह्यमानं जानीयाद्गुल्मं तमुपनाहयेत्॥ विदाहलक्षण
त्वल्पबहिस्त्वंगे समुन्नते॥ श्यावे सरक्तपर्यन्ते संस्पर्शे बस्तिसन्निभे॥ निःपीडितोन्नते तत्पार्श्वे पीडनात्॥ तत्रैव पी
डिते स्थले संपक्वं गुल्ममादिशेत्॥ तत्र धान्वंतरीयाणामधिकारः क्रियाविधौ॥ वैद्यानां कृतयोग्यानां व्याधशोधनरो
पणे॥ अन्तर्मार्गस्य चाप्येतत्पच्यमानस्य लक्षणं॥ हृत्क्रोडशून्यतान्तःस्थे बहिःस्थे पार्श्वनिर्गतिः॥ पक्वः श्रोतांसि संक्लिद्य
स यात्यूर्ध्वमधोपि वा॥ स्वयंप्रवृत्तं तं दोषमुपेक्षेत हिताशनः॥ दशाहं द्वादशाहं वा रक्षन्भिषगु-पद्रवान्॥ अत ऊर्ध्वं
हितं पानं सर्पिषः सविशोधनं॥ शुद्धं सतिक्तं सक्षौद्रं प्रयोगे सर्पिरिष्यते॥ शीतलैर्गुरुभिः स्निग्धैः गुल्मे जाते कफा
त्मजे॥ अवम्यस्याल्पकायाग्नेः कुर्याल्लंघनमादितः॥ मन्दाग्निर्वेदनामन्दा गुरुस्तिमितकोष्ठता॥ सोत्क्लेशा चारुचिर्य
स्य स गुल्मी वमनोपगः॥ उष्णैरेवोपचार्यस्तु कृते वमनलंघने॥ योज्याचाहारसंसर्गभेषजैः कटुतिक्तकैः॥ साना
हं दूसविबंधं च गुल्मं कठिनमुन्नतं॥ दृष्ट्वादौ स्वेदयेत्तत्र स्निग्धं च विनयेद्भिषक्॥ लंघनोल्लेखने स्वेदे कृतेग्नौ
संप्रधुक्षिते॥ घृतं सक्षारकटुकं पातव्यं कफगुल्मिनां॥ स्थानादपस्रुतं ज्ञात्वा कफगुल्मं विरेचनैः॥ सस्नेहैर्बस्ति

भिर्वापि शोधयेद्दशमूलकैः॥ मंदेग्नावनिले मूढे ज्ञात्वा सस्नेहमाशयं॥ गुटिकाश्चूर्णनिर्यूहाः प्रयोज्याः कफगु
ल्मिनां॥ कृतमूलं महावस्तुं कठिनं स्तिमितं गुरुं॥ जयेत्कफकृतं गुल्मं क्षारारिष्टाग्निकर्मभिः॥ दोषप्रकृतिसात्म्य
र्तुयोगं बुध्वा कफोल्बणे॥ बलदोषप्रमाणज्ञः क्षारं गुल्मे प्रयोजयेत्॥ एकांतरं द्व्यंतरं वा त्र्यहं विश्राम्य वा पुनः॥ शरीर
बलदोषाणां वृद्धिक्षपणकोविदः॥ श्लेष्माणं मधुरं स्निग्धं मांसक्षीरघृताशिनः॥ छित्वा छित्वाशयात्क्षारः क्षरत्वात्क्षा
रयत्यधः॥ मंदाग्नावरुचौ सात्म्ये मद्ये सस्नेहमश्नतां॥ प्रयोज्या मार्गशुद्ध्यर्थमरिष्टाः कफगुल्मिनां॥ लंघनोल्लेखनैः स्वे
दैः सर्पिःपानैर्विरेचनैः॥ बस्तिभिर्गुटिकाचूर्णक्षारारिष्टगणैरपि॥ श्लैष्मिकः कृतमूलत्वाद्यस्य गुल्मो न शाम्यति॥ त
स्य दाहो हृते रक्ते शरलोहादिभिर्हितः॥ औष्ण्यात्तैक्ष्ण्याच्च शमयेद्दाहो गुल्मे कफानिलौ॥ तयोः शमश्च संघातो गुल्मस्य
विनिवर्तते॥ दाहे धान्वंतरीयाणामत्रापि भिषजां बलं॥ क्षारप्रयोगे भिषजां क्षारतंत्रविदां बलं॥ व्यामिश्रदोषे व्यामिश्र ए
ष एव क्रियाक्रमः॥ सिद्धा ततः प्रवक्ष्यामि योगान्गुल्मनिबर्हणान्॥ त्र्यूषणात्रिफलाधान्यविडंगचव्यचित्रकैः॥ कल्की
कृतं घृतं सिद्धं सक्षीरं वातगुल्मनुत्॥ एत एव च कल्काः स्युः कषायः पांचमूलिकः॥ द्विपांचमूलिको वाथ तद्घृतं गुल्मनु
त्परं॥ प्रसन्नया वा क्षीरार्थी सुरया दाडिमेन वा॥ घृतं मारुतगुल्मघ्नः कार्यो दध्नः सरेण वा॥ हिंगुसौवर्चलव्योषविड
दाडिमदीप्यकैः॥ पुष्करव्योषधान्याम्लवेतसक्षारचित्रकैः॥ सटीचव्यजगंधैलासुरसैश्च विपाचितं॥ गुल्मानाहहरं
सर्पिर्दध्ना वानिलगुल्मिनां॥ हपुषाव्योषपृथ्वीकाचव्यचित्रकसैंधवैः॥ साजाजिपिप्पलीमूलदीपकैर्विपचेद्घृतं॥ सको
लमूलकरसं सक्षीरं दधिदाडिमैः॥ तत्परं वातगुल्मघ्नं शूलानाहविमोक्षणं॥ योन्यर्शोग्रहणीदोषकासश्वासारुचिज्वरान्॥
बस्तिहृत्पार्श्वशूलं च घृतमेतद्व्यपोहति॥ पिप्पल्याः कर्षमध्यर्धं दाडिमाद्द्विपलं पलं॥ धान्यात्संच मूलात् शुंठ्याः कर्षं क्षीर

च·चि· चतुर्गुणं॥ सिद्धमेतैर्घृतं सद्योवातगुल्मेचिकित्सितं। योनिशूलं शिरःशूलमर्शांसि विषमज्वरं॥ घृतानामौषधगणाय
१८ ातेपरिकीर्तिता॥ ते चूर्णयोगाश्चलस्ताः कषायास्ते च गुल्मिनां॥ कोलदाडिमघर्माबुतक्रमंडाम्लकांजिकैः॥ शूलानाह
नुदः पेयाबीजपूररसेनवा॥ चूर्णानिमातुलिंगस्यभाविता निरसेनवा॥ कुर्याद्वर्तिंसगुडिकागुल्मानां॥ कोलदाडिमघर्माबु
तक्रामंडाम्लकांजिकैः॥ शूलानाहनुदः पेयाबीजपूररसेनवा चूर्णानिमातुलिंगस्यभाविता निरसेनवा कुर्याद्वर्तिंसगु
डिकागुल्मानाहर्तिशांतये॥ हिंगुत्रिकटुकंपाठांहपुषामभयासटीं॥ अजमोदाजगंधे च तिंतिडीकाम्लवेतसौ॥ दाडिमं
पौष्करंधान्यमजाजींचित्रकंवचां॥ द्वौक्षारौलवणे द्वे च चव्यंचैकत्रचूर्णयेत्॥ चूर्णमेतत्प्रयोक्तव्यमन्नपानेष्वनत्ययं॥ प्राग्भ
क्तमथवापेयं मद्येनोष्णोदकेनवा॥ पार्श्वहृद्वस्तिशूलेषु गुल्मेवातकफात्मके॥ आनाहे मूत्रकृच्छ्रे च शूले च गुदयोन
जे। ग्रहणीपर्शोविकारेषु प्लीह्नि पांड्वामयेरुचौ॥ उरोविबंधे हिक्कायां कासेश्वासे गलग्रहे॥ भावितं मातुलिंगस्य चूर्ण
मेतद्रसेनवा॥ बहुशो गुडिकाः कार्याः कार्मुकाः स्युस्ततोधिकं॥ मातुलिंग रसो हिंगुदाडिमंविडसैंधवैः॥ सुरामंडेनपा
तव्यं वातगुल्मरुजापहं॥ नागरार्धपलं पिष्टं द्वे पले लुंचितस्य च॥ तिलस्यैकं गुडपलं क्षीरेणोष्णेन पाययेत्॥ वात
गुल्ममुदावर्त्तं योनिशूलं च नाशयेत्॥ पिबेदेरंडतैलं च वारुणीमंडमिश्रितं॥ तदेवतैलं पयसा वातगुल्मी पिबेन्न
रः॥ श्लेष्मण्यनुबले पूर्वं हितं पित्तानुगे परं॥ साधयेच्छुद्धशुष्कस्य लशुनस्य चतुःपलं॥ क्षीरेऽष्टगुणिते क्षीरशेषं च पा
ययेत्॥ वातगुल्ममुदावर्त्तं गृध्रसीं विषमज्वरं॥ हृद्रोगं विद्रधीं शोषं साधयत्याशु तत्पयः॥ तैलंप्रसन्नागोमूत्रमा
रनालं यवाग्रजं॥ गुल्मं जठरमानाहं पीतमेकत्र साधयेत्॥ पंचमूलकषायेण सक्षीरेण शिलाजतुः॥ पिबेत्तस्य १८
प्रयोगेनणावातगुल्मादिमुच्यतेवा स्वयं स्वेषेणापि फल्यन्यम्लकानां रसेनवा॥ भुक्त्वा स्निग्धमुदावर्त्ते ह्वान

गुल्माद्विमुच्यते॥ शूलानाहविबंधार्थं स्वेदयेद्वातगुल्मिनं स्वेदैः स्वेदविधायुक्तैर्नाडीप्रस्तरसंकरैः बस्तिकर्म
परंविद्याद्गुल्मघ्नं तद्धि मारुतं स्वेस्थाने प्रथमं जित्वा सद्यो गुल्ममपोहति तस्मादभीक्ष्णशो गुल्मा निरूहैः सानुवा
सनैः प्रयुज्यमानैः शाम्यंति वातपित्तकफात्मकाः गुल्मघ्ना विविधा दृष्टाः सिद्धाः सिद्धिषु बस्तयः गुल्मघ्नानि
च तैलानि वक्ष्यंते वातरोगिके तानि मारुतजे गुल्मे पानाभ्यंगानुवासनैः प्रयुक्तान्याशु सिद्धानि तैलं ह्यनिलजि
त्परं नीलिनीचूर्णसंयुक्तं पूर्वोक्तं घृतमेव च समलायप्रदातव्यं शोधनं वातगुल्मिने॥ नीलिनीं त्रिवृतां दंतीं पथ्यां कंपिल्ल
कैः सह शोधनार्थं घृतं देयं सविडक्षारनागरं नीलिनी त्रिफलां रास्नां बलां कटुकरोहिणीं पचेद्विडंगं व्याघ्रीं च पालिका
निजदके ांशभागसंयुक्तं घृतप्रस्थं विपाचयेत् दध्नः प्रस्थेन संयोज्य सुधाक्षीरपलेन च ततो घृतपलं दद्याद्यवागूमं
डमिश्रितं जीर्णे सम्यग्विरिक्तं च भोजयेद्रसभोजनं गुल्मकुष्ठोदरव्यंगशोफपांड्वामयज्वरान् श्वित्रं प्लीहानमुन्मादं
घृतमेतद्व्यपोहति कुक्कुटाश्च मयूराश्च तित्तिरक्रौंचवर्त्तिकाः शालयो मदिरा सर्पिर्वातगुल्मचिकित्सितं हितमुष्णं
द्रवं स्निग्धं भोजनं वातगुल्मिनां समंडवारुणीपानं तप्तं वा धान्यकैर्जलं मंदेऽग्नौ वर्धपक्वा यगुल्मोदीसे चाग्नौ प्रशाम्य
ति तस्मान्नातिसौहित्यं कुर्यान्नातिविलंघनं सर्वत्र गुल्मे प्रथमं स्नेहस्वेदोपपादिते या क्रिया क्रियते सिद्धिं सा
याति न विरूक्षिते भिषगात्ययिकं बुद्ध्वा पित्तगुल्ममुपाचरेत् वैरेचनिकसिद्धेन सर्पिषा पयसापि वा रोहिणीक
टुकानिंबमधुकं त्रिफलात्वचः कर्षांशास्त्रायमाणा च पटोलत्रिवृतापले द्विपलं च मसूराणां साध्यमष्टगुणेंभसि॥
घृतशेषं घृतसमं सर्पिषश्च चतुःपलं पिबेत्संमूर्छितं तेन गुल्मः शाम्यति पैत्तिकः ज्वरस्तृष्णा च शूलं च भ्रमो मूर्छा
रुचिस्तथा जले दशगुणे साध्यं त्रायमाणाचतुःपलं पंचभागस्थितं पूतं कल्कैः संयोज्य कार्षिकैः रोहिणीकटुका

गुल्मं त्रायमाणा दुरालभा कल्कैस्त्वामलकैर्वा राजीवं वा चंदनोत्पलैः रसस्यामलकानां च क्षीरस्य च घृतस्य च पलानि पृथगष्टाष्टौ
च॰ चि॰ दत्वा सम्यग्विपाचयेत् पित्तगुल्मं रक्तपित्तं विसर्पं पैत्तिकं ज्वरं हृद्रोगं कामलां कुष्ठं हन्यादेतद्घृतोत्तमं रसेनामलकेक्षूणां घृतपा
दं विपाचयेत् पथ्यापादं पिबेत्सर्पिस्तत्सिद्धं पित्तगुल्मनुत् द्राक्षां मधूकं खर्जूरं विदारीं सशतावरीं परूषकाणि त्रिफलां साधये
१ ज्जलसम्मितां जलाढके पादशेषे रसमामलकस्य च घृतमिक्षुरसं क्षीरमभयाकल्कपादिकं साधयेत्तद्घृतं सिद्धं शर्कराक्षौ
द्रपादिकं प्रयोगात्पित्तगुल्मघ्नं सर्वपित्तविकारनुत् वृषंसमूलमापोथ्य पचेदष्टगुणे जले शेषेऽष्टभागे तस्यैव पुष्पकल्कं प्रदाप
येत् तेन सिद्धं घृतं शीतं सक्षौद्रं पित्तगुल्मनुत् रक्तपित्तज्वरश्वासकासहृद्रोगनाशनं द्विपलं त्रायमाणाया जलद्विप्रस्थसाधितं
अष्टभागस्थितं पूतं कोष्णं क्षीरसमं पिबेत् पिबेदुपरि तस्यास्तु क्षीरमेव यथाबलं तेन निर्हृतदोषस्य गुल्मः शाम्यति पैत्तिकः
द्राक्षाभयारसं गुल्मे पैत्तिके सगुडं पिबेत् लिह्यात्कंपिल्लकं वापि विरेकार्थं मधुद्रवं दाहप्रशमनोऽभ्यंगः सर्पिषा पित्तगुल्मिनां
चंदनाद्येन तैलेन मधुकाद्येन वा पुनः येच पित्तज्वरे प्रोक्ताः तिक्ताः क्षीरवस्तयः हिताश्च पित्तगुल्मिभ्यः शालयो जांगलं मांसं ग
व्याजेयं पयः सर्पिः खर्जूरामलकं द्राक्षा दाडिमं सपरूषकं आहारार्थं प्रयोक्तव्यं पानार्थं सलिलं सृतं बलाविदारिगंधाद्यैः पित्त
गुल्मं चाकृतिं आमान्वये पित्तगुल्मे सामे वा कफवातजे यवागूभिः खलैर्यूषैः संधुक्ष्योऽग्निर्विलंघिते सामप्रकोपाद्दोषा
णां सर्वशमस्त्रिसांश्रेयो तस्मादग्निं सदा रक्षेन्निदानानि च वर्जयेत् वमनार्हाय वमनं प्रदद्यात्कफगुल्मिने स्निग्धस्विन्नश
रीराय गुल्मे शैथिल्यमागते परिविसृतं त्यास्तु चलत्वं ज्ञानथवा कुशान् भिषक् कुर्यात्समं वा ध्यगुल्मे पटमुखं क्षेपत संगृहीतो
यदा गुल्मो सलदापस्मपाश्रोल् वस्त्रान्तरं ततः घ्रातिद्यादु प्रमाणवित् विमार्गाजयस्त्वादौ यथालाभं प्रपीडयेत् प्रमृज्य
गुल्ममेवैवं नवं त्रंददस्य थेन तिलोरुबूकसर्पज्ञ बीजसर्षपैः परिलिप्य श्लेष्मगुल्ममयः पात्रैः सुखोष्णैः स्वेदयेद्भिषक् मत्वा

प्रस्थान्स्वरसं दशमूलभृतं पयः कफगुल्मं जयत्याशु सगुडं विडदाडिमं भल्लातकानां द्विपलं पंचमूलं पयोन्मितं साध्यं विदारिग
धमापोथ्य सलिलाढकैः पादशेषे समन्वितं पिप्पलीनागरं वचा विडंगं सैंधवं हिंगु यावशूकं विडं सठी चित्रकं मधुकं रास्ना
पिष्ट्वाक्षसममानानि पचेत् प्रस्थं च पयसो घृतप्रस्थं विपाचयेत् एतद्भल्लातकघृतं कफगुल्महरं परं प्लीहपांडामयश्वासग्रह
णीरोगकासनुत् पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः पालिकैः सयवक्षारैर्घृतप्रस्थं विपाचयेत् क्षीरप्रस्थं च तत्सर्पिर्हंति गुल्मं
कफात्मकं हृत्कामज्वरापहं श्वित्रासवं ग्रहणीपांडुरोगघ्नं नक्तमालं दंतीं दशमूलं पलोन्मितं जले चतुर्गुणे पक्त्वा चतुर्भागस्थितं रसं
सर्पिषः उर्जं तैलं क्षीरं चैकत्र साधयेत् समिश्रमिश्रकः स्नेहः योनिशूलेषु साधितं यदुक्तं वातगुल्मघ्नं स्रंसनं नीलिनीघृतं
द्विगुणं तत्र कार्यं प्रयोज्यं कफगुल्मिनां स्नुक्क्षीरं तथैव च गोत्रिवृताया समाधितं कार्षिकं मधु सर्पिः पालीं द्रामा ज
ट्दाण स्त्रक्ष्यार्थे पंच चाभयः रसाः पलानि तावंति चित्रकस्य तथैव च अष्टभागस्थितं तत्र रसं पूतं अधिश्रयेत् दंतीसमं
गुडं पूतं सर्पिषस्तत्र तथा श्वना तैलाबकं तथैव त्रिवृतायाश्चतुःपलं चूर्णितं चार्धपलिकं पिप्पलीविश्वभेषजं तत्साध्यं लेहव
ज्जीतं लिप्त्वा समं मधु दद्याच्चूर्णपलं चैकं त्वगेलापत्रकेसरात् ततो लेहपलं लेढ्वा जग्ध्वा चैकां हरीतकीं सुखं विरिच्य
ते स्निग्धो दीपनश्चापनामयः गुल्मं श्वयथुमर्शांसि पांडुरोगमरोचकं हृद्रोगं ग्रहणीदोषं कामलां विषमज्वरं कुष्ठं प्लीहानमा
नाहमेनानहंत्युपयोजितः निरत्ययः क्रमश्चास्य द्वेषामांसरसौदनं स्निग्धाः स्विन्नाः पुनर्दोषाः निरूहाः कफगुल्मिनां द्विग
णक्षारहिंगवम्लवचनमूत्राः कफमताः ग्रहणीदोषस्तस्कफगुल्मिनां शिखानिलयाः शाल्यादाहस्वंसेप्रशास्यंते
पुराणानि धान्यानि जांगलान्मृगपक्षिणः लघूनि यानि सर्वाणि पथ्यतमानि च कौलत्थमौद्गयूषश्च पिप्पल्या नागरस्य च श
ष्कमूलकयूषश्च बिल्वस्य लवणस्य च बीजपूरकहिंग्वम्लवेतसक्षारदाडिमैः तक्रेण तैलसर्पिभ्यां व्यंजनान्युपकल्पयेत्

च.चि.

१८

पंचमूलशृतं तोयं पुराणं वारुणीरसं। कफगुल्मी पिबेत्काले जीर्णं माध्वीकमेव च॥ यवानीचूर्णितं तक्रं बिडेन लवणीकृतं। पिबेत्संदीपनं वात
मूत्रवर्चोनुलोमनं॥ संचितः क्रमशो गुल्मो महावस्तुपरिग्रहः। कृतमूलः सिरानद्धो यदा कूर्म इवोन्नतः। दौर्बल्यारुचिहृल्लासकास
छर्द्यरतिज्वरैः। तृष्णातंद्राप्रतिश्यायैर्युज्यते न स सिध्यति। गृहीत्वा सज्वरं श्वासं छर्द्यतीसारपीडितः। हृन्नाभिहस्तपादेषु शोफः
कर्षति गुल्मिनं। रौधिरस्य तु गुल्मस्य गर्भकालव्यतिक्रमे। स्निग्धस्विन्नशरीरायै दद्यात्स्नेहविरेचनं। पलाशक्षारपात्रे द्वे द्वे पात्रे तैलस
र्पिषा। गुल्मशैथिल्यजननी पीत्वा मात्रां प्रयोजयेत्। प्रभिद्येत न यद्येवं दद्याद्योनिविरेचनं। क्षारेण युक्तं पललं सुधाक्षारेण वा पुनः
ताभ्यां वा भावितान्दद्याद्योनौ कटुकमत्स्यकान्। वराहमत्स्यपित्ताभ्यां नक्तकान्वा सुभावितान्। आधोहरैः सार्धं हरैर्माविलासमासि
कैः॥ किण्वं वा सगुडक्षारं दद्याद्योनिविशोधनं। रक्तपित्तहरं क्षारं केहयेन्मधुसर्पिषा। लशुनं मदिरां तीक्ष्णां मत्स्यांश्चास्यै प्रदापयेत्
बस्तिं सक्षीरगोमूत्रं सक्षारं दाशमूलिकं। अप्रवर्तमाने रुधिरे दद्याद्गुल्मप्रभेदनं। प्रवर्तमाने रुधिरे दद्यान्मांसरसौदनं घृततैलेन
चाभ्यंगं पानार्थं वारुणीरसं। रुधिरे तु प्रवृत्ते तु रक्तपित्तहरी क्रिया कार्या वातरुगार्तायाः सर्वा वातहरा पुनः। घृततैलासवक्वाथ
निर्वृत्ति वातगुल्मकाः॥ सुरासमंडं पूर्वं च पानमम्लस्य सर्पिषः॥ योजयेदुत्तरं बस्तिं जीवनीयेन सर्पिषा॥ अतिप्रवृत्ते रुधिरे सत्तिक्तेनात
वासनं। भवन्ति चात्र। स्नेहः स्वेदः सर्पिषा तिक्तबस्ति चूर्णानि बृंहणं गुडिकाः॥ वमनविरेकौ मोक्षः क्षतजस्य च वातगुल्मवतां सर्पि
स्तिक्तसिद्धं। क्षीरं प्रस्रंसनं निरूहाश्च। रक्तस्य चावसेचनमाश्वासनसंशमनयोगाः। उपनाहनं सशस्त्रं पक्वस्याभ्यंतरं
प्रयत्नस्य। संशोधनं संशमनं पित्तप्रभवस्य गुल्मस्य। स्नेहस्वेदौ भेदो लंघनमुल्लेखनं विरेकश्च। सर्पिश्च सतिक्तगुडिकाचूर्ण
मरिष्टश्च ससाराः। गुल्मस्यान्ते दाहः कफजस्याग्नेयनीतरक्तस्य गुल्मस्य रौधिरस्य क्रियाक्रमः स्त्रीभवेस्योक्तः॥ पथ्यान्नपा
नसेवा हिवर्जनं यथास्वं चापानि यच्चाग्निसमाधि॥ स्निग्धस्य च सर्वकर्माणि। हेतुलिंगसिद्धिः॥ क्रियाक्रमसाध्यनान

राम

१८

योगाश्च॥ गुल्मचिकित्सितसंग्रहणं एतावान् निवेशाय। इति [illegible] चरकसंहितायां चिकित्सितस्थाने गुल्मचिकित्सितं नाम
[illegible] अथातः प्रमेह [illegible] चिकित्सितं व्याख्यास्यामः॥ इति ह स्माह भगवानात्रेयः॥ पुनर्वसुं ज्ञानतपो
विशाल॥ कालेऽग्निवेशः प्रमेहान्सहेतुलिंगानुवाच मेहान् प्रशमनं च तेषां १ अस्यासुखं स्वप्नसुखं दधीनि ग्राम्यौदकानूपरसाः प
यांसि। नवान्नपानं गुडवैकृतं च प्रमेहहेतुः कफकृच्च सर्वं मेदश्च मांसं च शरीरजं च क्लेदं कफो बस्तिगतः प्रदूष्य॥ करोति मेहान्समु
दीर्णमुष्णैस्तानेव पित्तं परिदूष्य चापि। क्षीणेषु दोषेष्ववकृष्य बस्तौ धातून्प्रमेहाननिलः करोति॥ दोषो हि बस्तिं समुपेत्य मूत्रं संदूष्य
मेहान्कुरुते यथास्वं। साध्याः कफोत्था दश पित्तजाः षडूयाप्यान साध्याः पवनाच्चतुष्कः॥ समक्रियत्वाद्विषमक्रियत्वान्महात्ययत्वा
च्च यथाक्रमं ते। कफश्च पित्तः पवनश्च दोषा मेदोस्रशुक्रांबुवसालसीकाः॥ मज्जा रसौजः पिशितं च दूष्याः प्रमेहिणां विंशतिरे
व मेहाः। जलोपमं चेक्षुरसोपमं वा घनं घनं चोपरि विप्रसन्नं। शुक्लं सशुक्रं शिशिरं शनैर्वा लालेव वा वालुकया युतं वा॥ विद्यात्प्रमेहान्
कफजान्दशैतान्क्षारोपमं कालमथापि नीलं। हारिद्रमांजिष्ठमथापि रक्तमेतान्प्रमेहान् षडुशन्ति पित्तात्॥ मज्जौजसा वा वसया
न्वितं वा लसीकया वा सततं विबद्धं। चतुर्विधं मूत्रयतीह वातात्क्षेषेषु धातुष्वपकर्षितेषु॥ वर्णरसं स्पर्शमथापि गंधं यथास्व
दोषं भजते प्रमेहः॥ स्वादारुणो वातकृतः सतूलो मज्जादिसादृगुण्यमुपेत्य साध्यः॥ स्वेदांगगंधः शिथिलत्वमंगे शय्यासु
खे स्वप्नसुखे रतिश्च हृन्नेत्रजिह्वाश्रवणोपदेहो घनांगता केशनखातिवृद्धिः॥ शीतप्रियत्वं गलतालुशोषो माधुर्यमास्यकर
पाददाहः॥ शीतप्रियत्वं भविष्यतो मेहगणस्य रूपं मूत्रेऽपि धावंति पिपीलिकाश्च॥ स्थूलः प्रमेही बलवानिहैकः कृशस्तथैकः परि
दुर्बलश्च। संबृंहणं तत्र कृशस्य कार्यं संशोधनं दोषबलाधिकस्य। स्निग्धस्य दा योगा विविधाः प्रयोज्याः कफोपदिष्टा मलशो
धनाय। ऊर्ध्वं तथाधश्च मलेऽपनीते मेहेषु संतर्पणमेव कार्यं गुल्मः क्षयो मेहनबस्तिशूलं मूत्रग्रहश्चाप्यपतर्पणेन प्रमेहिणः

स्युः परितर्पणानि कार्याणि तस्मात्प्रसमीक्ष्य वह्निं संशोधनं नार्हति यः प्रमेही तस्य क्रिया संशमनी प्रयोज्या मंथाः कषाया यव चूर्णले
ह्याः प्रमेह शान्त्यै लघवश्च भक्ष्याः येविष्किराश्च प्रतुदा विहंगास्तेषां रसैर्जांगलजैर्मनोज्ञैः यवौदनं भृंजमथापि वाधमपात्सक्तूनभ
च·चि· वाप्यपूपान् मुद्गादियूषैरथ तिक्तशाकैः पुराणशाल्योदनमाददीत दंतीङ्गुदीतैलयुतं प्रमेही तथातसीसर्षपतैलयुक्तं समष्टि
१९ कं स्यात्तृणधान्यमन्नं यवप्रधानस्तु भवेत्प्रमेही यवस्य भक्ष्यान् विविधांस्तथाद्यात् कफप्रमेही मधुसंप्रयुक्तान् निशाशिलानां त्रि
फलाकषाये स्यात्तर्पणाः क्षौद्रयुता यवानां तान्सिंधुयुक्तान्प्रपिबेत्प्रमेही प्रायोगिकान्रूक्षवधार्थमेव ये श्लेष्मप्रमेहे विहिताः
कषायास्तैर्भावितानां च पृथग्यवानां सक्तून् अपूपान् सगुडान् सधानान् भक्ष्यांस्तथान्यान् विविधांश्च खादेत् खराश्वगोपेनकृतं
भृतानां तथा यवानां विविधाश्च भक्ष्याः वेणुयवा वा यवकाः अनेन कल्पेन गोधूममयाश्च भक्ष्याः संशोधनोल्लेखनलंघनानि
कालप्रयुक्तानि कफप्रमेहान् जयंति पित्तप्रभवान्विरेकः संतर्पणः संशमनो विधिश्च दार्वी सुराह्वं त्रिफलां समुस्तां कषाय
मुत्क्वाथ्य पिबेत्प्रमेही क्षौद्रेण युक्तामथवा हरिद्रां पिबेद्रसेनामलकीफलानां हरीतकीकट्फलमुस्तलोध्रं पाठाविडंगार्जुनध
न्वनाश्च दार्वी विडंगं खदिरो धवश्च सुराह्वकुष्ठागरुचंदनानि दार्व्यग्निमंथौ त्रिफलास पाठावासा खदिरं द्रुसहमूर्वा त्रयवान्
सुरारामलकीगुडूचि लंजंबाभयाचित्रकसप्तपर्णः पाठा च मूर्वा च तथा श्वदंष्ट्रा यवानी उशीराण्यभयागुरूणि १९ चव्या
भयाचित्रकसप्तपर्णाः पादैः कषायाः कफमेहिनां च दशोपदिष्टा मधुसंप्रयुक्ताः उशीरलोध्रार्जुनचंदनानि उशीरमु राम
स्तामलकाभयानां पटोलनिंबामलकामृतानां मुस्ताभयापद्मकवृक्षकाणां लोध्रांबुकालीयकधातकीनां निंबार्जुनामृति
निशोत्पलानां पटोलनिंबामलकामृतानां शिरीषसर्जार्जुनकेसराणां प्रियंगुकंकोत्पलकिंशुकानां अश्वत्थपाठासनवेतसा १९
नां कटंकटेर्युत्पलमुस्तकानां पैत्तेषु मेहेषु दशैव दिष्टाः पादैः कषाया मधुसंप्रयुक्ताः सर्वेषु मेहेषु हिनौ तु पूर्वौ कषाययोगौ

विहितास्तु सर्वमंथस्य पाने यवभावनायां स्युः भोजने पानविधौ पृथक्स्युः कपित्थानि तिलानि घृतानि चैव देहानि मेहे घ्नन्ति लाभकेषु
मेदः कफश्चैव कषाययोगैः स्नेहश्च वायुः शममेति तेषां कंपिल्लसप्तच्छदशाल्मलानि बिभीतरोहितककौटजानि कपित्थपुष्पाणि च
चूर्णितानि क्षौद्रेण लिह्यात्कफपित्तमेही पिबेद्रसेनामलकस्य वापि कल्कीकृतान्यक्षसमानि काले जीर्णे च भुंजीत पुराणमन्नं
मेही रसैर्जांगलजैर्मनोज्ञैः दृष्ट्वानुबंधं पवनं कफस्य पित्तस्य वा तैलहविर्विधिर्विकल्प्य तैलं कफेस्याः स्वकषायसिद्धं पित्ते घृतं पि
त्तहरैः कषायैः त्रिकंटकाश्मंतकसोमवल्कैः भल्लातकैः सातिविषैः सलोध्रैः वचापटोलार्जुननिंबमुस्तैः हरिद्रापद्मक
दीप्यकैश्च मंजिष्ठयाचागरुचंदनैश्च सर्वैः समस्तैः कफवातजेषु मेहेषु तैलं विपचेद्धि घृतं तु पैत्तेषु मिश्रं त्रिषुलक्षणेषु लोध्रं सदीपुष्कर
मूलमेलां मूर्वाविडंगं त्रिफलां यवानीं चव्यं प्रियंगुं मधुकं विशालां किराततिक्तं कटुरोहिणीं च भार्गीं नतं चित्रकपिप्पलीनां मूलं स
कुष्ठानि विषां सपाठां कलिंगकान्केसरमिंद्रसाह्वयं नखं सपिप्पलीमरिचं प्लवं च द्रोणेंऽभसः कर्षसमानि पक्त्वा पूते चतुर्भागज
लावशेषे रसेऽर्धभागं मधुनः प्रदाय पक्षं निधेयो घृतभाजनस्थः मध्वासवोऽयं कफपित्तमेहान् क्षिप्रं निहन्याद् द्विपलप्रयोगा
त् पांड्वामयार्शांस्यरुचिं ग्रहण्यां दोषं किलासं विविधं च कुष्ठं क्वाथः स एवाष्टपलश्च दार्व्या भल्लातकानां च चतुष्पलः स्या
त् मिश्रोपलो वाष्टपलो विशेषः क्षौद्रं च तावत्स यथास्तवोऽतो सारोदकं वाथ कुशोदकं वा मधूदकं वा त्रिफलारसं वा सीधुं पिबे
न्निगदं प्रमेही माध्वीकमग्र्यं चिरसंस्थितं वा मांसानि मृगद्विजानां विविधांश्च भक्ष्यान् संशोधनारिष्टकषायलेहैः संत
र्पणोत्थान् शमयेत्प्रमेहान् प्रशान्त्यवान् भक्षयतः प्रयोगाद्धान्यांश्च सक्तून्न भवंति मेहाः श्वित्रं च कुष्ठं कफजं च कुष्ठं तथैव मज्ज
गलकत्र योगान् संतर्पणोत्थेषु गदेषु योगा मेदस्विनां ये च मयोपदिष्टाः विरूक्षणार्थं कफपित्तजेषु सिद्धाः प्रमेहेष्वपि ते प्रयोज्याः व्या
यामयोगैर्विविधैः प्रगाढैरुद्वर्तनैः स्नापजलावसेकैः सेव्यत्वगेलागरुचंदनाद्यैर्विलेपनैश्चाशु न संति मेहाः क्लेदश्च मेदश्च कफ

च·चि· श्चरक्षाः प्रमेहहेतुप्रसमीक्ष्य तस्मात्। वैद्येन मात्रां कफपित्तमेदःकार्याण्यपतर्पणबृंहणानि अथावातमेहान् प्रति पूर्वमुक्ता वातो
ल्वणानां निहिता क्रियासा॥ वातो हि मेहे प्रतिकर्षितानां कुपत्यसाध्यान् प्रति नास्ति चिंता येहेतुभिर्ये प्रभवंति मेहास्तेषु प्रमेहेषु च ते
२० निषेव्याः॥ हेतोरसेवा विहिता यथैव जातस्य रोगस्य भवेच्चिकित्सा। हारिद्रवर्णं रुधिरं समूत्रं विना प्रमेहस्य हि पूर्वरूपैः॥ यो मूत्रयेन्
नवदेत्प्रमेहं रक्तस्य पित्तस्य च स प्रकोपः॥ दृष्ट्वा प्रमेहं मधुरं सपिच्छं मधूपमं स्याद्द्विविधोपचारः॥ क्षीणेषु दोषेष्वनिलात्मकः।
स्यात्संतर्पणाद्वा कफसंभवः स्यात्॥ सपूर्वरूपाः कफपित्तमेहाः क्रमेण ये वातकृताश्च मेहाः॥ साध्या न ते पित्तकृतास्तु याप्याः
साध्यास्तु मेदो यदि न प्रदुष्टं जातः प्रमेही मधुमेहिनां वा॥ न साध्यरोगः सहबीजदोषात्॥ ये चापि केचित्कुलजा विकारा भवं
ति तांश्च प्रवदंत्यसाध्यान् प्रमेहिणां याः पिडका मयोक्ता॥ रोगाधिकारे पृथगेव सप्त ताः शल्यप्रहृद्भिः कुशलैश्चिकित्स्याः शस्त्रे
ण संशोधनरोपणैश्चेति। भवति चात्र हेतुर्दोषाद्दूष्यं मेहानां साध्यतानुरूपं च मेहाहि विधर्मा विधिर्भिषग्जितं क्षपणदो
षाः॥ आधाय वात्या विकृतिर्मया मेहापहाः कषायाश्च तैलघृतलेहयोगा भक्ष्याः प्रवराः सर्वाः सिद्धाः॥ व्यायामविधिर्वि
विधः स्नानान्युद्वर्तनानि गंधाश्च मेहानां प्रशमाय चिकित्सितं समेतावत्। इति श्री चरकसंहितायां चि[illegible]स्थाने
प्रमेहचिकित्सितं नाम चतुर्थोऽध्यायः॥ अथातः कुष्ठचिकित्सितं॥ ॥ इति ह स्माह॥ हेतुलिंगं चिकित्सां कुष्ठानामाश्र
यं प्रशमनं च शृणु अग्निवेश सम्यग्विशेषतः स्पर्शनघ्नानां विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च॥ भजतामागतां छर्दिं
वेगांश्चान्यान् प्रतिघ्नतां व्यायाममतिसंतापमतिभुक्तानिषेविणां॥ शीतोष्णलंघनाहारान् क्रमं मुक्त्वा निषेविणां॥ घ राम
र्मश्रमभयार्तानां द्रुतं शीतांबुसेविनां॥ अजीर्णाध्यशिनां चैव पंचकर्मापचारिणां॥ नवान्नदधिमत्स्यातिलवणाम्लनिषे २०
विणां माषमूलकपिष्टान्नतिलक्षीरगुडाशिनां॥ व्यवायं चाप्यजीर्णेन्ने निद्रां च भजतां दिवा॥ विप्रान् गुरून् धर्षयतां पापं कर्म

च कुर्वतां वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमंबु च दूषयंति स कुष्ठानां सप्तको द्रव्यसंग्रहः॥ अतः कुष्ठानि जायंते सप्त चैकादशैव च॥
न चैकदोषजं किंचित्कुष्ठं समुपलभ्यते॥ स्पर्शाज्ञत्वमतिस्वेदो न वा वैवर्ण्यमुन्नतिः॥ कोठानां लोमहर्षश्च कंडूस्तोदः श्रमः क्लमः॥ कोठानां
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः॥ सुप्तमंगे दाहश्च कुष्ठलक्षणमग्रजमिति। अत ऊर्ध्वमष्टादशानां कुष्ठानां
कापालोदुंबरमंडलर्क्षजिह्वपुंडरीकसिध्मकाकणकैककुष्ठचर्मकुष्ठकिटिभविपादिकालसकदद्रूचर्मदलपामाविस्फोट
कशतारुर्विचर्चिकानां लक्षणान्युपदेक्ष्यामः॥ रूक्षारुणकपालाभं यद्रूक्षं परुषं तनु। कापालं तोदबहुलं तत्कुष्ठं विषमं
स्मृतं। रुग्दाहरागकंडूभिः परीतं लोमपिंजरं उदुंबरफलाभासं कुष्ठमौदुंबरं वदेत्। श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्स
न्नमंडलं कृच्छ्रमन्योन्यसंयुक्तं कुष्ठं मंडलमुच्यते। कर्कशं रक्तपर्यंतमंतस्यावं सवेदनं यदृक्षजिह्वासंस्थानमृक्षजिह्वं त
दुच्यते। सश्वेतं रक्तपर्यंतं पुंडरीकदलोपमं। सोत्सेधं च पुंडरीकं प्रवक्ष्यते। श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुंचति अलाबुपु
ष्पवर्णं तत्सिध्मं प्रायेणोरसि। यत्काकणंतिकावर्णं सपाकं तीव्रवेदनं। त्रिदोषलिंगं तत्कुष्ठं काकणं नैव सिध्यति। अस्वे
दनं महावस्तु यन्मत्स्यशकलोपमं। तदेककुष्ठं चर्माख्यं बहलं हस्तिचर्मवत्। श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतं
वैपादिकं पाणिपादस्फुटनं तीव्रवेदनं कंडूमद्भिः सरागैश्च गंडैरलसकं चितं सकंडूरागपिटकं दद्रुमंडलमुद्गतं। रक्तं सशूल
कंडूमत्सस्फोटं यद्दलत्यपि। तच्चर्मदलमाख्यातं असंस्पर्शसहमुच्यते पामाः श्वेतारुणश्यामाः कंडूलाः पिडका भृशं। स्फो
टाः श्वेतारुणाभासा विस्फोटाः स्युस्तनुत्वचः। रक्तं श्यावं सदाहार्ति शतारुः स्याद्बहुव्रणं सकंडूः पिडका श्यावा बहुस्रा
वा विचर्चिका। वातेधिकतरे कुष्ठं कपालं मंडलं कफे। पित्ते त्वौदुंबरं विद्यात्काकणं तु त्रिदोषजं। वातपित्ते श्लेष्मपित्ते वात
श्लेष्मणि चाधिके। ऋक्षजिह्वं पुंडरीकं सिध्मकुष्ठं च जायते। चर्माख्यमेककुष्ठं च किटिभं सविपादिकं। कुष्ठं चालसकं

।च.चि.। हेयंप्रायोवातकफात्मकं॥सामाशनादर्विस्फोटादद्रूश्चर्मदलंतथा॥पित्तश्लेष्माधिकः॥प्रायःकफप्रायाविचर्चिकाः॥सर्वं
२१ त्रिदोषजंकुष्टंदोषानांतुबलाबलं॥यथास्वंलक्षणैर्बुध्वाकुष्टानांक्रियतेक्रिया॥दोषस्ययस्यपश्येतकुष्टेषुविशेषलिंगमु
द्रिक्तं॥तस्यैवलिंगमकुर्यात्ततःपरंचानुबंधस्यकुष्टविशेषैर्दोषैर्दोषविशेषैःपुनश्चकुष्टानिजायंते॥तेहेतुर्हेतुस्तांप्रका
शयतिरौक्ष्यंशोषस्तोदः॥शूलंसंकुचनमायामः॥पारुष्यं॰खरभावोहर्षःश्यावारुणत्वंच॥कुष्टेषुवातलिंगंदाहोरागः
परिस्रवःपाकः॥विस्रागंधःक्लेदस्तथांगपतनंचपित्तकृतं॥श्वैत्यंशैत्यंकंडूःस्थैर्यंचोत्सेधगौरवंस्नेहः॥कुष्टेषुतुकफलिंगंजं
तुभिरासिलसणंक्लेदः॥सर्वैरेतैर्लिंगैर्युक्तंमतिमान्विवर्जयेदबलं॥तृष्णादाहपरीतं॥शांताग्निंजंतुभिर्जग्धं॥वातकफप्र
बलंयद्येकदोषोल्बणंनतत्कृछ्रं॥कफपित्तवातपित्तप्रबलानितुकृच्छ्रसाध्यानि॥वातोत्तरेषुसर्पिर्वमनंश्लेष्मोत्तरेषुकु
ष्टेषुपित्तोत्तरेषुमोक्षोरक्तस्यविरेचनंचाग्र्यं॥वमनविरेचनयोगाःकल्पोक्ताःकुष्टिनांप्रयोक्तव्याः॥प्रच्छनमल्पेशस्तश्वाशि
राव्यधोमहतिबहुदोषःसंशोध्य॥कुष्टीबहुशोनरक्षितान्प्राणान्॥दोषेह्यतिमात्रहृतेवायुर्हन्यादबलमाशु॥स्नेहस्यपानमि
ष्टं॥शुद्धेकोष्टेप्रवाहितेरुधिरे॥वायुर्हिशुद्धकुष्टंकोष्टिनमबलंविशतिशीघ्रं॥प्रदोषोत्क्लिष्टहृदयंवम्यः॥कुष्टेषुचोर्ध्वभागेषु
कुटजफलमधुकमदनैःसपटोलैर्निम्बरसयुक्तैः॥शीतरसःपद्मकसोमधुनिमधुकंचवमनानिकुष्टे॥कुष्टेषुत्रिवृतादंती
त्रिफलाचविरेचनेशस्ता॥सौवीरकंतुषोदकमालोडनमासवांश्चबसीध्वादीन्॥पूंसंश्रयोहराणांयथाविरेकंक्रमश्चो राम
ष्टःसार्वीवृहतीसिद्धे॥पटोलपिचुमंदमदनकृतमाले॥सस्नेहैःसंस्थाप्यःकुष्टीसकलिंगयवमुस्तैः॥वातोल्बणंपि
त्तंनिरूहमनुवासनार्हमालस्य॥फलमधुकनिंबकुटजैःसपटोलैःसाधयेत्स्नेहं॥तैलमधुकसैंधवफणिज्जकाःपि २३
प्पलीकरंजफलं॥नस्यंस्यात्सविडंगं॥कृमिकुष्टकफप्रकोपघ्नं॥वैरेचनिकैर्धूमैःश्लोकस्थानेरितैश्चःप्रशाम्यंति॥कृमयः

कुष्टकिलासाःप्रयोजितैरुत्तमांगस्थाः॥स्थिरकठिनमंडलानांस्विन्नानांप्रस्तरप्रनाडीभिः॥कूर्चैर्विघट्टितानांरक्तंक्लेशोपनेतव्यः
आभृष्वासिजानां॥मांसानांपोट्टकैःस्रावोष्णैश्चस्विन्नोत्सन्नंविलिखेत्कुष्टंतीक्ष्णेनशस्त्रेण॥रुधिरागमार्थमथवा॥शृंगा
लांबुभिर्हरेद्रक्तं॥प्रच्छिन्नमल्पंकुष्टंविरेचयेद्वाजलौकाभिः॥येलेपाःकुष्टानां॥युज्यंतेनिर्हृतास्रदोषाणां॥संशोधिताशु
यानांसद्यःसिद्धिर्भवतितेषां॥येषुनशस्त्रंक्रमतेस्पर्शेंद्रियनाशनानियानिस्युः॥तेषुनिपात्यःक्षारोरक्तंदोषंचविस्रा
व्य॥पाषाणकठिनपरुषेसुप्तेकुष्टेस्थिरेपुराणेच॥पीतागदस्यकार्यो॥विषैःप्रदेहोमदैःपूर्वानु॥स्तब्धानिसुप्तान्यस्वेदन
कंडूकनिकुष्टानि॥कूर्चैर्दंतैस्त्रिवृताकरवीरकरंजकुटजानां॥जात्यर्कनिंबजैर्वापत्रैःशस्त्रैःसमुद्रफेनैर्वा॥घृतानिगोमयैर्वा
वांततःप्रदेहैःप्रदेह्यानि॥मारुतकफकुष्टघ्नंकर्मोक्तंपित्तकुष्टिनांकार्यं॥कफपित्तरक्तकषायैःप्रशमनंच॥सर्पींषितिक्तका
निच॥यच्चोक्तंरक्तपित्तेतत्कर्मबाह्याभ्यंतरमग्र्यं॥तत्कार्यंपित्तकुष्टघ्नं॥दोषाधिक्यविभागादित्युक्तंकर्मकुष्टनुत्प्रोक्तं
वक्ष्याम्यपित्तसमानंप्रायस्त्वग्दोषमात्रास्यात्॥दार्वीरसांजनंवा॥गोमूत्रेणप्रयाघलेकुष्टं॥अभयाप्रयोजितावामासंसव्यो
षगुडतैलामूलंपटोलस्यतथागवाक्ष्याःपथ्यंपलांशंत्रिफलात्वचश्च॥स्यात्त्रायमाणाकुटरोहिणीच॥भागार्धिकेनागर
यादयुक्ते॥पलंतथैषांसहचूर्णितानां॥जलेश्रृतंदोषहरंपिबेन्नाजीर्णेरसैर्धन्वमृगद्विजानां॥पुराणशाल्योदनमाददी
त॥कुष्टानरोषंग्रहणीप्रदोषमर्शांसिकृच्छ्राणिहलीमकंच॥योगप्रयोगेणनिहंतिचैषषडहात्तिशूलंविषमज्वरंच॥मुस्तंव्योषं
त्रिफलामंजिष्ठादारुपंचमूलेद्वे॥सप्तच्छदनिंबत्वक्सविशालाचित्रकोमूर्वाचूर्णंतर्पणभागैर्नवभिःसंयोजितंसमध्वं
समसितंकुष्टनिबर्हणमेतत्प्रायोगिकंमस्यं॥श्वयथुंसपांडुरोगंश्वित्रंग्रहणीप्रदोषमर्शांसि॥भगंदरपिडकाकंडू
गंडपिडकाकंडूकोठांश्चविनिहंति॥त्रिफलातिविषाकटुकानिंबकलिंगावचापटोलानां॥मागधिकारजनीद्वयप

च·चि·

प्रकमर्शविमानानां॥ प्रनिबलामानां॥ दध्यादिपलं ततस्त्वक् त्रिगुणा तस्याश्च पुनर्ग्राहीत चूर्णस्य मितं परमं। लेलितकप्रयो
गारसेन जात्याः समाक्षिकः परमः॥ समदा कुष्ठघ्नं मासिक धातोश्च मन्त्रेण। खदिरकषायद्रोणं। कुंभे घृतभाविते समावाप्य शालीप्रसेयाः
२२ सजलि काम्लनश्च चूर्णैः कुनस्तस्मिन्॥ त्रिफलात्रिकटुरजनीमुस्ताह्वकर विडंग वाकुचिकाः॥ सौवर्णाश्च तथा त्वक् छिन्नरुहा चेति तन्मांसं
निदधीत धान्यमध्ये प्रातः प्रातः पिबेद् युक्त्या॥ मासेन महाकुष्ठं हंत्येषा त्वं च पक्षेण। अर्शः श्वासक छिन्नरुहा चेति तन्मासं। निद्धास
भगंदर कास किलास प्रमेह शोष्यांश्च॥ सभवनि कनकवर्णः पीत्वा रिष्टं कनकबिंदार्ख्यं कुष्ठघ्नि लक फलस्तेषु वनुपेयः स्वल्पपित्तेषु
खदिर सुरदारु सारं श्चपथिहा नइसेन नोसार्ठे॥ सौद्रमस्ते कार्यः कार्पेते चाष्टपलिकेरव्य। ताम्राय श्चूर्णानाम ष्टपलं प्रक्षिपेत्तत्रा
मेनि त्रिफले त्वग्मरिचं पत्रं कनकं च कर्षांशं। मत्स्यंडिकाम फस मानन्मासं जातमाय सेभांडे। मध्वासव माचरतः कुष्ठकिलास
शमं याति। त्रिफलासवः सगौडः मधत्रिकः कुष्ठरोग विनिलं ताक्रम कंदामूलं दंती वरांगमधुतैल संयुक्तः लघुनि वान्नानि हि
तानि विंध्यात् कुष्ठे शाकानि सतिक्तकानि भल्लातकैः सत्रिफलैः सनिंबैः युक्तानि वान्नानि घृतानि चैव। पुराणधान्यान्यथजा
गलानि॥ मांसानि मुद्गाश्च पटोलयुक्ताः। शस्तानगुर्वम्लपयोदधीनि। आनूपमत्स्यानि गुड स्तिलाश्च एलाकुष्ठं दार्वी शुन
पुष्पाणं चक्रको विडंगं च॥ कुष्ठेलेपनमिष्टं सांजनं चाभयं च। चित्रकमेला बिंबी वृषकं कुरुविंदनक्षत्रं च। नागरकवर्णमिश्र
मष्टाहं भावितं पलाशस्य। क्षारेण गवां मूत्रसुतेना सस्य मंडलान्याशुः भिपंते विलयं लिंचलि मान्यवोभित सातिं। मांसीमरी
चं लवणं रजनी नगरं सुधागृहाधूमः। मूत्रं पित्तं क्षारः पलाशजः कुष्ठनुल्लेपः। त्रपुसी समयश्चूर्णं मंडलनुत् सत्तुचित्रको वृहती राम
गोधारसः सलवणो दारुचमन्त्रं च मंडलप्रणुदः। कदलीपलाशपाटलनिचुलक्षारांभसा प्रसन्नेना। कुष्ठविनाशन मालपनं २२
मिरुमिभिंच। मुस्तं त्रिफलावदनक्षारां मसाप्रयचेन मापेषुनोयकार्यं पिष्टं च कल्कं च। तैर्मेचकः सुजातः क्रिणवर्जतिलः

प्रलेपनं श्रेष्ठं मंडलकुष्ठविनाशनमालपसंस्थे कृमिघ्नं च मुस्तं त्रिफला मदनं करंज आरग्वधः कलिंगयवाः दार्वी सप्तपर्णः स्नानं
सिद्धार्थकं नाम एवं कषायो वमनं विरेचनं वर्णकस्तथोद्घर्षः त्वग्दोषशाकुष्ठशोफप्रबाधनः पांडुरोगघ्नः कुष्ठकरंगबीजान्
पिडगजः कुष्ठसूदनो लेपः प्रपुनाटबीजसैंधवरसांजनकपित्थलाध्राश्च करवीरमूलवल्कः कटुरकरंजात्फलं त्वचो दार्व्योः
सुमनः प्रवालयुक्तो लेपः कुष्ठापहः सिध्मः लोध्रस्य धातकीनां वत्सकबीजस्य नक्तमालस्य कल्कं च मालतीनां कुष्ठेषून्मर्द
नालेपौ शिरीषत्वक्व कर्पास्याराग्वृक्षपत्राणि पिशाचकाकमाचीचतुर्विधः कुष्ठघ्नलेपःच दार्व्या रसं जनस्य च निंब
पटोलस्य खदिरसारस्य आरग्वधवृक्षकयोस्त्रिफलायाः सप्तपर्णस्य इति षट्कषाययोगाः कुष्ठघ्नाः सप्तमश्चातिसस्य
स्नाने पाने च हितस्तथाश्मश्चाण्वमारस्य आलेपनं प्रघर्षणमवचूर्णनमेव एव च कषायाः तैलघृतपाकयोगे च षांते
कुष्ठान्यर्थं त्रिफलानिंबपटोलं मंजिष्ठा रोहिणी वचा रजनी एष कषायोभ्यस्तो निहंति कफपित्तकुष्ठं एतैरेव च सर्पिः
सिद्धं वातोल्बणं जयति कुष्ठरोघना कटुजफलोत्पलमुस्तं दर्ली करवीरकासीसं एडगजनिंबपाठादुरालभावल्सोदशरव
दिरासनदारुनिंबाग्रं कुष्ठकर्तस्य कटुफलमूलकवी जानिरोहिणीकटुविडंगं च निक्तक्षारकार्वजंकं पिल्लुक सर्षपादी वीए
तैस्तैलं सिद्धं कुष्ठघ्नमेप एवचालेपः कुष्ठार्कतैल कटुफलमूलकवी जानिरोहिणी कटुका उद्वर्तनप्रकर्षणमवचूर्णनमे
पएवेरः स्वेलकारवीर करमोगोमत्रं चित्रविडंगं च कुष्ठेषु तैलयोगः सिद्धोयं तोभिषजा श्वेतकरवीर पल्लवमूलत्वग्वत्स
कोविडंगं श्च कुष्ठार्कमूलसर्षपाशिग्रुत्वग्रोहिणी कटुका एतैस्तैलं सिद्धं कल्कैः पादांशिकैर्गवां मूत्रादौ तैलं चतुर्गु
णमभ्यंगः कुष्ठकंडूघ्नः कटुकालां बीबीजं हेलु रोचनाहरिद्रे द्वे बृहती फलमेरंडः सविशालश्चित्रकोमूर्वा कासीसहिं
गुशिग्रुत्र्यूषणसुरदारुतुंबलविडंगं लांगलकीकूटजत्वक्चक्रदुरालभारोहिणी चैव सर्षपतैलं कल्कैरभिर्मूत्रे चतुर्गु

च·चि णेसाध्यं कंडूकुष्ठविनाशमभ्यंगाद्धतकफहंतकनकक्षीरी मेलामागाद्दंतीफलानिमूलंच जातीप्रवालसर्षपलशुनविडंगका
जत्वक् सप्तछदार्कपल्लवमूलत्वग्निंबचित्रकास्फोताः गुंजैरंडबृहतीमूलकसुरसार्जकफलानि कुष्टुंबरुपाठामूर्वाम
२३० लावइंथा एडगजकुटजशिग्रुत्र्यूषणभल्लातकक्षवकाः हरितालमवाक्पुष्पीतुच्छंकंपिल्लकोमनासंगः सौराष्ट्रीकासीसं
दार्वी त्वक्सर्जिकालवणं कल्केरेतैस्तैलंकरवीरकमूलपल्लवकषाये सार्षपमप्युन्मर्दनप्रघर्षणमवचूर्णनमेवचकेष्टः
श्वेतकरवीरकरसोगोमूत्रंचित्रकोविडंगंच कुष्ठेषुतैलयोगः वातैलंगोमूत्रंचतुर्गुणंसाध्यं कटुकालाबुरसाप्यं तस्मि
न्नसिध्मंमंडलान्याशुभिषग्घ्निषुगभ्यंगात्क्रमीश्चकंडूश्चविनिहन्यात् कुष्ठंतमालपत्रंमरिचंसमनःशिलंसकासीसं
तैलेनयुक्तमुषितंसप्ताहंभाजनेताम्रे तेनालिप्तंसिध्मंसप्ताहंधर्मसेविनोपैति मासान्नवंकिलासंस्नानंमुक्त्वाविशुध्यत
नोः सार्षपकरंजकोशातकानितैलान्यथेंगुदीनांचकुष्ठेषुहितान्याहुस्तैलंयच्चापिखदिरस्य जीवंतीमंजिष्ठदार्वीकंपि
ल्लुकंपयस्तुत्थं एषघृततैलपाकःसिध्मसिद्धेचसर्जरसःदेयःसमधूच्छिष्टोविपादिकानेनशाम्यतिस्वक्ता चर्मैककुष्ठ
किठिभंकुष्ठंचशाम्यत्यलसकंच किल्वण्ववराहरुधिरंपृथ्वीकासैंधवंचलेपःस्यात् लेपाजाभ्याःकुसुबकाणिकुष्ठंच
मंडलनुत् पूतिकादारुजटिलायसकरासीदगुमुद्गपर्ण्योवा लेपःसकाकनासोमंडलकुष्ठापहःसिद्धः चित्रकशोभांज
नकौगुडूच्यपामार्गदेवदारूणि खदिरोधवश्चलेपः श्यामारंतीद्रवंतीच लाक्षारसांजनैलाःपुनर्नवाचानिकुष्ठिनां
लेपःदधिमंडयुक्ताः सर्वेदेयाःपण्मारुतकफघ्नाः एडगकुष्ठसैंधवसौवीरकसर्षपैःकृमिघ्नैश्च कृमिकुष्ठसिध्ममंडल राम
दद्रुकुष्ठप्रशमेति एडगजःसर्जरसोमूलकबीजंचसिध्मकुष्ठनांकांजिकयुक्तंभिषजोमतमिदमुद्वर्तनंक्रमशः वासा
त्रिफलापानस्नानेचवर्तनेप्रदेहेच बृहतीसिंधयसेलाःससारिवारोहिणीचेनरवदिरावघातकडुलातरोहीनकलोध्र २३

कुटजधवनिंबाः सप्तछदकरवीराः शस्यंतेस्नानपानेषुजलवाप्यलोहकेसरपत्रप्लवचंदनमृणालानि भागोत्तराणिसिध्मं
प्रलेपनंपित्तकफजेषुकुष्ठे यष्ट्याह्वलोध्रपद्मकपटोलपिचुमंदचंदनरसाश्च स्नानेपानेहिताः स्युःशीतलाःपित्तकुष्ठिभ्यः
आलेपनंप्रियंगुर्हरेणुकावत्सकस्यचफलानि सातिविषाश्चसंसेव्याःसचंदनारोहिणीकटुकातिक्तःपलेप्रैलघृतैरभ्यं
गोरस्यमानकुष्ठेषुतैलैश्चंदनमधुकप्रपौंडरीकोत्पलयुतैश्च कुंदेप्रपतितिचा दाहेविस्फोटकेसचर्मदले शीताःप्रदेहसे
काश्चघनविरेकोघृतंतिक्तं खदिरघृतंनिंबघृतं दार्वीघृतमुत्तमंपटोलघृतंकुष्ठेषुभिषग्जितंसिद्धं त्रिफलात्वचोर्धपलि
काःपटोलपत्रंचकार्षिकाःशिष्टाःशेषाः कटुरोहिणीसनिंबायष्ट्याह्वात्रायमाणाच एषकषायःसाध्यःदत्वाद्विपलंमसू
रविदलानां त्रिसलिलकेषभागेशेषपूतोरसोग्राह्यः तेचकाषाया षट्पलेचतुःपलेसर्पिषश्चपक्तव्यं यावत्स्याद्दशपलंशे
षःपेयंततः तद्दाजपित्तकुष्ठंवीसर्पंवातशोणितंप्रबलं ज्वरदाहगुल्मविद्रधिविभ्रमविस्फोटकान्हन्यात् निंबपटोलं
दार्वीदुरालभांतिक्तकरोहिणींत्रिफलांकुर्यादर्धपलांशान् पर्पटकंत्रायमाणांच सलिलाढकसिद्धानांरसेष्टभाग
स्थितेक्षिपेत् चंदनकिराततिक्तकमागधिकास्त्रायमाणांच मुस्तंवत्सकबीजंकल्कीकृत्यार्धकार्षिकान्भागान्
नवसर्पिषःपलमेतत्सिद्धंघृतंपेयंकुष्ठज्वरगुल्मार्शोग्रहणीपांडामयश्वयथुहारी वीसर्पणपिडकाकंडूमदगंडनुत्ति
क्तं सप्तच्छदंप्रतिविषां शम्याकंतिक्तरोहिणीं पाठांमुस्तमुशीरंत्रिफलांपटोलपिचुमंदपर्पटकं धन्वयवासंचंद
नमुपकुल्येपद्मकंरजन्यौच षड्ग्रंथांसविशालां शतावरींसारिवेचोभे वत्सकबीजंवासांमूर्वाममृतांकिराततिक्तंच
कल्कान्कुर्यान्मतिमान् यष्ट्याह्वंत्रायमाणांच कल्कस्यचतुर्भागेजलमष्टगुणंरसोमृतफलानांद्विगुणाघृतप्रस्थंदेयं
तत्सर्पिःपाययेत्सिद्धं कुष्ठानिरक्तपित्तप्रबलान्यर्शांसिरक्तवाहीनि वीसर्पमम्लपित्तं वातासृक्पांडुरोगंच विस्फो

टकानसपामामन्मारंकामलांज्वरंकंडूं कुष्ठगुल्मपिडकानसृग्दरंगंडमालांचहन्यादेतत्सदा यः पीतंकालेप्यथावल्सर्पिः यो
च.चि. गांतरप्यजितान्महाविकारान्महातिक्तं खदिरस्यतुलाः पंचशिंशिपासनयोस्तुलेतुलार्धाः सर्वएवैतेकरंजारिष्टवेतसाः
२४. पर्पटः कुटजश्चैववृषः कृमिहरस्तथा हरिद्रेकृतमालश्चगुडूचीत्रिफलात्रिवृत् सप्तपर्णश्चसंक्षुण्णादशद्रोणेषुवारिणः
अष्टभागावशेषंतुकषायमवतारयेत् महातिक्तककल्कैस्तुल्यैस्तत्साधयेत् निहंतिसर्वकुष्ठानिपानाभ्यंगनिषेवणात्
महाखदिरमित्येतत्कुष्ठविकारनुत् दोषेहृतेपुनीतरक्तेचाभ्यंतरे कृतेशमने स्नेहेचकालयुक्ते नकुष्ठमतुवर्ततेसाध्यं
प्रपन्नकलसीकासक्तचश्रुतपुगाणश्चेपजन्तुदष्टेषु मूत्रंनिंबविडंगस्नानेपानेप्रदेहेच वृषकुटजसप्तपर्णाःकरवीरकरंज
निंबखदिराश्चस्नानेपानेलेपेकृमिकुष्ठनुदः सगोमूत्राः पानाहारविधानेप्रसेचनेधूपनेप्रदेहेच कृमिनाशनंविडंगंवि
शिष्टंनकुष्ठहाखदिरः एडगजः सविडंगोमूलान्यारग्वधस्यकुष्ठघ्नानि उद्दालनंचदंताः प्रवराहोश्चदंताश्च एडग
जःसविडंगोहरिद्रेनिशाराजवृक्षमूलंच कुष्ठोद्दालनमग्र्यं सपिप्पलीपाकलंयोज्यं श्वित्राणांप्रशमार्थंप्रयोक्तव्यंसर्वतो
विशुद्धानां श्वित्रेस्रंसनमग्र्यंमलपूरसइष्यतेसगुडः तंपीत्वास्निग्धो यथाबलंसूर्यपादसंतापंसेवेत विरिक्तश्च
त्र्यहंपिपासुः पिबेत्स्यांश्वित्रेंगेयस्फोटाजायंतेकंटकेनतान्भिंद्यात् स्फोटेषुनिःसृतेषुप्रातः पिबेत्पक्षं मलपूरंप्रियं
गुं शतपुष्पांचाम्भसामसक्तात्म्य पालाशंवाक्षारं यथाबलंफाणितोपेतं मद्वान्यत्कुष्ठघ्नंश्वित्राणांसर्वतोमूर्वपथ्यं ख
दिरोदकसंयुक्तंखदिरोदकमानमग्र्यंकासीसंरोचनांकनकपुष्पीविश्वत्राणांप्रशमनार्थंससैंधवंलेपनंदद्यात् कदलीक्षा राम
रयुतंवाक्षारसंदग्धंगवांरुधिरसंयुक्तं हस्तिमदाध्युषितं वामालत्याः क्षारकक्षारं नीलोत्पलंसकुष्ठं ससैंधवंहस्ति २५
मूत्रपिष्टंवा मूलकबीजंफल्गुजलेपः पिशंगवांपित्ते काकोदुंबरेकावासावल्गुजचित्रकगवांमूत्रेः पिष्टामनःशिलावा सं

युक्ताबर्हिपित्तेन लेपःकिलासहंताबीजान्यावल्गुजान्तिलाश्चगोपित्तमंजनेहेपिप्पल्यः कालेलोहरजः शुद्धाशोणितमोक्षैर्वि
रूक्षैर्न्नरुक्षैश्चसक्तनां श्वित्रंकस्यचिदेवप्रशाम्यतिक्षीणपापस्य दारुणंचारणंश्वित्रंकिलासंनामभिस्त्रिभिः यदुच्यतेचत्रि
विधंप्रदोषंप्रायस्तत्रतत् दोषेरक्ताश्रितेरक्तंताम्रंमांससमाश्रिते श्वेतंमेदःश्रितेश्वित्रंगुरुतच्चोत्तरोत्तरं अरक्तलोमतनुय
त्पांडुनातिचिरोत्थितं मध्यावकासेचोच्छ्रिलंतच्छ्वित्रंसाध्यमुच्यते संरक्तलोमचहुलंसन्निमंथसारस्यां यच्चवर्षगणोत्पन्नं
तच्छ्वित्रंनैवसिध्यति नचानृतानिकृतघ्नभावोनिंदागुरूणांगुरुधर्षणांचपापक्रियापूर्वकृतंचकर्महेतुः किलासस्यविरो
धिचान्नमिति भवतिचात्र हेतुर्द्रव्यंलिंगंविविधंश्रेष्ठ्यदोषाधिकादोषाः कुष्ठस्यचलिंगं समासतोदोषनिर्देशात् साध्या
साध्यंकष्टंकुष्ठंकुशपहाश्चयेयोगाः सिद्धाः किलासेहेतुलिंगंगुरुलाघवंशांतिं इतिसंग्रहः प्रणीतोमहर्षिणाकुष्ठनाशनेध्याये म
धतिबुभिर्वर्धनार्थंशिष्यायहिताय ॥ ॥इतिश्री चरकसंहितायांचिकि[illegible]स्थानेकुष्ठ[illegible]तंनामसप्त
मोध्यायः॥ अथातोराजयक्ष्मचिकि[illegible]तंव्याख्यास्यामः॥ इतिह॥ दिवौकसामृषिश्रेष्ठैः श्रुताः कथयतांकथाः का
मंव्यमनसंयुक्तापौराणीशशिनंप्रति रोहिण्यामपिसक्तस्यशरीरंनान्वरक्षतः अजगामाल्पतामिंदोर्देहःस्नेहपरिक्षयात्
दुहितृणामसंभोगाच्छेषाणांचप्रजापतेः क्रोधोनिःश्वासरूपेणमूर्तिमान्निःसृतोमुखात् प्रजापतेर्हिदुहितृः सप्तविंशतिमं
शुमान् भार्यार्थंप्रतिजग्राहनचसर्वास्ववर्तत गुरुणातमवज्ञानंभार्यासुसमवर्तिनं रजःपरीतमबलंयक्ष्माशशिनमाविशत् सो
भिभूतोतिबलिनागुरुक्रोधेननिष्प्रभः देवदेवर्षिसहितोजगामशरणंगुरुं अथचंद्रमसःशुद्धांमतिंबुध्वाप्रजापति प्रसादंस
मवानसौमिततोश्विभ्यांचिकित्सितः सविमुक्तग्रहश्चंद्रोविराजतिविशेषतः तेजसावर्धितोश्विभ्यां सत्वंशुद्धंमवापच क्रोधो
यक्ष्माज्वरोरोगएकोष्टाङः स्वसंज्ञकः सराज्ञः पूर्वमासीद्धिराजयक्ष्माततोमतः सयक्ष्माद्रुहतोह्यश्विभ्यांमानुषंलोकमागतः

च.चि. लब्धाश्चर्पूर्वं हेतुंसमाविशतिमानवान् अथथावलमारंभेवेगसंधारणंक्षयं यक्ष्मणःकारणंविद्याच्चतुर्थविषमाशनं युद्धाध्ययनभा
२५ राश्वलंघनप्लवनादिभिः पतनैरभिघातैर्वासाहसैर्वातथापरैः अयथाबलमारंभैर्जंतोरुरसिविक्षते वायुः प्रकुपितोदोषावुदीर्योभौ
प्रधावति सशिरःस्थशिरःशूलंकरोतिगलमाश्रितः कंठोध्वंसंचकासंचस्वरभेदमरोचकं पार्श्वेशूलंचपार्श्वस्थोवर्चोभेदंगुदेस्थितः
जृंभांज्वरंसंधिगतउरस्थश्चोरसाक्षतं क्षणनादुरसःकासात्रक्तंष्ठीवनेकफं अशोरेणोरसाक्षण्णुरः शूलनिपीडितंइतिसाहसिकंयक्ष्मा
रूपैरेतैःप्रपद्यते एष्यरामिमात्रसंभवसाहसं ह्रीमत्वाद्घृणित्वाद्वाभयाद्वावेगमागतं वातमूत्रपुरीषाणिगृह्णातिपदानरः न
दावेगप्रतीघातकफपित्तेसमीरयन् ऊर्ध्वंतिर्यगधश्चैवविकारानकरोत्यनिलः प्रतिश्यायंचकासंचस्वरभेदमरोचकं पार्श्वेशूलंशि
रःशूलंज्वरमंसावमर्दनं अंगमर्दमुहुश्छर्दिर्वर्चोभेदंत्रिलक्षणं रूपाण्येकादशैतानियक्ष्मायैरुच्यतेमहान् ईर्ष्योत्कंठाभयत्रासशो
कः क्रोधातिकर्शनात् अतिव्यवायानशनाच्छुक्रमोजश्चहीयते ततःस्नेहक्षयाद्वायुर्वृद्धोदोषावुदीरयन् प्रतिश्यायंज्वरकासमंगम
र्दंशिरोरुजं श्वासंभेदविड्भिंपार्श्वशूलंस्वरक्षयं करोतिचांसंसंतापमेकादशमहागदान् रूपाण्येकादशैतानियेनान्येकादशमहागदं
संप्राप्तराजयक्ष्माणंतथाप्राणक्षयप्रदं विविधान्यन्नपानानिवैषम्येणसमश्नतो जनयंत्यामयान्घोरान्विषमान्मारुतादयः स्रो
तांसितेषामर्दीनांवैषम्याद्विषमांगताः रुध्वारोगायकल्पंते पुष्यंतिनचधातवः प्रतिश्यायंप्रसेकंचकासंछर्दिमरोचकं ज्वरंसंतापमि
तापंचछर्दनंरुधिरस्यच पार्श्वेशूलंशिरःशूलंस्वरभेदमथापिच कफपित्तानिलकृतलिंगविषमाशनं इतिव्याधिसमूहस्यरोगरा
तेःसमुत्थितं रूपमेकादशविधंहेतुश्चोक्तश्चतुर्विधः पूर्वरूपंप्रतिश्यायोदौर्बल्यंदोषदर्शनं अदोषेष्वपिभावेषुकायदौर्बल्यदर्शनं ग।·
घृणित्वमश्नतश्चापिबलमांसपरिक्षयः स्त्रीमद्यमांसप्रियताप्रियतावगुंठनं मक्षिकाघुणकेशानांतृणानांपतनानिच प्रा २८
योन्नपानेकेशानांनखानांचातिवर्धनं पतत्रिभिः पतंगैश्चश्वापदैश्चाभिधर्षणं स्वप्नेकेशास्थिराशीनांभस्मनश्चाधिरोहणं

जलाशयानांशैलानांवनानांज्योतिषामपि शुष्यतांक्षीयमाणानांपततांयच्चदर्शनं प्राग्रूपंबहुरूपस्यतज्ज्ञेयंराजयक्ष्मणः रूपंतु
स्ययथोद्दिष्टंनिर्दिक्ष्यामिसभेषजं यदास्वेनोष्मणापाकंशारीरायांतिधातवः स्रोतसाचयथास्वेनधातुःपुष्यतिधातुना स्रोतसा
नांनिरोधाच्चरक्तादीनांचसंक्षयात् धातूष्मणांचापचयाद्राजयक्ष्माप्रवर्तते तस्मिन्कालेपचत्यग्निर्यदन्नंकोष्ठसंश्रितं मलीभ
वतितत्प्रायःकल्पतेकिंचिदोजसे तस्मात्पुरीषंसंरक्ष्यंविशेषाद्राजयक्ष्मणः सर्वधातुक्षयार्तस्यबलंतस्यहिविड्बलं रसःस्रोतःसु
रुद्धेषुस्वस्थानस्थोविदह्यते उत्कुर्ध्वंकासवेगेनबहुरूपःप्रवर्तते जायंतेव्याधयश्चात्रषडेकादशवापुनः येषांसंघातयोगेनरा
जयक्ष्मेतिकथ्यते कासांसतापोवैस्वर्यं ज्वरःपार्श्वशिरोरुजा शोणितश्लेष्मणोश्छर्दिःश्वासःकोष्ठामयोरुचिः रूपाण्येकादशैतानि
यक्ष्मणःषडिमानिच कासोज्वरःपार्श्वशूलंस्वरवर्चोगदोरुचिः सर्वैर्र्धैस्त्रिभिर्वापिलिंगैर्मांसबलक्षये युक्तोवर्ज्यश्चिकित्स्य
स्तु सर्वरूपोप्यतोन्यथा प्राणमूलंहितंश्लेष्माद्धिरंपित्तमेवच मारुतात्मातशिरसःश्यायनेमारुतेप्रति प्रतिश्यायस्ततोघोरा
जायतेदेहकर्शनः तस्यरूपंशिरःशूलंगौरवंघ्राणविप्लवः ज्वरःकासःकफोत्क्लेशःस्वरभेदोरुचिक्लमः इंद्रियाणामसामर्थ्यंय
क्ष्माचातःप्रजायते पिच्छिलंबहलंविस्रंहरितंश्वेतपीतकं कासमानोराजयक्ष्मीनिष्ठीवतिकफानुगं अंसपार्श्वाभितापश्चसंता
पःकरपादयोः ज्वरःसर्वांगगश्चेतिलक्षणंराजयक्ष्मणः वातात्पित्तात्कफाद्रक्तात्कासवेगात्सपीनसात् स्वरभेदोभवेत्तत्र
रूक्षामश्चलस्वरः पित्ताद्दाहयतेवक्त्रंदाहितांकंठतालुका कफात्संदोविबद्धश्चस्वरःखुरखुरायते सन्नोरक्तविबद्धत्वात्स्वरःकृ
च्छ्रात्प्रवर्तते कासातिवेगात्कषणपीनसात्कफवातिकः पार्श्वशूलंत्वनियतंसंकोचायामलक्षणं शिरःशूलंससंतापंयक्ष्मणः
स्यात्सगौरवं अभिष्यन्नैःशरीरैस्तुयक्ष्मिणोविषमाशनात् कंठात्प्रवर्ततेरक्तंश्लेष्माचोत्क्लिष्टसंचितः रक्तंविबद्धमार्गत्वान्मांसा
दीन्नप्रवर्तनेकसरं पलंकसादेवदारुचंदनंमधुकंघृत वीरावलाविदारीचचूर्णंगंधापुनर्णवा शृंगवेरोपयस्याश्चकल्कं

च·चि· मधुकं घृतं यथा एते श्लोकार्थे प्रदेहाः परिकीर्तिताः शान्ताः संसृष्टदोषाणां शिरःपार्श्वांसशूलिनां नावनं धूमपानानि स्नेहाश्चोत्तरभक्ति-
२८ काः तैलाभ्यंगयोगांश्च वस्तिकर्म तथापरं शृंगालाबुजलौकाभिः प्रदिश्य अथ तेन वा शिरःपार्श्वांसशूलेषु रुधिरं तस्य निर्हरेत्
प्रदेहाः सघृतश्चात्र पद्मकोशीरचंदनैः दूर्वामधुकमंजिष्ठकेशरैर्वा घृतप्लुतैः प्रपौंडरीकं पद्मस्य केसरं नीलमुत्पलं कसेरुको
पयस्या च ससर्पिष्कं लेपनं चंदनाद्येन तैलेन शतधौतेन सर्पिषा अभ्यंगः पयसा सेकः शस्तश्च मधुकांबुना माहेंद्रेण सुशी-
तेन चंदनादिसृतेन वा परिषेकप्रयोक्तव्य इति संशमनी क्रिया दोषाधिकानां वमनं शस्यते च विरेचनं स्नेहस्वेदोपपन्नानां
सस्नेहं यच्च कारणं शोषी मुंचति गात्राणि पुरीषस्रंसनादपि अबलापेक्षिकी मात्रा किं पुनर्यो विरिच्यते योगात् संशुद्धकोष्ठानां कासे
श्वासे स्वरक्षये शिरःपार्श्वांसशूले पुत्सितानेतान् प्रयोजयेत् बलाविदारी आमाशयसमुत्क्लिष्टं वदनात्कुंचमेति च वातश्लेष्मवि-
बधत्वाद्रसः स्वास्मृतनि दोषैरुपहते चाग्नौ सपिच्छमपि सार्यते पृथग्दोषैः समस्तैश्च जिह्वाहृदयसंश्रितैः जायते रुचिराहारे
द्विष्टैर्दृश्यमानैः कषायतिक्तमधुरैर्विद्यान्मुखवरसैः क्रमात् वातादिभिश्च जातां मानसी दोषदर्शनं अरोचकाः कासवेगा
दोषोत्क्लेशाद्वमत्यपि छर्दियां साविकाराणामन्येषामप्युपद्रवः तत्र यः पूर्वमेवानेः शुष्ककासी हलप्रभः शिरःपार्श्वांसशूली
च नेत्र्यादाने शोषिण कासदाहज्वरार्त्तोयस्तृष्णाकृमसमन्वितः निरूस्य पित्तनिशीथे तं विधास्त्रित्त शोषिणं सर्वलिंदोषजा
यस्माद्दोषाणां नु बलाबलं परीक्ष्याथ क्रियां वैद्यः शोषिणं समुपाचरेत् प्रतिश्याये शिरःशूले कासश्वासे ज्वरग्रहे पार्श्वशूले
च विविधा क्रियाः साधारणीः शृणु पीनसे स्वेदमभ्यंगं धूममालेपनानि च परिषेकावगाहांश्च यावकं वा यथाभवच लवणाम्लक राम
टूष्णांश्च रसान् स्नेहोपसंहितान् लावतित्तिरिपेपादविचर्याममधुकेन वा सिद्धं सलवणं सर्पिर्नश्यस्वर्यमनुत्तमं प्रपौंडरी-
कमधुकपिप्पलीबृहतीबला साधितं क्षीरसर्पिश्च तत्स्वर्यं नावनं घृतं शिरःपार्श्वांसशूलघ्नं कासश्वासनिबर्हणं प्रयोज्यमानं बहुशो

पंचकोलं तन्निष्कं दशमूलेन पयसा सिद्धं मांसरसेन च बलागर्भं घृतं सद्यो रोगानेतान् प्रबाधते पुनस्तस्योपरिसिध्ये वायथातिव्यहारितं
रास्नाघृतं वा सक्षीरं सक्षीरं वा बलाघृतः लेहान् कासापहान् श्वासहिक्काज्वरनिबर्हणान् शिरःपार्श्वांसशूलघ्नान् स्नेहांश्चैव प्रचक्षते
पलं खर्जूरमृद्वीकामधुकैः सपिप्पलीकैर्वैस्वर्यकासश्वासज्वरापहं दशमूलशृतात् क्षीरात्सर्पिर्यदुदियात् नवं सपिप्पलीकं सक्षौ-
द्रं तत्परं स्वरबोधनं शिरःपार्श्वांसशूलघ्नं कासश्वासज्वरापहं गणं पंचभिः पंचमूलैर्वा शृताद्यदुद्धियाद्घृतं पंचानां पंचमूलानां रसे
क्षीरचतुर्गुणे सिद्धं सर्पिर्जयेत् स्वेतद्यक्ष्मणः सप्तकं बलं खर्जूरं पिप्पली द्राक्षा पथ्या शृंगी दुरालभा त्रिफला पिप्पली मुस्तं शृंगाटो गु-
डशर्कराः वीरासटी पुष्कराख्यं सुरसः शर्करा गुडः नागरं चित्रकोलाजा पिप्पल्यामलकं गुडः शर्करा विहितानेतान् लिह्यात्
न मधुसर्पिषान् कासश्वासहरान् स्वर्यान् शिरःपार्श्वरुजापहान् सितोपलां तुगाक्षीरीं पिप्पलीं बहुलां त्वचां अन्त्यादूर्ध्वं द्वि-
गुणितं लेहयेन्मधुसर्पिषा चूर्णितं प्राशयेद्वैतच्छ्वासकासज्वरापहं सुप्तजिह्वारोचकिनमल्पाग्निं पार्श्वशूलिनं हस्तपादांसदा-
हेषु ज्वरे रक्ते तथोर्ध्वगे वासाघृतं शतावर्याः सिद्धं वा परमं हितं श्वदंष्ट्रां मद्दुरालंभां चतस्रः पर्णिनीर्बलां भागान् पलोन्मितान् कृ-
त्वा न पलं पर्पटकस्य च पचेद्दशगुणे तोये दशभागावशेषितं रसे सुपूते द्रव्याणामेषां कल्कान् प्रदापयेत् शटीपुष्करमूलं पिप्पली-
त्रायमाणयोः तामलक्याः किराततिक्तस्य कुटजस्य च फलानां सारिवायाश्च सुपिष्टान् कर्षसंमितान् तैः साधयेत् सुतत्प्रस्थं
क्षीराद्विगुणितं भिषक् ज्वरं दाहं भ्रमं कासं अंसपार्श्वशिरोरुजं तृष्णां छर्दिमतीसारमेतत्सर्पिर्व्यपोहति जीवंतीमधुकं द्राक्षाफ-
लानि कुटजस्य च शटीपुष्करमूलं च व्याघ्रीं गोक्षुरकं बलां नीलोत्पलं तामलकीं त्रायमाणां दुरालभां पिप्पलीं च समं पिष्ट्वा घृतं
वैद्यो विपाचयेत् एतद्व्याधिसमूहस्य रोगराजः समुत्थितं रूपमेकादशविधं सर्पिरग्र्यं निहंत्यपोहति बलां स्थिरां पृश्निपर्णीं
बृहतीं सनिदिग्धिकां साधयित्वा रसे तेन पयोभागैः समनागरं द्राक्षाखर्जूरसर्पिर्भिः पिप्पल्या च शृतं सह सक्षौद्रं ज्वरकासघ्नं

च·चि·
२३

स्वयं चैव प्रयोजयेत् अजायाः पयसश्चैव प्रयोगो जांगला रसाः यूषार्थे चणका मुद्गा मकुष्ठाश्चोपकल्पिताः ज्वराणां शमनीयोयः
पूर्वोक्तश्च क्रियाविधिः यक्ष्मिणां ज्वरदाहघ्नः ससर्पिष्कः प्रशस्यते कफप्रसेके बलवान् श्लैष्मिकश्छर्दयेन्नरः पयसा फलयुक्तेन
मधुरेण रसेन वा सर्पिष्मत्या यवाग्वा वा वामनीयोपसिद्धया वमितोपाचलघ्वन्नमादद्यात्तस्य दीपनं माहिकारिषं मधुरासी
धुंगाधूमयाचकं जांगलानि च शल्यानि सेवमानः कफं जयेत् श्लेष्मणोतिप्रसेकेन वायुः श्लेष्माणमस्यति कफप्रसेकं तं वि
द्वान् स्निग्धोष्णेनैव निर्जयेत् क्रिया कफप्रसेके न तथा सिव प्रशस्यते ऋघानि चान्नपानानि वातघ्नानि गुरूणि च प्रायेणोप
हिताग्नित्वात् समिचलघूनिभतिसार्येन प्राप्नाति चास्यैवेरस्यं चान्नमभिविंदति तस्याग्नेर्दीपनान् योगानतिसारनिवर्हणान्
कुर्याच्छुचिक्कागानदपादरुचिप्रतिसाधनान् सनागरादग्यवापालव्यास्तंडुलांबुना पिबेत्स्यवाग्जीर्णे च चांगेरीतक्र
दाडिमैः पाठाबिल्वयवानीभिश्चयाजध्यनक्रसंयुक्तं दुरालभा शृंगवेरं पाठा च सह कट्फलया जंबाम्रबिल्वमध्यं च सकपित्थं स नाग
रं पेयामंडेन पातव्यमतीसारनिवृत्तये एतानेव च योगांस्त्रीन् पाठादीन् कारयेत् खडान् सयूषधान्यान् साम्लान् रसान् सां
ग्राहिकान् परान् वेतसार्जुनजंबूनां मृणालकृष्णागंधयोः श्रीपर्ण्या मदयंत्याश्च यूथिकायाश्च पल्लवाः मातुलिंगस्य धातक्या
दाडिमस्य च कारयेत् स्नेहाम्ललवणोपेतान् खडान् सांग्राहिकान् परान् चांगेर्याश्चुक्रिकायाश्च दुग्धिकायाश्च कारयेत्
खडान् दधिसरोपेतान् ससर्पिष्कान् सदाडिमान् मांसानां लघुपाकीनां रसाः सांग्राहिकैर्युताः व्यंजनार्थे प्रशस्यंते भोज्यार्थे
रक्तशालयः स्थिरादिपंचमूलीयं जलपानं प्रशस्यते तक्रं सुरा ससचुक्रीका दाडिमस्याथवा रसः इत्युक्तं भिन्नशकृतां दीपनं राम
ग्राहि भेषजं वक्ष्याम्यूर्ध्वं रुचिकरं मुखवैरस्यनाशनं द्वौ कालौ दंतपवनं भक्षयेन्मुखधावनं तद्वत्प्रक्षालयेदास्यं धारयेत्क ८२
वलग्रहान् पिबेद्धूमं ततो मृष्टमद्यादीपनरोचनं भेषजं पानमन्नं च हितमिष्टोपकल्पितं त्वङ्मुस्तमेला धान्यानि मुस्त

मामलकत्वचः त्वक्दार्व्योयवान्याश्च पिप्पल्यस्तेजवत्यापि यवानी तिंतिडीकं च पंचैते मुखधावनाः श्लोकपादेषु विहिता रोचना
विहिता रोचनास्तस्य शोधनाः गुलिका धारयेदास्ये चूर्णैर्वा धावयेन्मुखं एषामालोडितानां वा धारयेत्कवलग्रहान् सुरामा
ध्वीकरीधूनां तैलस्य मधुसर्पिषोः कवलान् धारयेदिष्टान् क्षीरस्येक्षुरसस्य च यवानी तिंतिडीकं च नागरं साम्लवेतसं दा
डिमं बदरं चाम्लं कार्षिकाण्युपकल्पयेत् धान्यसौवर्चलाजाजीवरांगं चार्धकार्षिकं पिप्पलीनां शतं चैकं द्वे शते मरिचस्य
च शर्करायाश्च चत्वारि पलान्येकत्र चूर्णयेत् जिह्वाविशोधनं हृद्यं तच्चूर्णं भक्तरोचनं हृत्प्लीहपार्श्वशूलघ्नं विबंधानाहनाशनं
कासश्वासहरं ग्राहि ग्रहण्यर्शोविकारनुत् तालीसपत्रं मरिचं नागरं पिप्पली शुभाः यथोत्तरं भागवृद्ध्या त्वगेले चार्धभा
गिके पिप्पल्यष्टगुणा चात्र प्रदेया शर्करा बुधैः कासश्वासारुचिहरं तच्चूर्णं दीपनं परं हृत्पांडुग्रहणीरोगप्लीहशोषज्वरा
पहं छर्द्यतीसारशूलघ्नं मूढवातानुलोमनं कल्पयेद्गुडिकाश्चैतच्चूर्णं पक्त्वा सितोपलं गुडिका ह्यग्निसंयोगाच्चूर्णाल्लघुतराः स्मृ
ताः शुष्यतां क्षीणमांसानां कल्पितानि विधानवित् दद्यान्मांसादमांसानि बृंहणानि विशेषतः शोषिणे बृंहणं दद्याच्छ्येनम
त्स्यशब्देन चोरगान् ... मत्स्यान्त्रशब्देन दद्याद्दुंडुभानपि लोपाकान् स्थूलनकुलान् बिडालांश्चोपकल्पितान् शृगालशा
वांश्च भिषक् शशशब्देन दापयेत् सिंहानृक्षांस्तरक्षूंश्च व्याघ्रानेवं विधांस्तथा मांसादान् मृगशब्देन दद्यान्मां
सविवृद्धये गजखड्गतुरंगाणां वेसवाराकृतं भिषक् दद्यान्महिषशब्देन मांसं मांसाभिवृद्धये मांसेनोपचितांगानां मां
संमांसकरं परं नैकेन लाघवाभ्यस्तं विशेषान्मृगपक्षिणां मांसानि यान्यनभ्यासादनिष्टानि प्रयोजयेत् तेषूपधासुखं भु
ंजंतयाशानि तानि हि जानन् जुगुप्सितं नैव यो जग्धं वा पुनरुल्लिखेत् तस्माच्छद्मोपसिद्धानि मांसान्येतानि दापयेत्
बर्हितित्तिरदक्षाणां हंसानां शूकरोष्ट्रयोः खरगोमहिषाणां च मांसं मांसकरं परं योनिरष्टविधा चोक्ता मांसानामन्नपानिके ॥

तांपरं। रागिषाडवान्दद्यान्मांसानि शोषिणे प्रसहा भूशयानूपवारिजा वारिचारिणः। आहारार्थं प्रदातव्या मात्रया वातशोषिणे। प्रतुदा विष्किराश्चै
व धन्वजाश्च मृगद्विजाः। कफपित्तपरीतानां प्रयोज्याः शोषरोगिणां॥ विधिवत्सूपसिद्धानि मनोज्ञानि मृदूनि च। रसवंति सुगंधीनि मांसान्येता
नि भक्षयेत्॥ मांसमेवाश्नतः शोषं माध्वीकं पिबतोऽपि च। नियतस्याल्पचित्तस्य चिरं कायेन तिष्ठति। वारुणीमंडनित्यस्य बहिर्मार्जनसेविनः। अ
विधारितवेगस्य यक्ष्मा न लभतेऽन्तरं। प्रसन्नां वारुणीं सीधुमरिष्टानासवान्मधु यथार्हमनुपानार्थं पिबेन्मांसानि भक्षयेत्। मांसादमांस
स्वरसे सिद्धं सर्पिः प्रयोजयेत्। सक्षौद्रं पयसा सिद्धं सर्पिर्दशगुणेन वा। सिद्धं मधुरकैर्द्रव्यैर्दशमूलकषायकैः। क्षीरमांसरसोपेतं घृतं शो
षहरं परं। पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः। सयावशूकैः सक्षीरैः स्रोतसां शोधनं घृतं। रास्नाबलागोक्षुरकस्थिरावर्षाभुसा
धितं। जीवंतीपिप्पलीगर्भं सक्षीरं शोषनुद्घृतं। यवाग्वा वा पिबेन्मात्रां लिह्याद्वा मधुना सह। सिद्धानां सर्पिषामेषामद्यादन्नेन वा स
ह। शुष्यतां मे परिदिष्टो विधिराभ्यवहारिकः। बहिःस्पर्शनमाश्रित्य वक्ष्याम्यतः परं विधिं। स्नेहक्षीरांबुकोष्ठं तं स्वभ्यक्तमवगाहयेत्।
स्रोतोविबंधमोक्षार्थं बलपुष्ट्यर्थमेव च। उत्तीर्णं मिश्रकैः स्नेहैः पुनरक्तं सुखैः करैः। मृद्नीयात्सुखमासीनं सुखं चोत्सादयेन्न
रं। जीवंतीं शतवीर्यां च विकसां सपुनर्नवां। अश्वगंधामपामार्गं तर्कारीं मधुकं बलां। विदारीं सर्षपान्कुष्ठं तंडुलानतसीफलं। माषां
स्तिलांश्च किण्वं च सर्वमेकत्र चूर्णयेत्। यवचूर्णं त्रिगुणं च दध्ना युक्तं समाक्षिकं। एतदुत्सादनं कार्यं पुष्टिवर्णबलप्रदं। गौरसर्ष
पकल्केन गंधैश्चापि सुगंधिभिः। स्नायादृतुसुखैस्तोयैर्जीवनीयौषधैः शृतैः। गंधैः समाल्यैर्वासोभिर्भूषणैश्च विभूषितः। स्पृश्यानसं
स्पृश्य संस्पृश्य देवतान्समभिषग्द्विजान्। इष्टवर्णरसस्पर्शगंधवत्पानभोजनं। इष्टमिष्टैरुपहितं हितमद्यात्सुखप्रदं। समातीतानि राज
धान्यानि कल्पनीयानि शुष्यतां। लघून्यहीनवीर्याणि स्वादूनि गंधवंति च। यच्चोपदेक्ष्यते किंचित्क्षतक्षीणचिकित्सिते यक्ष्मिणस्तत्प्र २९
योक्तव्यं बलमांसाभिवृद्धये। अभ्यंगोत्सादनैश्चैव स्नानैरवगाहैर्विमार्जनैः। बस्तिभिः क्षीरसर्पिर्भिर्मांसैर्मांसरसौदनैः। इष्टैर्मद्यैर्मनोज्ञा

नां गंधानामुपसेवनैः। सुहृत्तिर्विविधैः स्नानैर्वालैरपि हितप्रियैः। सुहृदां रमणीयानां प्रमदानां च दर्शनैः। गीतवादित्रशब्दैश्च प्रियश्रुतिभि
रेव च। हर्षणाश्वासनैर्नित्यं गुरूणां समुपासनैः। ब्रह्मचर्येण दानेन तपसा देवतार्चनैः। सत्येनाचारयोगेन मंगलैरप्यहिंसया। वैद्यविप्रार्च
नाच्चैव रोगराजो निवर्तते। यया प्रयुक्तया चेष्ट्या राजयक्ष्मा पुरा जितः। तां वेदविहितामिष्टिमारोग्यार्थी प्रयोजयेदिति॥ तत्र श्लोकौ। प्रागु
त्पत्तिर्निदानानि प्राग्रूपं रूपसंग्रहः। समासव्यासतश्चोक्तं भेषजं राजयक्ष्मणः। नाम हेतुरसाध्यत्वं साध्यत्वं कृच्छ्रसाध्यता। इत्ययं सं
ग्रहः कृत्स्नो राजयक्ष्मचिकित्सितः॥ ॥ इति श्रीचरकसंहितायां चिकित्सितस्थाने राजयक्ष्मचिकित्सितं नामाष्टमो
ऽध्यायः॥ अथात उन्मादचिकित्सितं व्याख्यास्यामः। इति ह ०॥ बुद्धिस्मृतिज्ञानतपोनिवासः पुनर्वसुः प्राणभृतां शरण्यः। उन्मादहे
त्वाकृतिलक्षणानि कालेऽग्निवेशाय शशंस पृष्टः। विरुद्धदुष्टाशुचिभोजनानि प्रधर्षणं देवगुरुद्विजानां। उन्मादहेतुर्भयहर्षपूर्वो मनोभि
घातो विषमाश्च चेष्टाः। तैरल्पसत्त्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य। स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयंत्याशु नरस्य चे
तः। धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च। अबद्धवाक्यं हृदयं च शून्यं सामान्यमुन्मादगदस्य लिंगं। स मूढचेता न सुखं
न दुःखं नाचारधर्मौ कुत एव शांतिः। विंदत्यपास्तस्मृतिबुद्धिसंज्ञो भ्रमत्ययं चेत इतस्ततश्च। समुद्भ्रमं बुद्धिमनःस्मृतीनामुन्मादमा
गंतुनिजोत्थमाहुः। तस्योद्भवं पंचविधं पृथक्तु वक्ष्यामि लिंगानि चिकित्सितं च। रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनि
लोऽतिवृद्धः। चिंतादिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहंति शीघ्रं। अस्थानहासस्मितनृत्यगीतवागंगविक्षेपणरोदनानि।
पारुष्यकार्श्यारुणवर्णता च जीर्णे बलं चानिलजस्य रूपं। अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैश्चितं पित्तमुदीर्णवेगं। उन्मादमत्युग्र
मनात्मकस्य हृदि स्थितं पूर्ववदाशु कुर्यात्। अमर्षसंरंभविनग्नभावाः संतर्जनाभिद्रवणौष्ण्यरोषाः। प्रच्छायशीतान्नजलाभिलाषाः पि
ता च भाः पित्तकृतस्य लिंगं। संपूरणैर्मंदविचेष्टितस्य सोष्मा कफो मर्मणि संप्रवृद्धः। बुद्धिं स्मृतिं चाप्युपहंति चित्तं प्रमोहयन्संजनये

MEMORIAL (library stamp)

च.चि. हिक्काध्मानं बाह्वोश्चितं मंदमेवोचकम्पनादीविविक्तप्रियमाप्तिनिद्रा छर्दिश्च लाला लं च भुंक्ते न बलादि शौचं च कफात्मकस्य सः संनिपातः
२९. प्रभवोऽतिघोरः सर्वैः समस्तैः स तु हेतुभिः स्यात् सर्वाणि रूपाणि बिभर्ति तादृग्विरुद्धभैषज्यविधिर्विवर्ज्यः देवर्षिगंधर्वपिशाचयक्षरक्षःपि
तॄणामभिधर्षणानि आगंतुहेतुर्नियमव्रतादि मिथ्याकृतं कर्म च पूर्वदेहे अमर्त्यवाग्विक्रमवीर्यचेष्टा ज्ञानानि विज्ञानबलादिभिर्यः उन्मादका
लोऽनियतश्च यस्य भूतोत्थमुन्मादमुदाहरंति प्रदूषयंतः पुरुषस्य देहं देवादयस्ते हि गुणप्रभावैः विशंत्यदृश्यास्तरसा यथैव छाया तपो दर्प
णमर्यकांतौ आघातकालस्तु स पूर्वरूपः प्रोक्तो निदानस्य पराक्रमाद्यैः उन्मादरूपाणि पृथग्निबोध कालं च गम्यं पुरुषांश्च तेषां तद्यथा सौ
म्यदृष्टिं गंभीरमधृष्यमकोपनमस्वप्नभोजनाभिलाषिरोचकाविपाकपीनं पित्रभिहन्मत्तं विद्यात् चंडं साहसिकं तीक्ष्णं गंभीरमधृष्यम
मुखवाद्यनृत्तगीतान्नमाल्यभूषणगंधरक्तवस्त्रबलिकर्महास्यकथायोगप्रयोगप्रियं शुभगंधमिति गंधर्वोन्मत्तं विद्यात् असकृत्स्वप्नरोदन
हास्यनृत्यगीतगीतवाद्यपाठकथान्नपानस्नानमाल्यधूपगंधरतिं रक्तविप्लुताक्षं द्विजातिवैद्यपरिवादिनं रहस्यभाषिणमिति यक्षोन्मत्तं वि
द्यात् नष्टनिद्रमन्नपानद्वेषिणमनाहारमप्यतिबलिनं शस्त्रशोणितमांसरक्तमाल्याभिलाषिणं संतर्जकमिति राक्षसोन्मत्तं विद्यात् हासिनं प्र
स्वप्नचित्तं स्नानमलं म मानं नृत्तगीतभाषिणं वस्त्रावभाषिणं संकटकूटमलिनरथ्याचेलतृणाश्मकाष्ठारोहणरतं संभिन्नरूक्षवर्णस्वरं
नग्नं विधावंतं नैकत्र संतिष्ठमानं दुःखान्यावेदयंतं नष्टस्मृतिं च पिशाचोन्मत्तं विद्यात् तत्र प्रहासनृत्यप्रभानं देवविप्रवैद्यद्वेषावज्ञा
भिः स्तुतिवेदमंत्रशास्त्रोदाहरणैः काष्ठादिभिरात्मपीडनेन च ब्रह्मराक्षसोन्मत्तं विद्यात् आचारतपःस्वाध्यायकोविदं नराः प्रायः शुक्ल
प्रतिपदि त्रयोदश्यां च देवताः स्नानशुचिविविक्तसेवितं धर्मशास्त्रश्रुतिकाव्यकुशलं प्रायः षष्ठ्यां नवम्यां च ऋषयो मातृपितृगुरुवृद्ध ग्राप
सिद्धाचार्योपसेविनं प्रायो दशम्यां नवम्याममावास्यायां चेति पितरो गंधर्वा नृत्यगीतवादित्ररतिं परदारगंधमाल्यप्रियं चोक्षाचारमायो द्वा
दश्यां चतुर्थ्यां चेति सत्वबलरूपगर्वशौर्ययुक्तं माल्यानुलेपनहास्यप्रियमतिवाक्प्रचरणं प्रायः शुक्लैकादश्यां सप्तम्यां च यक्षाः स्नाध्या

मनपोऽन्वयशौचं ब्राह्मणमब्राह्मणं ब्रह्मवादिनं शून्यमालिनं देवागारसलिलक्रीडनरतं प्रायः शुक्लपंचम्यां पौर्णमास्यां चतुर्दश्यां च दूषयं
चेति ब्रह्मराक्षसाः रक्षःपिशाचास्तु हीनसत्त्वमपि भूतस्तैन्यं स्नानप्रायो रित्री वा नृत्ती वा छर्मो वा पुरुषान् छिद्रमवेक्ष्याभिधर्षयंति। त्वपरि सं
ख्येयानां प्रहाणामाविष्कृतमित्यशेषग्रहाख्याताः सर्वेष्वपि तु खल्वेतेषु ब्रह्मस्तु बुधस्योपसर्गं भान्ति: शंकमन्येषामात्मनिनाविलिया
नयनमप्रमाध्यात्मयः तथास्वश्रुतनेत्रो मेदुप्रस्वन्नाक्षः कृतजिह्वः प्रश्रुतनासः छिद्यमानमर्माप्रतिहन्यमानरूपाणि: सततं निकूज
न दुर्वर्णस्तृष्णार्तः पूतिगंधिश्चाहिंसार्थिना त्वमनोज्ञेयः तं परिवर्जयेत् रत्यर्थकामो भारिनौ तु भिषगभिप्रायाचाराभ्यां बुध्वा तं तमो
पहारबलिमिश्रेणभेषज्यमंत्रविधिनोपचारयेत् तत्र दृयो मंत्रैरपि निजागंतुनिमित्तनिमित्तयोरुन्मादयोः समासविस्तराभ्यां भेष
जविधिमनुव्याख्यास्यामः उन्मादे वातजे पूर्वं स्नेहपानं विशेषवित् कुर्यादावृतमार्गे तु सस्नेहं मृदु संशोधनं कफपित्तोद्भवेऽप्यादौ
वमनं सविरेचनं स्निग्धस्विन्नस्य कर्तव्यं शुद्धे संसर्जनक्रमः निरूहं स्नेहबस्तिं श्च शिरसश्च विरेचनं ततः कुर्याद्यथादोषं तेषां भू
यस्त्वमाचरेत् हृत्प्रेंद्रियबुद्धीनां शुद्ध्यैः पुनश्च मनवादिभिः मनःप्रसादं लभतेस्मृतिसंज्ञां च विंदति शुद्धस्याचारविभ्रंशेतो। एणं नावनमंज
नं ताडनं च मनोबुद्धिदेहसंवेजनं हितं यः शक्तो विनयत्यागः संयम्य सुदृढैस्तत्त्वे अपेत्य लोपृकाष्ठोपसेरोध्यश्चनतो गृहे तजे
नं त्रासनं दानं सांत्वनं हर्षणं भयं विस्मयो विस्मयोहेतुर्नयतिसत्कृतिं मनः प्रदेहोत्सादनाभ्यंगधूमपानं च सर्पिषा प्रयोक्तव्यं मनो
बुधिस्मृतिसंज्ञाप्रबोधनं सर्पिःपानादिरागंतोर्मंत्रादिश्चेष्यते विधिः अतः सिध्दतमान्योगान् शृणून्मादविनाशनान् हिंगुसौव
र्चलव्योषैर्द्विपलांशैर्घृताढकं चतुर्गुणेन गोमूत्रेण सिद्धमुन्मादनाशनं विशालात्रिफलाकौन्तदेवदारुवेलवालुकं स्थिरानंत हरिद्रे द्वे सारि
वे द्वे प्रियंगुका नीलोत्पलैलामंजिष्ठादंती दाडिमकेसरं तालीसपत्रं बृहती मालत्याकुसुमं नवं विडंगं पृश्निपर्णी च कुष्ठं चंद
नपद्मकैः अष्टाविंशतिभिः कल्कैरेतैः कर्षसमन्वितैः जले चतुर्गुणे दत्वा घृतप्रस्थं विपाचयेत् अपस्मारज्वरकासशोषमद

॥नलेक्षणे वातरक्तप्रतिश्यायेतृतीयकचतुर्थके। दद्यान्मूत्रकृच्छ्रेचविसर्पोपहतेषुच कंडूपाण्ड्वामयोन्मादविषमेहगरेषुच देवोपहत
च॰चि॰ चित्तानांगद्गदानामचेतसां शस्तंस्त्रीणांचवंध्यानांधन्यमायुर्बलप्रदं अलक्ष्मीपापरक्षोघ्नंसर्वग्रहविनाशनं कल्याणकमिदं
१० सर्पिः श्रेष्ठंपुंसवनेषुच एभ्यएवौषधेभ्यस्तुद्विगुणंसलिलेऽथवा एकविंशति रसेचाग्निनपचेत्सर्पिरेतद्विशेषतः चतुर्गुणेः वीरंभाषाकाकोलीस्व
यंगुप्तर्षभर्द्धिभिः मेदयाचसमैः कल्कैःस्यात्कल्याणकमहत् बृंहणीयंविशेषेणसन्निपातहरंपरं जटिलापूतनाकेशीचारटीम
र्कटीवचा त्रायमाणाजयावीराचोचकाकटुरोहिणी कायस्थाशूकरीछत्राअतिछत्रापलंकषा महापुरुषदंतांचवयस्थानाकुलीद्वयं
कटंभरावृश्चिकालीस्थिराचाइत्येतैर्घृतंसिद्धंचातुर्थकोन्मादग्रहापस्मारनाशनं महापैशाचिकंनामघृतमेतद्यथामृतं मेधाबुद्धि
स्मृतिकरंबालानांचांगवर्धनं लशुनानांशतंत्रिंशदभयास्त्र्यूषणात्पलं गवांचर्ममसीप्रस्थंद्व्याढकंक्षीरमूत्रयोः पुराणसर्पिषःप्रस्थ
मेभिःसिद्धंप्रयोजयेत् हिंगुचूर्णपलंशीतेदद्याच्चमधुमानिकं तदापानंतुसंमूलानुन्मादान्विषमज्वरान् विशेषतःत्रपुराणे
घृतेतंपाचयेद्भिषक् अपस्मारहरात्याशुपानाभ्यंजननावनैः हिंगुनाहिंगुपर्ण्याचवयस्थाचकयस्थका सिद्धंसर्पिर्हितंचस्या
दुपलाहिंगुचोरकः शुभंजीर्णघृतंशुभ्रमेभिर्वापाययेद्घृतं पायिनोनमांसभागोनवत्सरंस्थाद्दृष्टया त्रिदोषघ्नंपवित्रंचाविशेषाद्
ग्रहमोक्षणं गुणकर्मादिकंप्यानादास्वादात्कटुतिक्तकं दृष्टस्पर्शमथप्रांतंतभिसर्पग्रहापहं अपस्मारविषोन्मादवातेषु
विशेषतः एतैरौषधवर्गैर्वाविधेयंचप्रगतोति अंजनोत्सादनालेपा नावनादियोजयेत् शिरीषमधुकंहिंगुलशुनंतगरंवचां
कुष्ठंचवस्तमूत्रेणपिष्टंस्यान्नावनांजनं लशुनस्यविनष्टस्यतुलार्धंनिस्तुषीकृतं तदर्धंदशमूलस्यद्व्याढकेपाविपाचयेत् पादशे
षेघृतप्रस्थंलशुनस्यरसंतथा कोलमूलकवृक्षाम्लमातुलिंगार्द्रकैरसैः दाडीमाम्लसुरामस्तुकांजिकाम्लैस्तदर्धकैः साध ग॥प्र
येत्त्रिफलादारुलवणव्योषचित्रकैः यवानीतिंतिडीकाम्लवेतसैश्चपलार्धिकैः साधयेत्त्रिफलादारुलवणव्योषचित्रकैः सिद्ध ३०

मेतत्पिबेच्छूलगुल्मार्शोजठरामयान् वद्धपादामयप्लीहयोनिदोषकृमिज्वरान् वातश्लेष्मगदांश्चान्यानुन्मादांश्चव्यपोहति तद्वद्धो
पहरिद्रेद्वेमंजिष्ठाहिंगुसर्षपाः शिरीषबीजचोन्मादग्रहापस्मारनाशनं पिष्टातुल्यमसार्गेर्हिंगुलंहिंगुपत्रिका वर्तिःस्यान्मरिच
श्वानास्तिचाप्यंगोश्रृगालयोः नयांजयेदपस्मारभूतोन्मादज्वरार्दितान् भूतरक्षोमरातांश्चग्रहांश्चैवगोरसे मरिचंचा
तपेमासंस्थपित्तंहिताभिमंजनं धैः कृतंयस्यतकार्येदोषभूतहतस्मृतेः सिद्धार्थकंहिंगुवचाकरंजोदेवदारुच मंजिष्ठात्रिफलाश्वेता
तावकटभित्वक्कटुकत्रिकं समांशानिप्रियग्वश्चशिरीषोरजनीद्वयं वस्तमूत्रेणपिष्टोऽयमगदःपानमंजनं नस्यमालेपनंचापिस्नानमु
द्वर्तनंतथा अपस्मारविषोन्माददृत्यालक्ष्मीज्वरापहं भूतेभ्यश्चभयंहंतिराजद्वारेचशस्यते सर्पिरेतेनसिद्धंवासगोमूत्रंतदर्थकृत
प्रसेकर्पानसेगंधैर्धूमपानैरुतांपिबेत् बोधनीयधूमोत्र खरादिपक्षिमांसहिंगुभिः एल्यकोलूकगोमायुजंबुकरककबस्तजैः मूत्रपित्त
शकृल्लोमनखैश्चर्मभिरेवच सेकांजनंप्रधमनंनस्यंधूमांश्चकारयेत् बालालेपास्तकेप्राप्तः पैत्तिकेचप्रशस्यते तिक्तकंजीवनी
यंचसर्पिःस्नेहश्चमिश्रकः शीतानिचान्नपानानिमधुराणिमृदूनिच शास्त्रकेशांतसंधोचमार्दयद्योनिपक्वशिरा उन्मादविषमैर्वि
वज्जोगमारणेवच पलमांसविलुप्तंवातिवातेस्थापयेत्कालं सकृत्सन्निभमनिलेशांसंज्ञालब्धाप्रबुध्यते आप्वासयेत्सुहृद्वातंवाक्यैर्धर्मा
र्थसंहितैः ब्रूयादिष्टविनाशंवादर्शयेदद्भुतानिवा बध्वासर्षपतैलाक्तंक्षिपेद्वोत्तानमातपे कपिकच्छ्वाथवातप्तैर्लोहतैलजलैःस्पृ
शेत् कषाभिस्ताडयित्वाथवाबध्वाविजनेगृहे संध्याचैतो हिविभ्रांतंव्रजत्यस्यतथासमं सर्पेणोद्धृतदंष्ट्रेणदांतैःसिंहैर्गजै
श्चतं त्रासयेच्छस्त्रहस्तैश्चतस्करैःशत्रुभिस्तथा अथवाराजपुरुषाःबहिर्नीत्वासुसंयुतं त्रासयेयुर्वधेनैतंजितंराज्ञाज्ञया
इष्टद्रव्यविनाशाच्चमनोयस्योपहन्यते तस्यतत्सदृशंप्राप्य सांत्वाश्वासैःशमंनयेत् कामशोकभयक्रोधहर्षेर्ष्यालोभसंभवं परस्परप्रतिद्वंद्वैरेभिरेवशमंनयेत्

च.चि. बुध्वादेशवयःसात्म्यंदेशंकालंबलाबलं चिकित्सितमिदंकुर्यादुन्मादेदोषभूतजे देवर्षिपितृगंधर्वैरुन्मत्तस्यचबुधिमान् वर्जयेदंजनादी
नितीक्ष्णानिक्रूरमेवच सर्पिष्पानादिनस्येह मृदुभैषज्यमाचरेत् पूजांबल्युपहारांश्चमंत्रांजनविधिंतथा शांतिकर्मेष्टिहोमांश्चजप्यस्व
३१ स्त्ययनानिच वेदोक्तान्नियमांश्चैवप्रायश्चित्तानिचाचरेत् भूतानामधिपंदेवमीश्वरंजगतःप्रभुं पूजयन्प्रयतोनित्यंजयत्युन्मादजंभ
य रुद्रस्यप्रमथानामगणालोकेचरंतिये तेषांपूजांचकुर्वाणउन्मादेभ्योविमुच्यते बलिभिर्मंगलैर्होमैरौषध्यंगदधारणैः सत्याचार
तपोज्ञानप्रदाननियमव्रतैः देवगोब्राह्मणानांचगुरूणांपूजयातथा आगंतुःप्रशमंयातिसिद्धैर्मंत्रौषधैस्तथा यथोपदेशंपथ्य
मन्नपानंचिकित्सितं उन्मादेचकर्तव्यंसामान्याद्धातुरूपयोः निवृत्तामिषमद्योयोहिताशीप्रयतःशुचिः निजागंतुभिरुन्मादैःस
त्ववान्नसयुज्यते प्रसादश्चेंद्रियार्थानांबुध्यात्ममनसांतथा धातूनांप्रकृतिश्चैवविगतोन्मादलक्षणमिति तत्रश्लोकः
उन्मादानांसमुत्थानंलक्षणंसचिकित्सितं निजागंतुनिमित्तानामुक्तवान्भिषगुत्तमः ॥ ॥इतिश्री [चर]कसंहितायांचि
कि[त्सा]स्थानेउन्मादचिकित्सितंनामनवमोध्यायः ॥ ॥अथातोपस्मारचिकित्सितंव्याख्यास्यामः ॥ ॥इतिहस्मा
स्मृतेरपगमंप्राहुरपस्मारंभिषग्विदः तमःप्रवेशंबीभत्सचेष्टंधीसत्वसंप्लवात् विभ्रांतबहुदोषाणामहिताशुचिभोजिनं
रजस्तमोभ्यांविहतसत्वेदोषावृतेहृदि चिंताकामभयक्रोधशोकोद्वेगादिभिस्तथा मनस्यभिहतेनृणामपस्मारःप्रवर्तते
धमनीभिःश्रितादोषाहृदयंपीडयंतिहि संपीड्यमानोव्यथतेमूढोभ्रांतेनचेतसा पश्यन्नसंतिरूपाणिपतितःप्रस्फुरत्यपि
जिह्माक्षिभ्रूःस्रवल्लालोहस्तौपादौचविक्षिपन् दोषवेगेचविगतेस्वप्नवत्प्रतिबुध्यते पृथग्दोषैः पृथग्दोषैःसमस्तैश्चव गग्
स्यतेसचतुर्विधः कंपतेप्रदशेद्दंतान्फेनोद्वामीश्वसत्यपि परुषारुणकृष्णानिपश्येद्रूपाणिचानिलात् पीतफेनांगवक्त्राक्षःपी ३१
तासृग्रूपदर्शनः सतृष्णोष्णानलव्याप्तलोकदर्शीचपैत्तिकः शुक्लफेनांगवक्त्राक्षःशीतहृष्टांगजोगुरुः पश्यन्शुक्लानिरूपा

णिश्लेष्मिकान्मुच्यतेचिरात् सर्वैरेतैःसमस्तैश्चलिंगैर्ज्ञेयस्त्रिदोषजः अपस्मारःसचासाध्योयःक्षीणस्यानवश्चयः पक्षाद्वाद्वा
दशाहाद्वामासाद्वाकुपितामलाः अपस्मारायकुर्वंतिवेगंकिंचिदथांतरा तैराहृतानांहृत्स्रोतोमनसांसंप्रबोधनं तीक्ष्णै
राचरेद्बुधःकुर्यात्कर्मभिर्वमनादिभिः वातिकंबस्तिभूयिष्ठैःपैत्तंप्रायोविरेचनैः कफजंवमनप्रायैरपस्मारमुपाचरेत् सर्वतःसु
विशुद्धस्यसम्यगाश्वासितस्यच अपस्मारविमोक्षार्थंयोगान्संशमनान्शृणु गोशकृद्रसदध्यम्लक्षीरमूत्रैःसमैर्घृतं सिद्धं
पिबेदपस्मारकामलाज्वरनाशनं द्वेपंचमूलेत्रिफलांरजन्यौकुटजत्वचं सप्तपर्णमपामार्गंनीलिनींकटुरोहिणीं शम्याकंफल्गु
मूलंचपौष्करंसदुरालभं द्रोणेपांद्विपलिकानपादशेषेणपाययेत् भार्गींपाठांत्रिकटुकंत्रिवृतांनिचुलानिच श्रेयसीमाढकींमू
र्वांदंतींभूनिंबचित्रकौ द्वेसारिवेरोहिषंचभूतीकंमदयंतिकां क्षिपेत्पिष्ट्वाक्षमात्राणितेनप्रस्थंघृतात्पचेत् गोशकृद्रसदध्य
म्लक्षीरमूत्रैश्चतत्समैः पंचगव्यमितिख्यातंमहत्तदमृतोपमं अपस्मारेतथोन्मादेश्वयथावुदरेषुच गुल्मार्शःपांडुरोगेषु
कामलायांभगंदरे अलक्ष्मीग्रहरक्षोघ्नंचातुर्थकविनाशनं ब्राह्मीरसवचाकुष्ठशंखपुष्पीभिरेवच पुराणंमेध्यमुन्मादालक्ष्म्य
पस्मारपाप्मनुत् घृतंसैंधवहिंगुभ्यांवार्षवालेचतुर्गुणे मूत्रेसिद्धमपस्मारहृद्ग्रहामयनाशनं तैलप्रस्थंघृतप्रस्थंजीवनीयैःपलो
न्मितैः क्षीरद्रोणेपचेत्सिद्धमपस्मारविनाशनं कंसेक्षीरेक्षुरसयोःकाश्मर्येष्टगुणेरसे कार्षिकैर्जीवनीयैश्चघृतप्रस्थंविपाच
येत् वातपित्तोद्भवंक्षिप्रमपस्मारंनिहंतितत् वचाशम्याककैडर्यवयस्थाहिंगुचोरकैः सिद्धंपलंकषायुक्तैर्वातपित्तात्मकेघृतं
तद्वत्क्वाथचतुर्गुणे सिद्धंस्याद्गोशकृन्मूत्रंस्नानोत्सादनमेवच कटभीनिंबकट्वंगमधुशिग्रुत्वचोरसे सिद्धंमूत्रसमंतैल
मभ्यंगार्थंप्रशस्यते पलंकषावचापथ्यावृश्चिकाल्यर्कसर्षपैः जटिलापूतनाकेशीनाकुलीहिंगुचोरकैः लशुनातिरसा
चित्राकुष्ठैर्विड्भिश्चपक्षिणां मांसाशिनांयथालाभंबस्तमूत्रेचतुर्गुणे सिद्धंस्याद्गोशकृन्मूत्रंस्नानोत्सादनमेवच कटभीनिं

बकदंगमपुरीषेणचोरसेगसिधंमूत्रसमंतैलमभ्यंगार्थंप्रशस्यते पलंकषावचापथ्याश्चिकात्यर्कसर्षपैः जटिलापूतनाकेशीना
च·चि· कुलीहिंगुचोरकैः लशुनातिरसाचित्राकुष्ठैर्विड्भिश्चपक्षिणां मांसाशिनांयथालाभंबस्तमूत्रेचतर्गुणे सिद्धमभ्यंजनंतैलमप
३२ स्मारविनाशनं एतैरेवौषधैःकार्यंधूपनप्रलेपनं पिप्पलीलवणंशिग्रुहिंगुहिंगुशिवाटिकां काकोलीसर्षपंकालकमसाके
डुर्यचंदनं शुभनःस्कंधाश्चिचरवरान्यःस्वकोश्वेतिपेषयेत् बस्तमूत्रेणपिष्टोयंप्रधेहस्यात्सधूपनः अपमार्गास्तसंकुष्टपूतना
केशाचोरकैः उत्सादनंमूत्रपिष्टैस्तस्यगोऽस्तुगोलोमभिः जलूकासकृतान्तदुर्दन्तैर्वावस्तलोभिः खराश्चिभिर्गवायुक्तलोमाह
स्तिनखेनच कपिलानांगवांपित्तैर्नावनंपरं मंमतंश्वमृगालविडालानांसिंहादीनांचपास्यते मार्गीचनागदंतीचपुष्पताश्च
नविषाणिका ज्योतिष्मतीनागदंतीपारोहाःमूत्रेयेषिताः योगास्त्रयोऽतःषड्विंदून्पंचवायष्ट्भिषक् त्रिफलाव्योषपीतद्रु
यवक्षारफणिज्जकैः श्वानाहपामार्गकारंजैःफलैर्मूत्रैश्चबस्तजैः साधितंनावनंतैलमपस्मारविनाशनं पिप्पलीदृश्चिका
लीचकुष्टंचलवणानिच भार्गीचचूर्णितंनस्तःकार्यंप्रधमनंपरं कायस्थानगारदानसुद्रानमुस्तोशीरयवांस्तथा सव्योषान्
बस्तमूत्रेणपिष्ट्वावर्तीःप्रकल्पयेत् अपस्मारेतथोन्मादसर्पदष्टगरादिते विषपीतेजलमृतेचैताःस्युरमृतोपमाः मुस्तांकय
स्यांत्रिफलांच वयस्थांहिंगुशाखलं व्योषंमाषान्यवान्मूत्रैर्वास्तैर्मषार्षिभिस्त्रिभिः पिष्ट्वाकृत्वाचवर्तीतामपस्मारेप्रयोजयेन्
मेपुत्तेथोन्मादसर्पदष्टेगरार्दिते विषपीतेजलमृतेचैतास्युरमृतोपमः मुस्तांकयस्यांत्रिफलांवयस्थांहिंगुशाखलं व्योषंमा
षान्यवान्मूत्रैर्वास्तैर्मषार्धसैस्त्रिभिः पिष्ट्वाकृत्वाचवर्तीतामपस्मारेप्रयोजयेत् किलासेषुतथोन्मादेज्वरेषु पुष्पाश्र रामः
तेश्चपित्तंस्यादपस्मारप्रभंजनं नरवमर्पिपाषुक्तंधूपनंपरमंहितं नकुलोलूकमार्जारगृध्रकीटाहिकाकजैः पक्षै ३२
स्तुंडैःपुरीषैश्चधूपनंकार्यद्भिषक् आभिःक्रियाभिःसिद्धाभिर्हृदयंसंप्रबुध्यते श्रोतांसिचास्यशुध्यंतिस्मृतिसंज्ञांसविंदति॥

यस्योत्तंधमार्गेतुदोषंलिंगानिचाकृतिं दृष्टेतास्यभिषक्कुर्यादागंतून्मादभेषजं अनंतरमुवाचेदमग्निवेशःकृतांजलिः भगवन्स
कृतमुद्दिश्यःश्लोकस्थानेमहागदः अतस्त्वामिनिवेशस्तस्यव्यक्तिरिहोच्यतां सभुपबोधनःश्रुत्वाशाख्याथाहपुनर्वसुः म
हागदंसौम्यश्रृणुसहेत्वाकृतभेषजं मलिनाहारशीलस्यवेगाप्राप्तान्निगृह्णतः शीतोष्णस्निग्धरूक्षाद्यैर्हेतुभिश्चातिसेविते:
हृदयंसमुपाश्रित्यमनोबुद्धिवहाःशिराः दोषाःसंदूष्यतिष्ठंतिमोहावृतात्मनः रजस्तमोभ्यामाविष्टबुद्धौमनसिचावृतेहृदयेव्याकु
लेदोषैरथमूढोल्पचेतनः विषमांकुरुतेबुद्धिंनित्यानित्येहिताहिते अतस्त्वमिनिवेशंतंप्राहुराप्तामहागदं स्नेहस्वेदोपपन्नंतं
शोधयेद्वमनादिभिः कृतसंसर्जनंमेध्यैरन्नपानैरुपाचरेत् ब्राह्मीस्वरससिद्धंचपंचगव्यमुपाहरेत् तत्सेव्यंशंखपुष्पीचय
चमेध्यंरसायनं सुहृदश्चानुकूलास्तंसाधर्मार्थवादिनः संयोजयेयुर्विज्ञानधैर्यस्मृतिशमादिभिः प्रयोज्यंतैलमभ्यंगंपयसाच
शतावरी। ब्राह्मीरसः कुष्ठरसोवचावामधुसंयुताः दुश्चिकित्सोह्यपस्मारश्चिरकारीमहागदः तस्माद्रसायनेनैनंप्राय
शःसमुपाचरेत् जलाग्निद्रुमशैलेभ्योविषमेभ्यश्चतंसदा रक्षेदुन्मादिनंचैनंतद्धिप्राणहराहिते तत्रश्लोकौ हेतुंकुर्वंस्य
पस्मारेदोषाःप्रकुपितायथा सामान्यतःपृथक्त्वंचलिंगंतेषांचभेषजं महागदसमुत्था।लिंगंचोवाचसौषधं मुनिर्व्यासिसमा
सस्यामपस्मारचिकित्सितं। । इतिश्री चरकसंहितायांचिकित्सितस्थानेपस्मारचिकित्सितंनाम दशमोध्याय
अथक्षतक्षीणचिकित्सितंव्याख्यास्यामः॥ ॥ इतिहस्माह उदारकीर्तिरात्रेयःपरमार्थवित् क्षतक्षीणचिकित्सि
तमिदंप्रोवाचभेषजं धनुषायस्यःयस्यभारमुद्वहतोगुरुः युध्यमानस्यबलिभिःपतनेविषमोच्चनः वृषंहयंचधाव
तंदम्यंचान्यंनिगृह्णतः शीलाकाष्ठाश्मनिर्घातानिक्षिपतोनिघ्नतःपरान् अधीयानस्यचात्युच्चैर्दूरंवाव्रजतोद्रुतं महानदी
वातरतोहयैर्वासहधावतः सहसोत्पततोदूरान्तूर्णंवातिप्रनृत्यतः कर्मभिःक्रूरैःभृशमभ्याहतस्यच विच्छिन्नवक्षसि

च.चि. व्याधिर्बलवान् समुदीर्यते स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः उरः संभिद्यते तस्य भिद्यतेऽथ विरुज्यते प्रपीड्यते ततः पा
र्श्वे शुष्यत्यंगं प्रवेपते क्रमाद्वीर्यं बलं वर्णो रुचिरग्निश्च हीयते ज्वरो व्यथा मनोदैन्यं विड्भेदोऽग्निवधादपि दुष्टः श्यावः सुदुर्गंधः
३३, पीतो विग्रथितो बहुः कासमानस्य चाभीक्ष्णं कफः सासृक् प्रवर्तते स क्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसोः क्षयात् अव्यक्तं लक्षणं
तस्य पूर्वरूपमिति स्मृतं उरोरुक् शोणितच्छर्दिः कासो वैशेषिकः क्षते क्षीणे सरक्तमूत्रत्वं पार्श्वपृष्ठकटीग्रहः अल्पलिंगस्य दीप्ताग्नेः सा
ध्यो बलवतो नवः परिसंवत्सरो याप्यः सर्वलिंगं तु वर्जयेत् उरो मत्वा क्षतं लाक्षां पयसा मधुसंयुतां सद्य एव पिबेज्जीर्णे पयसाद्या
त्सशर्करां पार्श्वबस्तिरुजश्चाल्पपित्ताग्निस्तां सुरायुतां भिन्नविट्कः समुस्तातिविषापाठां सवत्सकां लाक्षां सर्पिर्मधूच्छिष्टं जीवनीय
गणं सितां त्वक्क्षीरीं समितं क्षीरे पक्त्वा दीप्तानलः पिबेत् इक्षुवालिकाबिसग्रंथिपद्मकेसरचंदनैः शृतं पयो मधुयुतं संधाना
र्थं पिबेत्क्षती यवानां चूर्णमामानां क्षीरे सिद्धं घृतप्लुतं ज्वरे दाहे सिताक्षौद्रसक्तून्वा पयसा पिबेत् एलापत्रत्वचोऽर्धाक्षाः पिप्प
ल्यर्धपलं तथा सितामधुकखर्जूरमृद्वीकाश्च पलोन्मिताः संचूर्ण्य मधुसंयुक्ता गुडिकाः संप्रकल्पयेत् अक्षमात्रां ततश्चैकां भ
क्षयेन्नां दिने दिने कासं श्वासं ज्वरं छर्दिं मूर्छां हिक्कां मदं भ्रमं रक्तनिष्ठीवनं तृष्णां पार्श्वशूलमरोचकं शोषप्लीहाढ्यवातांश्च स्वर
भेदं क्षतक्षयं गुडिका तर्पणी वृष्या रक्तपित्तं च नाशयेत् काशीपर्वास्थिशूली च लिह्यात्सघृतमाक्षिकं मधूकमधुकद्राक्षा
त्वक्क्षीरीपिप्पलीबलाः रक्तेऽतिवृत्ते सक्षौद्रं पूर्वस्तोयेन वा पिबेत् चटकांडरसं वापि रक्तं वा मृगजांगलं चूर्णं पौनर्नवं रक्तशा
लितंडुलषाष्टिकं रक्तष्ठीवी पिबेत्सिद्धं द्राक्षारसपयोघृतैः मधुकमधुकक्षीरसिद्धं वा तंडुलीयकं मूढवातस्त्वजामेदः सुरा
सृष्टं ससैंधवं क्षामः क्षीणः क्षताद्रक्तः स्वल्पनिद्रः सबलेऽनले शृतक्षीरसरेणाद्यात्सक्षौद्रघृतशर्करां शर्करायवगोधूमं जी राम.
वकर्षभकौ मधु शृतक्षीरानुपानं वा लिह्यात्क्षीणः क्षतः कृशः क्रव्यान्मांसरसं निर्यूहं घृतभृष्टं पिबेच्छ्वसः पिप्पलीक्षौद्रसंरक्तं मास ३३,

शोणितवर्धनं न्यग्रोधोदुंबराश्वत्थप्लक्षशालप्रियंगुभिः तालमस्तकजंबूत्वक्पियालैश्च सपद्मकैः साश्वकर्णैः शृतात्क्षीरादद्याज्जातेन सर्
पिषा शाल्योदनं क्षतोरस्कः क्षीणशुक्रश्च मानवः यष्ट्याह्वनागबलयोः क्वाथे क्षीरसमे घृतं पयस्यापिप्पलीवांशीकल्कैः सिद्धं क्षते
हितं कोललाक्षारसे तद्वत् क्षीराष्टगुणसाधितं कल्कैः कटुंगदार्वीत्वग्वल्कलत्वक्फलैर्घृतं जीवकर्षभकौ वीरा जीवंती नागरं स
टी बलास्त्रीपर्णीमेदे काकोल्यौ द्वे निदिग्धिके पुनर्नवे द्वे मधुकमात्मगुप्ता शतावरी ऋद्धिं परूषकं भार्गीं मृद्वीकां बृहतीं त
था शृंगाटकं पयस्यां पिप्पलीं बलां बदराक्षोडखर्जूरवातामाभिषुकानि च फलानि चैवमादीनि कल्पानि कुर्वीत कार्षिकान् धा
त्रीरसविदारीक्षुछागमांसरसं पयः एषां प्रस्थोन्मितान् भागान् घृतप्रस्थं विपाचयेत् प्रस्थार्धं मधुनः शीते शर्करार्धं तुलां तथा पला
र्धिकं च मरिचं त्वगेलापत्रकेसरं विनीय चूर्णितं तस्माल्लिह्यान्मात्रां सदा नरः अमृतप्राशमित्येतन्नराणाममृतं घृतं सुधामृतरसं प्रा
श्यं क्षीरमांसरसाशिना नष्टशुक्रक्षतक्षीणदुर्बलव्याधिकर्शितान् स्त्रीप्रसक्तान् कृशान् वर्णस्वरहीनांश्च बृंहयेत् प्रस्थार्धं मधुनः
शीते शर्करार्धं तुलां तथा पलार्धिकं च मरिचं त्वगेलापत्रकेसरं विनीय चूर्णितं तस्माल्लिह्यान्मात्रां सदा नरः अमृतप्राशमित्येतन्न
राणाममृतं घृतं प्राश्यं क्षीरमांसरसाशिना नष्टशुक्रक्षतक्षीणदुर्बलव्याधिकर्शितान् स्त्रीप्रसक्तान् कृ
शान् वर्णस्वरहीनांश्च बृंहयेत् कासहिक्काज्वरश्वासदाहपिपासास्रपित्तनुत् प्रतीतं छर्दिमूर्छाहृद्योनिमूत्रामयापहं श्वदं
ष्ट्रा शीरमंजिष्ठाबलाकाश्मर्यकट्फलं दर्भमूलं पृश्निपर्णी पलाशर्षभकौ स्थिरां पालिकान्साधयेत्तेषां रसे क्षीरचतुर्गुणे क
ल्कैः स्वगुप्तर्षभकमेदाजीवंतिजीवकैः शतावर्यृद्धिमृद्वीकाशर्कराश्रावणीबिसैः प्रस्थः सिद्धो घृतात्स वातपित्तहृद्रोगशू
लनुत् मूत्रकृच्छ्रप्रमेहार्शःकासशोषक्षयापहः धनुःस्त्रीमद्यभाराध्वखिन्नानां बलमांसदः मधुकाष्टपलं द्राक्षाप्रस्थं क्वा
थपचेद्घृतं पिप्पल्यष्टपले कल्के प्रस्थं सिद्धं च शीतलं पृथगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत् समसक्तु क्षतक्षीणरक्त

च.चि.

३५ गुल्मञ्चतद्धितं धात्रीरसविदारीक्षुजीवनीयरसाधृतात् छागगोपयसश्चैवसप्तप्रस्थान्पचेद्भिषक् सिद्धशीतघृतस्यक्षौद्रद्विप्रस्थं
प्रक्षिपेत्ततः यक्ष्मापस्मारपित्तासृग्योनिमूत्रामयापहं वयस्थापनमायुष्यंमांसशुक्रबलप्रदं घृतंतुपित्तेभ्यधिकेलिह्याद्वाते
धिकेपिबेत् लीढंनिर्वापयेत्पित्तमल्पत्वाद्धन्तिनापनलं आक्रमत्यनिलंपीतमूष्माणंनिरुणद्धिच क्षामक्षीणकृशाङ्गानामेता
न्येवघृतानितु त्वक्क्षीरीपिप्पलीलाजाचूर्णैःस्त्यानानियोजयेत् सर्पिर्गुडान्समध्वंशान्कृत्वा दद्यात्पयोनुच रेतोवीर्यं
बलंपुष्टिंतैराशुतरमाप्नुयात् बलाविदारीह्रस्वंचपञ्चमूलंपुनर्नवां पञ्चानांक्षीरवृक्षाणांशुङ्गानमुद्गाकांस्तथा एषांकषायेद्विक्षीरेविदार्याजरसां
शिके जीवनीयैःपचेत्कल्कैःरसमात्रेर्पनाढकं सितापलानिपूतेस्मिन्शीतेद्वात्रिंशदापयेत् गोधूमपिप्पलीवांशीचूर्णंशृङ्गाटकस्यच स
क्षौद्रंकुडवांशंतत्सर्वंसंजमूर्छितं स्त्यानंसर्पिर्गुडान्कृत्वाभूर्जपत्रेणवेष्टयेत् तान्जग्ध्वापलिकान्क्षीरंमद्यंचानुपिबेत्कफे शोषकासे
क्षयेन्क्षीणमल्लीभागकर्षिते रक्तनिष्ठीवनेदाहेपीनसेचोरसिक्षते शस्ताःपार्श्वशिरःशूलेभेदेचस्वरवर्णयोः त्वक्क्षीरीश्रावणीद्राक्षामूर्वर्ष
भकजीवकैः वीराह्रीस्वीरकाकोलीरहंसीकपिकच्छुभिः खर्जूराक्षिपमेदाभिःक्षीरपिष्टैःपलोन्मितैः धात्रीविदारीक्षुरसप्रस्थैःप्रस्थंघृता
स्पचेत् शर्करार्धतुलांशीतेक्षौद्रार्धप्रस्थमेवच दत्वासर्पिर्गुडान्कुर्यात्कासहिक्काज्वरापहान् यक्ष्माणंतमकंश्वासंरक्तपित्तंहलीमकं शु
क्रनिद्रास्यंतृष्णाहन्युःकार्श्यंसकामलं द्राक्षांन्यामामलकंमात्मगुप्तांपुनर्नवां शतावरींविदारींचसमांशांपिप्पलींतथा पृथक्दशपला
न्भागान्पलान्यष्टौचनागरात् शतावरींविदारींचसमांशांपिप्पलींतथा सौवर्चलंसयष्ट्याह्वंद्विपलंमरिचस्यच क्षीरतैलघृतानांतु
त्र्याढकंपर्कणपालं क्वथितेतानिचूर्णानिदत्वाबिल्वसमान्गुडान् कुर्यात्तान्भक्षयेत्क्षीणःक्षतपुष्पंचमानवः तेनश्रयोरसादीनां राम
कुश्यापुष्टिंसविंदति गोक्षीरःद्राढकंसर्पिःप्रस्थमिक्षुरसाढकं विदारीस्वरसप्रस्थंरसाम्नरसंचतेनिशाम् दद्यात्तित्यतिलस्मिं ३५
न्पिष्टानिकुरसेरिमान् मधूकपुष्पंकुडवंपियालकुडवंतथा तुगाक्षीर्यष्टिकुडवंखर्जूराणिचविंशतिः पृथग्विनीलयाकानम्ज्ञः

DR. BHAU DAJI MEMORIAL

पिप्पल्याश्चचतुःपलं विंशत्पलानिखण्डाश्चमधुकात्कर्षमेवच तथार्धपलिकान्पत्रजीवनीयानिदापयेत् सिद्धेहिकुडवंक्षौद्रान्शी
तेसिताचमोदकान् कारयेन्मरिचाजाजीपलचूर्णावचूर्णितान् वातासृक्पित्तरोगेषुक्षतकासक्षयेषुच शुष्यतांक्षीणशुक्राणांरक्ते
चोरसिसंस्थिते कृशदुर्बलरूक्षाणांपुष्टिवर्णबलार्थिनां योनिदोषक्षतस्रावहतानांचापियोषितां गर्भार्थिनीनांगर्भश्चयासांशुष्ये
न्म्रियेतवा धन्याबल्याहितास्तासांशुक्रशोणितवर्धनाः बस्तिदोषविकुर्वाणस्त्रिषुसक्तस्यमारुते बालघ्रानबृंहणान्बल्यान्
वृष्यरोगान्प्रयोजयेत् शर्करापिप्पलीचूर्णैःसर्पिषामाक्षिकेणवा संयुक्तंवाशृतंक्षीरंपिबेत्कासज्वरापहं विदारीक्षुरसक्वाथे
फलाम्लंघृतभर्जितं क्षोषक्षीणःपिबेद्यूषंजीवनंबृंहणंपरं सक्तूनांवल्कपलानांप्रस्थंक्षौद्रघृताचितं यवान्नसात्म्याद्दीप्ताग्निः
क्षतक्षीणःपिबेन्नरः जीवनीयौषधैर्यूषंवाजांगलंघृतभर्जितं रसंप्रयोजयेत्क्षीणेव्यंजनार्थसचक्रं गोमहिष्यश्वनागाजैःक्षीरे
र्मांसरसैस्तथा यथाग्निभोजयेद्यूषैःफलाम्लैर्वाघृतप्लुतैः दीप्तेग्नौविधिरेषस्यान्मंदेदीपनपाचनः यक्ष्मिणांविहितोग्राहीभि
न्नेशकृतिवस्यते पालिनसेधवंशुंठीद्वेचसौवर्चलात्पले कुडवांशानिवृक्षाम्लंदाडिमंपत्रमार्जकात् एकैकांमरीचाजाज्या
द्वांतांकाद्वेचतुर्थिके शर्करायाःपलान्यत्रदशद्वेचप्रयोजयेत् कृत्वाचूर्णमतोमात्रामन्नपानेषुयोजयेत् रोचनंदीपनंबल्यंपार्श्वा
र्तिश्वासकासनुत् एषांषोडशिकाधान्याद्द्विदिव्याजमोदयोः तासांदाडिमरसाम्लेहिद्विहिःसौवर्चलात्पलं शुंठ्याःकर्षदधि
त्थस्यमध्याध्यारांफलानिच चूर्णंषोडशपलैःशर्करायाविमिश्रितं खाण्डवोयंप्रदेयःस्यादन्नपानेषुपूर्ववत् पिबेन्नागब
लामूलस्यार्धकर्षविवर्धितं पलंक्षीरयुतंमासंक्षीरवृत्तिरनन्नभुक् एषःप्रयोगःपुष्ट्यायुर्बलारोग्यकरःपरः मंडूकपर्णी
कल्पेयंमधुकेनागरेतथा यथासंतर्पणंशीतमविदाहीहितंलघु अन्नपानंनिषेव्यंतुक्षतक्षीणैःसुखार्थिभिः यच्चोक्तंयक्ष्मि
णांसम्यक्क्षीणानांरक्तपित्तिनं तच्चकुर्यादवेक्ष्याग्निंव्याधिसात्म्यंबलंतथा उभयस्यतभवेदस्मिन्ननुबंधोहियक्ष्मणः प्रागेव

च.चि. गमनात्तस्य तस्मात्तु तु योजयेदिति भवति चात्र क्षतक्षयसमुत्थानां साध्यानां पृथगाकृतिं असाध्यायाप्यसाध्यत्वं साध्यानां सिद्धिमे
वच उक्तवान् श्रेष्ठशिष्याय क्षतक्षीणचिकित्सिते सर्वार्थविद् ईशलजस्तमोमोहः पुनर्वसुः ॥ ॥ इति श्री चरकसंहितायां चिकित्सि
७५ तस्थाने क्षतक्षीणचिकित्सितं नाम नवमोऽध्यायः ॥ ॥ अथातः श्वयथुचिकित्सितं व्याख्यास्यामः ॥ ॥ इति ह स्माह भिष
ग्वारिष्ठं कासिभजुष्टं मुनीन्द्रमत्र्यात्मजमग्निवेशः महागदस्य श्वयथोर्यथावत् प्रकोपरूपप्रशमानपृच्छत् तस्मै जगादागदवेदसिंधुः प्रव
र्तनादिप्रवरोत्रिजस्तान् वातादिभेदात्त्रिविधस्य सम्यगनिमानिजैकाङ्गजसर्वजस्य शुद्ध्यामयाभक्तकृशाबलानां क्षाराम्ललीक्ष्णोष्णगुरू
पसेवा दध्यामसृज्ज्ञाकविरोधिदुष्टगरोपसृष्टान्ननिषेवणं च अर्शांस्यचेष्टा न च देहशुद्धिर्मर्मोपघातो विषमा प्रसूतिः मिथ्योपचारः
प्रतिकर्मणां च निजस्य हेतुः श्वयथोः प्रदिष्टः बाह्यास्त्वचो दूषयिताभिघातकाष्ठाश्मशस्त्राग्निविषायसाद्यैः आगन्तुहेतुस्त्रिविधो निजश्च
सर्वाङ्गगात्रावयवाश्रितत्वात् बाह्याः सिराः प्राप्य यदा [illegible] स्थितानि संदूषयतीह वायुः तैर्बद्धमार्गः स तदा विसर्पन्नुत्सेधलिङ्गं
श्वयथुं करोति उरःस्थितैरूर्ध्वमधश्च वायोः स्थानस्थितैर्मध्यगतैश्च मध्ये सर्वाङ्गगः सर्वगतैः क्वचित्स्थैः दोषैः क्वचित्स्यात् श्वयथुस्तदाख्यः
उष्मा तथा स्याद्दवथुः सिराणामायामजृम्भा न च पूर्वरूपं सर्वत्रिदोषाधिकदोषलिङ्गैस्तांस्तत्समानीति चिकित्सितं च सगौरवं स्यादनव
स्थितत्वं सोत्सेधमूष्माथ सिरातनुत्वं सलोमहर्षश्च विवर्णता च सामान्यलिङ्गं श्वयथोः प्रदिष्टं चलस्तनुत्वक्परुषोऽरुणोऽसितः ससुप्ति
हर्षार्तियुतोऽनिमित्ततः प्रशाम्यति प्रोन्नमति प्रपीडितो दिवाबली च श्वयथुः समीरणात् मृदुः सगन्धोऽसितपीतरागवान् भ्रमज्व
रस्वेदतृषामदान्वितः य उष्यते स्पर्शसहोऽक्षिरागकृत्स पित्तशोथो भृशदाहपाकवान् गुरुः स्थिरः पाण्डुररोचकान्वितः प्रसेकनिद्रावमिव राम
ह्निमान्द्यकृत् सकृच्छ्रजन्मप्रशमो निपीडितो न चोन्नमेद्रात्रिबली कफात्मकः कृशस्य रोगैरबलस्य यो भवेदुपद्रवैर्वा वमिपूर्वकैर्युतः ३५
स हन्ति मर्मानुगतोऽथ राजिमान् परिस्रवेद्धीनबलस्य सर्वगः अहीनमांसस्य य एकदोषजो नवो बलस्थस्य सुखः स साधने निदानदोषर्तुवि

पर्ययक्रमैरुपाचरेत्तं बलदोषकालवित् अथामजं लङ्घनपाचनक्रमैर्विशोधनैरुल्बणदोषमादितः शिरोगतं शीर्षविरेचनैरधो विरेचनै
रूर्ध्वहरैस्तथोर्ध्वगं उपाचरेत्स्नेहभवं विरूक्षणैः प्रकल्पयेत्स्नेहविधिं च रूक्षजे विबद्धविट्कानिलजे निरूहं घृतं तु पित्तानिलजे सतिक्तकं प
यश्च मूर्च्छारतिदाहतर्षिते विशोधनीये तु समूत्रमिष्यते कफोद्भवं क्षारकटूष्णसंयुतैः समूत्रतक्रासवयुक्तिभिर्जयेत् साम्राम्लाजा
ङ्गलं पिशितमबलं शुष्कशाकं नवान्नं गौडं पिष्टान्नं दधि सकृशरं पिच्छिलं मद्यमम्लं धाना वल्लूरं समशनमथो गुर्वसात्म्यं विदाहि स्वप्नं रा
त्रौ श्वयथुगदवान् वर्जयेन्मैथुनं च मूत्रैर्निशीथिनी कटुरोहिणीं च सायोरजस्कां त्रिफलारसेन पीत्वा कफोत्थं शमयेत् शोथं गव्येन मूत्रे
ण हरीतकीं वा हरीतकी नागरदेवदारु सकाथं पुनर्नवं च सर्वांश्च विशोधपि मूत्रयुक्तं स्नातश्च जीर्णे पयसान्नमद्यात् पुन
र्णवानागरभल्लातकान् सहेन धीरः पयसा तमाशान् प्रपूरयेन्मागधिकां समूलां सनागरां वा प्रपिबेत् सवाते रसोत्रिकटूषणचि
त्रकं वा पयः सतं दोषहरं पिबेत् द्विप्रस्थमात्रं तु पलार्धकैस्तैः द्वौ वसिष्टं पवनेऽपि तैः सशुण्ठीं पीत्वा दुरसं प्रयोज्यं श्यामोरुबुकोषण
साधितं वा त्वक्पत्रवर्षाभू महौषधैर्वा समूर्द्धिकानागरदन्तिमिश्रं सप्ताहमौष्ट्रं त्वथवापि मासं पयः पिबेद्भोजनवारि वर्जं गव्ये समूत्रं स
हिषीपयो वा क्षीराशिना सम्यगयोगतां वातकफे पिबेद्वा गुरुभिन्नवर्चाः सञ्योषसौवर्चलमाक्षिकं वा गुडाभयां वा गुडनागरं वा सदोष
भिन्नामविबद्धवर्चाः विधानसंगपयसारमेवा प्राग्भक्तमद्यादुरुबूकतैलं श्यो नाकिबिल्वाग्निरुचिप्रणद्वे मधान्यदीशाश्वापिबेत्स
जातानुकंडीरभल्लातकचित्रकांश्च व्योषं विडङ्गं बृहती च फलं च द्विप्रास्थितं गोमयपावकेन द्रोणाप चेत्कुम्भिकमस्तुनस्तु त्रिभाग गव्य
मृत्पुलशीतं द्रोणप चेत्सार्धकमस्तुनस्तु सितोपालायाश्च घृतेन युक्तं लिप्ते घटे चित्रकपिप्पलीनां चैयाह संस्थापितमाहाधाहात् प्रयो
जयेत् हिनिहन्ति शोफं भगन्दरार्शःकृमिकुष्ठमेहान् वैवर्ण्यकार्श्यानिलकिक्किसं च कामयं धात्रीमरिचाभयास्त द्राक्षाफलानां च सपिप्प
लानां शतं पलं जीर्णगुडात्तुलां च संस्कृत्य कुम्भे मधुनाप्रलिप्ते समाहसुष्णे द्विगुणं चरीतं स्थितं जलद्रोणयुतं पिबेत्तां शोफानविन्धान्

॥

च.चि. कफघांतगांश्च सहस्राणि शतानि मिश्रश्च पुनर्नवे द्वे च पलस्य पत्रिंशो गुडूची सह चित्रकेण निदिग्धिका च त्रिफलोन्मितानि द्रोणाव
शेषं सलिले च सिद्धं पूतार्सं द्वे च गुडात्पुराणा तुल्यं मधुप्रस्थयुतं स्फटीतं मासं निदध्याद्घृतभाजनस्थं पलेयवानां परितश्च मासात् चू
१९ र्णीकृतैरर्धपलांशिकैस्तैः हेमत्वगेलामरिचांबुपत्रैः गंधान्वितं सौद्रघृतप्रदिग्धं जीर्णे पिबेद्धावि बलं समीक्ष्य हत्पांडुरोगश्वयथुं प्र
शस्यं प्लीहक्रमाणे च कफमेहगुल्मान् भगंदरं षट्जठराणि कासं श्वासं ग्रहण्यामयकुष्ठकंडूः शाखानिलं बद्धपुरीषतां च हिक्कां कि
लासं च हलीमकं च क्षिप्रं जयेद्वर्णबलायुरोज तेजान्वितो मांसरसान्नभुक्ता फलत्रिकं चित्रकपिप्पलीश्च सदीप्यकोलाहरजावि
डंगं विचूर्णितैकोडविकंडिरंश सौहुपुराणस्य तुलां गुडस्य मासं निदध्यात् घृतभाजनस्थं यवेषु तान्यवनिहंति तान्य चाशासां
पांडुविकारिणां च प्रोक्ताहिताः शोफि सुतैषरिशः पिप्पल्यजाजीगजपिप्पलीश्च निदिग्धिकाचित्रकनागरैश्च रजन्यलोपिप्पलीमूलपाठ
मुस्तं च चूर्णं सुखतोयपीतं हन्यात्त्रिदोषं चिरजं च शोफं कल्कं भूनिंबमहौषधान्याजयोजेर त्र्यूषणयावशूक चूर्णं प्रपीतस्त्रि
फलारसेन स्याद्द्वयं स्याल्लवणानि चतार्य योरजोषफलत्रिकं च सपिप्पलीमूलविडंगसारं मुस्ताजमोदामरदारुबिल्वं कलिंगकां
श्चित्रकमूलपाठां यष्ट्याह्वयं सातिविषं पलांशं सहिंगुकर्षं लवणं सुकचूर्णं द्रोणं तथामलकरसं तथैव स्याद्दूर्ध्वमनस्ततमालिकेन साध्य
मालोडयपावहुतमग्रदग्धं स्यात्तनंततः कोलसमां तु मात्रां कृत्वास्य शुष्कां विधिना भजेन प्लीहोदराश्चित्रहलीमकार्शः पांड्वामयारुच
कशोफशोषान् विशूचिकागुल्मगरामरीश्च सश्वासकासान् प्रणुदेत् सकुष्ठान् प्रयोजयेदार्द्रकनागरं वा तुल्यं गुडेनार्धपलानि
वृष्ट्या मात्रा पलं पंचपलानि मासं जीर्णे पयोयूषरसान्नभुक् ना गुल्मोदरार्शः श्वयथुः प्रमेहान् श्वासप्रसेकालसकाविपाकान् स
कामलाशोषयमानो विकारान् कासं कफं चैव जयेत् प्रयोगः रसस्तथैवार्द्रकनागरस्य पथोपजीर्णे पयसान्नमद्यात् शिलाह्व रामु
यवान्त्रिफलारसेन हन्यात्त्रिदोषं श्वयथुं प्रसह्य द्विपंचमूलस्य तुलां कषायं कंसेयवानां च शतं गुडाच्च लेहेकसिद्धे च विनीयचूर्णं ३६

व्योषं त्रिसोगंधमुखाक्षितैच प्रसार्धमात्रं मधुनः स्फटीत किंचिच्च चूर्णादपि यावशूकात् एकोनतः प्राप्य तत्तनश्चलेह्या तुस्ति
निहन्यात् श्वयथुं प्रसह्य श्वासज्वरारोचकमेहगुल्मान् प्लीहत्रिदोषोदरपांडुरोगान् कार्श्यामवातानसृगम्लपित्तं वैवर्ण्यमूत्रानिल
शुक्रदोषान् पटोलमूलामरदारुदंतीत्रायंतिपिप्पल्यभयाविशालाः यष्ट्याह्वयं तिक्तरोहिणी च सचंदनास्याप्लिचुलानिरावृ
कार्षाङ्कितैस्तैः क्वथितः कषायो घृतस्य पेयः कुडवं तु युक्तः वीसर्पदाहज्वरसन्निपातं तृष्णां विषाणि श्वयथुं निहंति सचित्र
कं धान्ययवानिपाठाः सदीप्यकत्र्यूषणवेतसाम्लाः बिल्वात्फलं दाडिमयावशूकं सपिप्पलीमूलमथापि चव्यं पिष्ट्वाक्षमात्रा
णि जलाढकेन पक्त्वा घृतप्रस्थमतः प्रदद्यात् गुल्मोदरार्शः श्वयथुं प्रबद्धं निहंति वह्निं च करोति दीप्तं पिबेद्धृतं वाश्रुणां बुसिद्धं
सचित्रकंसास्मुदारवीर्यं कल्याणकं चापि सपंचगव्यं तिक्तं महद्वाप्यथ तिक्तकं वा क्षीरं घृतं चित्रकृतं सिद्ध्यागतं साधुनिमिञ्च
तेच नसंपत्तं चित्रकमूलगर्भं तक्रेण सिद्धं श्वयथुघ्नमग्र्यं अर्शोतिसारानिलगुल्ममेहांश्चैतन्निहंत्यग्निबलप्रदं च तक्रेण वा
पाकं घृतनेन गो ज्यानि सिद्धान्यथ वायवानां जीवंतजाजीवसारिपुष्कराह्वैः सकारवी चित्रकबिल्वमध्यैः सयावशूकैर्बदर
प्रमाणैः श्वसामल्यका घृतनेल भूषा अर्शांसि सारानिलगुल्ममेहहृद्रोगमंदाग्निहितायवागूः यापंचकोलैर्विधिनेतनेन
सिद्धा भवेत्सापि समात्तयैव कुलत्थयूषश्च सपिप्पलीको मोड्डतश्चसत्र्यूषणयावशूकः रसास्तथा विष्किरजांगलानां सकूर्मगोधा
शिखिशल्लकानां स्वर्चलुगं जनकं पटोलसवायसीमूलकवत्रतिंबं शाकार्थिनो शाकमतिप्रशस्तं भोज्याः पुराणाश्च यवाश्च शा
लिः अभ्यंतरं भेषजमुक्तमेतद्बहिर्हितं यच्छृणु तद्यथावत् स्नेहं प्रदेहान् परिषेचनानि स्वेदांश्च वातप्रबलस्य कुर्यात् शैलेयकु
ष्ठागुरुदारुकौन्तीत्वक्पद्मकैलांबुपलाशमुस्तैः प्रियंगुथौणेयकहेममांसीतालीसपत्रामवसंध्यपान्यैः श्रीवेष्टकध्यामकपिप्पली
भिः स्पृक्कानखैश्चैव यथावलाभं वाताधिके स्याद्गमुशांतितैलं सिद्धं सपिष्टरपि च प्रदेहं जलेन तथा रंडुत्रषार्कसाम्रकाश्मर्यप

च.चि. श्नेरकवृकंजेश्चसिध्येः कदोष्णेरविमननीयैः स्नातस्यगंधैरनुलेपनीयः सवेत्तसासीरवतांद्रुमाणां त्वचः समांजिष्ठतामृणालाः सचंद्र
नागफनकवालुकोच पेतैसप्रदेहस्सतैलपाकः सुक्तरयेतनांवृणविप्रलसे सचंदनंसाभयपद्मकंच स्नानेहिताः क्षीरवतांकषायाः
२७ क्षीरोदकंचंदनलेपनंचकफोत्तकृष्णामिकणापुराणा पिण्याकशिग्रुत्वागमुप्रलेपः कुलत्थमुंगजलमुत्रमेव श्वंडाशक्कृष्णाम
मनुलेपनंचविभीतकानांफलमध्यलेपः सर्वत्रदाहानिहरेःप्रवालःशस्त्राःहस्तैःसकपित्थपत्रैः सचंदनैस्तासिदकासुलेपः
रास्नाकवोकहिफलाविडंगाःशिग्रूत्वचोमूषिककर्णिकाच निकाजैकोव्याघ्रनखोसमेवांसवचेलास्यात्कदरोहिणीच सकाव
मार्चाहस्तीमकुशपुनर्णवानागरचित्रकोच उत्पादनंशोफिषुमूत्रपिष्टंशल्लस्त्याभूलकतोयसेकः शोफास्त्वगात्रावयवाश्रिता
स्तन्लानदूषाहतिनामभेदैः श्रेष्ठावकुत्वारातिरपनंरव्यास्तपांलुकाश्चिद्दलेनिबोधदोषात्मयः स्वैः कुपितानिरानैः कुर्वं
निमर्दः स्वयथुंसमधीरं अंतर्गलेपुंपुरकाचिलंचशालूकसुखुसनिरोधकर्त्रे गलस्यसंधौचिबुकेगलेवासदाहरागः श्वसना
सबोधं शोफोश्चवातिस्य विडालिकास्यात्पुन्यादलेचहलयोरुतास्य स्यातालुविद्व्यपिदाहरोगैर्युक्ताभवेशोथकृताप्ररि
शतालुनिसात्रिदोषात् स्यादंतविद्रध्यपिदंतमांसशोफः कफशोणितसंचयोद्भः गलस्यपार्श्वेगलगंडएकः स्याद्गंडमालाच
द्रुमिस्तगंडैः साध्याःसताः पीनसपार्श्वशूलकासज्वरछर्दियुतानसाध्याः नेषांशिराकायशिरोविरेकाः धूमःपुराणस्यघृतस्यपा
नं सलंघनंवक्त्रसवेषुचैवप्रकर्षणंस्यात्कवलग्रहश्च अंगैकदेशेघनिवारिकासिः स्यात्वरुपारीस्फुरणःशिराभिः ग्रंथिर्मे
हामांसभवस्तनर्निमेदोभवस्निग्धतमश्चलश्च नंशोधितंस्वेदितमश्मकांस्यैः संशकुष्टदंडैर्विनयेदपक्वं विपाद्यसंचाधृत्यमि रोम
पक्वमकोशंशस्त्रेणदग्ध्वाव्रणवच्चिकित्सेत् अदग्धदेशस्यपरिशोषितस्य प्रयातिभूयोनिशानैर्विवृद्धिं तस्माद्दोषःकुशलैःसमंतात्के ३७
शोभवेदीस्यशरीरदेशात् शोषीकृतपावकशोनवीर्यैसुनस्तनीहः प्रसरेद्विसर्पः उपद्रवंतंविनिवारयेत्तैरोषधैःपूर्वतरंयथोक्तैः

ततःक्रमेणास्यचथाविधानंव्रणांश्रणतःत्वरयाचिकित्सेत् विवर्जयेत्कुसुमदराश्रितंसुगलाश्रितंमर्मणिसंश्रितंच स्थूलःखरश्चापिभवेद्धिव
ज्यौपश्चापिबालस्थविराबलानां ग्रंथ्यर्बुदानांचयथाविशेषंप्रदेहकेनोतिदोषहदुष्टे ततश्चिकित्सेत्भिषगर्बुदानिविधानविद्ग्रंथि
चिकित्सितेन नाम्नासमभूलापिडकाभवेद्यासाबालजीनामपरिश्रुतागा रोगःक्षताच्चर्मनखांतरेधात्मांसास्त्रदूषीभृषाशीघ्रपाकः
ज्वराचितावंसणकक्षजायाचर्तिर्निरर्त्तिःकठिनायनाच विडालिकास्यात्कफमालताभ्यांतेषांयथादोषमुपक्रमःस्यात् विश्रावणंपिंडि
कपोपनाहएवंकेषुचैवव्रणवच्चिकित्सेत् विस्फोटकाःसर्वशरीरजास्तस्फोटाःसरागाज्वरतर्षयुक्ताः यज्ञोपवीतप्रतिमाःप्रभूताः
पित्तानिलाजजानिलास्तकासाःश्वापरास्याःपिडकाःप्रकीर्णाःस्थूलाणुमध्याअपिपित्तजाताः सर्वेषुगात्रेषुमसूरमात्रामसू
रिकापित्तकफात्प्रदिष्टा वीसर्पिरागस्यविहितांक्रियांमन्तांतांचकुष्टेचहितंविदध्यात् वध्योनिलाद्यैर्विषणेश्चलिंगैरार्त्तोतिप्रविशेवृद्धिश्च
मूत्रेणपूर्णंमृदुमेदसाचस्निग्धंचविपक्वंकठिनंचशोफं स्यात्संधिजंशोणितजंसमानंतच्चापिपित्तप्रभवस्यकिंचित् विरेचनाभ्यंगनि
रुहलेपाःपक्वेषुचैवव्रणवच्चिकित्सा स्यात्मन्त्रमेदःकफजंविपाद्यविशुद्धयसीव्यद्व्रणवद्विपक्वंक्षमेतृणादिक्षणमन्यथायप्रवा
स्यत्कुडकाश्चपृष्ठेः गुदस्यपार्श्वेपिडकाभृशार्त्तिःपक्वप्रभिन्नातुभगंदरस्यात् विरेचनंचैषणपाटनंचविशुद्धमार्गस्यचतैलदाहः
स्यक्षारमूत्रेणकृपाचितेनतन्निजस्यचास्यव्रणवच्चिकित्सा जंघासुपिंडीप्रपदोपरिष्ठास्याच्छोपदंमांसकफाप्रदोषात् सिरःकफ
घ्नश्चविधिःसमग्रःनत्रेष्यतेसर्षपलेपनंच मंदास्त्रपित्तप्रचलाप्रदुष्टाःदोषास्ततीव्रंतनुरक्तपाकं कुर्वंतिशोफंज्वरतर्षयुक्तंविसर्प
णंजालकगर्दभाख्यं विलंघनंरक्तविमोक्षणंचविरूक्षणंकायविशोधनंच धात्रीप्रयोगान्शिशिरप्रदेहान्कुर्यात्तुजालकग
र्दभस्य एवंविधंश्चाप्यपरान्परांस्यशोफप्रकारानृनिलादिलिंगैः शांतिंबलंदोषहरैर्यथास्वमालेपनच्छेदनभेददाहैः प्रायोभिघाता
दनिलःसरक्तःशोफंसरागंसकरोतितत्र विसर्पतुल्मारुतरक्तनुच्चकार्यंविषघ्नंविषजंचकर्मेति भवतिचात्र त्रिविधस्यदोषभेद

च.चि. नुं सर्वांशंबवगात्रभेदश्च स्वयथोर्द्विविधस्य तथालिंगानिभिषग्जितंप्रोक्तं ॥ ॥ इतिश्रीच[illegible]संहि[illegible]चिकि[illegible]स्थानेश्व
यथुचि[illegible]तंनामद्वादशोध्यायः ॥ ॥ अथातउदरचिकित्सितंव्याख्यास्यामः ॥ ॥ इतिहस्माह ॥ सिद्धविद्याधराकीर्णेकैला
३८ सेनंदनोपमे तपमानंतपस्तीव्रंसाक्षाद्धर्ममिवाच्युतं भिषग्वेदविदांश्रेष्ठंभिषग्वेदप्रवर्तकं पुनर्वसुंजितात्मानमग्निवेशोऽब्रवी
दुधः भगवन्नुदरैर्दुःखैः दृश्यंतेहदिनानराः शुष्कवक्त्राःकृशैर्गात्रैराध्मातोदरकुक्षयः प्रनष्टाग्निबलाहाराःसर्वचेष्टास्वनीश्व
राः दीनाप्रतिक्रियाभावात्त्यजंतोसून्ननाथवत् तेषामायतनंसंख्यांप्राग्रूपाकृतिभेषजं यथावच्छ्रोतुमिच्छामिगुरुणासम्यगी
रितं सर्वभूतहितार्थर्षिःशिष्येणैवंप्रचोदितः सर्वभूतहितंवाक्यंव्याहर्तुमुपचक्रमे अग्निदोषान्मनुष्याणांरोगसंघाःपृथ
ग्विधाः मलवृध्याप्रवर्तंतेविशेषेणोदराणितु मंदेग्नौमलिनैर्भुक्तैरपाकाद्दोषसंचयः प्राणासंदूष्यमार्गान्बध्वाधोत्तरान्
त्वग्मांसांतरमागम्यकुक्षिमाध्मापयन्भृशम् जनयत्युदरंतस्यहेतुंशृणुतलक्षणं अत्युष्णलवणक्षारविदाह्यम्लगराशनात्
मिथ्यासंसर्जनाद्रूक्षविरुद्धाशुचिभोजनात् प्लीहार्शोग्रहणीदोषकर्शनात्कर्मविभ्रमात् क्लिष्टानामप्रतीकाराद्रौक्ष्याद्वेगविधा
रणात् स्रोतसांदूषणादामसंक्षोभादतिपूरणात् अर्शोबालपुरीषोधदंत्रस्फुटनभेदनात् अतिसंचितदोषाणांपापंकर्म
चकुर्वतां उदराण्युपजायंतेमंदाग्नीनांविशेषतः रूक्षान्नास्वादनिःस्निग्धंगुर्वन्नंपलचिरात् भुक्तंविदह्यतेसर्वंजीर्णाजीर्णं
नवेत्तिच सहतेनातिसौहित्यमीषच्छोफश्चपादयोः शश्वद्बलक्षयोल्पेपिव्यायामेश्वासमृच्छति वृद्धिःपुरीषनिचयोरूक्षोदा
वर्तहेतुकाः बस्तिसंधौरुगाध्मानंवर्धतेपाटतेपिच आतन्यतेचजठरमपिलघ्वल्पभोजनैः राजीजन्मवलीनाशःस्युर्लिं
गंतुभविष्यतां रुद्ध्वास्वेदांबुवाहीनिदोषाःस्रोतांसिसंचिताः प्राणाग्न्यपानान्संदूष्यजनयत्युदरंनृणां कुक्ष्याध्मानमा राम
टोपःशोफःपादकरस्ययोः मंदाग्निःश्लक्ष्णगंडत्वंकार्श्यंचोदरलक्षणं पृथग्दोषैःसमस्तैश्चप्लीहबद्धक्षतोदकैः संभवंत्यु ३८

दराण्यष्टौतेषांलिंगंपृथक्शृणु रूक्षाल्पभोजनायासवेगोदावर्तकर्शनैः वायुःप्रकुपितःकुक्षौहृद्बस्तिगुदमार्गगः हत्वाग्निंकफ
मुदीर्यतेनरुध्यगतिस्ततः आचिनोत्युदरंजंतोस्त्वग्मांसांतरमाश्रितः इतितस्यरूपाणिकुक्षिपादपृष्ठवृषणश्वयथुरुदरविपाट
नमनियतौचवृद्धिह्रासौकुक्षिपार्श्वशूलोदावर्तांगमर्दपर्वभेदः शुष्ककासआकार्श्यदौर्बल्यारोचकाविपाकाधोगुरुत्वंवातवर्चोमूत्रसंगः
श्यावारुणपरुषत्वंनखनयनवदनत्वङ्मूत्रवर्चसामपिचोदरंतन्वसितराजीसिरासंततमाहमाध्मातदृतिशब्दवद्भवति वायुश्चो
र्ध्वमधस्तिर्यक्सशूलश्चरतेतद्वातोदरमितिविंद्यात् कट्वम्ललवणात्युष्णातीक्ष्णाग्न्यातपसेवनैः विदाह्यजीर्णाध्यशनै
श्चाशुपित्तंसमाचितं प्राप्यानिलकफौरुध्वामार्गमुन्मार्गसंस्थितं निहंत्यामाशयेवह्निंजनयत्युदरंततइति तस्यरूपाणि
दाहज्वरतृष्णामूर्छाभ्रमातिसारकटुकास्यत्वंहरितहारिद्रत्वंनखनयनवदनत्वङ्मूत्रवर्चसामपिचोदरंनीलपीतह
रितहारिद्रताम्रराजीभिराततं दह्यतेदूयतेधूप्यतेउष्यतेस्विद्यतिक्लिद्यतेमृदुस्पर्शंक्षिप्रपाकंचभवतीत्येतत्पित्तोदरमिति
विंद्यात् अव्यायामादिवास्वप्नातिदतिस्निग्धातिपिच्छलैः दधिदुग्धोदकानूपमांसैश्चाप्यतिसेवितैः क्रुद्धेनश्लेष्मणास्रोतः
स्वावृतेष्वावृतानिलः तमेवपीडयन्कुर्यादुदरंबहिरंततः तस्यरूपाणि गौरवारोचकाविपाकांगसादसुप्तिपादमुष्कोरसोः कु
क्षिनिद्राश्वासकासास्यवैरस्यं शुक्लत्वंनखनयनवदनमूत्रवर्चसामपिचोदरंशुक्लराजीशिराततंगुरुस्तिमितकठिनं
चभवत्येवश्यैवंतु श्लेष्मोदरमितिविंद्यात् दुर्बलाग्नेरपथ्याशनविरुद्धगुरुभोजनात् स्त्रीभिर्दत्तैश्चरजोलोमविषमूत्रास्थिन
खादिभिः विषैश्चमंदैर्वाताद्याःप्रकुप्यंतिश्रियतास्त्रयः शीघ्रं शोफान्प्रकुर्वंतोजनयंत्युदरंततः इतितस्यरूपाणिसर्वे
षामेवदोषाणांसमस्तानिलिंगान्युपलभ्यंते वर्णाश्चनखादिषूदरमपिचनानावर्णराजीभिराततं भवतीत्येतत्सान्निपातो
दरमितिविंद्यात् अत्याशितस्यसंक्षोभाद्यानयानातिचेष्टितैः अतिव्यवायभाराध्ववमनव्याधिकर्शनैः वामपार्श्वाश्रितः

प्लीहाच्युतः स्थानाद्विवर्धते शोणितं वा रसादिभ्यो विवृद्धं तत् वर्धयेदिति तस्य प्लीहा कठिनोऽष्ठीलेवादौ वर्धमानः कच्छपसंस्थान उप
च.चि. पलभ्यते स चोपेक्ष्यमाणः क्रमेण कुक्षिं जठरमग्न्यधिष्ठानं परिक्षिपन्नुदरमभिनिर्वर्तयति तस्य रूपाणि दौर्बल्यारोचकाविपाक
३९ वर्चोमूत्रग्रहतमकपिपासांगमर्दछर्दिमूर्छांगसादकासश्वासमृदुज्वरानाहाग्निनाशकार्श्यास्यवैरस्यवर्णभेदकोष्ठपर्वशू
लान्यपि चोदरमरुणवर्णमविवर्णं वा नीलपीतहारितहारिद्रराजिमद्भवति एवमेव यकृदपि दक्षिणपार्श्वसंस्थं कुर्यात् तुल्यहेतुलिं
गौषधत्वात्तस्य प्लीहजठर एवावरोधः इत्येतत् प्लीहोदरमिति विद्यात् पक्ष्मवालैः सहान्नेन भुक्तैर्बध्यतेऽनेन गुदे उदावर्तैस्तथार्शोभि
रन्त्रसंमूर्छनेन वा अपानो मार्गसंरोधाद्धत्वाग्निं कुपितोऽनिलः वर्चःपित्तकफान् रुद्ध्वा जनयत्युदरं ततः इति तस्य रूपाणि तृष्णादाहज्व
रतमकमुखतालुशोषांगसादकासश्वासवैवर्ण्यदौर्बल्यारोचकाविपाकवर्चोमूत्रसंगाध्मानछर्दिक्षवथुशिरोहृन्नाभिगुदशूला
न्यपि चोदरं मूढवातं स्थिरमरुणनीलराजिसिरावनद्धमराजीकं वा प्रायो नाभ्यामुपरि गोपुच्छवदभिनिर्वर्तते इत्येतद्बद्धगुदोदरमिति
विद्यात् शर्करातृणकाष्ठास्थिकण्टकैरन्नसंयुतैः भिद्येतान्त्रं यदा भुक्तैर्जृम्भितात्यशितस्य वा पाकं गच्छन् रसस्तेभ्यश्छिद्रेभ्यः प्र
स्रवन् बहिः पूरयन् गुदमन्त्रं च जनयत्युदरं ततः इति तदधो नाभेरधः प्रायोऽभिनिर्वर्तमानमुदरं स्यात् यथाबलं च दोषाणां रूपा
णि दर्शयत्यपि चातुरः सलोहितनीलपीतपिच्छिलकुणपगन्धमवर्चउपवेशयति हिक्काश्वासकासतमकतृष्णाप्रमोहारोचकविपा
कदौर्बल्यपरीतश्च भवत्येतत् छिद्रोदरमिति विद्यात् स्नेहपीतस्य मन्दाग्नेः क्षीणस्यातिकृशस्य च अत्यम्बुपानान्नष्टेऽग्नौ
मारुतः क्लोम्नि वस्थितः श्रोतःसु रुद्धमार्गेषु कफश्चोदकमूर्छितः वर्धयेतां तदेवाम्बु तत्स्थानादुदराय ताविति तस्य रूपाणि अ
न्नकांक्षापिपासागुदस्रावनिस्तोदशूलकासश्वासातिदौर्बल्यान्यपि चोदरं नानावर्णराजीभिराततमुदकपूर्णदृतिसंक्षोभसंस्प राम्
र्शं भवत्येतदकोदरं विद्यात् तत्राचिरोत्पन्नमनुपद्रवमनुदकप्राप्तमुदरं त्वरमाणश्चिकित्सेत् उपेक्षितानां ह्येषां दोषाः स्वस्थाना ३९

दपाः सृतापरिपाकाद्द्रवीभूताः संधिस्रोतांसि उपक्लेदयन्ति स्वेदश्च बाह्यस्रोतःसु प्रतिहतगतिस्तिर्यग्वगतिष्ठमानस्तदेवोदकमाप्याययति
तत्र पिच्छासंतामंडलमुदरं गुरु स्तिमितमाकोटितमशब्दं मृदुस्पर्शमपगतराजीकमाक्रान्तं नाभ्यां परिसर्पतीति ततोऽनन्तरमुदकप्रादुर्भा
वः तस्य रूपाणि कुक्षेरतिमात्रं वृद्धिः सिरान्तर्धानगमनमुदकपूर्णस्येव दृतिसंक्षोभसंस्पर्शं च भवति तदातुरमुपद्रवाः स्पृ
शन्ति छर्द्यतीसारतमकतृष्णाश्वासकासदौर्बल्यपार्श्वशूलारुचिस्वरभेदमूत्रसंगादयस्तथाविधमचिकित्स्यं विद्यादिति भवति
चात्र वातात्पित्तात्कफात्प्लीहसन्निपातात्तथोदकात् परं परं कृच्छ्रतममुदरं भिषगादिशेत् पक्षाद्बद्धगुदं तूर्ध्वं सर्वं जातोदकं तथा
प्रायो भवत्यभावाय छिद्रान्त्रं चोदरं नृणां शूनाक्षं कुटिलोपस्थमुपक्लिन्नतनुत्वचं बलशोणितमांसाग्निपरिक्षीणं तु संत्यजेत् श्वयथुः
सर्वमर्मोत्थः श्वासहिक्कारुचिस्तृड्रुक् मूर्छाछर्दिरतीसारो निहन्त्युदरिणं नरं जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतं बलिन
स्तदजाताम्बु यत्नसाध्यं नवोत्थितं अशोफमरुणाभासं सशब्दं नातिभारिकं सदा गुडुगुडायन्तं सिराजालगवाक्षितं नाभिं विष्टभ्य पा
युवेगं कृत्वा प्रणश्यति हृन्नाभिवंक्षणकटीगुदप्रत्येकशूलिनः कर्कशं सृजतो वातं नातिमन्दे च पावके लोलस्याविरसे चास्ये मूत्रेऽल्पे
संहते मले अजातोदकमित्येतैर्लिंगैर्विज्ञाय यत्नतः उपाचरेद्भिषग्दोषबलकालविशेषवित् वातोदरं बलवतः पूर्वं स्नेहैरुपा
चरेत् स्निग्धाय स्वेदितांगाय दद्यात्स्नेहविरेचनं हृतदोषपरिम्लानं वेष्टयेद्वाससोदरं तथास्यानवकाशत्वाद्वायुर्नाध्मा
पयेत्पुनः दोषातिमात्रोपचयात् स्रोतोमार्गनिरोधनात् संभवत्युदराण्येषां तस्मान्नित्यं विशोधयेत् संसृज्य चैनं संशुष्कं बलार्थं पाय
येत्पयः प्रागनुत्क्लिष्टमनल्पं च बलेन च क्रमात्पयः पूर्वैः रसैश्च संराम्ललवणैर्दीपितानलं सोदावर्तिनः स्निग्धं स्विन्नमा
स्थापयेत्तं स्फुरणाकुंचसंध्यस्थिपृष्ठपार्श्वत्रिकार्तिषु दीप्ताग्निं बद्धविण्मूत्रं रूक्षमप्यनुवासयेत् तीक्ष्णाधोभागयुक्तः
स्यान्निरूहो दाशमूलिकः बलाम्लस्नेहैरण्डतैलेनैवानुवासनः अविरेच्यं तु यं विद्याद्दुर्बलं स्थविरं शिशुं सुकुमारप्र

च.चि. कुर्यादल्पदोषं वा नोल्बणानलं न भिषग्वारयेत् सर्पिर्यूषमांसरसादिभिः बस्त्यभ्यंगानुवासैश्च क्षीरैश्चोपाचरेद्भिषक् पित्तोत्तरे
त्वबलिनं पूर्वमेव विरेचयेत् दुर्बलं त्वनुवास्यादौ शोधयेत्क्षीरबस्तिना संजातबलकायाग्निं पुनः स्निग्धं विरेचयेत् पयसा सत्रि
४० वृत्कल्केन तु वृक्षसंतनं तं ससलाचापनानाव्यांग्लेनारग्वधेन वा सकफे वा समूत्रेण सवाते तिक्तसर्पिषा पुनः क्षीरप्रयोगं
च बस्तिकर्म विरेचनं क्रमेण ध्रुवमातिष्ठन् जंतुः पित्तोदरं जयेत् स्निग्धं स्विन्नं विशुद्धं च कफोदरिणमातुरं संसर्जयेत्कटुक्षार
युक्तैरन्नैः कफापहैः गोमूत्रारिष्टपानैश्च चूर्णायस्कृतितैलपा सक्षारतैलपानैश्च शमयेत्तु कफोदरं सन्निपातोदरे सर्वा यथोक्ताः
कारयेत्क्रियाः सोपद्रवं तु निर्वृत्तिं प्रत्याख्येयं विजानता उदावर्तरुजानाहैर्दाहमोहतृषाज्वरैः गौरवारुचिकाठिन्यैस्त्वनिलादीन्
यथाक्रमं लिंगैः प्लीहाधिके दृष्टा तत्रैवं स्वलक्षणैः चिकित्सां संप्रयुंजीत यथादोषं यथाबलं स्नेहं स्वेदं विरेकं च निरूहमनुवा
सनं समीक्ष्य कारयेद्बाहौ वामे वा व्यधयेत्सिरां षट्पलं पाययेत्सर्पिः पिप्पलीर्वा प्रयोजयेत् सगुडामभयां वाथ क्षारारिष्टगणां
स्तथा पिप्पलीनागरं दंती समांशं द्विगुणाभयं बिडार्धांशयुतं चूर्णमेतदुष्णांबुना पिबेत् विडंगसैंधवं सक्तून्सघृतान्
चित्रकं वचां दग्ध्वा कपोतोहीतकं लत्तानां तु गंडे कासाभयाजले मूत्रे वा स्रुत्पातश्च पलं रात्रिपिच्छितं पयसा गुल्मप्ली
हापहैः पिबेत् कामलागुल्ममेहार्शः प्लीहसर्वोदरकृमीन् सहन्याज्जांगलरसैर्जीर्णस्याच्चात्र भोजनं रोहितकत्वचं श्रे
ष्ठां पलानां पंचविंशतिं कोलद्विप्रस्थसंयुक्तां कषायमुपकल्पयेत् पालिकैः पंचकोलैस्तैः सर्वैश्चापि तुल्यया रोहीतकत्व
चा पिष्टैर्घृतप्रस्थं विपाचयेत् प्लीहाभिवृद्धिं शमयत्येतदाशु प्रयोजितं अग्निकर्म च कुर्वीत भिषग्वा तकफोल्बणे पैत्तिके जीवनी राम
यानि सर्पींषि क्षीरबस्तयः रक्तावसेकः संशुद्धिः क्षीरपानं च शस्यते यूषैर्मांसरसैश्चापि दीपनीयसमाहितैः लघून्यन्नानि सं ४०
योज्य दृप्यान् प्लीहोदरे भिषक् स्निग्धाय बद्धोदरिणे मूत्रतीक्ष्णौषधान्वितं सतैललवणं दद्यान्निरूहं चानुवासनं परिस्रंसीनि

च चान्नानि तीक्ष्णं चैव विरेचनं उदावर्तहरं कर्म कार्यं वातघ्नमेव च छिद्रोदरमृते स्वेदः श्लेष्मोदरवदाचरेत् जातं जातं जलं स्राव्यमे
वं तद्यापयेद्भिषक् तृष्णाकासज्वरार्तं तु क्षीणमांसाग्निमानवं वर्जयेच्छ्वाससंतप्तं शूलिनं दुर्बलेंद्रियं अपां दोषहराण्यादौ प्र
दद्यादुदकोदरे मूत्रयुक्तानि तीक्ष्णानि विविधक्षारवंति च दीपनीयैः कफघ्नैश्च तमाहारैरुपाचरेत् द्रवेभ्यश्चोदकादि
भ्यो नियच्छेदनुपूर्वशः सर्वमेवोदरं प्रायो दोषसंघातजं मतं तस्मात्त्रिदोषशमनीं क्रियां सर्वेषु कारयेत् दोषैः कुक्षौ हि संपू
र्णे वह्निर्मंदत्वमृच्छति तस्माद्भोज्यानि भोज्यानि दीपनानि लघूनि च रक्तशालीन्यवान्मुद्गान् जांगलांश्च मृगद्विजान् पयोमू
त्रासवारिष्टान्मधुसीधुं तथा सुरां यवागूमोदनं वापि यूषैर्दद्याद्रसैरपि मंदाम्लस्नेहकटुभिः पंचमूलोपसाधितैः उद
कानूपजं मांसं शाकं पिष्टकृतं तिलाः व्यायामाध्वदिनस्वप्नं यानपानं च वर्जयेत् तथोष्णलवणाम्लानि विदाहीनि गुरूणि च ना
द्यादन्नानि जठरी तोयपानं च वर्जयेत् नातिसांद्रं हितं पाने स्वादु तक्रमपेलवं त्र्यूषणक्षारलवणैर्युक्तं वा निचयोदरी वातो
दरी पिबेत्तक्रं पिप्पलीलवणान्वितं शर्करामरिचोपेतं स्वादु पित्तोदरी पिबेत् यवानीसैंधवाजाजी व्योषयुक्तं कफोदरी पिबे
न्मधुयुतं तक्रं कोष्णं नातिपलवं मधुतैलवचाशुंठीशताह्वाहिंगुसैंधवं युक्तं प्लीहोदरी जातं सव्योषं तूदकोदरी बद्धोद
री तु हपुषायवान्यजाजिसैंधवं दद्यात्तक्रं हपुषायवान्यजाजिसैंधवं पिबेन्मधुयुतं तक्रं चक्षाम्लं नातिपलवं मधुतैलवचाकुष्ठ
शताह्वाहिंगुसैंधवैः युक्तं प्लीहोदरी जातं सव्योषं तूदकोदरी बद्धोदरी तु हपुषायवान्यजाजि पिबेच्छिद्रोदरी तक्रं पिप्पली
क्षौद्रसंयुतं गौरवारोचकार्तानां समदाग्न्यतिसारिणां तक्रं वातकफार्तानाममृतत्वाय कल्पयेत् शोफाणां हन्ति रामृणां
पीडितकारणं पयः शुष्कानांसामदेहानां गव्यं छागं समाहितं देवदारुपलाशार्कहस्तिपिप्पलीशिग्रुकैः साश्वगंधैः सगो
मूत्रैः प्रदिह्यादुदरं समैः वृश्चिकालीं वचां कुष्ठं पंचमूलं पुनर्नवां वर्षाभूनागरं धान्यं जलेप्रक्वावसेचयेत् मूत्राण्यष्टावुदरी

DR. BHAU DAJI MEMORIAL

च.चि. णांस्नेहपानेनचयोजयेत् रूक्षाणांबहुवातानांतथासंशोधनार्थिनां स्नेहनीयानिसर्पींषिजठरघ्नानिवक्ष्यते पिप्पलीपिप्पलीमूलंच
व्यचित्रकनागरैः सक्षारैरर्धपलिकैः द्विप्रस्थंसर्पिषःपचेत् कल्केर्द्विपंचमूलस्यतुलार्धस्यरसेनच दधिमंडाढकोपेतंतत्स
४१. पिंजठरापहं श्वयथुंवातविष्टंभंगुल्मार्शांसिचनाशयेत् नागरत्रिफलाप्रस्थंघृततैलात्तथाढकं मस्तुनःसाधयित्वातुपिबेत्स
र्वोदरापहं कफमारुतसंभूतेगुल्मेचैतत्प्रशस्यते चतुर्गुणेजलेमूत्रेद्विगुणेचित्रकात्पलेकल्केसिद्धंघृतप्रस्थंसक्षारंजठरीपिबेत्
यवकोलकुलत्थानांपंचमूल्यारसेनच सुरासौवीरकाभ्यांचसिद्धंचापिबेद्घृतं एभिःस्निग्धायसंजातेबलेशांतेचमारुते स्र
स्तेदोषाश्रयेदद्यात्कल्पदृष्टंविरेचनं पटोलमूलंरजनीविडंगंत्रिफलात्वचं कंपिल्लकंनीलिनींचत्रिवृतांचेतिचूर्णयेत् षडाद्यान्
कार्षिकानंत्यांस्त्रीनाद्याद्द्वित्रिचतुर्गुणान् कृत्वाचूर्णंततोमुष्टिंगवांमूत्रेणवापिबेत् विरिक्तोमृदुसंजीतभोजनंजांगलैरसैः मंडं
पेयांचपीत्वासव्योषंषडहंपयः शृतंपिबेत्ततश्चूर्णंपिबेदेवंपुनःपुनः हंतिसर्वोदराण्येतच्चूर्णंजातोदकान्यपि कामलांपांडु
रोगंचश्वयथुंचापकर्षति गवाक्षींशंखिनींदंतींतिल्वकस्यत्वचंवचां पिबेद्द्राक्षांबुगोमूत्रकोलकर्कंधुसीधुभिः यवानीहपुषा
धान्यत्रिफलोपकुंचिका कारवीपिप्पलीमूलमजगंधाशटीवचा शताह्वाजीरकंव्योषंस्वर्णक्षीरीसचित्रका द्वौक्षारौपौष्क
रंमूलंकुष्ठंलवणपंचकं विडंगंचसमांशानिदंत्याभागास्त्रयस्तथा त्रिवृद्विशालेद्विगुणेसातलास्याच्चतुर्गुणा एषनारायणोनामचूर्णो
रोगगणापहः नैनंप्राप्यनिवर्तंतेरोगाविष्णुमिवासुराः तक्रेणोदरिभिःपेयोगुल्मिभिर्बदरांबुना आनद्धवातेसुरयावातरोगेप्रस
न्नया दधिमंडेनविड्भंगेदाडिमांबुभिरर्शसैः परिकर्तेसवृक्षाम्लैरुष्णांबुभिरजीर्णके भगंदरेपांडुरोगेश्वासेकासेगलग्रहे
हृद्रोगेग्रहणीदोषेकुष्ठेमंदेनलेज्वरे दंष्ट्राविषेमूलविषेसगरेकृत्रिमेविषे यथार्हंस्निग्धकोष्ठैश्चपेयमेतद्विरेचनं हपुषांका राम
चनक्षीरींत्रिफलांकटुरोहिणीं नीलिनींत्रायमाणांचसातलांत्रिवृतांवचां सैंधवंकाललवणंपिप्पलींचेतिचूर्णयेत् दाडि ४१

मत्रिफलामांसरसमूत्रसुखोदकैः पेयोयंसर्वगुल्मेषुप्लीह्निसर्वोदरेषुच श्वित्रेकुष्ठेष्वजीर्णेचसदनेविषमाग्निषु शोफार्शःपांडुरोगेषु
कामलायांहलीमके वातंपित्तंकफंचैवचिरेणसंप्रसाधयेत् नीलिनीनिचुलंव्योषंद्वौक्षारौलवणानिच चित्रकंचपिबेच्चूर्णंक्षीरे
णोदरगुल्मनुत् क्षीरद्रोणंसुधाक्षीरप्रस्थंदधिमंडाढकेसिद्धात्तस्मात्क्षीरपलकल्किनात् घृतप्रस्थात्पिबेन्मात्रांतद्वज्जठरशांतये कल्के
नेस्नुक्पयहलेनच गुल्मानांगरदोषाणांज्वराणांचशांतये एषांचानुपिबेत्पेयांयूषंवास्वादुवारसं घृतेजीर्णेविरिक्तस्तुकोष्णा
मर्धशृतंजलं शुंठ्याःपिबेत्ततःपेयांयूषंकोलत्थकंततः पिबेद्रूक्षस्त्र्यहंत्वेवंभूयोवाप्रतिभोजितः पुनःपुनःपिबेत्सर्पिरानुपूर्व्यात
येनतु पीलुकल्केनसंसिद्धंघृतमानाहभेदनं गुल्मघ्नंनीलिनीसर्पिःस्नेहंवामिश्रकंपिबेत् घृतान्येतानिसिद्धानिविदध्यात्कुशलो
भिषक् गुल्मानांगरदोषाणांउदराणांचशांतये पीलुकल्केनसंसिद्धंघृतमान्निर्हृतदोषाणां जांगलप्रतिभोजिनां दोषशेषनि
वृत्त्यर्थंयोजनंवक्ष्यामनःपरं चित्रकःसुरदारुभ्यांपयःक्षीरेणवापिबेत् मांसंयुक्तोयवानाःपिप्पल्यानागरस्यच विडंगचि
त्रकौदंतीव्योषंचव्यंचतैः पयःकल्कैःकोलसमैःपीत्वापयदधमुदरंजयेत् पिबेत्कषायंत्रिफलादंतीरोहितकैःशृतं व्योषक्षारयुतं
जीर्णेरसैःपयःजांगलैः मासंवाभयजंभोज्यंसतक्षीरघृतान्वितं क्षीरानुपानंगोमूत्रेणाभयांवाप्रयोजयेत् सप्ताहंमाहिषंमूत्रं
क्षीरंचानन्नभुक्पिबेत् मासमौष्ट्रंपयश्छागंत्रीन्मासान्व्योषसंयुतं हरीतकीसहस्रंवाक्षीराशीवाशिलाजितान् शिलाज
तुविधानेनगुग्गुलंवाप्रयोजयेत् शृंगवेरार्द्रकरसःपानेक्षीरसमोमतः तैलंरसेनतेनैवसिद्धंदशगुणेनवा दंतीद्रवंतीफलजंतै
लंदूष्योदरेहितं शूलानाहविबंधेषुसक्तुयूषरसादिभिः सरलागरुशिग्रूणांबीजेभ्योमूलकस्यच तैलान्यभ्यंगपानार्थेशूल
घ्नान्यनिलोदरे श्लेष्मिकारुचिहृल्लासबलाग्निमनपायच अरिष्टान्दापयेत्क्षारान्कफघ्नान्श्लेष्मोदरे पिप्पलीतिल्वकंहिं
गुनागरंहस्तिपिप्पली भल्लातकंशिग्रुफलंत्रिफलांकटुरोहिणीं देवदारुहरिद्रेद्वेसरलातिविषेवचां कुष्ठंमुस्तंतथापंच

च·चि·

४२

लवणानि प्रकल्प्य च दधिसर्पिर्वसातैलमज्जायुक्तानि दापयेत् अंतर्धूमं क्षारं विडालपदकं पिबेत् मदिरादधिमंडोष्णजलका
लिरसुरासवैः हृद्रोगं श्वयथुं गुल्मं प्लीहार्शोजठराणि च विसूचिकामुदावर्तं वातानाष्ठीलां च नाशयेत् क्षारं चाजकरीषाणां स्रुतं
मूत्रे विपाचयेत् कार्षिकं पिप्पलीमूलं पंचैव लवणानि च पिप्पली चित्रकं शुंठी त्रिवृत्तां त्रिफलां वचां यवक्षारोपोष्करं मूलं स्व
र्णक्षीरीं विषाणिकां गुडिकां कोलमात्रां तु तस्मादम्लेन वा पिबेत् श्वयथौ चाविपाके च प्रवृद्धे चोदरकोष्ठे मावितानां गवां मूत्रे
षष्टिकानां च तंडुलैः यवागूं पयसा सिद्धां प्रकामं भोजनेन नरं पिबेदिक्षुरसं चानु जठराणां निवृत्तये स्वं स्वं स्थानं व्रजंत्येषां वातपि
त्तकफास्तथा चित्रबिल्वस्तपारं तातिरपं खिनिफलैवः पूर्णं कंपर्वकं प्रयुंजीत मात्राभक्तं गतदवयेपि ततोऽस्याशिलीमूलेववो
दोषायशाल्लवित् दध्याम्लक्षयुतं क्षीरं दोषघ्नौषधरं शिवं पार्श्वशूलमुरस्तंभं हृद्ग्रहं वापि मारुतः जनयेद्यस्य तैलं च बिल्वक्षा
रेण पाययेत् तथाग्निमंथश्योनाकपलाशतिलनालजैः चव्याकदल्यपामार्गक्षारैः प्रत्येकशः श्रुतैः तैलं पक्वं भिषग्दद्यादुद
राणां प्रशांतये कफे वातेन पित्तेन ताभ्यां वाप्यावृतेऽनिले बलिनः स्वौषधयुतं तैलमैरंडजं हितं तीक्ष्णैः ससारगोमूत्रैर्व
स्तिभिः समुपाचरेत् सोऽपि स्तंभोऽपि वा वायुर्दुराध्मापयति यं नरं सविरिक्तो नरो यस्तु पुनराध्मायते तु तं सुस्निग्धैरम्ललव
णैर्निरूहैः समुपाचरेत् क्रियाभिस्तेजश्वे त्रिदोषो न प्रशाम्यति ज्ञातीन्सुहृदो दारान्ब्राह्मणान्नृपतीन्गुरून्
अनुज्ञाप्य भिषक्कर्म विदध्यात्संशयं ब्रुवं अक्रियायां ध्रुवो मृत्युः संशयो भवेत् एवमाख्याय तस्येदं मनुज्ञाः प्रयोजयेत्
पानभोजनसंयुक्तं विषमस्मै प्रयोजयेत् यस्मिन्वा कुपितः सर्पो विसृजेद्धि फले विषं तेनास्य दोषसंघातः स्थिरो लीनो विमार्गगः
विषेणाशुप्रमथितो राशुभिन्नः प्रवर्तते विषेणाहृतदोषं तं शीतांबु परिषेचितं पाययेच्च भिषग्दुग्धं यवागूं वा यथाबलं त्रिवृत् ४२
मंडूकपर्ण्याः शाकं स यवचास्तुकं भक्षयेत्कालशाकं वा स्वरसोदकसाधितं निरम्ललवणस्नेहविना खिन्नमनन्नभुक् मा

समेकं ततश्चैवं तृषितः स्वरसं पिबेत् एवं निर्हृतदोषः स्यात्षाण्मासिकं ततः दुर्बलाय प्रयुंजीत प्राणभृत्कारभं पयः दूष्योदरे
हृतृणं कर्मैरस्य आरग्वधकर्मणां वामं कुक्षिं मात्यथित्वा नाभ्यधश्चतुरंगुलं मात्रायुक्तेन शस्त्रेण पाटयेन्मतिमान्भिषक् विपाट्यां
त्रं ततः पश्चाद्वीक्ष्य बद्धक्षतांत्रयोः सर्पिषाभ्यक्तकेशादीन चमृज्य विमोक्षयेत् मूत्रेणाद्रं संमृज्य तत्रान्त्राणि वमोक्षयेत् छिद्राण्य
न्त्रस्य तु स्थूलैर्दंशयित्वा पिपीलिकैः बहुशः संगृहीतानि ज्ञात्वा छित्वा पिपीलिकान् प्रतीपान्त्रैः प्रवेश्यांत्रं प्रैयैः सीव्येद्व्रणं ततः य
था जातोदरं सर्वमुदरं व्यधयेद्भिषक् वामभागे च धोमे नाडीं दत्वावगालयेत् विश्राव्य च विमृश्यैतद्दृश्येद्वा ससोदरं तथा च स्तिविरेका
द्यैर्लीनं सर्वं च वर्जयेत् निश्रुतं लंघितः पेयामस्नेहलवणां पिबेत् अतः परं तु षण्मासान्क्षीरवृत्तिर्भवेन्नरः त्रीन्मासान्पय
सा पेयां तु पिबेत् त्रींश्चापि भोजयेत् श्यामाकं कोरदूषं वा क्षीरेणालवणं लघु नरः संवत्सरेणैवं जयेत्प्राप्तं जलोदरं प्रयोगाणां
च सर्वेषामनुक्षीरं प्रयोजयेत् दोषानुबंधरक्षार्थं बलस्थैर्यार्थमेव च प्रयोगापचितांगानां हितं ह्युदरिणां पयः सर्वधातुक्षयार्ता
नां देवामृतमिवापरं इति भवति चात्र हेतुं प्राग्रूपमष्टानां लिंगं व्यासमासतः उपद्रवान्गरीयस्त्वं साध्यासाध्यत्वमेव च
जाताजातांबुलिंगानि चिकित्सां प्रोक्तवानृषिः चिकित्सितं समासव्यासतो निर्दिष्टं घोरदारुणाः [illegible]
[illegible] आसीनं मुनिमव्यग्रं कृतज
प्यं तल्लक्षणं पृष्टवानर्शसां युक्तिमग्निवेशः पुनर्वसुं प्रकोपहेतुः संस्थानं लिंगं चिकित्सितं साध्यासाध्यविशेषांश्च तस्मै त
न्मुनिरब्रवीत् इह खल्वग्निवेश द्विविधान्यर्शांसि सहजानि कानिचिज्जातस्योत्तरकालजानि तत्र बीजं गुदवलि
बीजोपतप्तमायतनमर्शसां सहजानां विकाराणां तत्र सहजानि सहजातानि शरीरेणार्शांसीत्यधिमांसविकाराः सर्वेषां चार्श
सां क्षेत्रं गुदस्यार्धपंचमांगुलावकाशोत्तिस्त्रो गुदवलयः क्षेत्रमितिदेशः केचित्त्वभूयः परावदेशं समुद्दिश्य सर्वासां शीघ्रमपत्यय

च·चि· पंगलमुखनासिकाक्षिकाक्षिकर्णनाभिवर्त्मानि त्वगुत्तरस्याधिमांसदेशाएषगुह्यवलिजानां चर्मकीलिति संज्ञातस्मिन् सर्वेषां चा
र्शसामधिष्ठानं मेदो मांसं त्वक्षु तत्र सहजान्यर्शांसि कानिचि दणूनिकानिचिन्महांलिकानिचिद्दीर्घाणिकानिचिद्ध्रस्वानिकानिचिद्वृत्ता
५२. नि कानिचिद्विसृतविसर्पाणि कानिचिदंतःकुटिलानि कानिचिद्बहिःकुटिलानिचिदणूनि कानिचिन्महांलिकानिदंतं कुटिलानिका
निचिद्बहिः कुटिलानिकानिचिद्बहुमुखानि यथास्वदोषानुबंधवर्णानिलेरूपहेतोजन्मप्रभृतिप्रवृत्तिरूपाणि विवर्णः क्षामोदीनप्र
चुरविबद्धवातमूत्रवर्चाः शर्करी चाश्मरी वातश्चानियतविबद्धयुक्तापक्वामभिन्नवर्चाः अंतरांतरांतरामश्वेतपांडुहरितपीत
रक्तारुणतनुसांद्रपिच्छलगंधामवर्चउपवेशीनाभिबस्तिवंक्षणोदेशप्रचुरपरिकर्तिकान्वितसगुदशूलप्रवाहिकाध्मानपरिहर्षप्र
मोहप्रसक्तविष्टंभसादोपांत्रकूजोदावर्तहृदयोंद्रियोपलेपः प्रभूतविबद्धशुल्काम्लोद्गारसकृदुर्बलाग्निरल्पशुक्रः क्रोधनोदुःखोपचा
रशीलः श्वासकासतमकतृष्णाहृल्लासछर्दरोचकपीनसक्षवथुपरितोमिरिकः शिरःशूली क्षामभिन्नसन्नसक्तजर्जरस्वरः
कर्णरोगीसंभूनपाणिपादवदनाक्षिकूटः सज्वरः सांगमर्दः सर्वसर्वास्थिशूली चांतरांतरा पार्श्वबस्तिहृदयपृष्ठग्रहोपल
सः प्रध्यापनःपरः परमलससेवेति जन्मप्रभृत्यस्यगुदजा तेनामार्गोपरोधाद्वायुरपानः प्रत्यारोहन्समानोदानव्यानप्राणान्पित्तश्ले
ष्मारौ गोधप्रकोपयति तेचसर्वएवकुपिताः पंचवायवःपित्तश्लेष्मणौ चाभिद्रवंतेएतान्विकाराञ्जनयंती त्युक्तानि सहजान्य
र्शांसि अतऊर्ध्वंजातस्योत्तरकालजानि व्याख्यास्यामः गुरुमधुरशीताभिष्यंदिविदाहिविरुद्धाजीर्णप्रमितासात्म्यभोजनाद्व्यमात्स्यां
गदमहिषाविकपिशितभक्षणात्कृशशुष्कपूतिमांसपैष्टिकपरमान्नक्षीरमंदकातिविदलगुडविकृतिसेवनान्माषमूलके क्षु
रसपिण्याकपिंडालुकशुष्कशाकशुक्तलशुनकिलाटतक्रपिंडकविसमृणालशालूकक्रौंचादनकसेरुकशृंगाटकतरूटविरूढन
वशूकशमीधान्यामलकोपयोगाद्गुरुफलशाकसारागदधिहरिनकंवत्रवसानिशिरस्पनत्रपर्यूषितपूतिशीतान्नसंकीर्णान्ना राम,
४२,

भ्यवहरणात्मंदकानिक्रांतमद्यपानाद्व्यापन्नगुरुसलिलपानात्स्नेहपानसंशोधनवस्तिकर्मविभ्रमादव्यायामादव्यावायाद्दिवा
स्वप्नस्त्रुखशयनासनपसेवनाद्योपहताग्नेर्मलोपचयो भवत्यतिमात्रमथोत्कुटकविषमकठिनासनसेवनादुद्भ्रांतयानोष्ट्र प्रमाणादति
व्यवायाद्वस्तिनेत्रात्मस्य कप्रणिधानाद्गुदक्षणनादभीक्ष्णं शीतांबुसंस्पर्शाच्चेलेलोष्टतृणभिसंघर्षणात्प्रततातिप्रवाहणा
द्वातमूत्रपुरीषवेगोदीरणात्समुदीर्णवेगविधारणात्स्त्रीणां चामगर्भभ्रंशाद्गर्भोत्पीडनाद्दुर्विषमप्रसूतिभिश्च प्रकुपितो वा
युरपानमलमुपचितमधोगामिमासाद्य गुदवलिष्वाधत्ते ततस्तास्वभिषण्णास्वर्शांसि प्रादुर्भवंति सर्षपमसूरमुद्गमाषमकु
ष्ठकलायपिंडीटिंडिकेरयवकाकनंतिकाकुंदुरुबिंबीवकरीरोदुंबरखर्जूरजांबवकशृंगीगोस्तनांगुष्ठकसेरुकशृंगाटकशिखिशुकजिह्वा
जिह्वाप्रमुकुलकर्णिकासंस्थानानि सामान्याद्वातपित्तकफप्रबलानितेषामयं विशेषः शुष्कम्लानकठिनपरुषरूक्षश्यावान्यतीक्ष्णाग्राणि
वक्राणिस्फुटितमुखानि विषमविसृतानि शूलाक्षेपतोदस्फुरणचिमिचिमासंहर्षपरीतानि स्निग्धोपशयानि प्रवाहिकाध्मानशिश्न
वृषणवंक्षणगुदांगमर्दहृदयद्रवग्रहतानि प्रततविबद्धवातसर्ववर्चोमूत्र कटिपृष्ठत्रिकपार्श्वकुक्षिबस्तिशूलशिरोभितापक्षवथु
वथूद्गारप्रतिश्यायकासोदावर्तायासशोषमूर्छारोचकमुखवैरस्यतिमिरकर्णनादशंखशूलकारवकारणपाणि श्यावारुणप
रुषनखनयनवदनत्वङ्मूत्रपुरीषस्य वातोल्बणान्यर्शांसि विंद्यादिति भवति चात्र कषायकटुतिक्तानि रूक्षशीतलघूनि च
प्रमिताल्पाशनं तीक्ष्णंमद्यं मैथुनसेवनं लंघनं देशकालौ च शीतौ व्यायामकर्म च शोको वातातपस्पर्शो हेतुर्वातार्शसां मत
ति मृदुशिथिलसुकुमाराण्यर्शांसि हानिरक्तपित्तनीलकृष्णानि स्वेदोपक्लेदवंत्यामविस्रगंधीनि तनुरक्तपीतस्रावीणि रु
धिरवाहीनि दाहकंडूशूलनिस्तोदपाकवंति शिशिरोपशयानि संभिन्नपीतहरितवर्चांसि विस्रगंधप्रचुरविण्मूत्राणि च
पिपासाज्वरतमकसंमोहभोजनद्वेषकराणि पीतनखदंतत्वङ्मूत्रपुरीषस्य पित्तोल्बणान्यर्शांसीति विंद्यात् भवति चात्र

च.चि. कदम्ब लवणक्षारव्यायामाग्न्यातपप्रभाः देशकालावशिशिरौ क्रोधो मद्यमसूयनं विदाहि तीक्ष्णमुष्णं च सर्वं पानान्नभेष
जं पित्तोल्बणानां विज्ञेयः प्रकोपे हेतुरर्शसामिति तन्वस्राविप्रमाणेन च स्यूपचितानि श्लक्ष्णस्पर्शानि स्निग्धपाण्डुपिच्छिलानि
४४ स्तब्धानि गुरूणि स्तिमितानि सुमहान्ति स्थिराणि स्वपूनि बहुप्रसन्नपिञ्जरशुक्लरक्तपिच्छाश्राविणि कण्डूलानि गुरुपिच्छिलश्वेतमूत्रपुरी
षाणि प्रवाहिकातिमात्रोत्थानवंक्षणानाहं च निपरिकर्तिकाहृल्लाससमिष्ठीविकाकासारोचकप्रतिश्यायगौरवच्छर्दिमूत्रदोषशोफपा
ण्डुरोगशीतज्वराश्मरीशर्कराहृदयेन्द्रियोपलेपास्यमाधुर्यप्रमेहकराणि दीर्घकालानुबन्धान्यतिमात्रमग्निमार्दवक्लैब्यकराणि आम
विकारप्रबलानि शुक्लानखनयनवदनत्वङ्मूत्रपुरीषस्य श्लेष्मोल्बणान्यर्शांसीति विद्यात् भवन्ति चात्र मधुरस्निग्धशीतानि ल
वणाम्लगुरूणि च अव्यायामदिवास्वप्नशय्यासनसुखे रतिः प्रवातसेवा शीतो देशकालावचिन्तनं श्लेष्मिकाणां समुद्दिष्टमेत
त्कारणमर्शसां हेतुलक्षणसंसर्गाद्विद्याद्द्वन्द्वोल्बणानि तु सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणं समं विष्टम्भोऽन्नस्य दौर्बल्यं कुक्षेराटो
पः ऽवच कार्श्यमुद्गारबाहुल्यं सक्थिसादोऽल्पविट्कता ग्रहणीदोषपाण्डुर्तिराशङ्का चोदरस्य तु पूर्वरूपाणि निर्दिष्टान्यर्शसा
मभिवृद्धये अर्शांसि खलु जायन्ते नासन्निपतितैस्त्रिभिः दोषैर्दोषविशेषात्तु विशेषः कल्प्यतेऽर्शसां पञ्चात्मा मारुतः पित्तं क
फो गुदवलित्रयं सर्वाण्येव प्रकुप्यन्ति गुदजानां समुद्भवे तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च सर्वदेहोपतापीनि प्रायः कृच्छ्र
तमानि च हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा शोफो हृत्पार्श्वशूलं च यस्यासाध्योऽर्शसो हि सः हृत्पार्श्वशूलं सम्मोहश्छर्दिरङ्गस्य रुग्ज्व
रः तृष्णा गुदस्य पाकश्च निहन्युर्गुदजातुरं सहजानि त्रिदोषाणि यानि चाभ्यन्तरे वलौ जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दिशेत् राम
शेषत्वादायुषस्तानि चतुष्पादसमन्विते याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च ४४
तेषां प्रशमने यत्नमाशु कुर्याद्विचक्षणः कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च बाह्यायां तु वलौ जाता

न्येकदोषोल्बणानि च अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च तेषां प्रशमने यत्नमाशु कुर्याद्विचक्षणः तान्याशु हि गुदं बद्ध्वा कुर्युर्बद्धगुदोदरं तत्राहु
रेके शस्त्रेण कर्तनं हितमर्शसां दाहं क्षारेण वाप्येके दाहमेके तथाग्निना अस्त्येतद्भूरितन्त्रेण धीमता दृष्टकर्मणा क्रियते त्रिवि
धं कर्म भ्रंशस्तत्र सुदारुणः पुंस्त्वोपघातः श्वयथुर्गुदे वेगविनिग्रहः आध्मानं दारुणं शूलं व्यथा रक्तातिवर्तनं पुनर्विरोहो रूढानां
क्लेदो भ्रंशो गुदस्य वा मरणं वा भवेच्छीघ्रं शस्त्रक्षाराग्निविभ्रमात् यत्तु कर्म सुखोपायमल्पभ्रंशमदारुणं तदर्शसां प्रवक्ष्यामि
समूलानां निवृत्तये वातश्लेष्मोल्बणान्याहुः शुष्काण्यर्शांसि तद्विदः प्रस्रावीणि तथार्द्राणि रक्तपित्तोल्बणानि च तत्र शुष्का
र्शसां पूर्वं प्रवक्ष्यामि चिकित्सितं स्तब्धानि स्वेदयेत्तानि शोफशूलान्वितानि च चित्रकक्षारबिल्वानां तैलेनाभ्यज्य बुद्धिमान्
यवमाषपुलाकानां कुलत्थानां च पोटलैः गोखराश्वशकृत्पिण्डैस्तिलकल्कैस्तुषैस्तथा वचाशताह्वापिण्डैर्वा सुखोष्णैः स्नेहसंयुतैः
सक्तूनां पिण्डिकाभिर्वा स्निग्धानां कुष्ठतैलसर्पिषा शुष्कमूलकपिण्डैर्वा काण्णगन्धिकैः रास्नापिण्डैः सुखोष्णैर्वा सस्नेहैर्हपुषैरपि
वृषकस्याक्षरास्नायाः शाकं गञ्जनकस्य च अभ्यज्य कुष्ठतैलेन स्वेदयेत्पोटलीकृतैः वृषार्कैरण्डबिल्वानां पत्रोत्क्वाथेश्च सेचये
त् मूलकत्रिफलार्काणां वेणूनां वारणस्य च अग्निमन्थशिग्रूणां पत्रैरश्मन्तकस्य च जलेनोत्क्वाथ्य शूलार्तं स्वभ्यक्तमवगाह
येत् कोलोत्क्वाथे यवाक्वाथे सौवीरकतुषोदके कल्के क्वाथेऽम्लके वा दधिमण्डाम्लकाञ्जिके गोमूत्रे वा सुखोष्णेन स्वभ्यक्तमुपवे
शयेत् कृष्णसर्पवराहोष्ट्रजं बूकावृषदंशजं वसामभ्यञ्जनं दद्याद्धूपनं चार्शसां हितं नृकेशाः सर्पनिर्मोकोवृषदंशस्य चर्म
च अर्कमूलं शमीपत्रमर्शसां धूपनं हितं तुम्बुरूणि विडङ्गानि देवदारु सक्षता घृतं वराह वृषविट्च धूपनं सक्तु चाघृतं कुञ्ज
रस्य पुरीषं तु घृतं सर्जरसो मधु हरिद्राचूर्णसंयुक्तं सुधाक्षीरं प्रलेपनं गोपित्तपिष्टाः पिप्पल्यः सहरिद्राः प्रलेपनं पिप्पल्यश्चि
त्रकं श्यामा बिल्वं मदनतण्डुलाः प्रलेपः कुक्कुटशकृद्धरिद्रागुडसंयुतः तिक्तुम्भश्यामृतासंगः पारापतशकृद्गुडः प्रले

च.चि. पश्चाद्गजाह्लादिनिवाभल्लातकानिच प्रलेपस्यार्कजाह्लादिदलैः सोष्णावसायुतैः मूलकस्य पद्मकैर्कोशातकीवसयासह आर्कपयःस
धाकाण्डतिक्तालाब्वश्वपल्लवाः करंजावस्तमूत्रंचलेपनंश्रेष्ठमर्शसां अभ्यंगाद्याः प्रदेहान्ता यएते परिकीर्तिताः परिकीर्तिताः स्तंभश्व
४५ यथुकण्डूर्णा नास्त्रेशर्शसांहिताः प्रदेहांतेपक्कानांगुदजाः प्रश्रवंतिहि संचितंदुष्टरुधिरंततः संपद्यतेसुखी रूक्षोष्णस्निग्धशीतैर्हिनव्या
धिरुपशाम्यति रक्तेदुष्टेभिषक्तस्माद्रक्तमेवावसेचयेत् गुदश्वयथुशूलार्तंमंदाग्निंपाययेत्ततः पूपर्णपिप्पलीमूलंपाठांहिंगुसचित्र
कैः सौवर्चलंपुष्कराख्यं अजाजींबिल्वपेशिकां बिडंयवानींहपुषांविडंगंसैंधवंवचां तिंतिडीकंचमंडेनमधेनोष्णोदकेनवाशो
थग्रहणीदोषशूलानाहाश्चमुच्यंते पाचनपाययेद्वात्तंतद्वत्त्यामतिसारिके सगुडामभयांवाथप्राशयेत्पूर्वभक्तिकीं पाययेद्वात्व
चूर्णंत्रिफलारससंयुतं हंत्यगुदाश्रयेदोषेगुदजायांनिसंक्षयं गोमूत्रेत्र्यध्युषितांदद्यात्सगुडांवाहरीतकीं हरीतकींतत्रयुक्तानांत्रिफ
लांचयोजयेत् सनागरंचित्रकंवाशीधुयुक्तंप्रदापयेत् चव्यंवासिफसंयुक्तंसाजाजीचित्रकंपिबेत् सुरांवाहपुषापाठायुक्तांसौवर्
चलान्वितां दधित्थंबिल्वसंयुक्तंसाजाजीव्योषचित्रकैः सुरांवाहपुषापाठायुक्तांसौवर्चलान्वितां दधित्थंबिल्वसंयुक्तंयुक्तंवा
व्योषचित्रकैः भल्लातकयुतंचापिप्रदद्यात्तक्रतर्पणं बिल्वनागरसंयुक्तंयवान्याचित्रकेणवा चित्रकंहपुषांहिंगुदद्याद्वातक्रसं
युतं पंचकोलकयुक्तंवातक्रमस्मैप्रदापयेत् हपुषांकुंचिकांधान्यामजाजींकारवींशठीं पिप्पलीपिप्पलीमूलंचित्रकोहस्ति
पिप्पली शृंगवेरंसमरिचमजगंधांसचव्यकं यवानींचाजमोदांचचूर्णितंतक्रसंयुतं मंदाम्लकटुकंविद्वान्पाययेद्धृतभाजने
व्यक्ताम्लकटुकंजातंतक्रमरिष्टसंज्ञितं प्रपिबेन्मात्रयाकालेधन्लस्यल्पपिपासिते दीपनंरोचनंवर्ण्यंकफवातानु
लोमनं गुदश्वयथुकण्डूर्तिनाशनंबलवर्धनं त्वचंचित्रकमूलस्यपिष्ट्वाकुंभंप्रलेपयेत् तक्रंवादधिवातत्रजातमर्शोहरंपि राम
बेत् वातश्लेष्मार्शसांतक्रात्परंनास्तीहभेषजं तत्प्रयोज्यंयथादोषंसस्नेहंरूक्षमेववा सप्ताहंवादशाहंवापक्षंमासम ४५

थापिवा बलकालप्रमाणज्ञोभिषक्तक्रंप्रयोजयेत् अत्यर्थमृदुकायाग्नेस्तक्रमेवावचारयेत् सायंवालाजसक्तूनांदद्यात्तक्रावलो
हिकां जीर्णेतक्रेप्रदद्याद्वातक्रपेयांससैंधवां तक्रानुपानंसस्नेहंतक्रौदनमतःपरं यूषैर्मांसरसैर्वापिभोजयेत्तक्रसंयुतं काल
क्रमज्ञःसहसानचतक्रंनिवर्तयेत् तक्रप्रयोगोमासांतःक्रमेणोपरमोहितः बलोपचयवर्णार्थमेषनिर्दिश्यतेक्रमः रूक्षम
र्धोद्धृतस्नेहंयतश्चानुद्धृतंघृतं तक्रंदोषाग्निबलवित्त्रिविधंतत्प्रयोजयेत् नविरोहंतिगुदजाःपुनस्तक्रसमाहताः भ्रोतः
सुतक्रशुद्धेषुरसःसम्यगुपैतियः तेनपुष्टिर्बलंवर्णःप्रहर्षश्चोपजायते वातश्लेष्मविकाराणांशतंचविनिवर्तते पि
प्पलीपिप्पलीमूलंचित्रकंहस्तिपिप्पली शृंगवेरमजाजींचकारवींधान्यकानिच बिल्वंकर्कटिकांपाठांपिष्ट्वापयोविपाचयेत्
फलाम्लंयवकक्षारमानादपांडुजापहं समिरंवचपलामकुर्याद्वैदैर्वापिपिव ऽज्जलं सुतेश्चैवघृतंसाध्यमर्शसांविनिवृत्तये सदीपलाशा
सिधांवापिप्पल्यानागरेणवा दद्याद्यवागूंतक्राम्लांमरिचैरवचूर्णितां शुष्कमूलकयूषेणयवकोलत्थमेनवा दधित्थमूलयूषं
वाससकुलत्थमकुष्ठकं जागलधारसंदद्यात्सिभियूषैःसमन्वितं लावादीनांरसंसाम्लंवासतक्रंग्राहिभिर्युतं रक्तशालिर्महाशालिःक
लमोलांगलोमलःशारदःषष्टिकश्चैवस्यादन्नविधिरर्शसां दृष्टकोभिन्नकस्मातामर्शसांहिक्रियाविधिःयस्यमेगाटशकृत्स्तस्यवक्ष्या
मिभेषजं सस्नेहैःसक्तुभिर्युक्तांप्रसन्नांलवणीकृतां दद्यान्मंतडिकांपूर्वंभक्षयित्वासनागरं गुडंसनागरंपाठांफलाम्लंपाय
येत्तथा गुडंघृतंयवक्षारंप्राग्भक्तंवाप्रयोजयेत् यवानीनागरंपाठांदाडिमस्यरसंगुडं सतक्रलवणंदद्याद्वातवर्चोऽनुलोमनं
दुस्पर्शकेनबिल्वेनयवान्यानागरेणवा एकैकेनापिसंयुक्तापाठाहंत्यर्शसांरुज प्राग्भक्तान्समदेहशनसक्तुभिस्लवचूर्णिता
न् करंजपल्लवान्दद्याद्वातवर्चोऽनुलोमनान् मदिरांलवासधणोसीधुंसौवीरकंतथा गुडनागरसंयुक्तांपिबेद्धापूर्वभक्तिकं
सगुडामभयांवाथप्राशयेत्पूर्वभक्तिकीं पिप्पलीनागरक्षारकारवीजीरधान्यकैः सिद्धंसर्पिर्विधातव्यंवातवर्चोवि

च·चि· बंधनुत् फाणितेनवसंयोज्यफलाम्लयेद्वृतं पिप्पलीपिप्पलीमूलं चित्रकोहस्तिपिप्पली शृंगवेरयवक्षारं तैः सिद्धपाययेद्घृतं चव्यचि
त्रकसिद्धं वागुडक्षारसमन्वितं पिप्पलीमूलसिद्धं वा सगुडक्षारनागरं पिप्पलीपिप्पलीमूलं दधिदाडिमधान्यकैः सिद्धं स
६६ र्पिः प्रदातव्यं वातवर्चोविबंधनुत् चव्यंत्रिकटुकंपाठांक्षारंकुस्तुंबरूणिच यवानीपिप्पलीमूलमुभेचविडसैंधवे चित्रकं
बिल्वमभयांपिष्ट्वासर्पिर्विपाचयेत् चतुर्गुणेवदध्याचलद्घृतंकफवातनुत् शकृद्वातानुलोमार्थंजातेदध्नचतुर्गुणे
प्रवाहिकांगुदभ्रंशंमूत्रकृछ्रंपरिस्रवंगुदवंक्षणशूलंचघृतमेतद्व्यपोहति नागरंपिप्पलीमूलंचित्रकोहस्तिपिप्पली श्व
दंष्ट्रापिप्पलीधान्यंबिल्वंपाठायवानिकां चांगेरीस्वरसेसर्पिः कल्कैरेभिर्विपाचयेत् चतुर्गुणेचदध्नात्घृतंकफा
तनुतनुत् अर्शांसिग्रहणीदोषंमूत्रकृछ्रंप्रवाहिकं गुदभ्रंशार्तिमानाहंघृतमेतद्व्यपोहति पिप्पलीनागरंपाठांश्वदंष्ट्रां
चपृथक्पृथक् भागान्त्रिपलिकान्कृत्वाकषायमुपकल्पयेत् गंठीरंपिप्पलीमूलंव्योषंचव्यंसचित्रकं पिष्ट्वाक
ल्कीकृतंतत्रदद्यात्पलिकंभिषक् पलानिसर्पिषस्तत्रचत्वारिंशत्प्रदापयेत् चांगेरीस्वरसंतत्सर्पिषाद्दधिसद्गुणान्
मृदग्निनाततःसाध्यंसिद्धंसर्पिर्निधापयेत् नराहारंप्रयोक्तव्यमन्नेप्रायोगिकेविधौ ग्रहस्पर्शौविकारंप्रंगुल्महृद्रो
गनाशनं शोफप्लीहोदरानाहमूत्रकृछ्रज्वरापहं कासहिक्काऽरुचिश्वासमूदनंपार्श्वशूलनुत् बलपुष्टिकरंधन्यम
ग्निसंदीपनंपरं सगुडांपिप्पलीयुक्तामभयांघृतभर्जितां त्रिवृतंलोफलांवापिभक्षयेद्दानुलोमिकीं विड्वातकफपित्तानाम०
नुलोम्येश्वनिर्मले गुदेर्शांसिप्रशाम्यंतिपावकश्चाभिवर्धते वर्हिर्तित्तिरिलावानांरसानम्लानसंस्कृताम् दक्षाणांवर्त
कानांचदद्याद्विड्भेदसंग्रहे नृवरंतीफलशानांचांगेर्याश्चित्रकस्यचयमकेभर्जितंदद्याच्छाकंदधिससंचितं उपोदकां रामू
चंचुपर्णींवीरांवास्तुकपल्लवान् सुवर्चलांसलोणींकायवशाकमवल्गुजां अम्लीकांसमहापत्रांकाकमाचींरुहासहां ५६

शाकंसच्यःसजीवन्त्याःशाकंलुञ्जनकस्यच दधिदाडिमसिद्धानियमकेभर्जितानिच धान्यनागरयुक्तानिशाकानिशाकान्यना
निदापयेत् गोधलोपाकमार्जारश्वाविद्भृगवामपि कूर्मशल्यकयोश्चापिसाधयेच्छाकवद्रसान् रक्तशाल्योदनंदद्या
त्सेस्रैवांतशांतये तालाश्वस्तोन्नारुहंमेयाग्निपानयेत्सुतं मदिरांशार्करंजातंशीधुंतकंसुपोरकं अरिष्टंदधिमंडंवासीनंवासमशुक्तं
जलं कंटकार्याश्रृतंवापिश्रृतंनागरधान्यकैः अनुपानंभिषक्दद्याद्वातवर्चोऽनुलोमनं उरावर्तपरीतायदेयन्वास्थैक्रिक्ष्मिः
विलोमवातशूलार्तास्तेधिष्टमनुत्रासनं पिप्पलीमधुकंबिल्वंशताह्वांमदनंवचां कुष्ठंसदीपुष्कराख्यंचित्रकंदेवदारुच पिष्ट्वातैलं
विपक्तव्यंद्विगुणक्षीरसंयुतं अर्शांसामूढवातानांतच्छ्रेष्ठमनुवासनं गुदनिःसरणंशूलंमूत्रकृछ्रंप्रवाहिकां कटयूरुपृष्ठदौर्बल्य
मानाहंवंक्षणाश्रयं पिच्छास्रावंगुदेशोफंवातवर्चोविनिग्रहं उत्थानंबहुशोयश्च जयेत्तच्चानुवासनं आस्थापनानिके
स्निग्धैःसुरवाष्पेणासेहसंयुतैः दार्वंतैरौषधैलेप्याःस्तब्धाःशूनागुदरुहाः नैर्दिग्धानिप्रस्रवंत्याशुश्लेष्मपित्तंसशोणितं
कंडूस्तंभःसमुच्छोफःश्मतानांविनिवर्तते निरूहंवाप्रयुंजीतसक्षीरंदशमूलिकं समूत्रस्नेहलवणंकल्कैर्युक्तैःफलादिभिः
हरितकीनांप्रस्थार्धंप्रस्थमामलकस्यच कपित्थानांदशपलंततोर्द्धेनम्बारुणी विडंगंपिप्पलीरोध्रंमरिचंसैलवालुकं
द्विपलांशंजलस्यैतच्चतुर्द्रोणेविपाचयेत् द्रोणशेषेरसेतस्मिन्पूतेशीतेप्रदापयेत् गुडस्यद्विशतंतिष्ठेत्तत्सर्वंघृतभाजने
पक्षादूर्ध्वंघृतंपेयंततोमात्रायथाबलं अस्याभ्यासादरिष्टस्यगुदजायांतिसंक्षयं ग्रहणीपांडुहृद्रोगप्लीहोदरापहः कुष्ठशो
फारुचिहरोबलवर्णाग्निवर्धनः सिद्धोपमभयाद्यश्चःकामलाश्वित्रनाशनः कृमिग्रंथ्यर्बुदव्यंगराजयक्ष्मज्वरांत
कृत् दंतीचित्रकमूलानामुभयोःपंचमूलयोः भागान्पलांशानापोथ्यजलद्रोणेविपाचयेत् त्रिपलंत्रिफलायाश्चदला
नांतत्रदापयेत् तुलांगुडस्यतिष्ठेच्चमासार्धंघृतभाजने तंमात्रयापिबन्नित्यमर्शोभ्योविप्रमुच्यते ग्रहणीपांडुरोगघ्न

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

च.चि. वातवर्चोनुलोमनं दीपनंचारुचिघ्नंचदद्यारिष्टमिमाबुद्धीरीतकीनांप्रस्थार्द्धंप्रस्थमामलकस्यच विशालायादधित्थस्यप
टाचित्रकमूलकयोः द्वेद्वेपलेपोथ्यद्रोणेसाधयेदपां पादशेषेरसेतस्मिन्पूतशीतेरसेचतुर्थशेषेतुपूतशीतेसमावपेत् ४
८० समावपेत् गुडस्यैकांतुलांवैद्यःसंसृष्टितांपिबेदेनंमहरापर्शोविकारवान् हृत्पांडु दत्वाकुंभेदृढेस्थाप्यंमासार्धंघृतभाविते
प्रलिप्तेपिप्पलीचव्याप्रियंगुमधुसर्पिषा तस्यमात्रांपिबेत्कालेशार्करस्ययथावलं अर्शांसिग्रहणीदोषमुदावर्त्तमरोचकं हृद्रो
गंचसर्वमेतेनसाधयेत् सवस्यामलकस्यैषांकाकुर्याज्जर्जरीकृतांतुलां कुडवोन्मितांपिप्पलीत्वविडंगमरिचानिच पाठांसापिप्पली
मूलंक्रमुकंचव्याचित्रकौ मंजिष्ठेल्वालुकंलोध्रंपालिकान्युपकल्पयेत् कुष्ठंदारुहरिद्रेचसुराह्वंसारिवाद्वयं मुस्तमिंद्राह्वयंचै
वकर्षार्धपलोन्मितान् चत्वारिनागपुष्पस्यपलान्यभिनवस्यच द्रोणाभ्यामंभसोद्वाभ्यांसाधयित्वावतारयेत् द्रोणस्येत्शेषे
शेषेपूतेचशीतेतस्मिन्नुपदापयेत् मृद्वीकाढ्याढकरसेशीतंनिर्यूहसम्मितं शर्करायाःस्यभिन्नायाद्विगुणांतत्रकुसुम
स्वरसश्चाशुल्काकमर्य्यप्रस्थंनवस्यच तमलत्कपत्रंसवसेव्यत्रमुककेसरं चूर्णयित्वाचमतिमान्कार्षिकानिप्रदापयेत्
तत्सर्वंस्थापयेत्पक्षंसचौसघृतभाजने प्रलिप्तसर्पिषाकिंचित्कर्पूरागरुधूपिते पक्षादूर्ध्वमरिष्टोज्यंकनकोनामविश्रुतः येनः
स्वादुरसाहृद्यःप्रयोगाद्भक्तरोचनः अनेकशत्रिशोपलैर्हिंसाअहिसर्वानिवापकर्षति वलिपलितखालित्यदोषजंचव्यपोह
ति पत्रभंगोदकैःशौचंकुर्यादुष्णेनवांभसा इतिशुष्कार्शसांसिद्धमेतदुक्तंचिकित्सितं चिकित्सितमतःसिद्धंश्राविणांसंप्रव
क्ष्यते तत्रानुबंधोद्विविधःश्लेष्मणोमारुतस्यच विदन्वाचंकदिनंरूक्षमधोवायुर्नवर्त्तते तनुचारुणवर्णंचसफेनंचासृ
क्पायांसांककटीहृत्शूलंदौर्बल्यंयदिचाधिकं तत्रानुबंधोवातस्यहेतुर्यदिचरूक्षणं शिथिलंश्वेतपीतंचविट्स्निग्धंगुरु राम.
शीतलं यदर्शसांघनंचासृक्तंतुमत्स्याडुपिच्छिलं गुदंसपिच्छं स्तिग्धंचकारणंश्लेकारणंश्लेष्मानुबंधोविज्ञेयस्तत्र ८०

घपे वातपैत्तिके तर्पणादिक्रमं कुर्याच्छ्रोतांसि निष्यंदयेद्दिजान् अनुलोमोऽनिलः स्वास्थ्यं क्षुत्तृष्णोर्जा मनसि ताल्लघुलमिंद्रियो १७

हार शुद्धिजीर्णौषधाकृतिः क्लमो दाहोऽगसदनं भ्रमो मूर्छारुचिस्तथा अरतिर्बलहानिश्च सावशेषौषधाकृतिः अकालेऽल्पो
तिमात्रं च पुराणं न च भावितं असम्यक्संस्कृतं चैव व्यापद्यतौषधं ध्रुवं आध्मानं परिकर्तश्च स्रावो हृद्गात्रयोर्ग्रहः जीवादानं सवि
भ्रंसः सोपद्रवकृमस्तथा अयोगादतियोगाच्च दशैता व्यापदः स्मृताः तेषां भैषज्यवैधानां वैगुण्यादातुरस्य च योगाः सम
क्प्र वृत्तिः स्यादतियोगे निवर्तनं अयोगः प्रातिलोम्येन न चाल्पं च प्रवर्त्तनं श्लेष्मोत्क्लिष्टेन दुर्गंधिमरुघमेति वा बाहुः विरेच
नमजीर्णं च पीतमूर्ध्वं प्रवर्त्तते क्षुधितेन मृदौ कोष्ठे च भ्योत्क्लिष्टकफेन वा तीक्ष्णं पीतं स्थितं रूक्षं च वमनं स्याद्विरेचनं प्रतिलोमा
पहरणं दोषाणामप्यसौ वसः अयोगसंगं कृच्छ्रेण न चागच्छति लिंगवाल्यशः पीतौषधेन शुद्धश्चेज्जीर्णे तस्मिन्पुनः पिबेत् औषधं तत्र-
जीर्णेऽन्यद्रूपं स्यादतियोगतः शात्वा कोष्ठस्य गुरुतां लघुतां बलमेव च अजीर्णमृदु बाधादौषधं तीक्ष्णमेव च वमनं न नु दुष्छंदक्रूर
कोष्ठं विरेचनं पाययेदौषधं भूयो हन्यासील पुनर्दिनो अस्निग्धास्विन्नदेहस्य रूक्षस्यानवमौषधं दोषानुत्क्लेशानिर्हर्तुं स सत्कं जनये
द्रुदान् विभ्रंसं श्वयथुं हिक्कां तमसो दर्शनं तृषां पिडिकोद्वेष्टनं कंडूं मूर्छां सादं तथैव च स्निग्धस्विन्नं च चास्यल्पं दीप्ताग्नेर्जीर्णमौ-
षधं शीतैर्वा स्तब्धमामेवा दोषानुत्क्लेश्य नावहेत् तानेव जनयेद्रोगान्योगः सर्वशवसः विज्ञाय मतिमांस्तत्र यथोक्तां कारयेत्क्रियां
तं लैल्वलघुलवणाद्यक्तं स्विन्नं प्रस्तरसंकरैः पाययेत पुनर्जीर्णे सम्यग्वर्वा निरूहयेत् निरूढं च रसैर्धान्यैर्भोजयित्वानुवासयेत् फ
मागधिकादारुसिद्धस्तैलेन मात्रया स्निग्धं वातहरैः स्नेहैः पुनस्तीक्ष्णेन शोधयेत् अतितीक्ष्णं क्षुधार्तस्य मृदुकोष्ठस्य भेषजं कृत्वाशु
विट्कफान्धातून्स्रावयेत्द्रवान् बलस्वरक्षयं दाहं कंठशोषं क्लमं तृषां कुर्याच्च मदकरैस्तत्र शेषमौषधमुल्लिखेत् वमने तु विरेकस्या
द्विरेके वमनं मृदु परिषेकावगाहाद्यैः सुशीतैः स्तंभयेच्च तं कषायमधुरैः शीतैरन्नपानौषधैस्तथा रक्तपित्तातिसारघ्नैर्दाहज्वरह
रैरपि अंजनं चंदनोशीरमजासृक्शर्करोदकं लाजाचूर्णैः पिबेन्मंथमतियोगहरं परं वमनस्यातियोगे तु शीतांबुपरिषेचितः पिबेत्फल
रसैर्मंथं सघृतक्षौद्रशर्करं श्रृंगाभिश्च वगदीनां सिद्धां पेयां समाक्षिकां वर्चसांग्राहिकैः सिद्धं क्षीरभोज्यं च दापयेत् जांगलैर्वा रसै

च·म· र्भोज्यपिच्छाबस्तिंचदापयेत् मधुरैरनुवास्यश्च सिद्धेनक्षीरसर्पिषा वमनस्यातियोगेतु शीतांबुपरिषेचितं पिबेल्लकरसैर्मंथंसघृ
१८ तक्षौद्रशर्करं सोद्गारायांभृशंवम्यांमूर्वाया धान्यमुस्तयोः समधूकांचनं चूर्णं लेहयेन्मधुसंयुतं वमतोंऽतःप्रविष्टायांजिह्वायांकवल
ग्रहाः स्निग्धाम्ललवणाहृद्यायूषक्षीररसैर्हिताः फलान्यम्लानिखादेयुस्तस्यान्येचाग्रतोनराः निःसृतांतिलद्राक्षाकल्कलिप्तांप्रवेशये
त् वाग्ग्रहानिलरोगेषुघृतंमांसोपसाधितं लव्वींद्रवांयवागूंतुस्नेहस्वेदौचबुद्धिमान् वमितश्चविरिक्तश्चमंदाग्निश्चातिलंघितः
अग्निप्राणविवृद्ध्यर्थंक्रमंपेयादिमाचरेत् बहुदोषस्यरूक्षस्यहीचदारुणं अभ्यंगस्वेदवर्त्यादिसनिरूहानुवासनं उदावर्तहरं
सर्वंकर्माध्मातस्यशस्यते स्निग्धेनगुरुकोष्ठेनसामेबलवदौषधं क्षामेनमृदुकोष्ठेनश्रांतेनाल्पबलेनवा पीतंगत्वागुदंसाम
माशुदोषंनिरस्यच तीव्रशूलामपिच्छाश्रांकरोतिपरिकर्तिकां लंघनंदीपनंसामेरूक्षोष्णंलघुभोजनं बृंहणीयोविधिःसर्वःक्षाम-
स्यमधुरस्तथा आमेजीर्णेत्रिवंधश्चेक्षाराम्लंलघुशस्यते पुष्पकासीसमिश्रंवासारेणलवणेनवा सदाडिमरसंसर्पिःपिबेद्वातेधि
केसतिदध्यम्लंभोजनेपानेसंयुक्तंदाडिमत्वचा देवदारुतिलानांवाकल्कमुष्णांबुनापिबेत् अश्वत्थोदुंबरप्लक्षकदंबैर्वाशृतंपयःक
षायमधुरंबस्तिंपिच्छाबस्तिमथापिच यष्ट्यांमधुकसिद्धंवास्नेहबस्तिंप्रदापयेत् अल्पंतुबहुदोषस्यदोषानुत्क्लिश्यभेषजं अल्पा
ल्पंश्रावयेत्कंडूशोथंकुष्ठानिगौरवं कुर्याच्चाग्निवधोत्क्लेशस्तैमित्यारुचिपांडुताः परिश्रावसतांदोषांवमदोयेत्शामयेतवा स्ने-
हितंवापुनस्तीक्ष्णंपाययेतविरेचनंशुद्धचूर्णासवारिष्टान्संस्कृतांश्चप्रयोजयेत् पीतस्यौषधवेगानांनिग्रहान्मारुतादयः कुपिता
हृदयंगत्वाघोरंकुर्वंतिहृद्ग्रहं हिक्कापार्श्वरुजाकासदैन्यलालाक्षिविभ्रमैः जिह्वांखादतिनिःसंज्ञोदंतान्किटिकिटापयेत्
नगच्छेद्विभ्रमंतत्रवामयेदाशुतंभिषक् मधुरैःपित्तमूर्छार्तंकटुभिःकफमूर्छितं पाचनीयैस्ततश्चास्यदोषशेषंविपाचयेत्का
याग्निंचबलंतस्यक्रमेणाभिप्रवर्द्धयेत् यवनेनातिवमतोहृदयंयस्यपीड्यते तस्मिन्स्निग्धाम्ललवणंदद्यात्पित्तकफेन्यथा पीतौ राम
षधस्यवेगानांनिग्रहेणकफेणवा रुद्धोतिवविशुद्धस्यगृह्णात्यंगानिमारुतः स्तंभवेपथुनिस्तोदसादोद्वेष्टनमंथनैःतदावातहरं १८

सर्वंस्नेहस्वेदादिशस्यते अतितीक्ष्णंमृदौकोष्ठेलघुदोषस्यभेषस्यभेषजं दोषान्हृत्वाविनिर्मथ्यजीवंहरतिशोणितं तेनान्नं
मिश्रितंदद्याद्वायसायशुनेपिवा भुक्तंतच्चेद्वदेज्जीवंनभक्तंपित्तमादिशेत् शुक्लंवाभावितंवस्त्रंत्याघनंकोष्णवारिणा प्रक्षा
लितंविवर्णंस्यात्पित्तेशुद्धंतुशोणितं तृष्णामूर्छामदार्त्तस्यकुर्यादामरणक्रियां तस्यपित्तहरांसर्वामतियोगेवयाहिता मृगगो
महिषाजानांमद्यस्कंजीवतामसृक् पिबेज्जीवाभिसंधानंजीवोजीवेनगच्छति तद्देवदर्भमृदितरक्तावस्तिंप्रदापयेत् श्यामाकाश्म
र्यबदरीदूर्वोशीरैःशृतंपय घृतमंडांजनयुतंशीतंबस्तिंप्रदापयेत् पिच्छाबस्तिंसुशीतंचाघृतमंडानुवासनं गुदंभ्रष्टंकषायैश्चस्तंभ-
यित्वाप्रवेशयेत् सामगंधर्वशब्दाश्चसंज्ञानाशोऽस्यकारयेत् यदाविरेचनंपीतंविडंतमवतिष्ठति वमनंभेषजंतंवादोषानुत्क्लिश्यनाव
हेतुर्नपीतंविडंतम्यातिष्ठति वमनंभेषजंतंवादोषानुत्क्लिश्यनावहेत् तदाकुर्वंतिकंड्वादीन्दोषाःप्रकुपितागदान् सावशेषाःपुनस्त-
त्रस्यापथ्यायाधिभेषजं पित्तस्वेहंतर्दीप्तेमार्दवाद्धतं नवाहयतिदोषांस्तुस्वस्थानान्स्तंभयेच्चतान् वातसंगगुदस्तंभशूलैःक्षरतिचा
ल्पशः तीक्ष्णंबस्तिंविरेकंवासोर्होलंघितपाचितः रूक्षंविरेचनंपीतंरूक्षेणाल्पबलेनवा मारुतंकोपयित्वाशुकुर्याद्घोरानुपद्रवान्- १
स्तंभशूलानिघोराणिसर्वगात्रेषुमुह्यतः स्नेहस्वेदादिकस्तत्रकार्योवातहरोविधिः स्निग्धस्यगुरुकोष्ठस्यमृदुत्क्लेशौषधंकफं पित्तंवातं
सरुद्ध्वासतंद्रीगौरवंक्लमं दौर्बल्यंचांगवलंघनंपाचनंचात्रस्निग्धतीक्ष्णंचशोधनमितितत्रश्लोकौ॥इत्येतेन्यायतःप्रोक्ताःसरूपाः
सचिकित्सिताःदशकुर्याद्दाशुतमुल्लिखेन्वमनस्यविरेकस्यकृतस्याकुशलैर्नृणांकुशलैर्हृत्तस्यवमनस्यच धामनावेत्तायतात्मस्म
द्वस्थैवेवलत् दद्यात्संशोधनंसम्यगारोग्यार्थंनृणांसदा इतिश्रीचरकसंहितायांपंचकर्माधिकारेवमनविरेचनाव्यापत्सिद्धिवर्ण-
नोनामाष्टशोऽध्यायः अथातोव्यापन्निद्दिंव्याख्यास्यामः इतिस्माह धीधैर्यौदार्यगांभीर्यक्षमादमतपोनिधिं पुनर्वसुंशिष्यग
णःपप्रच्छविनयान्वितः काकतिव्यापदोबस्तेःकिंसमुत्थानलक्षणं काचिकित्साइतिप्रश्नान्श्रुत्वातानब्रवीद्गुरुः नातियोगौक्लम
ध्मानेहिक्काध्मानसिरुर्धता प्रवाहिकोशिरोगर्तिःपरिकीर्तःपरिश्रवः द्वादशाव्यापदोबस्तेरसम्यग्योगसंभवा आसामेकैकशो

रूपंचिकित्सांचनिबोधमेगुरुकोष्टेनिलप्रायेरुक्षेवातोल्वणेपिवा शीतोल्पलवणस्नेहद्रव्यमात्रोघनोपिवा वस्तिःसंक्षोभ्यतंदोषंदु
र्बलं त्वादनिर्हरन् करोतिगुरुकोष्टत्वंवातमूत्रशकृद्ग्रहं नाभिवस्तिरुजंदाहं हृल्लेपंश्वापथुंगदे कंडूंगंडानिवैवर्ण्यमरुचिंवह्निमा
र्दवंचतत्रोष्णाः प्रथ्याः पानंस्वेदाः पृथग्विधा फलवर्त्योथवाकालंज्ञात्वाशस्तंविरेचनं बिल्वमूलत्रिवृद्दारुयवकोलकुलत्थवान् सुरा-
मूत्रादिनावस्तिः सप्रारूपेप्ययस्तमानयेत् स्निग्धस्विन्नोतितीक्ष्णोवामृदुकोष्टेनरुज्यते तस्यलिंगंचिकित्साचशोधनाख्यांसमाचदु
र्हवेत् पृश्निपर्णीस्थिरापद्मंकाश्मर्यमधुकंबलांपिष्वाद्राक्षांमधूकंचक्षीरेतंडुलधावनेद्राक्षायाःपक्वलोष्टस्यप्रसादमधुकस्यच विनी
यमघृतंवस्तिंदद्यादादूतियोगिने आमशेषेनिरूहेणमृदुनादोषईरितः मूर्छयत्यनिलंमार्गंदुष्वाचाग्निंहिनस्तिच कुर्मंसदाहं घूल
मोहवेष्टनगौरवं कुर्यात्स्वेदैर्विरूक्षैस्तंपाचनैश्चाप्युपाचरेत् पिप्पलीकतृणोशीरदारुमूर्छास्तंजलं पिबेत्सौवर्चलोपेतंश्रंसनंह
द्विशोधनंवचानागरशाघोवादधिमंडेनमूर्छिता प्रयाप्रसन्नयावास्फुरारिष्टेनासवेनवा दारुत्रिकटुकंपथ्यापलाशंचित्रकंसटीं
पिष्ट्वाकुष्टंचमूत्रेणपिवेस्क्षारांश्चदीपनान् गतेमस्यविदध्याच्चसमूत्रंदशमूलिकं समूत्रमथवासववणंमधुतैलिकं अ
ल्पवीर्यमहादोषैरुक्षःक्रूरःशयेस्तुतः वस्तिर्दोषावृतोरुद्धमार्गोरुध्यात्समीरणं सविमार्गोऽनिलःकुर्यादाध्मानंमर्मपीडनं
विदाहंगुरुकोष्टस्यमुष्कवंक्षणवेदनां रुणद्धिहृदयंशूलैरितश्चेतश्चधावति श्यामाफलाद्यैर्लवणपिप्पलीकुष्टसर्षपैः
धूममाषवचाकिण्वक्षारचूर्णगुडैः कृतांकरांगुष्टनिभांवर्तियवमध्याप्रवेशयेत् अभ्यक्तस्विन्नगात्रस्यतैलाक्तांस्नेहिते-
गुदे १०विण्मूत्रसंगमानाहंवालंवाप्यनुलोमयेत् अथवालवणागारधूमसिद्धार्थकैःकृतांबिल्वादिश्चनिरूहस्यात्पीलुसर्ष
पमूत्रवान् सरलामरदारुभ्यांसिद्धंचैवानुवासनं मृदुकोष्टेवलेवस्तिरतितीक्ष्णोतिनिर्हरन् कुर्याद्धिकाग्नंबृंहणंचयत्
बलाद्विस्थिरादिकाश्मर्यत्रिफलाचव्यसैंधवैः कृसन्नारर्करनालाम्लैस्तैलंपक्त्वानुवासयेत् उष्णांबुनाक्षपिप्पल्यादितोलवणे
संपक्तःधूमलहरसक्षीरस्वेदात्वातंचवातनुत् अतितीक्ष्णसवा११तोवाश्चान्नंनवासम्यक्प्रपीडितः घट्टयेद्धृदयंवस्तिस्स् १९

त्रकाशाकुशोत्कटैः साम्लःसलवणस्कंधकरीरबदरीवलैः श्वतैर्वस्तिर्हितंसिद्धंवातघ्नैश्चानुवासनं वातमूत्रपुरीषाणांदत्तेवेगान्नि
गृह्णतः अतिवापीडितोवस्तिर्मुखेनापतिवेगवान् मूर्छाविकारंदृष्ट्वादौतस्यशीतांबुनामुखं सिंचेत्पार्श्वोदरेवाधःप्रमृज्याद्धीजये
च्चतं केशेषालंब्यवाकेशंधुनुयात्त्रासयेच्चतं गोखराश्वगजैःसिंहैराज्यप्रेष्यैस्तथोरगैः उल्काभिरेवमर्येश्चवस्तिंतस्यानयेदधः व-
स्त्रपाणिग्रहैःकंठंरुंध्यान्नम्रियतेमथा प्राणोदाननिरोधाद्धिप्रसिद्धतरमार्गगःअपानःपवनोवस्तिंतमाश्ववाश्वपकर्षति ततःकुमु
ककल्कंसंपाययेताम्लसंयुतंस्याच्चैक्ष्ण्यात्सरत्वाच्चवस्तिंसोस्यानुलोमयेत् पक्वाशयस्थितेस्विन्नेनिरूहोदाशमूलिकः यवको
लकुलत्थैश्चविधिर्योमूत्रसाधितः बिल्वादिपंचमूलेनसिद्धोवस्तिरुरःस्थितः शिरःस्थेनावनंधूमःप्रस्थाद्यैःसर्षपैःशिरः स्निग्धस्वि
न्नेमहादोषेवस्तिर्मृद्वल्पभेषजः उत्क्लेश्याल्पंहरेद्दोषंजनयेच्चप्रवाहिकांस्वपथंवस्तिपाशोश्चजंघोरुसदनंतथा विबद्धमारुतोजंतुर
भीक्ष्णंसंप्रवाहयेत् स्वेदाभ्यंगनिरूहांश्चशोधनीयानुलोमिकान् विदध्याल्लंघयित्वावावस्तिंकुर्याद्विरेकवत् पूर्वत्क्रूरकोष्ठेचती
व्रदोषेतनुर्मृदुः शीतोल्पश्चावृतोदोषैर्वस्तिर्विस्तंभितोऽनिलः मार्गेगात्राण्यनुसरनूर्ध्वमूर्ध्वमुपाहतः ग्रीवामन्येचगृह्णातिशिरःकं
ठंभिनत्तिच बाधिर्यकर्णनादंचपीनसंनेत्रविभ्रमं कुर्यात्तितिलतैलेनलवणेनयथाविधि युंज्यात्प्रधमनैर्नस्यैर्मैरस्यविशोधनैः
विरेचनैर्निरूहैश्चवस्तिभिश्चानुलोमकैः अस्निग्धस्विन्नदेहस्ययस्यवस्तिर्विधीयते अतितीक्ष्णोगुरुश्चैवसोतिमात्रंप्रवर्त्तते श्रो
तःसु१२तस्यरूक्षेषुविरूढस्यातिमात्रया तथोदावर्तकोष्टस्यवायुःसंप्रतिहन्यते विलोमःससमुद्धूतोरुजत्यंगानिदेहिनः रुक्तोदक
पसंस्तंभासादवेपथुजृंभणैः तंतैलसैंधवाभ्यक्तमुष्णांभोभिर्निषेचयेत् एरंडपत्रनिःक्वाथैप्रस्तरैश्चोपपादयेत् यवकोलकुल
त्थानांपंचमूलद्वयस्यच जलद्रोणेसमुत्क्वाथ्यकषायंसैंधवेनतं बिल्वतैलेनसंयोज्यवस्तिंदद्याद्विकारवित् तंनिरूहंसमाश्वस्तं-
द्रोण्यांसमवचारयेत् ततोमुक्तवतस्तस्यकारयेदनुवासनं यष्टीमधुकतैलेनबिल्वतैलेनवाभिषक् मृदुकोष्टःस्यदोषस्यरुक्ष
तीक्ष्णोष्णमात्रयावास्तेदोषान्निरस्याशुजनयेत्परि।कर्त्तिकां त्रिकवंक्षणवस्तीनांतोदंनाभेरधोघरुतं विवर्णाल्पसमुत्थानंवस्ति

भिलेखनाद्भवेत् स्वादुशीतौषधैस्तत्रपयसेक्षादिभिःसृतं यष्ट्याह्वतिलकल्काभ्यांवस्तिःस्यात्क्षीरभोजिनः ससर्जरसयष्ट्या
ह्व जिंगिनीकर्दमांजनं विनायद्गंधेवस्तिःस्यात्पक्वाम्लषडभोजिनः पित्तरक्तेगमेल्लडवड़ोवातीस्थोवालस्त्त वस्तिर्गुदंविलखनि
क्षिणोति विदहत्यपि सविदग्धेसविल्यस्त्रापित्तंचानेकवर्णवित वठादिपल्लवेषेवकल्योयव तिलेषुच स्तवर्चल्लोपोदकपोःकर्बुदा
रेचशस्यते" इतितत्रश्लोकाः इत्येताव्यापदःप्रोक्तावस्तेसाकृतिभेषजान् क्षुधाक्रांतःनवस्तीन्निफंजन्मापराध्यति तीक्ष्णालंमू
त्रविल्वाम्लिलवणक्षारसर्षपैः प्राप्तकालंविघातव्यंक्षीराधैर्मार्दवंतथा आपादतलमूत्स्थेनदोषानपक्वाशयेस्थितान् वीर्येण
वस्तिरादत्तेरवरुष्णोऽर्कोभूरसनिव यद्वत्कसं्भसंमिश्रात्तोपाद्रागंहरेसडुःतद्वद्वीरुताद्देहात्रिरूहेनिरेन्मलान् इतिश्रीचरकसंहि
तायांपंचकर्म्माधिकारेवस्तिव्यापत्सिद्धिवर्णनोनामसप्तमोध्यायः अथातःप्रसृतयोनियांसिद्धिंव्याख्यास्यामः इतिस्माह अथेमानृसु
कुमाराणांनिरूहान्शोधनान्मृदून्कर्म्माणाविप्लुतानांचवक्ष्यामिप्रसृतैःपृथक् क्षीरात्प्रसृतोकार्यौमधुतैलघृतात्त्रयः खजेन
मथितोवस्तिर्वातघ्नोविलवर्णकृत् एकैकःप्रसृतस्तैलप्रसन्नाक्षौद्रसर्पिषांबिल्वादिमूलक्वाथाद्वौकौलत्थाद्वौसवातनुत् पंचमूल
रसात्वंचद्वौतैलात्क्षौद्रसर्पिषोः एकैकोःप्रसृतोवस्तिःस्वेदनीयोनिलापहः सैंधवार्द्धाक्षएकैकःक्षौद्रतैलपयोघृतात् प्रसृतोहपु
षाक्षोचनिरूहःशुक्रकृत्सरं पटोलनिंबभूनिंबरास्नासप्तछदांभसः चत्वारःप्रसृताएकोघृतात्सर्षपकल्कितःनिरूहपांचतिक्तो
यंमेहाभिष्यंदिकुष्ठनुत् विडंगत्रिफलाशिग्रुफलमुस्ताखुकर्णिकाःकषायाःप्रसृताःपंचतैलादेकोविमथ्यतान् विडंगपिप्पली
कल्कान्निरूहःकृमिनाशनःपयस्येक्षुस्थिरारास्नाविदारीक्षौद्रसर्पिषएकैकप्रसृतोवस्तिःकृष्णाकल्कोवृषत्वकृत् चत्वारस्ते
लगोमूत्रदधिदधिमंडम्लकांजिकात्प्रसृताःसर्षपैःपिष्टैर्वेट्संगानाभेदनःश्चदंष्ट्राश्मभिदेरंडरास्नात्तैलकृतासवान् सितापं
चकृनाकोलीपिप्पलीमधुयष्टिकाःस्यान्मूत्रकृच्छ्रेतुसानाहेवस्तिरुत्तमः एतेसलवणाकोष्णानिरूहाप्रसृतनव मृदुवस्तोजडीभू
तेलीस्थोःन्योवस्तिरिष्यते शीष्योर्विकपितेस्वादुप्रस्यास्थापनमेवचा वातेपसृष्टस्योष्मैर्स्फूर्गदादादयोयदि द्राक्षांबुनानृवल्कस्कं २०

Dr. BHAU DAJI
MEMORIAL

सपिबेद्दोषशोधनं तद्वेपित्तंकृशात्कृद्धानान् हत्वादाहादिकानूजयेत् शुद्धश्चापिपिवेच्छीतंयवागुंशर्करायुतां अथवातिविरिक्त
स्यक्षीणविट्कस्यभोजनं माषूयणकुल्माषान्पिवेदथ्यथवाकृशंमांसंचेदतिसार्येतपूतिश्लैररीरचकैः सयनातिविषाकुष्ठनल-
दारुवचाःपिवेत् सम्यद्धांतंसव्तिनंकफंवायोतिसार्यते कफंतत्रस्ववर्गीयोवस्तिश्रेष्ठंभिषग्जितं षणामषांद्विसंसर्गान्नित्रशद्देदा
भवंतितु कल्कैःसहषट्त्रिंशाविंशास्तोपद्रवानपि शूलप्रवाहिकामानपरिकर्त्तारुचिज्वरान् तृष्णोष्मदाहमूर्च्छादींश्चैषांविद्याद
पद्रवान् तत्रामेवामनंकार्यंव्योषाम्ललवणैर्युतं पिबंतांशस्यतेवस्तेरामेनप्रतिषिध्यतेवा लघ्वग्राहिवर्गीयोवस्तिःशकृतिशस्य
ते स्याद्दम्लोव्यक्तलवणःस्नेहवस्तिःसमीरणे रक्तवक्तेनपित्तास्तेकषायस्वादुतिक्तकः सार्यमाणेकफेवस्तिःकषायःकटुतिक्तकः
शरूनावापुनावामेनेनवचेस्यथानिले संसृष्टेःतरमानंस्याद्व्योषाम्ललवणैर्युतंपित्तोनामेऽसृजावापितयोरामेनवापुनःसंसृष्टयोर्भ
वेत्यानंभव्योषंस्वादुतिक्तकं आमेनतुकफेसृष्टेव्योषकषायेलवणेफलं वातेनविशिपित्तेवाविट्पित्तास्तैस्तथानिले मधुराम्लःकषा
यस्यात्संसृष्टेवस्तिरुत्तमःस्याद्स्तिर्व्यावस्तिर्वातेनरक्तेतुकार्यःस्यादम्लतिक्तकः त्रिचतुःपंचसंसर्गामेवमेवविकल्पयेत् शुद्धिश्चै-
षातिसारोक्तासर्वरोगषड्ंबरत्वचःशांखंसर्ज्जरसंलासांकर्दमंचपलाशिकं पिष्ट्वातैःसर्पिषःप्रस्थःक्षीरद्विगुणितंपिबेत् अती
सारेषुसर्वेषुपेयमेतच्चयथाबलं कफलंधातुकीबील्वसमंगारक्तशालिभिःमसूराश्चत्थमुद्गैश्चयवागूस्याज्जलेसृतेःडुंबरकद
गसमंगाप्लसवेतसैः मसूरधातकीपुष्पबलामिश्चतथाभवेत् स्थिरादीनांदाबालो वलादीनामथापिवा क्वाथेषुसमस्तृ
राणां यवाम्बस्युःपृथक्पृथक्कच्छुराम्लशाल्यारीलंडुलैर्वापिसाधितःदधितक्रारलोनोम्लाश्चरिष्विक्षुरसेलथा शीताःस
शर्कराःक्षौद्राःसर्वातीसारनाशनाःससर्पिर्मरिचाजाज्योर्मधुरालवणाःशिवाइतिभवति स्निग्धाम्ललवणमधुरंपानंव
स्तिश्चमारुतेकोष्मं शांतंतिक्तंकषायंमधुरंरक्तेरेचपित्तेच तीक्ष्णोष्मंकषायकटुश्लेष्मणिसंग्राह्विवातनुत्स्वृति विपाचनमामे
पानंपित्तासृग्वस्तयोरुक्ताःअतिसारात्स्त्रस्वत्तंमिश्रंद्वंद्वादियोगजेष्वपिच तत्रोद्रेकविशेषादोषेषूपद्रवक्रमविशेषः प्रासृति

च०म० काः सद्यापक्रियानिरूहस्तथातिसारहिताः रसकल्ययवघृतयवाग्वश्चोक्तागुणाप्रसृतासेद्धाच इतिश्रीचरकसंहितायांपंच
२१ कर्म्माधिकारे प्रसृतयोगीयां सिद्धिवर्णनोनामाष्टमोऽध्यायः अथातस्त्रिमर्म्मीयाव्याख्यास्यामः इतिस्माह सप्तोत्तरंमर्म्मश
तमस्मिन्शरीरे स्कंधमर्म्मत्याश्रितमग्निवेश तेषामन्यतमपीडायांसमपीडापसमधिकापीडाभवति चेतनानिबंधवैशेष्यात्
तत्रशाखाश्रितेभ्योमर्म्मभ्यः स्कंधाश्रितानिगरीयांसिशाखानांतदाश्रितत्वात् स्कंदाश्रितेभ्योपिबस्तिहृच्छिरांसि तन्मूलत्वाच्छरी
रस्यतद्धृदयेदशधमन्यः प्राणोदानौमनोबुद्धिचेतनामहाभूता॥नन्निचनाभ्यामोचाराइवप्रतिष्ठिता निशिरस्सिंद्रियाणिइंद्रियानि
प्राणवहानिश्रोतांसिसूर्यमिवगभस्तयःसंश्रितानिबस्तिगुदश्चलगुदमुष्कसीवनीशुक्रमूत्रवहानांनाडीनांमध्येमूत्रधारांबुवहा
नांसर्वश्रोतसामुदधिरिवापगानांप्रतिष्ठितः बहुभिश्चतन्मूलैसंज्ञकैःश्रोतोभिर्गगनमिवदिनकरकरैर्व्याप्तमिदंशरीरं तेषांत्र
याणामन्यतमस्यापिभेदाशुचैवशरीरभेदः स्यादाश्रयविनाशादाश्रितस्यपिविनाशः उपघातान्घोरतव्याधिप्रादुर्भावः तस्मा
देषानिविशेषतोरक्षाणिबाह्याभिघाताशानादिभ्यश्चतत्रहृदयेभिहतेकासश्वासबलक्षयकंठशोषमापकर्षणेनिह्वानिर्गममुख
तालुशोषायस्मारोन्मादप्रलापचित्तनाशादयस्युः शिरस्यादिहतेमन्यास्तंभार्दितचक्षुर्विभ्रममोहोद्वेष्टनचेष्टाहनुग्रहमूकका
सनगद्गदत्वाक्षिनिमीलनगंडस्पंदनजृंभणालालालाश्रावस्वरहानिवदनजिह्मत्वादीनिचबस्तौतुवातमूत्रवर्चोनिग्रहवंक्षणमे
हनवस्तिशूलकुंडलोदावर्त्तवर्ध्मागुल्मानिष्ठीलोपस्तंभनाभिकुक्षिगुदश्रोणीग्रहादयोवाताकपस्तस्थानांतेषांलिंगानिचिकित्सि
तेथीक्रियाविसन्धक्तानिकिंत्वेतानिविशेषतोऽनिवार्द्रक्ष्याणि अनिलोपिहिपित्तकफसमुदीरणेहेतुः प्राणश्चलंचसचबस्तिं
साध्यतमःतस्मान्नवस्तिसमंकिंचित्क्रियाविकर्म्मपरिपालनं तत्रषडास्थापनस्कंधान्विमानेद्वैवानुवासनस्कंधौ इहच
किहितान्बस्तीबुद्ध्याविचार्यमहामर्म्मपरिपालनार्थंप्रयोजयेत्सशर्करःपानार्थोबिल्वादिपंचमूलरसस्थिरादिपंचमूलीर
सरादिव्याधिचिकित्साचभूयश्चाहघुपसृष्टेहिंगुचूडालिवणानामन्यतमचूर्णसंयुक्तंमातुलुंगस्यारसेनपाययेतस्तिशवयगुः २१

हृद्रोगविहितंचकर्म्ममूर्द्धितुवातोपसृष्टेऽभ्यंगस्वेदोपनाहनास्तकर्म्मावपीडनधूमादीनिबस्तौतुकुंभीस्वेदोवर्त्तयः श्यामा
दिर्गोमूत्रसिद्धोनिरूहोबिल्वादिभिःसुरादिसिद्धः तारकासेक्षुदर्भगोक्षुरकमूलसृतंक्षीरंचत्रपुसैर्वारुद्वराश्वबीजंयवा
न्यपभंकटिकलोनिरूहः पीतदारुकसिद्धस्तैलानुवासंच तैलवकंचसर्पिर्विरेकार्थंशतावरीगोक्षुरुकबृहतीककारिका
गुडूचीपुनर्णवो॥ क्षीरमधुकहिंसारिवाश्रेयसीलोध्रकुंशकाशमूलकषायंक्षीरचतुर्गुणंवलावृषकखराश्वोपकुंचिकावत्सिका
बीजशितिवारमधुकवचाशतपुष्पाश्मभेदकमदनफलकल्कासिद्धंतैलमुत्तरबस्तेनिरूहोवास्निग्धाखिन्नस्यबस्तिश्चमूत्रवि
कारहरइतिभवतिचात्र हृदयेबस्तिमूर्द्धिवस्तौचनृणांप्रातिष्ठिताः तस्मात्तर्षांसदायत्नंकुर्वीतपरिपालने अबाधवर्ज्जनंनि
त्यंस्वस्थवृत्तानुवर्त्तनं उत्पन्नानिविघातश्चमर्म्मणांपरिपालनं अतऊर्ध्वंविकारायेत्रिमर्मीयेचिकित्सितं ऽनप्रोक्तामर्म्मगास्ते
षांकांश्चिद्वक्ष्यःमिसौषधान् नाध्मछसितिसशब्दाश्रोवागिलिकाकफोलद्वकुजेच्चनिःसंज्ञःसोपतंत्रकः दृष्टेंसंस्तंभसंज्ञांचहत्वा
कंठेचकूजति मुक्तेतुहृदयेस्वास्थ्यंयातिमोहंब्रजेत्पुनः तान्कुंभ्धसनाःकफवाताभ्यांरुद्धास्तस्यविमोक्षयेत् ताक्ष्णोतास्मुक्तास
विंदंति तुंबरीन्यभयाहिंगुपौष्करंलवणत्रयं यवक्काथांबुनापेयंहत्वाभ्यांधपतंत्रके हिंग्वम्लवेतसंशुंठीससौवर्च्चलदाडिमं
पिबेद्वातकफघ्नंच मक्षरस्निग्धगुर्वन्नेह्नसेवनाच्चिंतनात्श्रमात् शोकाद्व्याधनुषंगाच्चवायुनोदीरितःकफः यदासौसमय-
स्कंधहृदयंहृदयाश्रयां सपवृणोतिज्ञानादीतदातंत्रोमाजायते हृदयेव्याकुलभावोवाक्चेष्टेंद्रियगौरवं मनोबुद्धिप्रसादश्चत
द्रायालक्षणंमतं कफघ्नंतत्रकर्त्तव्यंशोधनंवमनानिच व्यायामोरक्तमोक्षश्चभोज्यंचकटुतिक्तकं मूत्रौकसादोजठरंरुक्प्रमु
त्संगसंक्षयो मूत्रातीतोनिलाष्ठिलावातबस्तुस्ममारुतो वातकुंडलिकाग्रंथिविघातोबस्तिकुंडलं त्रयोदशैतेमूत्रस्यदोषास्ता
न्लिंगतश्शृणु पित्तंकफोद्वयंवापिवस्तौसंहन्यतेयदा मारुतेनतदामूत्रंरक्तंपित्तंघनंसृजेत् सदाहंश्वेतसांद्रंवासर्वैर्वालक्ष
णैर्युतं मूत्रौकसादंतंविघात्पित्तश्लेष्महरैर्जयेत् विधारणात्प्रतिहतंवातोदावर्त्तितंयदा पूरयत्युदरंमूत्रंतदातदनिमित्त

च॰ म॰ रुक् अपक्किमूत्रजठसंदेत् मूत्रवैरेचनीतत्र चिकित्सांसंप्रयोजयेत् हिंगुद्विरुत्तरंचूर्णंत्रिमर्म्मीयेप्रकीर्तितं हन्यान्मूत्रोदरानाह
२२ माध्मानंगुदमेंद्रयाः मूत्रितस्यव्यवायंतेरेतोवातोद्धतंच्युतं पूर्वमूत्रस्यपश्चाद्वाश्रवेतत्कृच्छ्मुच्यते स्वरवैगुण्यानिलक्षेपैःकिंचि
न्मूत्रस्यतिष्ठतिमणिसंधौश्रवेत्सश्चात्तत्संगात्स्थवानिरुक् मूत्रौगःसंसविच्छन्नस्तंछेषागुरुत्रोफसःवाताहतिर्भवेद्वातान्मूत्रेसं-
ष्यंतिसंक्षयःचिरंधारयतेमूत्रंत्वरयानप्रवर्तते वाहमानस्यमंदंवामूत्रातीतःसउच्यते आध्मापयन्वस्तिगुदंरुध्वावायश्चलो
न्नतां कुर्यान्नीव्रार्तिमष्टीलांमूत्रविषार्गत्ररोधनी मूत्रमाधारयेद्वस्तौवायुःकुथोविधारणात् मूत्ररोधार्तिकंडूमिर्वातवस्तिः
सउच्यते उष्मणासोष्मकंमूत्रंशोषयन्रक्तपीतकं उष्मवातस्सजेत्कृच्छाद्दस्कपस्थार्तिदाहवान् गतिसंगादुदावर्तःसमूत्रस्था
नमार्गयोः मूत्रस्यविगुणोवायुर्भग्नव्याधिस्थकुंडलं मूत्रंवहतिसस्तंभंगगौरवचेष्टनैः तीव्ररुग्मूत्रविट्संगैर्वातकुंडलि
के तिसारकंवातकफात्तु ष्ठंवस्तिद्वारेघुदारुणं ग्रंथिकुर्यात्सकृच्छेणसृजेन्मूत्रंतदावृतं अरसरासश्शूलंतरक्तग्रंथिप्रचक्षते रू
क्षदुर्बलयोर्वातेनोवर्त्तशकृत् मूत्रस्रोतोनुपथेनविट्संसृष्टंतदानरः विट्गंधंमूत्रयोःकृच्छाद्विडविघातंविनिर्दिशेत् द्रुताध्वल
घनायासाद्गमिघाताद्प्रपीडनात् स्वस्थानाद्बस्तिरुत्थतनःस्थूलस्तिष्ठतिगर्भवेत् शूलस्यंदनदाहार्तोविंदुंविंदुंश्रवत्यपि पी
डितस्यसृजेद्धारांसंस्तंभोद्वेष्टनार्तिमान् वस्तिकुंडलमाहुस्तंघोरंशस्त्रविषोपमं पवनप्रबलःप्रायोदुर्निवारमबुद्धिभिःतस्मिन्
पित्तावृतेदाहःशूलंमूत्रविवर्णता श्लेष्मणागौरवंशोफःस्निग्धंमूत्रंघनंसितं श्लेष्मरुद्धाविलेवस्तिपित्तोदीर्णेनसिध्यति अति
क्रांतविलःसाध्योनचयःकुंडलीकृतःस्याद्वस्तौकुंडलीभूतेतृण्मोहःश्वासएवच दोषाधिक्यमवेक्ष्यैतन्मूत्रकृच्छ्रहरैर्जयेत् व-
स्तिमुत्तरवस्तिचसर्वेषामेवदापयेत् पुष्पनेत्रंतुहैमंस्याच्छ्लक्ष्णंमोत्तरवस्तिकं गोपुच्छतद्वत्समजा सूर्दनुभस्सयोःशेषंवास
र्षपच्छिद्रंद्विकर्णेद्वादशांगुलं तेनाजवस्तियुक्तेनस्नेहस्यार्द्धपलंनचेत् यथावयोविशेषेणस्नेहमात्राविकल्पावा स्नातस्यभुक्तस्य
रसेनपयसापिवा विसृष्टवर्चोमूत्रस्यपीठेजानुसमेमृदौ ऋजोःसुखोपविष्टस्यहृष्टेमेढ्रेघृताभ्यिते शलाकयागतिंवीक्ष्ययघप्र राम २२

तिहताभवेत् ततःशोफप्रमाणेनपुष्पंनेत्रंप्रवेशयेत् गुदवन्मूत्रमार्गेणप्रणयेद्सेवनीं हिंसाद्यतिगतिंवस्तिंसूनेस्नेहोनगच्छति
कृसंप्रपीड्यनिःकंपंनिःकर्षेन्नेत्रमेवच प्रत्यागतेद्वितीयंवातृतीयंचोपपादयेत् अनागच्छन्नुपेक्ष्यत्वपथ्यस्तरजन्याक्षपितास्यच
पिप्पलीलवणागारधूमापामार्गसर्षपैःवार्ताकरसनिर्गुंडीशम्याकैःसमहानरैःमूत्राम्लपिष्टैःसगुडैर्वर्तिंकृत्वाप्रवेशयेत् अग्रे-
तुसर्षपाकारांप्रश्चार्धमाषसंमितांनिरदीर्घघृताभ्यक्तांसकुमारामभंगुरां नेत्रवन्मूत्रवाड्यांतुपायोनांगुष्ठसमितां स्नेहप्रत्याग-
तेताभ्यांमानुवासनिकाविधिः परिहारश्चसर्व्यापत्ससम्यग्तुलक्षणः स्त्रीणामार्तवकालेतुप्रतिकर्म्मतदाचरेत् गर्भाशयस्करं
स्नेहंतमादत्तेस्यनावृतः गर्भयोनिस्तदाशीघ्रंजितेप्रगृह्णातिमालते वस्तिजेषुविकारेषुयोनिविभ्रंशजेषुच योनिशूलेषुतीव्रेषुयो
निव्यापत्स्वसृग्दरे अप्रश्रवतिमूत्रेचविंदुविंदुश्रवत्यपि विदध्यादुत्तरंवस्तिंयथास्वौषधमिश्रितं पुष्पनेत्रप्रमाणंतुप्रमदानांदशांगु
लं मूत्रश्रोतःपरीणाहंमुद्गश्रोतोनिपातिच अपत्यमार्गेनारीणांविधेयंचतुरंगुलंद्व्यंगुलंमूत्रमार्गेतुबलायाश्चैकमंगलं उत्तानायाश
याःनार्याः सम्यक्संकोच्यसक्थिनी अथास्याःप्रणयेन्नेत्रमनुवंशागतंसुखं द्वित्रिश्चतुरिनिस्नेहानहोरात्रेणदापयेत् वस्तौवस्तौप्र
णीतेषुवर्तिःपीनतराभवेत् त्रिरात्रंकर्म्मकुर्वीतस्नेहमात्रांविवर्द्धयन् अनेनैवविधानेनकर्मकुर्यात्पुनस्त्र्यहं अतःशिरोविकाराणां
कश्चिद्भेदःप्रवक्ष्यते पित्तरक्तानिलादुष्टाःशंखदेशेभिमूर्छिताः तीव्ररुग्दाहरागंहिशोफंकुर्वंतिदारुणंसशिरोविषवद्वेगीनिरुध्या
शुगवलंतथा त्रिरात्राज्जीवितंहंतिशंखकोनामतःपरं अहंजीवतिभेषज्यंप्रत्याख्यायास्यकारयेत् शिरोविरेकसेकादिसर्वंवी
र्यंनुचयत् रूक्षाशनात्यध्यशन प्राग्वातावश्यामैथुनैः वेगसंधारणायासव्यायामैकुपितोनृणां केवलंसकफोवार्द्धंगृहीत्वाशिर
सोःनिलः मन्याभ्रूशंखकर्णाक्षिललाटार्द्धेषुवेदनां शस्त्रारणिनिभांकुर्यात्तीव्रांसोर्धावभेदकः नयनंवाथवाश्रोत्रमतिवृ
द्धौविशानाशयेत् चतुःस्नेहोत्तमांमात्रांशिरःकायविरेचनं नाडीस्वेदोघृतंजीर्णंवस्तिकर्मानुवासनं उपनाहःशिरोवस्तिद-
हनंचात्रशस्यते प्रतिश्यायेशिरोरोगेयच्चोद्दिष्टंचिकित्सितं संधारणाघजीर्णाद्यैर्मस्तिष्कंरक्तमारुतौ दुष्टौदूषयतस्तच्चदुष्टंता

च०म० श्यांविमूर्छितं सूर्योदयेधुत्रःसंतापाद्दक्तपिघंद्येत्समैः ततोदिनेशिरःशूलंदिनवृध्याविवर्द्धते दिनक्षयेततस्त्यानेमस्तिष्केसंभ
२२ शाम्यति सूर्यावर्त्तःसतत्र॰श्यात्सर्पिरोत्तरभक्तिकं शिरःकायविरेकौचमूर्द्धित्रिस्नेहधारणं जांगलैरुपनाहैश्चघृतक्षीरैश्चसेव
नं बर्हितित्रिरिल्लावादिस्थितास्तीरोस्थितंश्रृतं स्यान्नावनंजीवनीयक्षीरादशगुणसाधितं दुष्टादोषास्त्रयोमन्यांपश्चाच्छटांस्तवेदना
तीव्रांकुर्वंतिसावासिभूशंखेषुवतिष्टते स्यंदनंगंडपार्श्वस्यनेत्ररोगहनुग्रहं अनंतवातस्तंहन्यात्स्थिराक्षावर्त्तनाशतेः वातः
रुक्षादिभिःकुद्धःशिरःकंपमुदीरयेत् तत्रामृताबलास्तामहाश्वेताश्वगंधकैः स्नेहस्वेदादिवातघ्नंशस्तंनस्यंसतर्पणं नस्तकर्म-
चकुर्वीतशिरोरोगेषुशास्त्रवित् द्वारंहिशिरसोनाशातेनतद्व्याप्यहंतिताम् नावनंचावपीडश्चध्मापनंधूमएवच प्रतिमर्शश्चवि
ज्ञेयोनस्तः कर्म्मचपंचधा स्नेहंसंशोधनंचैवद्विविधंनावनंस्मृतं शोधनंस्तंभनश्चस्यादवपीडोद्विधारसः चूर्णस्याध्मापनंतद्धिदे
हस्रोतोविशोधनं विज्ञेयःस्त्रिविधोधूमःप्रागुक्तःशमनादिकं प्रतिमर्शोभवेत्स्नेहोनिर्दोषोत्क्रमयार्थकृत् एवंतद्रेचनंकर्म्मत-
र्पणंशमनंत्रिधा स्तंभत्युभिगुरुत्वायाःश्लेष्मिकायेशिरोगदाः शिरोविरेचनंतेषुनस्तःकर्म्मप्रशस्यते रक्तपित्तादिरोगेषुशम
नंनस्यमिष्यतेधायनधूमपानंचतथायोगेषुकारयेत् फलादिभेषजप्रोक्तंशिरसोयद्विरेचनं तच्चूर्णंकल्पयेत्तेनपचेत्स्नेहंविरेच
नं यदुक्तंमधुरस्कंधभेषजंतेनतर्पणं साधयित्वाभिषक्स्नेहंनस्तःकुर्याद्विधानवित् प्राक्सूर्येमध्यसूर्येवाप्रावृत्तावटयकश्य
च उत्तानस्यशयानस्यशयनेशाम्यतोमुखं प्रलंबशिरसःकिंचित्किंचित्स्यादोन्नतस्यच अन्नवाकृशिरसोतस्यंनशिरःप्रतिपद्य
ते अत्यवाक्शिरसोनिश्यमास्तुलिंगेवतिष्टतेतनएवंशयानस्यशुच्यर्थंस्वेदयेत्स्थिरः संस्वेदनाशमुन्नस्यवामेनांगुष्टपर्वणा
हस्तेनदक्षिणेनाथकुर्याद्भयतःसम प्रणाल्यापिचुनावापिततःस्नेहयथाविधिः क्षतेचस्वेदयेद्भूयेआकर्षेच्चपुनःपुनः तेस्ने
हंश्लेष्मणासार्द्धंयथास्नेहोऽचतिष्ठते स्वेदनेकृशिनःश्लेष्मानस्तकर्म्मराफुरुस्थिते भूयःस्नेहस्यशैत्येनशिरसिस्त्यायतेपुनः
श्रोत्रमन्यागलाद्येषुविकारायसकल्पतेऽघातस्तकृतेधूमंपिबेत्कफशोधनं हितान्नभुग्निवातोघ्नसेवीस्यान्नियतेंद्रियः विधिरेषो २३

वपीडस्यकार्यःप्रध्मापनस्यच षडंगुल्याथवानच्चधूमेनचूर्णंस्तृखेनवा विरक्तशिरसंतूष्णंपाययित्वांबुभोजयेत् लघुद्रव्यविरु
द्धंचनिवातस्थमतंद्धितः शुद्धदेहस्यदोषस्यकोपनंप्रस्तुसेवते सदोषोविवरंस्तत्रकरोतिस्थान्गदान्बहून् यथास्वंविहितां-
तेषुक्रियांकुर्याद्विचक्षणः अकालकृतजानांचरोगाणामनुरूपतः अजीर्णेभोजनेभुक्तेतोयपीतेथदुर्दिने प्रतिश्यायेनवेस्ना
नेस्नेहपीतेःनुवासिते भावनंस्नेहनंरोगान्करोतिश्लेष्मिकान्बहून् तत्रश्लेष्महरःसर्वस्तीक्ष्णोष्णादिर्विधिर्हितःक्षामेविरि
तेगर्भव्यायामातिहतेनृषिघातोरुक्षेणनस्येनरुद्दस्तान्जनयेद्गदान् तत्रवातहरः सर्वोविधिस्नेहनबृंहणं स्वेदादिस्याघृतं
जीर्णगर्भिण्याश्चविशेषतः ज्वरेशोकादितप्तानांतिमिरंमद्यपद्रयतु रूक्षशीतांजनैर्लेपःपुटपाकैश्चशोधयेत् स्नेहनंशोधनं
चैवद्विविधनस्यमुच्यते प्रतिमर्शस्यनस्यार्द्धंकरोतिनचदोषवान् नस्तःस्नेहांगुलिंदद्यात्प्रातर्निशिचसर्वदा नचोछिद्येरा
णांप्रतिमर्शःसदाचरेदिति तत्रश्लोकः त्रीणियस्मात्प्रधानानिकर्म्माण्यभिहितेषुच तेषुलिंगंचिकित्सांचरोगभेदाश्चसौष
धाः विधिरुत्तरवस्तिश्चनस्तःकर्म्मविधिस्तथा सव्यापत्क्षपतंसिद्धौमर्माध्यायेप्रकीर्तितं इतिश्रीचरकसंहितायांपंचकर्म्मा
धिकारेत्रिमर्म्मीयासिद्धिवर्णनोनामनवमोध्यायः अथातोवस्तिसिद्धिंव्याख्यास्यामः सिद्धानांवस्तीनांतिषुरोगेषुप्रशावग्निवेश
गदलःसिद्धिंसिद्धिप्रदांनिषजांबलदोषकालंशास्तानांविदताप्रविभज्यविनियोजिताःसम्यक्स्वैरैवरौषधवर्गैःस्वान्स्वान्रो
गान्नियच्छंतीकर्म्मान्यद्वस्तिसमंनविद्यतेशीघ्रसुखविशोधित्वात् अशुचत्तर्पणयोगात्वन्निरत्ययश्चवस्तिदानस्य सत्यपि
दोषहरत्वेकटुतीक्ष्णोष्मातिभेषजादानात् दुःखोःद्गाराहत्वात्कोष्ठबाधाविरेकेस्फः अविरेच्यशिशुवृद्धौतावप्राप्तहीनधा
तुवलौआस्थायनमेवतयोःसर्वार्थकृदुत्तमंकर्म्मावलर्णहर्षमार्दवगात्र स्नेहान्नृणांदध्यसाशु अनुवासनंनिरूहश्चोत्तरवस्ति
श्चसत्रिविधःशाखावातार्तानाविड्सगाध्मानांजगाददिषुचरामुःउत्तानांशीतान्शीतार्त्तानातथोष्णाश्रृतयोग्यौषधयुक्ता
न् वस्तीन्संतर्पणविनियुंज्यात् वस्तीन्बृंहणीयात् व्याधिषुयुंजाद्विशोधनीयेषुमेदस्विनोविशोध्यायेषुमेदस्विनोविशोध्या

च॰म॰ येचनराःकुष्टमेहार्त्ताः नरक्षीणक्षतदुर्बलमूर्छाकृशामिशुद्धदेहानांयुंज्याद्दिशोधनीयान् दोषनिबद्धायुषेयेचवाजीकरणमृ
२४ गितेयोश्वमधकघृतपयोयुक्ताज्याःसदैशरुराःसमूत्रतैलाऽरनाललवणाश्वकफवातेयुंज्याद्द्रव्याणिवस्तिष्वम्लमूत्रंपयः
स्फराक्काथान् अविरोधाद्दादूनांरसयोनित्वाच्चजलमुसंस्कदारुदातोक्ते लाकुष्टमंधकंचपिप्पलीस्नेराः उद्वानुलोमभा-
गान्विःसर्षपशर्कराललवणांआवापोवस्तिनामतःप्रयोज्यानीतेषुतानिस्फःफक्कानिसहकषायोत्कजरतःप्रवक्ष्यामि
चिरजातकटिनवलिपुव्याधिषुतीक्ष्णान्विपर्ययेमृदवःसंप्रतिशापकषायोज्यास्तनुवासननिरूहाः अर्द्धश्लोकैरतःसिद्धा
न्नानाव्याधिषुसर्वशःवस्तीन् वीर्यसमेभागैर्यथार्हालोडनाश्नुणु बिल्वाग्निमंथौत्र्येनाकःकाश्मर्यःपाटलिस्तथा शालि
पर्णापृष्टिपणीवृहत्यौवर्द्धमानकः यवकोलकुलत्थानिस्थिरवैतेत्रयोःनिलेसस्पेतंचतुःस्नेहरःपिशितःस्वरसाबि- स
बाःनलवंजुलवानीरशातपत्राणिदैवलं मंजिष्टासारिवानंतापयस्यामधयष्टिकाः चंदनंपद्मकोशीरंगंलुंतेपैत्रि-
केत्रयःसशर्करघृतक्षौद्राःसक्षीरावस्तयोहिताः अर्कस्तथैववालर्कएकाष्टीलापुनर्णिवाहरिद्रात्रिफलामुस्तंपीनदा
रुकुटंनटं पिप्पल्यश्चित्रकश्चेतित्रयस्तेकफरोगिणां सक्षाराक्षौद्रगोमूत्रानातिस्नेहान्विताहिताः फलजीमूनकेक्ष्वा
कुधामार्गस्त्वेदवत्सकाःश्यामाचत्रिवृताचैवद्विरादंतीद्रवंत्यपि प्रकीर्याचोदकीर्याचक्षीरिणी नीलिनीतथा सप्तलाशं
खिगेधफलंकंपिल्लकस्यच चत्वारोमूत्रसिद्धास्तेपक्काशयविशोधनाः काकोलीक्षीरकाकोलीपृष्टिपणीशतावरी मधूकं
चविदारीचशृंगाटककसेरुकेआत्मगुप्ताफलंमाषाःसगोधूमायवस्तथा जलजानूपजंमांसमित्येतेशुक्रमांसदाः जीवंति
चाग्निमंथश्वधातकीपुष्पवत्सकौ प्रग्रहःखदिरःकुष्टंशमीपिंडीतकोयवाकियवाःपियंगूरक्तमूलीचतरु णीस्वर्णयूथिका
वटाद्याकिंशुकंरोध्रमितिसंग्राहिकामताःपयःश्रृतंपरिस्रावेसवृश्चीवपुनर्णवं आखुकर्णिकपावापितंडुलीयकयुक्तयाकालं राम
कतककांडेक्षुवालिभिःदाहघ्नःसघृतःक्षीरोहितीयश्चोत्पलादिकःकर्वुदाराटकीनीपविपुलैःक्षीरसाधितैःवस्तिःप्रदेयोभि २४

षजाशीतः समधुशर्करःपरिकर्त्तेतथावृत्तेश्रीपणीकोविदारजैःसुषिः शाल्मलीवृतानांक्षीरसिद्धिघृतान्वितःहितःप्रवर
णेतद्वत्दृत्तेःशाल्मलिकस्यचअश्वावरोहकःकाकनाशराजकसेरुकाःसिद्धाःक्षीरेतियोगस्थःसौद्रांजनवृतिर्यताःन्यग्रोधा
द्यैश्चतुर्भिश्चतैनैवविधिनापरःवृहतीक्षीरकाकोलीपृष्टिपणीशताघरी काश्मर्यषदरीदूर्वातथोशीरप्रियंगवः जीवादानेश्चतैः
क्षीरैःहौघृतांजनसंयुतौ वस्तिप्रदेयौभिषजाशीतौमधुसशर्करौ गोप्यजामहिषीक्षीरैर्जीवनीयघृतेरपि शशैणदक्षमार्जा
रमहिषाघजशोणितैःसद्यस्तैरेवतैर्वस्तिर्वीवीदानेप्रशस्यते मधूकंमधुकंदूर्वाद्राक्षाकाश्मर्यचंदनैः मंजिष्टासारिवानंताता
पयस्यामधुकैस्तथा रक्तपित्तेप्रदेयःकषायःसोमवल्कजइति तत्रश्लोकाःत्रिकास्त्रयोऽनिलादीनांचतुष्काश्चापरेत्रयःपक्काश
यविशुध्यर्थंवृत्ताःसग्राहिकास्तथा परिस्रावेतथादाहेपरिकर्तेप्रवाहिणे सातियोगेमतौद्वौद्वौजीवादानेतथात्रयःद्वौरक्तपित्तेद्वे
चसमत्रिंशदितिस्मृताःफलभात्योषधस्नेहावस्तयोगुणसन्निभाःगुल्मातिसारोदावर्त्तस्तंसंकुचितादिषु सर्वांगैकांगरोगेष्वे
वंविधेषुच यथास्वैरोषधैःसिन्धस्तीन्दद्याद्विचक्षणःपूर्वोक्तेनविधानेनकुर्वान्योगान्पृथग्विधान् इतिश्रीचरकसंहिता
यांपंचकर्माधिकारेवस्तिसिद्धिवर्णमोमानोनामदशमोध्यायः अथातःफलमात्रसिद्धिंव्याख्यास्यामः इतिस्माह भगवंतमुदा
रसस्त्वार्धाश्रुतिविज्ञानसमृद्धमनिज फलवस्तिवरत्वसिध्यर्थंसविवादामुनयोःमुपगमन् भृगुःकौशिककाप्यशौनकाः
सपुलस्त्याशितगौतमादयःकतमत्प्रवरंफलादिषुस्मृतमास्थापनयोजनास्विति कफपित्तहरंवरंफलषथजीमूतकमाहशौन
कामृडतीर्यतयाभिनत्तिनछर्दिरित्याहतृणोथवामकाःकटुतुंबममन्येतमवमनेदोषसमीरणंचयत् तदरण्यमशौल्यतोक्ष्म
ताकटुरूक्षेरिनिगौतमोःअब्रवीत् कफपित्तनिवर्हणंपरंसतुधाना-तमेवमन्यतेतदमन्यतवातलंपुनर्विडिशोल्मानिकरंव
लापहं कुष्टजंप्रशासंसवोत्तमंनवलघ्नंकफपित्तहारिच अतिविज्जलमौर्ध्वभागिकंपवनक्षोभितकाप्यआहतत् कृतमेधन
वाश्चवातलंकफपित्तंप्रबलंहरेदिति तदसाध्वंतिभद्रशौनकःकटुकंवातिवलघ्नमित्यपि इतितद्वचनानिहेतुभिः सविचित्राणि

निशाम्यतु ष्टिमान् ऽभ्यशांसफलेषु निश्चयं परमं चाग्निस्तोऽब्रवीदिदं फलदोषगुणान् सरस्वतीश्रुतिसर्वैरपिसम्यगीरितानन्वकिं
चिदद्दोषनिर्गुणंगुणभूयस्मतोविचिन्त्यते इहकुष्ठहितागरागहितमिक्ष्वाकुतुमहिधूत्तमं कुटजस्यफलंहृद्रामये प्रवरंकोटफ
लंचपांडुषुउदरेषुतवेधनहितंमदनसर्वगदाविरोधितु मधुरंसकषायतिक्तकं तदरूक्षंसकटूष्मबिल्वलं कफपित्तरुद्राशुक
रिवाप्यनपायपवनातुलोमिव फलनामवेशोषतस्त्वतोलभतेऽन्येषुफलेषुतत्त्वपि गुरुणाथवचस्फुटाहेतेमुनिसंघैरपिपूजितेत
था प्रणिपत्यमुदासमन्वितःसहितःशिष्यगणोभुरस्तवान् सर्वकर्मगुणरुङ्गुरुणोक्तोवस्तिरूर्द्ध्मथनैर्जिल्वानभैः नाथधागुदम
तःसशरीरात्सर्वतःकथमपोहतिरोगात् तद्गुरुरब्रवीदिदंशरीरंतंत्रयतेऽनिलः सचविधान केवलएवदोषसहितोवाघासयगः
प्रकोपमुपातितं पवनंकफपित्तसविट्कं शुचिकरोनुलोमयतिवस्तिःसर्वशरीरगाश्चगदसंघास्तत्प्रशांतिमुपयांति अथवाधि
गम्यडमुंडिकाधिपोगजोष्ट्रागोश्वाविकजकर्मरागनुत् अभृच्छद्रनंसचवस्तिमब्रवीद्विधंचतस्याहपुनःप्रचोदितः अजीर
णंरसम्यगजोष्ट्रयोद्लिंवस्तिगवाश्वस्यवदंतिषं अजाविकानांनुगरहणोवंदंतिवस्तितडुपापनितकाः अरंतिरष्टाद्शषो
डशांगुलंतथैवनेभेद्दिरशांगुलंक्रमात् गजोष्ट्रगोश्वाव्यजवस्तिसंविधौचतुर्थभागोपनयंहितंवदत् अजादिषुप्रस्थमु
शंतितद्विहः गवादिषुद्वौत्रिगुणंगवाश्वयोः निरूदलष्ट्रायमवेह्विराटकेगजांतुर्द्धनुवासनेऽष्टमः कलिंगकुष्ठंमधुकंस
पिप्पलीवचाशताह्वामदनरसांजनं हितानिसर्वेषुगडःससैंधवोद्विपंचमूलंचविकल्पजान्विते गजेविकाश्वत्स्यवटाश्व
कर्म्मजाःससादिराऽभयहशालतालजाः तथाचचारग्वरधूशिग्रुफटलामधूकसाराःसनिकुंभचित्रकाःफलाद्राभू
तीकस्कराह्वरोहिणीकषायउ क्तस्तथिकोगवांहितःपलाशादतीस्फरदारुकट्टद्रवंतरुक्तास्करगम्यचाधिका खरो
ष्ट्रयोःपीलुकरीरखादिराःशमीसधिल्वादिगणस्यवाछदाः अजाविकानांत्रिफलापरूषकंकपित्थकर्कंधुसबिल्व-
कोलजं अथाग्निवेशःसततास्फराम्नराहितंचपभस्छगुरुस्तदाह्च सदातुराश्रोत्रियराजसेवकास्तथैववेश्यासह २५

पण्यतीविभिः द्विजोशिष्याध्ययनंप्रताह्निकक्रियादिभिर्देहहितंनसेवते नृपोपसेतिनृपचित्तरक्षणात् गुरोविरोधा
वहुचिंतनाद्भयात् नृचित्तवर्ह्विराफ्पचारितसर्वसृतोपिभूषानिरतापणांगनासदासनाद्त्यनुवधविक्रियक्रिया
दिलौभाद्पिचाल्पजीविनः सदैवतेष्पुगतवेगनिग्रहंसमहभत्तेनकालभोजनं अकालनिर्हारविनोभवंतिभवंतिये
पिसदातुराश्चते समीरणंवेगविधारणोद्धतंविवंधसर्वांगरुजाकरंभिषक् समीक्ष्यतेषांफलवर्तमादतःस्रुकल्पितं
स्नेहवतीघयोजयेत् पुनर्णवैरंडनिकुंभचित्रकाःसदेवदारुत्रिवृतानिदिग्धिकाः महांतिमूलानिचपंतिपंचवैविपाच्य
मूत्रेदधिमंडसंयुतं सतैलसर्पिर्लवणैश्चपंचभिर्विमूर्छितंवस्तिमथप्रयोजयेत् निरूहितंधन्वरसेनभोजिनं निकुंभतैले
नततोनुवासयेत् वलासस्तांफलविल्वचित्रकान्हिपंचमूलंकृतमालकफलं यवान्कुलत्थान्विपचेज्जलाटकेरसःसपे
ष्यस्फकलिंगकादिभिः सतैलसर्पिर्मधुसैंधवोहितःसदातुराणांवलवर्द्धनः तथानुवास्यंमधुकेन साधितं रसेन विल्वेन
शताह्वयापिवा सजीवनीयस्तुरसोनवासनेनिरूहणोवालवणःशिशोहितः नचांन्यदाश्वांवगलाभिवर्द्धनंनिरूतस्ते
शिशुवृद्धयोपरमिति तत्रश्लोकाःफलकर्मवस्तिचरमानेत्रपंहस्तयोगजादीनां सवततानुरागदृष्टाःफलमात्रयोहितंतेषां
इतिश्रीचरकसंहितायांपंचकर्म्माधिकारेफलमात्रसिद्धिवर्णनोनामैकादशोध्यायः समाप्तायंपंचकर्म्माधिकारः ७
अथातउत्तरसिद्धिंव्याख्यास्यामः इतिस्माह भगवानात्रेयः अथखल्वास्करंवैयःसशुद्धंवमनादिभिः दुर्वलंक्षामल-
मथाग्निमुक्तसंधावनंवनं निहतानिलविरामूत्रकफ पित्तरुशायसंस्तन्यदेहंप्रतिकराःसहिष्मुंप्रतिपालयेत् यथासंस्त
रणंपूर्णतैलपात्रंयथैवच गोपालइवदंडेगाः सर्वस्मादपचारतः अग्निसंधुक्षणार्थंपूर्वांपेयादिनाभिषक् रसोंतरे
णोपचरेत्क्रमकोविदेः स्निग्धाम्लस्वादुहृद्यानिततोम्ललवणोरसौ स्वादुतिक्तौततोभूयःकषायकटुकैस्ततःअन्योन्य
प्रतीकानांरसानांस्निग्धरूक्षयोः व्यत्यासादिप्रकृतिगमयेद्भिषक् कृतिक्रमोनिरातंकोरतियुक्तस्थिरेंद्रियः वललवान्

सत्वसपन्नो विज्ञेयः प्रकृतिंगतः एकांप्रकृतिसमासः सर्ववर्ज्याणिवर्जयेत् महादोषकराण्यष्टावतानितुविशेषः उच्चै
र्भाष्यंरथक्षोभमतिचंक्रमणासने अजीर्णाहितभोज्येचदिवास्वप्नंसमैथुनंतजोदेहोर्द्धसर्वाधोमध्यपीडाःसदोष
जा सदोषजाःश्लेष्मजास्तयजाश्चैवव्याधयःस्मृर्यथाक्रमं तेषांविस्तरतोलिंगमेकैकस्यचभेषजं यथावत्संप्रवक्ष्यामि
सिद्धांबस्तिश्वयापनां तत्रोच्चैर्भाष्यातिभाष्याभ्यांशिरस्तापिशंखकर्णनिस्तोदश्रोतोपरोधमुखतालुशोषतैमिर्यपिपा
साज्वरतमकादीन् ग्रहमन्यास्तंभरक्तनिष्टीवनोरःपार्श्वशूलस्वरभेदहिक्काश्वासादयःस्युः रथक्षोभात्संधिपर्वशैथिल
दन्तमाशा कर्णशिरःशूलतोदकुक्षिरक्षैपाटोपांत्रकूटजनाध्मानेंद्रियोपरोधस्फिक्पार्श्ववंक्षणकटीपृष्ठवेदनासक्थिस्तं
धहनुग्रीवादौर्बल्यांगोपतापपादशोकापस्मारप्रहर्षणादयः अतिचंक्रमणात्पादजंघोरुजानुवंक्षणश्रोत्रिपृष्ठिमूल
सक्थिसादीनस्तोदनिस्तोदपिंडिकोद्वेष्टनांगमर्दनाभितापशिराधमनाहर्षश्वासकासःप्रत्यासनाद्यथाक्षोभजोनुसि
कपार्श्ववंक्षणकटीपृष्ठवेदनादयः अजीर्णाद्यसभ्यांशुषाशोषाध्मानशूलनिस्तोदपिपासागात्रछर्घतीसारमूर्छाज्व
रप्रसाहरणामपिषादयः विषमाहितासनाभ्याम भक्ताभिलाषदौर्बल्यंकंडूपामागात्रावसादवातादिप्रकोपजाश्चग्र
हणपर्वोविकारादयोदिवास्वप्नादरोचकाविषादयः विषमाहितासनाभ्यामेनन्नाभिलाषदौर्बल्यंकंडूपामागात्रावसा
दवातादिप्रकोपजाश्च ग्रहणपर्वोविकारादयोदिवास्वप्नादरोचकाविपाकाग्निनाशस्तोमित्यपांडुत्वकंडूपामादाहछर्दंग
मर्दहृत्स्तंभजाड्यनिद्रातंद्राप्रसंगग्रंथिजन्मदौर्बल्यरक्तमूत्राक्षिताल्पुलेपः व्यवायादाशुबलनाशोभवति शिरोवस्तिगुदमें
द्रवंक्षणोरुजंघाशादमूलरुक्मूलहृदस्पंदनेत्रपीडाशैथिल्यशुक्रमार्गेशोणितागमनकासश्वासशोणितष्ठीवनीः स्वराव-
सादकटीदौर्बल्यैकांगरोगमुष्कश्वयथुवातवर्चामूत्रसंगभुक्ताविसर्गजात्यवेपथबाधिर्यविषादाः अवलुप्यतइवगुद
स्ताम्यतीवमेद्रमवसीदतीवमनोवेपतेहृदयं पीडांतेसंधयस्तमः प्रवेशयतइत्येषमेतिषार पवारैःप्रादुर्भवंत्युपद्रवःतेषां-

Dr BHAU DAJI MEMORIAL

रसिद्धिः तत्रोच्चैर्भाष्याति भाष्यजानामिभ्यंगस्वेदोपनाहधूमनस्ये परिभुक्तस्नेहपानरसनीक्षीरादिभिर्वातिहरःसर्वोविधिर्मो
नंवारथक्षोभातिचंक्रमणात्यासनजानांस्नेहस्वेदादिवातहरंकर्मसर्वनिदानहानंचअजीर्णाध्यशजानांचशोषतछर्दनरू-
क्षःस्वेदोलंघनीयपाचनीयदीपनीयौषधावचारणंच विषमाहितासनजानांच शोषतछर्दनरूक्षःस्वेदोलंघनीयपाचनीय
दीपनीयौषधावचारणंच विषमाहितासनजानांयथास्वदोषहरणक्रियादिवास्वप्नजानांधूमपानंलंघनवमनविरेचनव्यायामरूक्षा
शमारिष्टदीपनीयौषधोपयोगः तथावातहराःस्वेदाभ्यंगोपानहवस्त्राश्चाहाराःसस्नेहविधयोयोपनावस्तयोनुवासनं मूत्रवैरूक्षवास्ति
शूलेषुचोत्तरवस्तिविदारिगंधागणजीवनीक्षीरसिद्धतैलंस्यासानुपानाश्चवस्तयःसर्वकालंदेयास्तानुपदेक्ष्यामः मुस्तोशीरबलार
ग्वधरास्तामंजिष्ठाकटुकरोहिणीत्रायमाणापुनर्नवागुडूचीविभीतकगुडूचीस्थिरादीनांपंचमूलानिपालिकानिकुंडशः क्षुता
भिरष्टेनमदनफलानिप्रक्षाल्यजलाटकेपरिकाथ्यपादशेषोरसःस्यात्द्विप्रस्थेसंयुतःपुनःस्तनक्षीरेशेषपादजांगलरसस्तु्यमधु
घृतः शतकुसुमाकुटजफलमधुकरसमांजन प्रियंगुकल्कीकृतःससैंधवःसात्मौषोंवस्तिशुक्रमांसवलुनन क्षतक्षीणकासागुल्म
शूलमूत्रकृछ्रास्पृग्दरोविसर्पाभिर्वाहिकाशिरोजानूरुजंघावस्तिग्रहाश्मर्यून्मादापस्माराशाःप्रमेहाध्मानवातरक्तपित्तश्लेष्मव्याधिहरःस
घोबलजानानारसायनश्चेतिएरंडमूलपलाशानुषेहलंशालपर्णीबृहतीकंटकारिकागोक्षुरकरास्ताश्वगंधागुडूचीवर्षाभ्वारग्वधदेव
दारुश्चेतित्रिपलिकानिमदनफलानिसर्षपकल्कमधुघृतयुक्तंसस्वोस्मनिरूहमेकद्वौत्रीनूवादघात् सर्वेषांप्रशास्यतेविशेषतोललिम
कुमारस्त्रीविहारक्षीणांक्षितरुविशार्शोमूत्रकृछ्रगुल्मवर्धोदावर्तग्रहणीदोषाश्मरीणांहिततममपत्यकामानांच ह्रस्वहचरबला-
दभमूलसारिवासिद्धेनपयसाथवावृहतीकंटकारिकाशतावरीछिन्नरुहाश्रितमपयसामधुकपिप्पलीकल्पितेनपूर्ववद्वस्तिः त
थावलाविदारीशालिपर्णीपृष्टिपर्णीवृहतीकंठकारिकादर्भमूलपरूषकाश्मर्यबिल्वफलसिद्धेनमयसामधुकमदनकल्किते
नमधुघृतसौवर्चलयुक्तेनकासज्वरगुल्मप्लीहार्दिस्त्रीमघकिरावाणांसघोवलजननोरसायनश्च वलारास्तारग्वधमदनवि-

च॰म॰ स्त्वगुडूचीपुनर्णवैरंडरूक्मनासहचरपलाशदेवदारुपंचमूलानिपालिकानिपालिकानियव कोलकुलुत्थद्विप्रसृतंशुष्कमूला-
२७ निपलिकानियवकोलकुलत्थद्विप्रसृतंशुष्कमूलानिपालिकानिजलद्रोणसिद्धंनिरूपमाणावशेषंकषायंपूतंमधुमदनशतपुष्प
मुस्तपिप्पलीवचावत्सकरसांजनप्रियंगुयवानीकल्कितंगुडघृततैलक्षौद्रक्षारमांसरसाम्लकांजिकयुक्तंसुखोष्णंवस्तिंदद्या
त् शुक्रमूत्रवाःसंगेनिलजेगुल्मेहृद्रोगाध्मातवर्ध्मपार्श्वपृष्ठकटीग्रहसंज्ञानाशबलक्षयेषुचहयुभर्द्रकुडवोद्विगुणेक्षीरेयव-
श्चक्षीरोदकसिद्धःक्षीरशेषोमधुघृततैललवणयुक्तःसर्वांगविस्तृतवातरक्तविण्मूत्रस्त्रोखेदितहितोवातहरस्तद्धिमेधाग्निबल
जननंचेति ह्रस्वपंचमूलीकषायःक्षीरोदकःसिद्धःपिप्पलीमधुकमदनकल्कीकृतःसगुडघृततैललवणक्षीणविषमज्वरक-
र्पितवस्तिःबलातिबलापामार्गान्मगुप्तायूलाक्षारजलांजलिकषायःसगुडघृततैललवणमनयुक्तःपूर्ववद्वस्तिःस्थविरदुर्बलक्षी
णशुक्ररुधिराणांचपथ्यतमःमधुकविदारीदर्भमूमृद्वीकायवैःकषायमाज्येनपयसापक्वामधुकमदनकल्कोकृतंसमधुघृतसैंधं
वंज्वरार्त्तेभ्योवस्तिंदद्यात् शालपर्णीपृश्निपर्णीगोक्षुरककाश्मर्यपरूपकखर्जूरमधुकपुष्पैरसाक्षीरजलप्रस्थाभ्यांसिद्धःकृशीयः
पिप्पलीमधुकोत्पलकल्कितःसघृतसैंधवःक्षीणेंद्रियविषमज्वरकर्शितस्यवस्तिःस्थिरादिपंचमूलीपंचमूलीपंचमूलीपंचप
लेनशालिषष्टिकयवगोधूममाषपंचकप्रसृतेनचछागंपयःसृतंपादशेषकुक्कुटांडरसंमधुघृतघृतशर्करासैंधवसौवर्च्चल
युक्तोवस्तिर्वृष्यतमोबलमांसजननश्च कल्कश्चैकल्कश्चैकशिखिगोनर्दहंससारसांमेषुस्यात् सतित्तिरंसमपूरंसपाकहंसंप
पःसपंचमूलंपयसिसिद्धं शतपुष्पमधुकमदनपिप्पलीकल्कोघृततैलसैंधवयुक्तोवस्तिर्बलवर्णशुक्रजननोरसायनश्च द्वि
पंचमूलकुक्कुटसिद्धंपयःपादशेषंपिप्पलीमधुकमदनरास्नाकल्कशर्करामधुघृतयुक्तःस्त्रीरतिकामानांबलजननोवस्तिः
मयूरपादांत्रंस्थिरादिभिःपालिकैःसहजलेपयसिपक्वाक्षीरशेषंमदपिप्पलीविदारीशतकुसुमामधुककल्कीकृतंमधुसैंधव
युक्तंवस्तिंदद्यात् स्त्रीष्वतिप्रसक्तक्षीणेंद्रियेभ्योबलवर्णकरंकल्पोऽयंविष्किरसप्रतुदप्रसहांबुचारस्यात् आरोरोहितादिषु २७

मत्स्येषुगोधानकुलमार्जारमूषिकशल्यकमांसानांदशपलान् भागान्पंचमूलान्पयसिपक्वात्तस्यपयःपिप्पलीफलकल्क
सैंधवसौवर्च्चलशर्करामधुघृततैलयुक्तोवस्तिर्बल्योरसायनःक्षीणक्षतसंधानकरोमथितोरस्करथगजवयभग्नवातबलास
कप्रत्यूदावृत्तवातसक्तमूत्रवर्च्चशुक्राणांहिततमश्च कर्मादीनामन्यतममपिसितसिद्धंपयोगोवृषहयानागहंसकुक्कुटांगरसम
धुघृतशर्करासैंधवेक्षुरकात्मगुप्ताफलकल्कयुक्तोवस्तिःगोवृषस्तवराहवृषणकर्कटचटकसिद्धंक्षीरमुच्चटेक्षुरसात्मयुक्ता
हंमधुघृतसैंधवयुक्तःकिंचिल्लवणितोवस्तिःकर्कटरसंश्चटकांडरसयुक्तःशर्करोवस्तिःइत्येतेवस्तयःपरवृष्याःउच्चटेक्षुर
सात्मगुप्तास्वजक्षीरभोजनानुपानात्स्त्रीशतगामिनंनरंकुर्युःदशमूलमयूरहंसकुक्कुटकाप्यात्यंचमृतंतैलघृतवसामज्ज
चतुःप्रसृतयुक्तंस्नुपुष्पामुस्तहपुषार्कल्कीकृतंसलवणोवस्तिःपादगुल्मोरुजानुजंघात्रिकवंक्षणबस्तिवृषणानिलरोगहरः
मृगविष्किरानूपबिलेशयानामेतनैवकल्केनवस्तयोदयाःमधुघृतद्विप्रसृतंतुल्योष्मोदकंहपुषार्द्धपलंसैंधवार्द्धक्षयुक्तोव
स्ति रतिहरोरसायनश्च घृततैलमज्जचतुःप्रसृतंहपुषार्द्धपलंसैंधवातहरश्च मधुतैलचतुःप्रसृतंतुल्योरमोदकंशतपु
ष्पार्द्धपलंसैंधवार्द्धकर्षयुक्तोवस्तिर्दीपनोबृंहणोबलवर्णकरोवृष्यतमोनिरुपद्रवोवस्तिमेढ्रपाकपरिकर्तिकामूत्रकृच्छ्रपित्तव्या
धिहरोरसायनश्च तद्वन्मघृताभ्यांमांससंयुक्तोसुस्ताक्षसंयुक्तःपूर्ववद्वस्तिवातवलासपादहर्षगुल्मजानुनीकुंचनवति
स्तिवृषणमेढ्रत्रिकोलुपृष्ठशूलहरःसुरासौवीरकुलत्थमांसमधुघृतःसमंप्रसृतोमुस्तसनाक्षाकल्कीकृतसलवणोबस्तिः
सर्वपाकहरोरोगहरः द्विपंचमूलत्रिफलाबिल्वमदनफलकषायगोमूत्रसिद्धःकुटजामदनफलमुस्तापाठाकल्किसैंधवयवा
षभूकःक्षौद्रयुक्तोवस्तिःश्लेष्मव्याधिवस्त्यारोपवातशुक्रसपांडुरोगाजीर्णोविषूचिकालसकेषुदेयइति अतऊर्ध्वंवृष्यतम
स्नेहानुपदेक्ष्यामःशतावरीगुडूचीविदार्यामलकद्राक्षाखर्जूराणांयत्रिपीडितानांरसप्रस्थमेकैकंतद्वद्तैलंमाहिषजाक्षा
राणांचद्रोणंदद्यात् जीवकर्षभकमेदामहामेदाखसीकुंरीशृंगाटकपिप्पलीपुष्करबीजनीलोत्पलकदेवपुष्पपुंडरीकक-

स्केपृषतर्शसांसकुकुटचटकचकोरमताजवर्हिजीवंजीवककलिंगरसैरेरंडरसवसामज्जनिश्वसाधयेत् ब्रह्मघोषशंखपटह
भेरीनिनदैः सिद्धंसितच्छत्रकृतछायंगजस्कंधमारोपयेत् भगवंतंवृषभध्वजमभिपूज्यतंस्नेहंत्रिभागमाक्षिकंमंगलाशीर्भिरवि
देवतैः र्घनैर्षस्तिगमयेत् नृणांस्त्रीविहारीणांनष्टरेतसांक्षीणक्षतविषमज्वरार्तानांव्यापन्नयोनीनांवंध्यानांचरक्तपित्तिनांमृता
पत्यानामनार्तवानांचस्त्रीणांचक्षीरमांसरुधिराणांवपथ्यतंमचरसायनेमुत्तमं वलीपलितनाशनंविद्ध्यात् वलागोक्षुरुकरा
स्नाश्वगंधाशतावरीसहचराणांशालमापोथ्यजलद्रोणशतेसाध्यंतत्रद्रोणशेषेरसेपूतेविदार्यामलकस्वरसपोर्वस्तधूलिकाल
क्षीरीवीशमृणालनीलोत्सलपटोहिषवतावराहवृषणावर्हिकुक्कुटहंसांडरसानांघृततैलयोरेकैकप्रस्थंम--- प्रस्थात्क्षीर-
स्यदत्वाचंदनमधूकमधूलिकात्वक्षीरीवीशमृणालनीलोत्पलपटोलात्मगुप्तोदकीर्यलाखर्जूरतामलकीशिकंटारिकाजीकर्ष
भक्षुद्रसहामहामेदापिप्पलीह्रीरलक्पत्रकेसरकल्कांश्चदत्वासाधयेत् ब्रह्मघोषादिनाविधिनानसिद्धंबस्तिंदयातेनस्त्रीश
गच्छेत् नचात्तेविहाराहारयंत्रणाकाचित् एषवृष्योवस्त्योवृंहणआयुष्योवलीपलितनुक्षीणक्षननष्टशुक्रविषमज्वरातीनां
व्यापन्नयोनीनांचपथ्यतमः सहचरपलशतमुदकद्रोणेशतेपमुदकद्रोणेशतेपक्वाद्रोणेशेषेरसेपूतेविदारीक्षुरसपृष्ठा-
ष्यामष्टगुणक्षीरघृततैलप्रस्थंवलामधूककचंदनमधूलिकासोरिवमिदामहामेदाकाकोलीक्षीरकाकोलीपयस्यागुरुमं
जिष्ठाव्याघ्रनखसटीसहस्त्रवीर्यावरांगरोध्राणामक्ष्रमात्रैर्द्विर्गुणशर्करैकल्कैः साधयेत् ब्रह्मघोषादिनातसिद्धंबस्तिंदद्या
त् देषसर्वरोगहरोरसायनोवलिपलितनुत्वर्णमांसशुद्धवर्द्धनः इत्येतेरसायनाः स्वेताःस्वस्थहवस्तयःसतिविभवेश
तपाकाःसहस्त्रपाकाःकार्यावीर्यवलाधानार्थमिति तत्रश्लोकाः इत्येतेबस्तयःसस्नेहाश्चोक्तायापसंज्ञिताःस्वस्थानामातुराणां
ववृत्धानांवावरोधिनःअतिव्यवायाशीलानांशुक्रमांसवलप्रदाः सर्वरोगप्रशमनाःसर्वेष्वनृषुयौगिकाःनारीणामप्रजानांच
नराणांचाप्ययत्पदाउभयार्थकरादृष्टाःस्नेहवस्तिनिरूहयोः व्यायामंमैथुनंमद्यमध्वानंशाशिरांबुच संभोजनंरथक्षोभवत्तिषो २८

तविगर्हिताः शिखिनानर्दहसांडैर्हसदंवद्वयस्त्रयःविशतिर्विष्किरैस्त्रिशत्प्रतुदैःसहसैस्तथा तथाष्टाविंशतिःसप्तविंशतिश्चा
बुचारिभिः तवमत्स्यादिभिश्चैवशिखिकल्पेनस्तयःदशकर्कटकाद्यैश्चकूर्मकल्पेनवस्तयःदशार्कटकाद्यैश्चकूर्मकल्पेनवस्तयः
मृगैःसप्तदशैकात्रर्विशतिर्विष्किरैर्नव आनूपदसशिविरिववद्धषपैववतुर्दशः एकोनत्रिंशादित्येतैःसहस्नेहैसमासजःप्रोक्ताविः
स्तरतोभिन्नाद्दशजेषोपडशोत्तरे प्रानमांसिकेसंयुक्ताःकुर्वन्त्यतिरुशंनरं नातियोगनवायोगंस्तंभितास्तेनकुर्वतेमृदु षाननिव
यस्यत्वतेप्रयोजिताःसमूत्रैर्वस्तिभिस्तीक्ष्णैरास्थाप्यक्षिप्रमेवसःशोपाग्निनासपांडुत्वश्लूलार्शःपरिकर्तिकाःस्फुर्जरश्चातिसारश्च
पापनात्यर्थसेवनात् अरिष्टक्षारसीध्वाघातत्रेष्टदीपनक्रियायुक्तातस्मान्निषेवैतपापनान्मप्रसंगतःइत्यच्चैर्भाष्यपूर्वाणांव्या
पदःसचिकित्सिताःविस्तरेणसदाप्रोक्तास्ताभ्योरक्षेत्सदातुरं कर्म्मणांवमनादीनामसम्यक्करणापदांयत्रोक्तंसाधनंस्थाने-
सिद्धिस्थानंतदुच्यते इत्यध्यायशतंविंशमात्रेयमुनिवाङ्मयं हितार्थप्राणिनांप्रोक्तमग्निवेशेनधीमता दीर्घमायुर्यशःस्वा
स्थ्यंत्रिवर्गंचापिपुष्कलं सिद्धिंवानुत्तमालोकेलमतेधिनापठन् सक्षिप्यतिविस्तीर्णंलिशोक्तंविविस्तृणोतिच अतस्तंत्री
क्तमंमिदंचरकेणाख्यबुद्धिना संस्कृतंतत्रसपूर्णविभागेनोपलभ्यते तच्छंकरंभूतपतिसंप्रमापयत् अखंडार्थंदृढव
लोजातःपांचनदेपुरे कृत्वावहुभ्यस्तंत्रेभ्योविशेषाञ्छिलोवयं सप्तदशौषधध्यायाःसिद्धकल्पैरपूरयत् इदमन्यमन
शार्थच्छतंत्रेदोषविवर्जितं षड्विंशद्विर्विधिवाणिनिर्भूषितंतंत्रयुक्तिभिः तत्राधिकरणंयोगोहेत्वर्थःपदस्य-
चप्रदेशोदेशावाक्यशेषाःप्रयोजनं उपदेशातपदेशातिदेशार्थाःपतिनिर्णयोःप्रसंगेकांतनैकांतोत्द्यपवर्गोविपर्ययः पू
र्वपक्षोविधानानुसतंव्याख्यानसंशयः अतीतानागतावेक्ष्याःस्वसद्यसमुच्चयाःनिर्दृशानंनिर्वचनंत्सनियोगोविकल्पनं
प्रत्युत्सारस्ततोद्धारःसंभवस्तत्रयुक्तयःतत्रंव्याससमासोक्तभवंत्येताभिरुत्सः एकदेशेनदृश्यतेसमासाभिहितेनतथा य
थांवुजवनस्यार्कःप्रदीपोवेशमगोयथा प्रवोधनप्रकाशार्थास्तथातंत्रस्ययुक्तयः एकस्मिन्नपियस्येहशास्त्रेलब्धास्पदा-

च॰म॰ तिःशास्त्रमन्यद्प्याश्रुयुक्तिंदाप्यामबुध्यते अधीयानोपशास्त्राणितंत्रयुक्ताविनाभिषक् नाधिगच्छतिशास्त्रार्थान् भाग्यस्पय
२९ थानिगृहीनस्तृणोन्येनछात्मस्त्रमिगाबुधं स्त्रगृहीततदेवसंशास्त्रंचरस्तानितस्मादेतान्प्रवक्ष्यंते।रुविस्तरेणोत्तरेपुनः त
लसानार्थमस्यैवृतन्त्रस्यगुणदोषतःइदरिक्तमधीत्यसम्यगर्थानुविमृ।शानिथि।विमनाःप्रयोगनित्यःसमनुजस्करवजीवितप्रदा
ताभवतिचधीधृतिबुद्धिसिद्धिवृद्धा अग्निवेशकृततेतंत्रेचरकप्रतिसंस्कृते सिद्धिस्थानमिदंश्रेष्ठमष्टमंपरिपूर्यते जनो।नंत
स्तावन्निरवधिरितिव्याधिनिवहोनसंख्यातुशमाबहुविधरसाद्रव्यगतयः विचित्राःसंयोगाःपरिणतिरपूर्वेतिचकुतस्त्रिकि-
त्सायाःपरनरतिकगलसौपिनरः पुण्योभयस्त्यात् तयोरप्यस्त्याद्दष्टंविषमापरिहारिणां इत्यमेकरसंनांस्तिनरोगोप्येकदोष
तः योऽधिकत्वेननिर्दिष्टःक्रियतेरसदोषयोः इतिश्रीचरकसंहितायांमुत्तरसिद्धिवर्णनोनाम ७ संपूर्णोयंचरकमिति
समाप्तः ॥शाके१७८६रक्ताक्षीनामसंवत्सरमाघवद्य१मंदवासरे ग्रंथसंख्या१४७५

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

च०म०
३०

राम
३०